# अनिवार्य-संस्कृतभाषाव्याकरणम्

## कक्षा ९

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी-भक्तपुरम्

# अनिवार्य-संस्कृतभाषाव्याकरणम्

कक्षा ९

नेपालसर्वकारः
शिक्षाविज्ञानप्रविधिमन्त्रालयः
पाठ्यक्रमविकासकेन्द्रम्
सानोठिमी–भक्तपुरम्

प्रकाशकः
**नेपालसर्वकारः**
**शिक्षाविज्ञानप्रविधिमन्त्रालयः**
**पाठ्यक्रमविकासकेन्द्रम्**
**सानोठिमी–भक्तपुरम्**

प्रस्तुतपाठ्यपुस्तकसम्बन्धिनः सर्वेऽधिकाराः पाठ्यक्रमविकासकेन्द्रस्य स्वामित्वेऽन्तर्निहितास्सन्ति । लिखितां स्वीकृतिं विनाऽस्य पुस्तकस्य पूर्णभागस्य एकांशस्य वा यथावत् प्रकाशनम्, परिवर्त्य प्रकाशनं तथा केनाऽपि वैद्युतेन साधनेन अन्येन प्रविधिना वा यन्त्रप्रयोगेण प्रतिलिपिनिस्सारणञ्च सर्वथा निषिद्धं वर्तते ।

सर्वेऽधिकाराः प्रकाशकाधीनाः

प्रथमसंस्करणम् - २०७९

# अस्मदीयं कथनम्

विद्यालयस्तरीयशिक्षामुद्देश्यप्रधानां व्यावहारिकीं सामयिकीं वृत्तिदायिनीं च विधातुं समये समये पाठ्यक्रम-पाठ्यपुस्तकविकास-परिमार्जनानुकूलनकार्याणि निरन्तरं सञ्चाल्यमानानि सन्ति । विद्यार्थिषु राष्ट्रराष्ट्रियते प्रति सम्मानभावनामुद्भाव्य नैतिकानुशासन-स्वावलम्बनादि-सामाजिक-चारित्रिक-गुणानामाधारभूत-भाषिकशिल्पस्य विकासपूर्वकं सहयोगात्मकस्य दायित्वपूर्णस्य चाऽऽचरणस्य विकासोऽद्यत्वे आवश्यको दृश्यते । अस्या एवावश्यकतायाः परिपूर्तये शिक्षासम्बद्धैर्महानुभावैः सम्मिलितानां गोष्ठीनामन्तःक्रियायाश्च निष्कर्षेण निर्मितं २०७८ तमस्य वैक्रमाब्दस्य पाठ्यक्रममनुसृत्य पुस्तकमिदं निर्मितं वर्तते । शिक्षा विद्यार्थिषु वर्तमानस्य ज्ञानपक्षस्यान्वेषणं विधाय शिक्षणशिल्पेन जीवनस्य सम्बन्धं स्थापयति । शिक्षया विद्यार्थिषु स्वाधिकारस्य, स्वतन्त्रतायाः, समानतायाश्च प्रवर्धनाय, स्वस्थजीवनस्याभ्यासाय, तार्किकविश्लेषणेन निर्णयाय, वैज्ञानिकविश्लेषणेन व्यक्ति-समाज-राष्ट्राणां सबलविकासाय चाग्रेसरणशीलं सामर्थ्यं विकसनीयम् । एवं व्यक्तेः नैतिकाचरणप्रदर्शनाय, सामाजिकसद्भावप्रवर्धनाय, पर्यावरणस्य समुचितप्रयोगशिक्षणाय, दृढशान्तौ प्रतिबद्धतायै च शिक्षायाः आवश्यकता समाजे अवलोक्यते । तेन समाजसापेक्षतया ज्ञान-शिल्प-सूचना-सञ्चार-प्रविधीनां प्रयोगसमर्थाः, स्वावलम्बिनः, व्यावसायिकशिल्पाभ्यासनिरताः, राष्ट्रं राष्ट्रियतां राष्ट्रियादर्शं च प्रति सम्मानविधायकाः, समाज-स्वीकार्याः, सदाचरणशीलाः, स्वसंस्कृति-संस्कारपालनपराः, परसंस्कृत्यादिषु सहिष्णवश्च नागरिकाः शिक्षया निर्मातव्याः । एवं कल्पनाशीलानां रचनाशिल्पिनाम्, नैरन्तरिकपरिश्रमेणोद्यमशीलानाम्, विचारे उदात्तानाम्, व्यवहारे आदर्शमयानाम्, सामयिकसमस्यानां व्यवस्थापने साफल्याधायकानाम्, स्वावलम्बिनाम्, देशभक्तानाम्, परिवर्तनोद्यतानाम्, चिन्तनशीलानाम्, समावेशिसमाजनिर्माणे योगदानं करिष्यमाणानां च नागरिकाणां निर्माणं शिक्षया विधातव्यमिति समाजस्यापेक्षा दृश्यते । इमानेव पक्षान् विचार्य 'राष्ट्रिय-पाठ्यक्रम-प्रारूप, २०७६' इत्यनुसारेण निर्मितस्य अनिवार्यसंस्कृतभाषाव्याकरणविषयकपाठ्यक्रमस्याधारेण नवमः कक्षायाः पाठ्यपुस्तकमिदं विकसितं वर्तते ।

इदं पुस्तकं प्रा.डा. ध्रुवप्रसादः ज्ञवाली, सहप्रा. ध्रुवप्रसादः भट्टराई, डा. वैकुण्ठः घिमिरे, निश्चलः अधिकारी, पुरुषोत्तमः घिमिरे- प्रभृतीनां महानुभावानां कार्यदलेन परिमार्जितं सम्पादितञ्चास्ति । अस्य पाठ्यपुस्तकस्य विकासे पाठ्यक्रमसिद्धान्तसंरचनयोः नवीनतमधारणामनुसृत्य परम्परागतानां

शिल्पानामनुसरणं कृतमस्ति । अस्मिन् कार्ये अस्य केन्द्रस्य महानिर्देशकः अणप्रसादः न्यौपाने, प्रा.डा. नुरापतिः पोखरेल, रोहिणीराजः तिमिल्सिना, शिवराजः लामिछाने, भीमप्रसादः खतिवडा, गणेशः तिमिल्सिना, केशव भट्टराई, पर्वतः घिमिरे, टुकराजः अधिकारी-प्रभृतीनां महानुभावानां विशेषसहयोगो विद्यते । अस्य रूपसज्जा भक्तबहादुरः कार्की इत्याख्येन महानुभावेन कृतमस्ति ।

पाठ्यपुस्तकं शिक्षणप्रक्रियाया महत्त्वपूर्णसाधनं भवतीति नाविदितं शेमुषीमताम् । सानुभवाः शिक्षकाः, जिज्ञासवश्छात्राः, सविधिकर्मकराश्च पाठ्यक्रमलक्ष्यीकृतान् विषयान् नैकविधस्रोतसां साधनानाञ्चोपयोगेन अध्यापयितुमध्येतुं कर्म कर्तुं च प्रभवन्ति । अनेकैः कारणैः सर्वेष्वेव विद्यालयेषु सरलतया पाठ्योपकरणानामुपलब्धेरभावाद् अध्ययनकार्यं केवलं पाठ्यपुस्तकाश्रितं भवतीति तथ्यमात्मसात्कृत्य प्रस्तुतमिदं पाठ्यपुस्तकं यथासम्भवं स्तरयुतं विधातुं प्रयासो विहितः, तथापि पाठ्यपुस्तकेऽस्मिन् यत्र यत्र त्रुटयोऽल्पताश्च विदुषां दृष्टिपथमागच्छेयुस्तत्र तत्र परिष्कारे परिवर्धने च दृग्गोचरीभूतानां त्रुटीनां परिमार्जनादिकार्यजाताय परामर्शप्रदानविधौ शिक्षकच्छात्राभिभावकपाठकविशेषज्ञानां महती प्रभावकारिणी भूमिका भवति । अत उक्तविषयेषु रचनात्मकपरामर्शदानेनोपकर्तुं पाठ्यक्रमविकासकेन्द्रमिदं तांस्तान् सर्वानेव महानुभावान् सप्रश्रयमभ्यर्थयते ।

नेपालसर्वकारः

**शिक्षाविज्ञानप्रविधिमन्त्रालयः**

**पाठ्यक्रमविकासकेन्द्रम्**

# विषयसूची


| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| | **भाषाखण्डः** | |
| प्रथमः | नीतिपद्यानि | २ |
| द्वितीयः | छन्दःपरिचयः | १५ |
| तृतीयः | सिद्धिदः साधुः | ३५ |
| चतुर्थः | महाभारतस्य सूक्तयः | ४५ |
| पञ्चमः | आरोग्यधनम् | ५७ |
| षष्ठः | महाकाव्यपद्यानि | ६५ |
| सप्तमः | दानशीलः शिविः | ७८ |
| अष्टमः | सामाजिकसञ्जालस्य सदुपयोगः | ८७ |
| नवमः | महाकविः श्रीहर्षः | ९८ |
| दशमः | आर्यसंस्कृतेर्वैज्ञानिकत्वम् | १०५ |
| | **व्याकरणखण्डः** | |
| प्रथमः | संज्ञाप्रकरणे वर्णज्ञानं पारिभाषिक्यः संज्ञाश्च | १२० |
| द्वितीयः | वर्णोच्चारणस्थान-प्रयत्न-पारिभाषिकसंज्ञाः | १२७ |
| तृतीयः | यणादिसन्धिः | १३४ |
| चतुर्थः | गुणसन्धिः | १३९ |
| पञ्चमः | वृद्धिसन्धिः | १४३ |
| षष्ठः | पररूप-दीर्घ-पूर्वरूप-प्रकृतिभाव-अवङ्सन्धिः | १४९ |
| सप्तमः | प्रकृतिभावसन्धिः | १५५ |
| अष्टमः | श्चुत्वष्टुत्वादिसन्धिः | १६१ |
| नवमः | पूर्वसवर्णादिसन्धिः | १६६ |
| दशमः | अनुस्वारपरसवर्णादिसन्धिः | १७० |
| एकादशः | रुत्वानुनासिकानुस्वारादिसन्धिः | १७५ |

| पाठसङ्ख्या | पाठः | पृष्ठसङ्ख्या |
|---|---|---|
| द्वादशः | सत्व-रुत्वोत्वादिसन्धिः | १८० |
| त्रयोदशः | रेफलोप-सुलोपादिसन्धिः | १८४ |
| चतुर्दशः | सुबन्तपदपरिचयः | १८७ |
| पञ्चदशः | अकारान्त-शब्दाः- १ | १९२ |
| षोडशः | अकारान्त-शब्दाः- २ | २०० |
| सप्तदशः | अदन्त-सर्वनामशब्दाः | २०८ |
| अष्टादशः | निर्जर-विश्वपाशब्दौ | २१८ |
| एकोनविंशः | इकारान्तशब्दाः | २२५ |
| विंशः | ईकारान्तपुँल्लिङ्गशब्दाः | २३८ |
| एकविंश | उकारान्त-ऋकारान्तादिपुँल्लिङ्गशब्दानां रूपसाधनम् | २४६ |
| द्वाविंशः | आबन्तशब्दाः | २५५ |
| त्रयोविंशः | मति-त्रि-गौर्यादिशब्दाः | २६१ |
| चतुर्विंशः | अवर्णान्तनपुंसकलिङ्गशब्दाः | २६९ |
| पञ्चविंशः | इकारान्तादि-नपुंसकलिङ्ग-शब्दाः | २७६ |

**न्यायखण्डः**

| | | |
|---|---|---|
| प्रथमः | मङ्गलाचरणम्-द्रव्यादिपदार्थोद्देशश्च | २८४ |
| द्वितीयः | पृथ्व्यादिनवद्रव्याणां लक्षणप्रकरणम् | २९२ |
| तृतीयः | रूपादिशब्दान्तगुणनिरूपणम् | २९९ |
| चतुर्थः | बुद्धिनिरूपणम्, कारणनिरूपणञ्च | ३०८ |
| पञ्चमः | प्रत्यक्षप्रमातत्करणनिरूपणम् | ३१७ |
| षष्ठः | पारिभाषिकपदार्थपरिचयः | ३२५ |

# भाषाखण्डः

# नीतिपद्यानि

कः कालः कानि मित्राणि को देशः कौ व्ययागमौ ।
कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥१॥

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति ॥२॥

गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत् ।
वर्तमानेन कालेन प्रवर्तन्ते विचक्षणाः ॥३॥

वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयं पक्वफलाम्बुभोजनम् ।
तृणेषु शय्या वसनं च वल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥४॥

हस्ती स्थूलतनुः स चाङ्कुशवशः किं हस्तिमात्रोऽङ्कुशो
दीपे प्रज्वलिते प्रणश्यति तमः किं दीपमात्रं तमः ।
वज्रेणाभिहता पतन्ति गिरयः किं वज्रमात्रं नगाः
तेजो यस्य विराजते सः बलवान् स्थूलेषु कः प्रत्ययः ॥५॥

१.
**अन्वयः**

कालः कः, मित्राणि कानि, देशः कः, व्ययागमौ कौ, अहं कः, मे शक्तिः का, इति मुहुः मुहुः चिन्त्यम् ।

**पर्यायः**

कालः = समयः, कः = कीदृशः, मित्राणि कानि = सुहृदः कीदृशाः ?, देशः = स्थानम्, कः = कीदृशः, व्ययागमौ = आयव्ययौ, कौ = कीदृशौ, अहम् = स्वयम्, कः = कीदृशः, मे = मम, शक्तिः = बलम्, का = कीदृशी, इति = पूर्वोक्तं सर्वम्, मुहुः मुहुः = भूयः भूयः, चिन्त्यम् = विचारणीयम् ।

**कोशः**

| | |
|---|---|
| **कालः** | कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः । |
| **मित्रम्** | वयस्यः स्निग्धः सवया अथ मित्रं सखा सुहृत् । |
| **व्ययः** | अनुहारोऽनुकारः स्यादर्थस्यापगमे व्ययः । |
| **शक्तिः** | शक्तिः पराक्रमप्राणौ विक्रमस्त्वतिशक्तिता । |
| **मुहुः** | मुहुः पुनः पुनः शश्वदभीक्ष्णमसकृत्समाः । |

**विग्रहः**

व्ययागमौ = व्ययश्च आगमश्च ।

**भावार्थः**

व्यवहारकुशलैर्जनैः सदैव समयस्य विचारः कर्तव्यः । शत्रुमित्रयोर्विषये ज्ञातव्यम् । स्थानं कीदृशमिति अवगन्तव्यम् । आयव्यययोर्विषये विचारणीयम् । स्वस्य, स्वशक्तेश्च विषये चिन्तनीयम् ।

२.

**अन्वयः**

मृत्युलोके, येषां, विद्या न, तपः न, दानं न, ज्ञानं न, शीलं न, गुणः न, धर्मः न, ते भुवि भारभूताः, मनुष्यरूपेण मृगा (इव) चरन्ति ।

**पर्यायः**

मृत्युलोके = पृथिव्याम्, येषाम् = एतादृशां जनानाम्, विद्या न = ज्ञानं नास्ति, तपः न = तपश्चर्या नास्ति, दानं न = दाक्षिण्यं नास्ति, ज्ञानं न = विवेकः नास्ति, शीलं न = अनुशासनं नास्ति, गुणः न = सच्चरित्रं नास्ति, धर्मः न = धारणशक्तिः नास्ति, ते = पूर्वोक्तजनाः, भुवि = पृथिव्याम्, भारभूताः = व्यर्थभूताः मनुष्यरूपेण = नरशरीरेण, मृगाः (इव) = पशवः (इव), चरन्तिः = भ्रमन्ति ।

**कोशः**

| | |
|---|---|
| **मनुष्यः** | मनुष्या मानुषा मर्त्या मनुजा मानवा नराः ।<br>स्युः पुमांसः पञ्चजनाः पुरुषाः पूरुषाः नरः ॥ |
| **भूः** | भूर्भूमिरचलानन्ता रसा विश्वम्भरा स्थिरा ।<br>धरा धरित्री धरणी क्षोणिर्ज्या काश्यपी क्षितिः ।<br>सर्वंसहा वसुमती वसुधोर्वी वसुन्धरा ।<br>गोत्रा कुः पृथिवी पृथ्वी क्ष्मावनिर्मेदिनी मही ॥ |
| **मृगाः** | पशवोऽपि मृगा वेगः प्रवाहजवयोरपि । |

### विग्रहः

मनुष्यरूपेण - मनुष्यस्य रूपेण ।

मृत्युलोके - मृत्योर्लोकः, तस्मिन् ।

भावार्थः

विद्याविहीनाः तपोरहिताः अदानशीलाः शीलभ्रष्टाः निर्गुणाः धर्महीनाः जनाः पशवः एव सन्ति । ते पृथिव्याः भारभूताः पशवः मनुष्यशरीरं गृहीत्वा भ्रमन्ति ।

३.

### अन्वयः

गते शोकः न कर्तव्यः । भविष्यं नैव चिन्तयेत् । विचक्षणाः वर्तमानेन कालेन प्रवर्तन्ते ।

### पर्यायः

गते = अतीते, शोकः = मन्युः, न कर्तव्यः = न विधातव्यः, भविष्यम् = भाविकालम्, नैव चिन्तयेत् = न विचारयेत्, विचक्षणाः = विद्वांसः, वर्तमानेन = अधुनातनेन, कालेन = समयेन, प्रवर्तन्ते = प्रचलन्ति ।

### कोशः

**समयः** कालो दिष्टोऽप्यनेहापि समयोऽप्यथ पक्षतिः ।

**शोकः** वैरं विरोधो विद्वेषो मन्युशोकौ तु शुक् स्त्रियाम् ।

**विचक्षणाः** विद्वान् विपश्चिद्दोषज्ञः सन्सुधीः कोविदो बुधः
धीरो मनीषी ज्ञः प्राज्ञः सङ्ख्यावान् पण्डितः कविः ।
धीमान् सूरिः कृती कृष्टिर्लब्धवर्णो विचक्षणः ।
दूरदर्शी दीर्घदर्शी श्रोत्रियच्छान्दसौ समौ ॥

### विग्रहः

विचक्षणः = विचष्टे इति ।

### भावार्थः

कालो निरवच्छिन्नोऽस्ति । विगतकालस्य चिन्तनेन न किमपि भवति, न च भविष्यकालस्य कल्पनया किमपि भवितुं शक्नोति । अधुनातनः समय एव पश्चात् अतीतकालरूपेण परिवर्तते । भविष्यकालं तु जनो नैव अधिगन्तुं शक्नोति । अतो विद्वान् जनः सदैव वर्तमानकालं समुचितरूपेण यापयति । यो जनो वर्तमानेन कालेन जीवति, वर्तमानकालं सम्यग् यापयति तस्य विगतकालो भविष्यकालश्च सानन्दं गच्छति ।

४.

**अन्वयः**

व्याघ्रगजेन्द्रसेवितं द्रुमालयं वनं, पक्वफलाम्बुभोजनं, तृणेषु शय्या, वल्कलं वसनं च वरम् (परन्तु) बन्धुमध्ये धनहीनजीवनं न (वरम्) ।

**पर्यायः**

व्याघ्रगजेन्द्रसेवितम् = शार्दूलवारणव्याप्तम्, द्रुमालयम् = वृक्षगृहम्, पक्वफलाम्बुभोजनम् = पक्वफलजलभक्षणम्, तृणेषु = शष्पेषु, शय्या = पर्यङ्कः, वल्कलम् = वल्कम्, वसनम् = वस्त्रम्, वरम् = श्रेष्ठं समुचितं वा, बन्धुमध्ये = स्वजनसमीपे, धनहीनजीवनम् = द्रव्यरहितजीवनम्, न वरम् = न समुचितम् ।

**कोशः**

**व्याघ्रः** सिंहो मृगेन्द्रः पञ्चास्यो हर्यक्षः केसरी हरिः ।
कण्ठीरवो मृगरिपुर्मृगदृष्टिर्मृगाशनः ।
पुण्डरीकः पञ्चनखचित्रकायमृगद्विषः।
शार्दूलद्वीपिनौ व्याघ्रे तरक्षुस्तु मृगादनः ॥

**गजेन्द्रः** दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥

**द्रुमः** वृक्षो महीरुहः शाखी विटपी पादपस्तरुः ।
अनोकहः कुटः सालः पलाशी द्रुद्रुमागमाः ॥

**आलयः** गृहं गेहोदवसितं वेश्म सद्म निकेतनम् ।
निशान्तपस्त्यसदनं भवनागारमन्दिरम् ॥

**अम्बुः** आपः स्त्री भूम्नि वार्वारि सलिलं कमलं जलम्
पयः कीलालममृतं जीवनं भुवनं वनम् ।
कबन्धमुदकं पाथः पुष्करं सर्वतोमुखम् ।
अम्भोर्णस्तोयपानीयनीरक्षीराम्बुशम्बरम् ।
मेघपुष्पं घनरसः त्रिषु द्वे आप्यमम्मयम् ॥

**तृणम्** शष्पं बालतृणं घासो यवसं तृणमर्जुनम् ॥

**वल्कलम्** सारो मज्जा नरि त्वक् स्त्री वल्कं वल्कलमस्त्रियाम् ।

**वसनम्** वस्त्रमाच्छादनं वासश्चेलं वसनमंशुकम् ।

**विग्रहः**

व्याघ्रगजेन्द्रसेवितम् - व्याघ्रश्च गजेन्द्रश्च व्याघ्रगजेन्द्रौ, ताभ्यां सेवितम् ।

द्रुमालयम् - द्रुमाणामालयम् ।

पक्वफलाम्बुभोजनम् - पक्वं च तत् फलं पक्वफलम्, पक्वफलस्य अम्बुनश्च भोजनम् ।

बन्धुमध्ये - बन्धूनां मध्ये ।

धनहीनजीवनम् - धनेन हीनं धनहीनम्, धनहीनं च तज्जीवनम् ।

**भावार्थः**

जीवने धनस्य बहु महत्त्वमस्ति । अन्यत् सर्वं सोढुं शक्यते किन्तु बन्धुमध्ये धनहीनो भूत्वा स्थातुं नैव शक्यते । अतो येन केनाप्युपायेन धनार्जनं कर्तव्यम् ।

**५.**
**अन्वयः**

(यः) स्थूलतनुः हस्ती (भवति) स च अङ्कुशवशः (भवति), अङ्कुशः हस्तिमात्रः (भवति) किम् ? दीपे प्रज्वलिते तमः प्रणश्यति, तमः दीपमात्रं भवति किम् ? वज्रेण अभिहता गिरयः पतन्ति, नगाः वज्रमात्रं (भवन्ति) किम् ? यस्य तेजः विराजते सः बलवान् (भवति), स्थूलेषु कः प्रत्ययः ?

**पर्यायः**

स्थूलतनुः = विशालकायः, हस्ती = गजः, अङ्कुशवशः = सृणिपराधीनः, अङ्कुशः = सृणिः, हस्तिमात्रः = गजपरिमाणः, भवति किम् = विद्यते किम्, न भवति इति भावः, दीपे = दीपके, प्रज्वलिते = प्रदीप्ते, तमः = तमिस्रम्, प्रणश्यति = विनश्यति, तमः = तिमिरं दीपमात्रम् = दीपकपरिमाणम्, भवति किम् = न भवति इति भावः, वज्रेण = कुलिशेन, अभिहताः = ताडिताः, गिरयः = पर्वताः, पतन्ति = निपतन्ति, नगाः = पर्वताः, वज्रमात्रम् = कुलिशपरिमाणं भवन्ति किम् = न भवन्ति इत्यर्थः, यस्यः तेजः = पराक्रमः, विराजते = विद्यते, सः एव बलवान् = शक्तिशाली, स्थूलेषु = विशालकायेषु कः प्रत्ययः = कः अर्थः ।

**कोशः**

**तनुः** गात्रं वपुः संहननं शरीरं वर्ष्म विग्रहः ।
कायो देहः क्लीबपुंसोः स्त्रियां मूर्तिस्तनुस्तनूः ॥

**गजेन्द्रः** दन्ती दन्तावलो हस्ती द्विरदोऽनेकपो द्विपः ।
मतङ्गजो गजो नागः कुञ्जरो वारणः करी ॥

| | |
|---|---|
| **अङ्कुशः** | अन्दुको निगडोऽस्त्री स्यादङ्कुशोऽस्त्री सृणिः स्त्रियाम् । |
| **तमः** | अन्धकारोऽस्त्रियां ध्वान्तं तमिस्रं तिमिरं तमः । |
| **वज्रः** | वज्रोऽस्त्री कुलिशं गदा । |
| **गिरि** | महीध्रे शिखरिक्ष्माभृदहार्यधरपर्वताः । |
| | अद्रिगोत्रगिरिग्रावाचलशैलशिलोच्चयाः । |

## विग्रहः

स्थूलतनुः - स्थूला तनुः यस्य सः ।

अङ्कुशवशः - अङ्कुशस्य वशः ।

हस्तिमात्रः - हस्तिनः मात्रा इव मात्रा यस्य सः ।

दीपमात्रम् - दीपस्य मात्रा इव मात्रा यस्य तत् ।

वज्रमात्रं - वज्रस्य मात्रा इव मात्रा येषां ते ।

बलवान् - बलं यस्य अस्तीति ।

## भावार्थः

अङ्कुशः हस्तितुल्यः विशालकायो न भवति तथापि हस्तिनं वशीकरोति । दीपः तमःपरिमाणो न भवति तथापि तमो नाशयति । वज्रो गिरिसमानो न भवति तथापि पर्वतं पातयति । अतो यस्य आन्तरं तेजो भवति स एव बलवान् भवति, स्थूलत्वमेव शक्तेः प्रमाणं नास्तीति भावः ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **अधस्तनशब्दानामुच्चारणं कुरुत**

| | | |
|---|---|---|
| (क) शक्तिः | (ख) व्याघ्रगजेन्द्रसेवितम् | (ग) अङ्कुशः |
| (घ) मृगाः | (ङ) द्रुमालयम् | (च) वज्रेण |
| (छ) मृत्युलोके | (ज) पक्वफलाम्बुभोजनम् | (झ) स्थूलः |
| (ञ) मनुष्यरूपेण | (ट) बन्धुमध्ये | (ठ) प्रत्ययः |
| (ड) विचक्षणाः | | |

२. **शिक्षकाच्छ्रुत्वा पद्यमनुवाचयत**

हस्ती स्थूलतनुः स चाङ्कुशवशः किं हस्तिमात्रोऽङ्कुशो
दीपे प्रज्वलिते प्रणश्यति तमः किं दीपमात्रं तमः ।
वज्रेणाभिहता पतन्ति गिरयः किं वज्रमात्रं नगाः
तेजो यस्य विराजते स बलवान् स्थूलेषु कः प्रत्ययः ॥

३. **गति–यति–लयनिर्धारणपुरःसरमधोऽङ्कितं पद्यं वाचयत**

वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयं पक्वफलाम्बुभोजनम् ।
तृणेषु शय्या वसनं च वल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥

४. **अधस्तनश्लोकस्थपदानां शुद्धोच्चारणं कृत्वा प्रतिपदमर्थं श्रावयत**

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।
ते मृत्युलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति ॥

५. **पाठस्य प्रथमस्य श्लोकस्यान्वयं सहपाठिनः श्रावयत ।**

६. **निर्दिष्टपदानां पर्यायान् कोशात् सङ्कलय्य श्रावयत**

(क) मुहुर्मुहुः (ख) शोकः (ग) वसनम् (घ) प्रणश्यति

७. पुस्तकमवलम्ब्य अन्तिमस्य श्लोकस्य भावार्थं शिक्षकं श्रावयत ।

८. नीतिसम्बद्धं श्रुतपूर्वं श्लोकं विशिष्टवाक्यं वा कक्षायां श्रावयत ।

९. समूहं विधाय 'व्यावहारिकजीवने नीतिपद्यानां प्रभावः' इति विषये मिथो विमर्शं कुरुत ।

## पठनम्

१. लयमनुसृत्य पाठस्थपद्यानां सस्वरं वाचनं कुरुत ।

२. अधस्तनपद्यस्य मौनपठनं विधायान्वयं प्रस्तुत

कः कालः कानि मित्राणि को देशः कौ व्ययागमौ ।
कश्चाहं का च मे शक्तिरिति चिन्त्यं मुहुर्मुहुः ॥

३. अधस्तनश्लोकान् पठित्वा शिक्षकसाहाय्येन तदनुवर्तिनः प्रश्नानुत्तरयत

त्यजेदेकं कुलस्यार्थे ग्रामस्यार्थे कुलं त्यजेत् ।
ग्रामं जनपदस्यार्थे आत्मार्थे पृथिवीं त्यजेत् ॥
पुष्पे गन्धं तिले तैलं काष्ठेऽग्निं पयसि घृतम् ।
ईक्षौ गुडं तथा देहे पश्यात्मानं विवेकतः ॥
दृष्टिपूतं न्यसेत् पादं वस्त्रपूतं पिबेज्जलम् ।
शास्त्रपूतं वदेद् वाक्यं मनः पूतं समाचरेत् ॥

(क) जनः किमर्थं पृथिवीं त्यजेत् ?

(ख) आत्मानं कथं पश्येत् ?

(ग) कीदृशं वाक्यं वदेत् ?

(घ) दृष्टिपूतमिति श्लोकस्यान्वयः कीदृशः ?

(ङ) तैलं कुत्र भवति ?

(च) जनः कस्यार्थे किं कुर्यात् ?

(छ) दृष्टिपूतमिति पदस्य विग्रहवाक्यं किम् ?

(ज) 'हृदयम्' इति शब्दस्य पर्यायः कः ?

(झ) उपरिलिखितश्लोकेषु कस्य वृत्तस्य प्रयोगः ?

(ञ) पृथिवीत्यस्य कोशनिर्देशं कुरुत ।

४. **पाठं पठित्वा समस्तपदानि विचित्य लिखत ।**

५. **पाठस्य प्रथमस्य श्लोकस्य भावार्थं पठित्वा तत्र समाविष्टविषयान् सूत्ररूपेण कथयत ।**

६. **प्रदत्तं गद्यांशं पठित्वा तदनुवर्तिनः प्रश्नानुत्तरयत**

दाक्षिणात्ये जनपदे महिलारोप्यं नाम नगरमासीत् । तत्र सकलार्थिकल्पद्रुमः सकलकलापारङ्गमोऽमरशक्तिर्नाम राजा बभूव । तस्य परमदुर्मेधसो बहुशक्तिरुग्रशक्तिरनन्तशक्तिरिति नामानस्त्रय पुत्रा बभूवुः ।

राजा तान् शास्त्रविमुखान् आलोक्य सचिवानाहूय प्रोवाच, “भो सज्जनाः ! मम एते पुत्राः शास्त्रविमुखाः विवेकरहिताश्च इति भवद्भिर्ज्ञातमेव । अत एतान् पश्यतो मम महदपि राज्यं न सौख्यमावहति । अतो यथैतेषां बुद्धिप्रकाशो भवति तथा कोऽप्युपायोऽनुष्ठीयताम् । अत्र च मद्दत्तां वृत्तिं भुञ्जानानां पञ्चशती तिष्ठति । ततो यथा मम मनोरथाः सिद्धिं यान्ति तथानुष्ठीयताम् ।” इति ।

तत्रैकः प्रोवाच, “देव ! द्वादशभिर्वर्षैर्व्याकरणं श्रूयते ततो मन्वादीनि धर्मशास्त्राणि चाणक्यादीन्यर्थशास्त्राणि वात्स्यायनादीनि कामशास्त्राणि । एवं च ततो धर्मार्थकामशास्त्राणि ज्ञायन्ते ततः प्रबोधनं भवति ।” इति ।

अथ तन्मध्यतः सुमतिर्नाम सचिवः प्राह, “अशाश्वतोऽयं जीवितव्यविषयः । प्रभूतकालज्ञेयानि शब्दशास्त्राणि । किञ्चित् तत्संक्षेपमात्रं शास्त्रमेतेषां प्रबोधनार्थं चिन्त्यताम् ।” इति । स राजा तदाकर्ण्य विष्णुशर्माणमाहूय प्रोवाच, “भो भगवन् ! मम अनुग्रहार्थमेतान् अर्थशास्त्रं प्रति शीघ्रं यथा अनन्यसदृशान् विदधासि तथा कुरु, तदाहं त्वां शासनशतेन योजयिष्यामि ।” इति ।

अथ विष्णुशर्मा तं राजानं जगाद, “देव ! मम तथ्यवचनं श्रूयताम्, अहं शासनशतेनापि विद्याविक्रयं न करोमि । पुनः एतान् पुत्रान् मासषट्केन यदि नीतिशास्त्रज्ञान् न करोमि ततः स्वनामत्यागं करोमि । किं बहुना मम एषः सिंहनादः श्रूयताम् । नाहमर्थलिप्सुर्ब्रवीमि । मम अशीतिवर्षस्य व्यावृत्तसर्वेन्द्रियार्थस्य अर्थेन न किञ्चित् प्रयोजनम् । किन्त्वहं तव प्रार्थनासिद्ध्यर्थं सरस्वतीविनोदं करिष्यामि । तल्लिख्यतामद्यतनो दिवसः । यद्यहं षण्मासाभ्यन्तरे तव पुत्रान् नयशास्त्रं प्रति अनन्यसदृशान् न करिष्यामि ततो देवो देवमार्गं सन्दर्शयितुं नार्हति ।” इति ।

अथासौ राजा ब्राह्मणस्यासम्भाव्यां प्रतिज्ञां श्रुत्वा ससचिवः प्रहृष्टः विस्मयान्वितः तस्मै सादरं तान् कुमारान् समर्प्य परां निर्वृतिमाजगाम । विष्णुशर्मणाऽपि तानादाय तदर्थं मित्रभेद-मित्रप्राप्ति-काकोलूकीय-लब्धप्रणाश-अपरीक्षितकारकाणि चेति पञ्च तन्त्राणि रचयित्वा ते राजपुत्राः पाठिताः । तेऽपि तानि अधीत्य मासषट्केन यथोक्ताः संवृत्ताः ततः प्रभृति एतत्पञ्चतन्त्रनामकं नाम नीतिशास्त्रं बालावबोधनार्थं भूतले प्रवृत्तम् ।

**(अ) एकवाक्येन उत्तरयत**

(क) राज्ञः कति पुत्रा आसन् ? के च ते ?

(ख) राजा किमर्थं चिन्तितः आसीत् ?

(ग) कतिसमयस्य पश्चात् पुत्राः शास्त्रनिपुणाः सञ्जाताः ?

(घ) विष्णुशर्मा किं न करोति ?

(ङ) पञ्चानां तन्त्राणां नामानि कानि ?

**(आ) सङ्क्षेपेण प्रश्नानामुत्तरं दत्त**

(क) सुमतिर्नाम सचिवः किमवोचत् ?

(ख) राजा कीदृश आसीत् ?

(ग) विष्णुशर्मा कां प्रतिज्ञामकरोत् ?

(घ) नीतिशास्त्रस्य व्यावहारिकं महत्त्वं किम् ?

(ङ) पञ्चतन्त्रनामकं नीतिशास्त्रं किमर्थं भूतले प्रवृत्तम् ?

७. **शिक्षकसाहाय्येन अधोलिखितसूक्तीनां व्यावहारिकोपयोगित्वविषये विमर्शं कुरुत**

(क) विनाशकाले विपरीतबुद्धिः

(ख) मन एव मनुष्याणां कारणं बन्धमोक्षयोः

(ग) न हि सुप्तस्य सिंहस्य प्रविशन्ति मुखे मृगाः

(घ) यस्य नास्ति स्वयं प्रज्ञा विद्या तस्य करोति किम्

(ङ) अनभ्यासे विषं विद्या अजीर्णे भोजनं विषम्

## लेखनम्

१. **अधस्तनपद्यानां विग्रहवाक्यं पाठाधारेण लिखत**

(क) व्याघ्रगजेन्द्रसेवितम्

(ख) द्रुमालयम्

(ग) पक्वफलाम्बुभोजनम्

(घ) धनहीनजीवनम्

(ङ) बन्धुमध्ये

(च) अङ्कुशवशः

२. **सन्धिविच्छेदं कुरुत**

(क) वज्रेणाभिहताः

(ख) शक्तिरिति

(ग) मुहुर्मुहुः

(घ) कश्च

(ङ) मृगाश्चरन्ति

(च) फलाम्बुभोजनम्

(छ) हस्तिमात्रोऽङ्कुशः

(ज) व्ययागमौ

३. **अधस्तनपद्यस्यान्वयं लिखत**

गते शोको न कर्तव्यो भविष्यं नैव चिन्तयेत् ।

वर्तमानेन कालेन प्रवर्तन्ते विचक्षणाः ॥

४. **शिक्षकस्य सहपाठिनां कोशस्य वा साहाय्येन प्रदत्तेषु प्रतिपदं द्वौ पर्यायौ निर्दिशत**

(क) कालः

(ख) भुवि

(ग) विचक्षणाः

(घ) वनम्

(ङ) हस्ती

५. **अधस्तनस्य नीतिपद्यस्य सन्देशं सरलसुरभाषायां लिखत**

हस्ती स्थूलतनुः स चाङ्कुशवशः किं हस्तिमात्रोऽङ्कुशो

दीपे प्रज्वलिते प्रणश्यति तमः किं दीपमात्रं तमः ।

वज्रेणाभिहता पतन्ति गिरयः किं वज्रमात्रं नगाः

तेजो यस्य विराजते सः बलवान् स्थूलेषु कः प्रत्ययः ॥

६. **प्रदत्तगद्यांशतो पञ्च बोधप्रश्नान् निर्माय तेषामुत्तराणि लिखत**

यदि साम्प्रतं भुवनेऽवलोक्यते तर्हि सर्वत्रैव आर्थिके, सामाजिके, औद्योगिके, राष्ट्रिये, राजनीतिके, शैक्षिके च क्षेत्रे सङ्घस्य महत्त्वं प्रेक्ष्यते । आर्थिकक्षेत्रे श्रमिकाणाम्, व्यवसायिनाम्, शिल्पिनाम्, चर्मकाराणाम्, नापितानाम्, प्रकाशकानाम्, लेखकानाम्, औद्योगिकानाम्, वित्तीयसंस्थाकर्मचारिणां च शतशः सङ्घा दृष्टिपथमुपयान्ति । सामाजिकक्षेत्रे छात्राणाम्, लेखकानाम्, साहित्यिकानाम्, कलाकाराणाम्, महिलानां च

विविधाः सङ्घा समीक्ष्यन्ते श्रूयन्ते च । राष्ट्रियक्षेत्रे विविधवादप्रवर्तकाः सङ्घा दृष्टिगोचरतामुपगच्छन्ति, यथा समाजवादिनाम्, साम्यवादिनाम्, शोषितानाम्, कृषकाणाम्, लोकतन्त्रादिवादिनां विविधाः सङ्घाः कस्य न श्रुतिपथमवतरन्ति ।

लोकेऽस्मिन् एकाकिनो जनस्य, बालस्य, स्थविरस्य वा न तथा शक्तिसंपुष्टं गौरवास्पदं च वचनम्, यथा तत् सर्वत्राद्रियेत । कार्यसाधनक्षमत्वं संहतौ एकतायां च दरीदृश्यते । समूहावलम्बनमनाश्रित्य विहितं कर्म न तथा सद्यःफलदायि कार्यसिद्धसाधकं च, यथा समवायेन समूहाश्रयेण च । अत एव लोके विविधाः सङ्घाः प्रवर्त्यन्ते । समूहाश्रयस्य कार्याणि लक्ष्यं चाल्पीयसैवायासेन सिध्यन्ति । वस्तुतः कलौ काले सङ्घ एव कार्यसाधकः, दुर्गतिदमकः, अवृत्तिनिरोधकः, शोषणनाशकः, हितसम्पादकः, अदम्योत्साहसञ्चारकश्च । अत एव शस्यते -

सङ्घे शक्तिः कलौ युगे । इति ।

### ७. सान्वयं व्याख्यात

वरं वनं व्याघ्रगजेन्द्रसेवितं द्रुमालयं पक्वफलाम्बुभोजनम् ।

तृणेषु शय्या वसनं च वल्कलं न बन्धुमध्ये धनहीनजीवनम् ॥

### ८. अधस्तनपद्यस्य सप्रसङ्गं व्याख्यां कुरुत

येषां न विद्या न तपो न दानं ज्ञानं न शीलं न गुणो न धर्मः ।

ते मृत्युलोके भुवि भारभूताः मनुष्यरूपेण मृगाश्चरन्ति ॥

### ९. आचार्यचाणक्यस्य जीवनविषये शिक्षकसाहाय्येन स्वानुसन्धानेन वा विंशतिं वाक्यानि लिखत ।

## व्याकरणानुशीलनम्

### १. विशेषणविशेष्ययोः सङ्गतिं मेलयित्वा अधस्तनानां वाक्यानां पुनर्लेखनं कुरुत

(क) विचारः मानवस्य विशेषं गुणोऽस्ति ।

(ख) सुविचारस्य शक्त्या एव मानवाः समाजे पूजितः भवन्ति ।

(ग) सुविचारस्य कारणेन एव बुद्धस्य विवेकानन्दस्य च अधिकं सम्मानो विद्यते ।

(घ) कुविचारः सुशीलोऽपि मानवं दानवमिव विदधाति ।

(ङ) मनसि उद्भूतः विचारस्य व्यवहारे प्रभावो दृश्यते ।

२. **शिक्षकस्य साहाय्येन लिङ्गानुशासनं विचार्य अधस्तनमनुच्छेदं संशोध्य लिखत**

सज्जनस्य पार्श्वे सद्गुणानि भवन्ति, दुर्जनस्य च पार्श्वे दुर्गुणानि। अतः सज्जनस्य सर्वे मित्राः भवितुमिच्छन्ति, दुर्जनस्य च शत्रूणि भवितुं वाञ्छन्ति। सज्जनस्य वचनोऽपि मधुरो भवति, किन्तु दुर्जनस्य शब्दं तु सदा हृदयविदारकं भवति। दुर्जनस्य आहारं शुद्धं न भवति, अतस्तस्य शरीरे बहूनि रोगाणि उद्भवन्ति। सज्जनस्तु आहारस्य विहारस्य च नियमान् पालयति, अतः सः सर्वदा स्वस्थो भवति। तस्य मनसि सर्वदा सुखः भवति।

३. **विग्रहवाक्यानां स्थाने व्युत्पन्नं समस्तं वा पदं संस्थाप्यानुच्छेदं पुनः लिखत**

ये जनाः नेपाले निवसन्ति तेषां सर्वेषां मनसि राष्ट्रस्य भक्तिर्भवति। धनस्य अर्जनं विधातुं ते परेषां देशेषु गच्छेयुस्तथापि ते सर्वदा मातृरूपां भूमिं स्मरन्ति। सर्वोच्चं शिखरं सगरमाथां, शान्तेर्दूतं बुद्धं रमणीयां प्रकृतिं च पुनः पुनः स्मृत्वा तेषां हृदयं गौरवेण अन्वितं भवति। राष्ट्रस्य निर्माणाय देशवासिनां महती भूमिका भवति। राष्ट्रे वर्तमानानां सम्पदां सम्यग् रक्षणाय, देशस्य निर्माणाय चास्माभिः प्रकर्षेण यत्नो विधेयः।

## रचनात्मकोऽभ्यासः

१. **शिक्षकस्य अन्येषां वा विदुषां साहाय्येन कानिचन उपयोगीनि नीतिवाक्यानि अन्विष्य विलिख्य च कक्षाया भित्तिषु, विद्यालयस्य वा भित्तिषु योजयत।**

२. **भवतां समाजे मातृभाषायां वा अनेकाः सूक्तयः प्रचलिताः सन्ति। कासाञ्चन दशानां सूक्तीनां सङ्कलनं विधाय तासां संस्कृतेऽनुवादं कुरुत।**

# छन्दःपरिचयः

यजुर्वेदमन्तरा त्रयाणामेव वेदानां मन्त्रा छन्दोबद्धा वर्तन्ते । पौराणिकं वाङ्मयं तु प्रायेण सर्वमपि छन्दःसु एव निबद्धमस्ति । ललितसंस्कृतसाहित्येऽपि गद्यसाहित्यात् पद्यसाहित्यं विपुलतरं वर्तते । पद्यसाहित्यं छन्दोऽन्तरा स्वरूपमेव न प्राप्नोति । दृश्यकाव्येषु अपि प्रायेण सर्वैरपि नाटककर्तृभिः पद्यानां प्रयोगो विहितोऽस्ति । अतः संस्कृतवाङ्मयस्य अध्ययनं छन्दोज्ञानमन्तरा न सम्भवति । अतः षट्सु वेदाङ्गेषु छन्दःशास्त्रमपि परिगणितमस्ति । छन्दःशास्त्रं वेदपुरुषस्य पादस्थानीयमङ्गं कथ्यते । 'पिङ्गलच्छन्दःसूत्रम्' इति प्रमुखमाद्यं च छन्दःशास्त्रं वर्तते । अत्र वैदिकानि लौकिकानि च छन्दांसि विवेचितानि सन्ति ।

### पद्यलक्षणं तद्भेदाश्च

पद्यं चतुष्पदि तच्च वृत्तं जातिरिति द्विधा ।

वृत्तमक्षरसङ्ख्यातं जातिर्मात्राकृता भवेत् ॥

यत्र चत्वारः पादा भवन्ति तत् पद्यं कथ्यते । यथा-

इज्याध्ययनदानानि

तपः सत्यं धृतिः क्षमा ।

अलोभ इति मार्गोऽयं

धर्मस्याष्टविधः स्मृतः ॥

अत्र चत्वारः पादाः सन्ति । अत इदं पद्यं वर्तते ।

### जातिवृत्तयोः परिचयः

पद्यं वृत्तं जातश्चेति द्विविधं भवति । मात्राणां गणना यत्र विधीयते सा जातिरुच्यते । यथा आर्याछन्दसि मात्राणां गणना भवति, अत आर्या जातिरस्ति । यत्र च अक्षराणां गणना भवति तद् वृत्तं कथ्यते । अनुष्टुप्छन्दसि, इन्द्रवज्रादिषु च अक्षराणां गणना विधीयते, अतस्तानि वृत्तान्यभिधीयन्ते ।

### सम-अर्धसम-विषमवृत्तानां परिचयः

पादव्यवस्थामाधृत्य वृत्तं समवृत्तम्, अर्धसमवृत्तम्, विषमवृत्तं चेति त्रिविधं भवति ।

## समवृत्तम्

अङ्घ्रयो यस्य चत्वारस्तुल्यलक्षणलक्षिताः ।
तच्छन्दःशास्त्रतद्विज्ञाः समं वृत्तं प्रचक्षते ॥

यत्र पद्यस्य चतुर्षु एव पादेषु समानं लक्षणं भवति तत् समवृत्तं कथ्यते । यथा-

आहार-निद्रा-भय-मैथुनञ्च
सामान्यमेतत् पशुभिर्नराणाम् ।
धर्मो हि तेषामधिको विशेषः
धर्मेण हीनाः पशुभिः समानाः ॥

इन्द्रवज्रावृत्तस्यास्मिन् पद्ये चतुर्षु एव पादेषु समानं लक्षणमस्ति । अतः इन्द्रवज्रावृत्तं समवृत्तं वर्तते ।

## अर्धसमवृत्तम्

प्रथमाङ्घ्रिसमो यस्य तृतीयश्चरणो भवेत् ।
द्वितीयस्तुर्यवद्वृत्तं तदर्धसममुच्यते ॥

यत्र च पद्यस्य प्रथमतृतीयपादयोरेकं लक्षणम्, द्वितीयचतुर्थपादयोश्चापरं लक्षणं भवति तद् वृत्तमर्धसमवृत्तं कथ्यते । यथा-

जगदम्बविचित्रमत्र किं
परिपूर्णा करुणास्ति चेन्मयि ।
अपराधपरम्परापरं
न हि माता समुपेक्षते सुतम् ॥

वियोगिनीवृत्तस्यास्मिन् पद्ये प्रथमतृतीयपादयोरेकम्, द्वितीयचतुर्थपादयोश्चापरं लक्षणं वर्तते, अतो वियोगिनीवृत्तमर्धसमवृत्तमस्ति ।

यस्य पादचतुष्केऽपि लक्ष्म भिन्नं परस्परम् ।
तदाहुर्विषमं वृत्तं छन्दःशास्त्रविशारदाः ॥

यत्र च प्रतिचरणं भिन्नं लक्षणं भवति तद् वृत्तं विषमवृत्तं कथ्यते । यथा-

मृगलोचना शशिमुखी च
रुचिरदशना नितम्बिनी ।
हंसललितगमना ललना
परिणीयते यदि भवेत् कुलोद्गता ॥

उद्गतावृत्तस्य अस्मिन् पद्ये प्रतिचरणं भिन्नं लक्षणं दृश्यते । अतः उद्गतावृत्तं विषमवृत्तमस्ति ।

**ह्रस्ववर्णाः-** अ, इ, उ, ऋ, लृ, एते स्वरा ह्रस्ववर्णाः सन्ति । एतैः सह एकैकस्य व्यञ्जनस्य योगेन निर्मितानि अक्षराणि अपि ह्रस्वानि भवन्ति । यथा-

क् + अ = क

क् + इ = कि

क् + उ = कु

क् + ऋ = कृ

क् + लृ = क्लृ

**दीर्घवर्णाः-** आ, ई, ऊ, ॠ, ए, ओ, ऐ, औ । एते स्वरा दीर्घाः सन्ति । एतैः सह एकैकस्य व्यञ्जनस्य योगेन निर्मितानि अक्षराणि अपि दीर्घाणि भवन्ति ।

क् + आ = का

क् + ई = की

क् + ऊ = कू

क् + ॠ = कॄ

क् + ए = के

क् + ओ = को

क् + ऐ = कै

क् + औ = कौ

## लघुगुरुपरिचयः

छन्दःशास्त्रे लघुवर्णा दण्डाकारेण ( । ) चिह्नेन बोध्यन्ते, गुरुवर्णाश्च सर्पाकारेण ( ऽ ) चिह्नेन बोध्यन्ते । छन्दःशास्त्रे प्रायो ह्रस्ववर्णा लघुपदेन दीर्घाश्च वर्णा गुरुपदेन व्यवह्रियन्ते । कासुचिद् अवस्थासु ह्रस्वाक्षरमपि गुरु जायते, ता अवस्था एवं सन्ति-

(क) अनुस्वारसहितं ह्रस्वमपि गुरु भवति । यथा- वंशः, शिंशपा, वयं नुमः ।

(ख) विसर्गसहितं ह्रस्वमपि गुरु भवति । यथा- दुःखम्, निःशङ्का, धृतिः क्षमा ।

(ग) वर्णसंयोगात् पूर्ववर्ति ह्रस्वमपि गुरु भवति । यथा- सत्त्वम्, दुष्टा, सम्पृक्तौ ।

(घ) हलन्तवर्णात् पूर्ववर्ति ह्रस्वमपि गुरु भवति । यथा- अभवत्, सर्वम्, शाङ्गिन् ।

(ङ) पद्यचरणस्यान्त्ये वर्तमानं ह्रस्वमपि गुरु भवति । यथा-

भवं भवानीसहितं नमामि ।
नागेन्द्रहाराय त्रिलोचनाय
श्रयत इन्दिरा शश्वदत्र हि ।

## गणपरिचयः

छन्दःशास्त्रे त्रयाणामक्षराणां समूहो गण उच्यते । तस्मिन् समूहे वर्तमानानां लघूनां गुरूणां वा अक्षराणां स्थानं सङ्ख्यां च आधृत्य भगणः, जगणः, सगणः, यगणः, रगणः, तगणः, मगणः, नगणश्चेति गणा अष्टौ भवन्ति । गणपरिचयार्थमेकः श्लोकोऽत्र प्रदीयते-

आदिमध्यावसानेषु भजसा यान्ति गौरवम् ।
यरता लाघवं यान्ति मनौ तु गुरुलाघवम् ।

| गणनाम | लक्षणम् | सङ्केतः | उदाहरणानि |
|---|---|---|---|
| भगणः | आदिगुरुः | ऽ।। | माधव, गच्छति, खादति । |
| जगणः | मध्यगुरुः | ।ऽ। | भवन्ति, प्रयाति, मुकुन्द । |
| सगणः | अन्त्यगुरुः | ।।ऽ | अभवत्, महिमा, विधृतिः । |
| यगणः | आदिलघुः | ।ऽऽ | मुकुन्दः, समानः, असारे । |
| रगणः | मध्यलघुः | ऽ।ऽ | शिंशपा, माधवः, उच्यते । |
| तगणः | अन्त्यलघुः | ऽऽ। | खादन्ति, श्रीराम, वैदेहि । |
| मगणः | सर्वगुरुः | ऽऽऽ | श्रीरामः, वैदेही, कथ्येते । |
| नगणः | सर्वलघुः | ।।। | भवति, तनय, नमति । |

## यतिपरिचयः

यतिर्जिह्वेष्टविश्रामस्थानं कविभिरुच्यते ।
सा विच्छेदविरामाद्यैः पदैर्वाच्या निजेच्छया ॥

श्लोकादीनामुच्चारणे पादमध्ये वा पादान्त्ये वा जायमानो विश्रामो यतिः कथ्यते । छन्दःशास्त्रेण उच्चारणसौकर्याय लयव्यवस्थापनाय च छन्दःसु यतिव्यवस्था विहिता विद्यते । यथा-

विद्या ददाति विनयम् - १ विनयाद् याति पात्रताम्- २
पात्रत्वाद् धनमाप्नोति- ३ धनाद् धर्मं ततः सुखम्- ४

अत्र प्रतिचरणं पादान्त्ये यतिर्भवति । पुनः

स हि गगनविहारी- १ कल्मषध्वंसकारी- २
दशशतकरधारी- ३ ज्योतिषां मध्यचारी- ४
विधुरपि विधियोगाद्- ५ ग्रस्यते राहुणासौ- ६
लिखितमपि ललाटे- ७ प्रोज्झितुं कः समर्थः- ८

अत्र प्रतिचरणमादितः अष्टमे, ततः पादान्त्ये यतिर्वर्तते ।

## अनुष्टुप्

श्लोके षष्ठं गुरु ज्ञेयं सर्वत्र लघु पञ्चमम् ।
द्विचतुष्पादयोर्ह्रस्वं सप्तमं दीर्घमन्ययोः ॥

अनुष्टुब्वृत्ते प्रतिचरणमष्टौ अक्षराणि भवन्ति । तत्र प्रतिचरणं षष्ठमक्षरं गुरु भवति, पञ्चममक्षरं च लघु भवति । प्रथमतृतीयचरणयोः सप्तममक्षरं गुरु भवति चेद् द्वितीयचतुर्थचरणयोः सप्तममक्षरं लघु भवति । यथा-

सच्चिदानन्द-रू-पाय विश्वोत्पत्त्यादि-हे-तवे ।
। ऽ ऽ । ऽ ।
तापत्रयवि-ना-शाय श्रीकृष्णाय व-यं नुमः ॥
। ऽ ऽ । ऽ ।

अत्र प्रतिचरणमष्टौ अक्षराणि सन्ति । तेषु प्रतिचरणं षष्ठमक्षरं गुरु अस्ति, पञ्चममक्षरं च लघु अस्ति । प्रथमतृतीयचरणयोः सप्तममक्षरं गुरु अस्ति चेद् द्वितीयचतुर्थचरणयोः सप्तममक्षरं लघु अस्ति । अतः पद्यमिदमनुष्टुब्वृत्तस्य निर्दिष्टमुदाहरणं वर्तते ।

## आर्या

यस्याः पादे प्रथमे द्वादश मात्रास्तथा तृतीयेऽपि ।
अष्टादश द्वितीये चर्तुथके पञ्चदश साऽऽर्या ॥

आर्या जातिरस्ति । अतस्तत्र मात्रागणना भवति । आर्यायाः प्रथमचरणे द्वादश माात्रा भवन्ति, द्वितीयचरणे अष्टादश मात्रा भवन्ति, तृतीयचरणे द्वादश एव मात्रा भवन्ति, चतुर्थचरणे पञ्चदश मात्रा भवन्ति । यथा-

अविरलमदजलनिवहं भ्रमरकुलानेकसेवितकपोलम् ।
अभिमतफलदातारं कामेशं गणपतिं वन्दे ॥

अत्र-

| | |
|---|---|
| प्रथमचरणे | अ-वि-र-ल-म-द-ज-ल-नि-व-हं |
| | १ १ १ १ १ १ १ १ १ १ २ = १२ |
| द्वितीयचरणे | भ्र-म-र-कु-ला-ने-क-से-वि-त-क-पो-लम् । |
| | १ १ १ १ २ २ १ २ १ १ १ २ २ = १८ |
| तृतीयचरणे | अ-भि-म-त-फ-ल-दा-ता-रं |
| | १ १ १ १ १ १ २ २ २ = १२ |
| चतुर्थचरणे | का-मे-शं ग-ण-प-तिं व-न्दे ॥ |
| | २ २ २ १ १ १ २ २ २ = १५ |

अत्र प्रथमचरणे द्वादश मात्राः सन्ति, द्वितीयचरणे अष्टादश मात्राः सन्ति, तृतीयचरणे द्वादश एव मात्राः सन्ति, चतुर्थचरणे पञ्चदश मात्राः सन्ति । अतः पद्यमिदमार्याजातेः निर्दिष्टमुदाहरणमस्ति ।

## इन्द्रवज्रा

स्यादिन्द्रवज्रा यदि तौ जगौ गः ।

| | | | |
|---|---|---|---|
| ऽऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| त | त | ज | ग ग |

इन्द्रवज्रावृत्ते प्रतिचरणमेकादश अक्षराणि भवन्ति । तत्र क्रमेण तगणः (ऽऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), ततो द्वौ गुरुवर्णौ (ऽऽ) च क्रमेण आगच्छन्ति । यथा-

नागेन्द्रहाराय त्रिलोचनाय

| | | | |
|---|---|---|---|
| ऽऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| त | त | ज | ग ग |

भस्माङ्गरागाय महेश्वराय ।

| | | | |
|---|---|---|---|
| ऽऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| त | त | ज | ग ग |

नित्याय शुद्धाय दिगम्बराय

| | | | |
|---|---|---|---|
| ऽऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| त | त | ज | ग ग |

तस्मै नकाराय नमः शिवाय

| | | | |
|---|---|---|---|
| ऽऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| त | त | ज | ग ग |

अत्र प्रतिचरणं क्रमेण तगणः (ऽऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), ततो द्वौ गुरुवर्णौ (ऽऽ) च आगताः सन्ति । अतः पद्यमिदमिन्द्रवज्रावृत्तस्य निर्दिष्टमुदाहरणमस्ति ।

### उपेन्द्रवज्रा

उपेन्द्रवज्रा जतजास्ततो गौ ।

| | | | |
|---|---|---|---|
| ।ऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| ज | त | ज | ग ग |

उपेन्द्रवज्रावृत्ते प्रतिचरणमेकादश अक्षराणि भवन्ति । तत्र क्रमेण जगणः (।ऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), ततो द्वौ गुरुवर्णौ (ऽऽ) च क्रमेण आगच्छन्ति । यथा-

त्वमेव माता च पिता त्वमेव

| | | | |
|---|---|---|---|
| ।ऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| ज | त | ज | ग ग |

त्वमेव बन्धुश्च सखा त्वमेव

| | | | |
|---|---|---|---|
| ।ऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| ज | त | ज | ग ग |

त्वमेव विद्या द्रविणं त्वमेव

| | | | |
|---|---|---|---|
| ।ऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| ज | त | ज | ग ग |

त्वमेव सर्वं मम देव देव

| | | | |
|---|---|---|---|
| ।ऽ। | ऽऽ। | ।ऽ। | ऽऽ |
| ज | त | ज | ग ग |

अत्र प्रतिचरणं क्रमेण जगणः (।ऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), ततो द्वौ गुरुवर्णौ (ऽऽ) च आगताः सन्ति । अतः पद्यमिदमुपेन्द्रवज्रावृत्तस्य निर्दिष्टमुदाहरणमस्ति ।

**उपजातिः**

अनन्तरोदीरितलक्ष्मभाजौ

| | | | |
|---|---|---|---|
| । ऽ । | ऽ ऽ । | । ऽ । | ऽ ऽ |
| ज | त | ज | ग ग |

पादौ यदीयावुपजातयस्ताः ।

| | | | |
|---|---|---|---|
| ऽ ऽ । | ऽ ऽ । | । ऽ । | ऽ ऽ |
| त | त | ज | ग ग |

यस्मिन् पद्ये उपर्युक्तयोरेन्द्रवज्रोपेन्द्रवज्रावृत्तयोः सम्मिश्रणं भवति तत्र उपजातिवृत्तं जायते । यथा-

कर्पूरगौरं करुणावतारं

| | | | |
|---|---|---|---|
| ऽ ऽ । | ऽ ऽ । | । ऽ । | ऽ ऽ |
| त | त | ज | ग ग |

संसारसारं भुजगेन्द्रहारम् ।

| | | | |
|---|---|---|---|
| ऽ ऽ । | ऽ ऽ । | । ऽ । | ऽ ऽ |
| त | त | ज | ग ग |

सदा वसन्तं हृदयारविन्दे

| | | | |
|---|---|---|---|
| । ऽ । | ऽ ऽ । | । ऽ । | ऽ ऽ |
| ज | त | ज | ग ग |

भवं भवानीसहितं नमामि ॥

| | | | |
|---|---|---|---|
| । ऽ । | ऽ ऽ । | । ऽ । | ऽ ऽ |
| ज | त | ज | ग ग |

अत्र प्रथमद्वितीयचरणयोरिन्द्रवज्रावृत्तमस्ति चेत् तृतीयचतुर्थचरणयोरुपेन्द्रवज्रावृत्तमस्ति । इन्द्रवज्रा-उपेन्द्रवज्रावृत्तयोः सम्मिश्रणाद् अत्र उपजातिवृत्तं वर्तते ।

**वंशस्थः**

जतौ तु वंशस्थमुदीरितं जरौ

| | | | |
|---|---|---|---|
| । ऽ । | ऽ ऽ । | । ऽ । | ऽ । ऽ |
| ज | त | ज | र |

वंशस्थवृत्ते प्रतिचरणं द्वादश अक्षराणि भवन्ति । तत्र क्रमेण जगणः (।ऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), रगणः (ऽ।ऽ) च आगच्छन्ति । यथा-

गजाननं भूतगणाधिसेवितं

| । ऽ । | ऽ ऽ । | । ऽ । | ऽ । ऽ |
|---|---|---|---|
| ज | त | ज | र |

कपित्थजम्बूफलचारुभक्षणम् ।

| । ऽ । | ऽ ऽ । | । ऽ । | ऽ । ऽ |
|---|---|---|---|
| ज | त | ज | र |

उमासुतं शोकविनाशकारकं

| । ऽ । | ऽ ऽ । | । ऽ । | ऽ । ऽ |
|---|---|---|---|
| ज | त | ज | र |

नमामि विघ्नेश्वरपादपङ्कजम्

| । ऽ । | ऽ ऽ । | । ऽ । | ऽ । ऽ |
|---|---|---|---|
| ज | त | ज | र |

अत्र प्रतिचरणं क्रमेण जगणः (।ऽ।), तगणः (ऽऽ।), जगणः (।ऽ।), रगणः (ऽ।ऽ) च आगताः सन्ति । अतः पद्यमिदं वंशस्थवृत्तस्य निर्दिष्टमुदाहरणमस्ति ।

## इन्दिरा

नररलैर्गुराविन्दिरा मता

| । । । | ऽ । ऽ | ऽ । ऽ | । ऽ |
|---|---|---|---|
| न | र | र | ल ग |

इन्दिरावृत्ते प्रतिचरणमेकादश अक्षराणि भवन्ति । तत्र क्रमेण नगणः (।।।), रगणः (ऽ।ऽ), रगणः (ऽ।ऽ), तत एको लघुवर्णः (।), एको गुरुवर्णः (ऽ) चेति क्रमेण आगच्छन्ति । यथा-

जयति तेऽधिकं जन्मना व्रजः

| । । । | ऽ । ऽ | ऽ । ऽ | । ऽ |
|---|---|---|---|
| न | र | र | ल ग |

श्रयत इन्दिरा शश्वदत्र हि ।

| । । । | ऽ । ऽ | ऽ । ऽ | । ऽ |
|---|---|---|---|
| न | र | र | ल ग |

दयित दृश्यतां दिक्षु तावका-

| । । । | ऽ । ऽ | ऽ । ऽ | । ऽ |
|---|---|---|---|
| न | र | र | ल ग |

स्त्वयि धृतासवस्त्वां विचिन्वते ॥

| । । । | ऽ । ऽ | ऽ । ऽ | । ऽ |
|---|---|---|---|
| न | र | र | ल ग |

अत्र प्रतिचरणं क्रमेण नगणः (। । ।), रगणः (ऽ । ऽ), रगणः (ऽ । ऽ), तत एको लघुवर्णः (।), एको गुरुवर्णः (ऽ) चेति आगताः सन्ति । अतः पद्यमिदमिन्दिरावृत्तस्य निर्दिष्टमुदाहरणं वर्तते ।

## भुजङ्गप्रयातम्

भुजङ्गप्रयातं चतुर्भिर्यकारैः

| । ऽ ऽ | । ऽ ऽ | । ऽ ऽ | । ऽ ऽ |
|---|---|---|---|
| य | य | य | य |

भुजङ्गप्रयातवृत्ते प्रतिचरणं द्वादश अक्षराणि भवन्ति । तत्र प्रतिचरणं क्रमेण चत्वारो यगणाः (। ऽ ऽ) आगच्छन्ति । यथा-

नमामीशमीशान निर्वाणरूपं

| । ऽ ऽ | । ऽ ऽ | । ऽ ऽ | । ऽ ऽ |
|---|---|---|---|
| य | य | य | य |

विभुं व्यापकं ब्रह्मवेदस्वरूपम् ।

| । ऽ ऽ | । ऽ ऽ | । ऽ ऽ | । ऽ ऽ |
|---|---|---|---|
| य | य | य | य |

निजं निर्गुणं निर्विकल्पं निरीहं

| । ऽ ऽ | । ऽ ऽ | । ऽ ऽ | । ऽ ऽ |
|---|---|---|---|
| य | य | य | य |

चिदाकाशमाकाशवासं भजेऽहम् ॥

| ऽ ऽ　| ऽ ऽ　| ऽ ऽ　| ऽ ऽ
य　य　य　य

अत्र प्रतिचरणं क्रमेण चत्वारो यगणाः (। ऽ ऽ) आगताः सन्ति । अतः पद्यमिदं भुजङ्गप्रयातवृत्तस्य निर्दिष्टमुदाहरणं वर्तते ।

## तोटकम्

वद तोटकमब्धिसकारयुतम्

। । ऽ　। । ऽ　। । ऽ　। । ऽ
स　स　स　स

तोटकवृत्ते प्रतिचरणं द्वादश अक्षराणि भवन्ति । तत्र प्रतिचरणं क्रमेण चत्वारः सगणाः (।। ऽ) आगच्छन्ति । यथा-

रविरुद्रपितामहविष्णुनुतं

। । ऽ　। । ऽ　। । ऽ　। । ऽ
स　स　स　स

हरिचन्दनकुङ्कुमपङ्कयुतम् ।

। । ऽ　। । ऽ　। । ऽ　। । ऽ
स　स　स　स

मुनिवृन्दगणेन्द्रसमानयुतं

। । ऽ　। । ऽ　। । ऽ　। । ऽ
स　स　स　स

तव नौमि सरस्वति पादयुगम् ।

। । ऽ　। । ऽ　। । ऽ　। । ऽ
स　स　स　स

अत्र प्रतिचरणं क्रमेण चत्वारः सगणाः (। । ऽ) आगताः सन्ति । अतः पद्यमिदं तोटकवृत्तस्य निर्दिष्टमुदाहरणं वर्तते ।

## स्रग्विणी

रैश्चतुर्भिर्युता स्रग्विणी सम्मता

ऽ । ऽ　ऽ । ऽ　ऽ । ऽ　ऽ । ऽ
र　र　र　र

स्रग्विणवृत्ते प्रतिचरणं द्वादश अक्षराणि भवन्ति । तत्र प्रतिचरणं क्रमेण चत्वारो रगणाः (ऽ। ऽ) आगच्छन्ति । यथा-

अच्युतं केशवं रामनारायणं

| | | | |
|---|---|---|---|
| ऽ । ऽ | ऽ । ऽ | ऽ । ऽ | ऽ । ऽ |
| र | र | र | र |

कृष्णदामोदरं वासुदेवं हरिम् ।

| | | | |
|---|---|---|---|
| ऽ । ऽ | ऽ । ऽ | ऽ । ऽ | ऽ । ऽ |
| र | र | र | र |

श्रीधरं माधवं गोपिकावल्लभं

| | | | |
|---|---|---|---|
| ऽ । ऽ | ऽ । ऽ | ऽ । ऽ | ऽ । ऽ |
| र | र | र | र |

जानकीनायकं रामचन्द्रं भजे ॥

| | | | |
|---|---|---|---|
| ऽ । ऽ | ऽ । ऽ | ऽ । ऽ | ऽ । ऽ |
| र | र | र | र |

अत्र प्रतिचरणं क्रमेण चत्वारो रगणाः (ऽ । ऽ) आगताः सन्ति । अतः पद्यमिदं स्रग्विणीवृत्तस्य निर्दिष्टमुदाहरणं वर्तते ।

## द्रुतविलम्बितम्

द्रुतविलम्बितमाह नभौ भरौ

| | | | |
|---|---|---|---|
| । । । | ऽ । । | ऽ । । | ऽ । ऽ |
| न | भ | भ | र |

द्रुतविलम्बितवृत्ते प्रतिचरणं द्वादश अक्षराणि भवन्ति । तत्र क्रमेण नगणः (। । ।), भगणः (ऽ ।।), भगणः (ऽ ।।), रगणः (ऽ । ऽ) च आगच्छन्ति ।

निगमकल्पतरोर्गलितं फलं

| | | | |
|---|---|---|---|
| । । । | ऽ । । | ऽ । । | ऽ । ऽ |
| न | भ | भ | र |

शुकमुखादमृतद्रवसंयुतम् ।

| | | | |
|---|---|---|---|
| ।।। | ऽ।। | ऽ।। | ऽ।ऽ |
| न | भ | भ | र |

पिबत भागवतं रसमालयं

| | | | |
|---|---|---|---|
| ।।। | ऽ।। | ऽ।। | ऽ।ऽ |
| न | भ | भ | र |

मुहुरहो रसिका भुवि भावुकाः ।

| | | | |
|---|---|---|---|
| ।।। | ऽ।। | ऽ।। | ऽ।ऽ |
| न | भ | भ | र |

अत्र प्रतिचरणं क्रमेण नगणः (।।।), भगणः (ऽ।।), भगणः (ऽ।।), रगणः (ऽ।ऽ) च आगताः सन्ति । अतः पद्यमिदं द्रुतविलम्बितवृत्तस्य निर्दिष्टमुदाहरणमस्ति ।

# अभ्यासः

## श्रवणं भाषणञ्च

१. **पद्यलक्षणं शिक्षकात् श्रुत्वा अधस्तनान् प्रश्नान् उत्तरयत**

(क) किं नाम पद्यम् ? (ख) पद्यं कतिविधं भवति ?

(ग) जातेर्लक्षणं किम् ? (घ) किं वृत्तं कथ्यते ?

२. **अनुष्टुप्छन्दसो लक्षणं श्रुत्वा तद् समवृत्तमस्ति ? उत अर्धसमवृत्तं वर्तते ? उताहो विषमवृत्तं विद्यते ? ससमन्वयं कथयत ।**

३. **पाठस्य ह्रस्वदीर्घवर्णव्यवस्थां श्रुत्वा अधस्तनानामक्षराणां ह्रस्वत्वं दीर्घत्वं वा निश्चित्य कथयत**

खे, जू, हि, त, फा, कौ, श्री, नु, सै, णो ।

४. **एकं मित्रं किमपि शब्दं लघुवाक्यं कथयतु, अपरञ्च तत्रागतानामक्षराणां लघुगुरुनिर्णयं सकारणं कथयतु । एवं वारं वारं विधाय लघुगुरुनिर्णयाभ्यासं कुरुत ।**

५. **पादान्त्ये वर्तमानमक्षरं लघु भवति उत गुरु ? निश्चित्य कथयत ।**

६. **अधस्तनानां त्र्यक्षराणां शब्दानां क्रमेण उच्चारणं विधाय तद्गणनिर्धारणार्थं मित्रं कथयत, तत्कथनस्य उचितानुचितत्वं च विचारयत**

करुणा, संसारः, साधवे, विचार्य, संस्कृते, साधूनाम्, आदृत्य, चलति, शम्भुना, क्रमेण, उच्चार्य, देवताः, वनौकाः, गुरवे, मुनीनाम्, सत्यस्य, लोकेन्द्रः, सन्दीपे, संहिता, माधवः, अरुणः ।

७. **श्रीमद्भगवद्गीतायाः प्रथमं श्लोकमुच्चार्य ससमन्वयं तद्वृत्तं निश्चिनुत ।**

८. **इन्द्रवज्रावृत्तस्य गणव्यवस्थां कथयत ।**

९. **अधस्तनं पद्यं श्रुत्वा लक्षणविचारेण तद्वृत्तं निश्चित्य कथयत**

व्रताय तेनानुचरेण धेनोः<br>
न्यषेधि शेषोऽप्यनुयायिवर्गः ।<br>
न चान्यतस्तस्य शरीररक्षा<br>
स्ववीर्यगुप्ता हि मनोः प्रसूतिः ।

१०. **उपजातिवृत्तस्य अधस्तने पद्ये कुत्र इन्द्रवज्रा कुत्र च उपेन्द्रवज्रा वर्तते ? कथयत**

धनुर्भृतोऽप्यस्य दयार्द्रभावम्
आख्यातमन्तःकरणैर्विशङ्कैः ।
विलोकयन्त्यो वपुरापुरक्ष्णां
प्रकामविस्तारफलं हरिण्यः ॥

११. **अधस्तनान् सङ्केतान् शिक्षकात् श्रुत्वा तल्लयानुशीलनेन वृत्तलक्षणं कथयत**

(क) नना ननाना ननना ननानना

(ख) ननना ननना ननना ननना

(ग) ननाना ननाना ननाना ननाना

(घ) नाना ननाना ननना ननाना

१२. **लक्षणं श्रुत्वा इन्दिरावृत्तस्य गणक्रमं निर्धारयत ।**

१३. **अधस्तनस्य पद्यस्य श्रवणानन्तरं तद्वृत्तं परिचिनुत**

वयं वैदिका राष्ट्रवादं वहामः
वयं वैदिका धर्ममार्गे चलामः ।
क्षुधाशान्तये नैव स्वत्वं त्यजामः
तृषाशान्तये नैव धर्मं त्यजामः ॥

१४. **आर्याछन्दस एकमुदाहरणं श्रावयत ।**

## पठनम्

१. **छन्दःपरिचयसम्बद्धं पाठस्य प्रथममनुच्छेदं पठित्वा अधस्तनान् प्रश्नान् उत्तरयत**

(क) केषां वेदानां मन्त्राः छन्दोबद्धाः सन्ति ?

(ख) ललितसंस्कृतसाहित्येऽपि कस्मात् किं विपुलतरं वर्तते ?

(ग) किं छन्दोऽन्तरा स्वरूपमेव न प्राप्नोति ?

(घ) छन्दो वेदपुरुषस्य कतममङ्गं वर्तते ?

(ङ) आद्यं छन्दःशास्त्रं किम् ?

२. **अधस्तनं पद्यं वृत्तं वर्तते उत जातिः ? पठित्वा कथयत**

यस्य पुरः स्वजनेऽप्यनुकालं
विवशा आपण्डितमाबालम् ।
गायन्त्युच्चैः कृतकरतालं
नृत्यन्ति च विहसन्ति बतालम् ॥

३. **अधस्तनपद्यं पठित्वा तस्य समवृत्तत्व-अर्धसमवृत्तत्व-विषमवृत्तत्वनिर्णयं कुरुत**

प्रविवेश गामिव कृशस्य
नियमसवनाय गच्छतः ।
तस्य पदविनमितो हिमवान्
गुरुतां नयन्ति हि गुणा न संहतिः ॥

४. **अधस्तनस्य वाक्यस्य प्रत्येकमक्षराणि लघूनि गुरूणि वा सन्ति ? लघुगुरुनियमान् पठित्वा क्रमेण कथयत**

संस्कृतं न केवलं संस्कृतिपरम्परयोरेव वाहकम्, अपि तु स्वास्थ्य-खगोल-ज्योतिर्विज्ञानादिविषयाणां प्रत्यक्षज्ञानेन स्वस्य विज्ञानत्वमपि प्रमाणीकर्तुं क्षममक्षयं विद्यावैभवं विद्यते ।

५. **गणपरिचयं पठित्वा अधस्तनानां पदानां गणनिर्धारणं कुरुत**

सागरः, सुमन्तुः, साधना, आगामी, अक्षयम्, बलिष्ठः, नेतारः, करोति, हससि, नेपालः, विजेता, कुरुत, मनस्वी, मायावी, सुमेधा, शङ्करः, गणितम्, उन्नतिः, प्रगतिः, आकृतिः, प्रकृतिः, विकारः ।

६. **का नाम यतिः ? सा च छन्दसि किमर्थमावश्यकी ? यतिपरिचयं पठित्वा वदत ।**

७. **अनुष्टुब्वृत्तस्य लक्षणं पठित्वा उत्तरयत**

(क) अनुष्टुब्वृत्ते प्रतिचरणं कत्यक्षराणि भवन्ति ?

(ख) अनुष्टुब्वृत्ते प्रतिचरणं कतममक्षरं गुरु भवति ?

(ग) अनुष्टुब्वृत्ते पञ्चमाक्षरं कीदृशं भवति ?

(घ) अनुष्टुब्वृत्तस्य सप्तमाक्षरव्यवस्था कीदृशी वर्तते ?

(ङ) प्रदत्तं पद्यमनुष्टुब्वृत्तस्य निर्दिष्टमुदाहरणमस्ति उत दुष्टम् ? लक्षणानुशीलनेन कथयत

शैशवेऽभ्यस्तविद्यानां यौवने विषयैषिणाम् ।
वार्धके मुनिवृत्तीनां योगेनान्ते तनुत्यजाम् ॥

८. **आर्याया लक्षणं प्रदत्तपद्ये घटते न वा ? अनुशीलयत**

गुणिगणगणनारम्भे न पतति कठिनी सुसम्भ्रमाद् यस्य ।
तेनाम्बा यदि सुतिनी वद बन्ध्या कीदृशी भवति ॥

९. **अधोऽङ्कितानां पद्यानां वृत्तं परिचित्य लयानुशीलनेन वाचयत**

(क) वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्बुभक्षणम् ।
तृणानि शय्या वसनं च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ॥

(ख) अथ रामवचो हृदये निदधत्
कपिराशु स वेञ्जकयीमनयत् ।
पथि यानपरश्च बभूव दृढं
कुसुमेषु शरैरशनैः प्रहृतः ॥

(ग) इति विचिन्त्य शिवे ! समिताशिवे !
जगति जातमयन्तवशादिदम् ।
स्तुतिजपार्चनचिन्तनवर्जिता
न खलु काचन कालकलास्ति मे ॥

१०. **इन्दिरावृत्तस्य लक्षणं पठित्वा तस्य द्वे उदाहरणे अन्विष्य श्रावयत ।**

११. **अधस्तनस्य पद्यस्य वृत्तं परिचित्य लक्षणोदाहरणसमन्वयं विधत्त**

धर्मलोपो यदाधर्मसम्पोषणं
जायते संसृजामि स्वयं भारत ।
सज्जनान् रक्षितुं दुर्जनान् मर्दितुं
धर्मसंस्थापनार्थं पुनर्भूतले ॥

१२. **अधःप्रदत्तमुपजातिलक्षणं पठत, शिक्षकसाहाय्येन तदर्थं बुद्ध्वा उपजातेः चतुर्दश भेदानां विषये विमर्शं कुरुत, ततः प्रतिभेदमुदाहरणान्वेषणाय च प्रयतध्वम्**

एकत्र पादे चरणद्वये वा
पादत्रये वाऽन्यतरः स्थितश्चेत् ।
तयोरिहान्यत्र तदोहनीयाः
चतुर्दशोक्ता उपजातिभेदाः ॥

१३. **अधःप्रदत्तं वंशस्थवृत्तस्य पद्यं पठित्वा तस्य प्रतिचरणं गणान् निर्दिश्य तद्गणानां पद्यलक्षणनिर्दिष्टगणेषु समन्वयं कुरुत**

वरं वनं व्याघ्रगजेन्द्रसेवितं
द्रुमालयं पक्वफलाम्बुभक्षणम् ।
तृणानि शय्या वसनं च वल्कलं
न बन्धुमध्ये धनहीनजीवनम् ॥

## लेखनम्

१. **समवृत्त-अर्धसमवृत्त-विषमवृत्तानां प्रत्येकमेकमुदाहणमन्विष्य लिखत ।**

२. **'पद्यं चतुष्पदि' इति पद्यलक्षणं सोदाहरणं व्याख्यात ।**

३. **जातेर्लक्षणं सोदाहरणं लिखत ।**

४. **अधस्तनानामक्षराणां ह्रस्वदीर्घनिर्धारणं कुरुत**

सा, प्लृ, त, थे, दै, हो, नि, गु, जी, क्षौ, बू, भृ ।

५. **पाठस्थं लघुगुरुपरिचयं पठित्वा अधोऽङ्कितानां प्रश्नानामुत्तराणि लिखत**

(क) सामान्यतो किं लघुसंज्ञं भवति ?

(ख) लघुगुर्वक्षरबोधके चिह्ने के ?

(ग) काभ्यां सहितं ह्रस्वाक्षरमपि गुरुर्भवति ?

(घ) संयोगात् पूर्ववर्तिनो ह्रस्वाक्षरस्य गुरुत्वे उदाहरणद्वयं प्रदर्शयत ।

(ङ) सोदाहरणं पादान्त्ये वर्तमानस्य ह्रस्वाक्षरस्य गुरुत्वं निरूपयत ।

६. **अधोऽङ्कितानां पङ्क्तीनामादितो गणनिर्धारणं कुरुत**

(क) विधुरपि विधियोगाद् ग्रस्यते राहुणासौ ।

(ख) सुरतकलापकलानिधिशङ्करकेलिपवित्रितकीर्तिरते ।

(ग) विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनम् ।

(घ) मुखं श्लेष्मागारं तदपि च शशाङ्केन तुलितम् ।

(ङ) ध्यायेन्नित्यं गणेशं परमगुणयुतं ध्यानसंस्थं त्रिनेत्रम् ।

(च) आषाढस्य प्रथमदिवसे मेघमाश्लिष्टसानुम् ।

(छ) रात्रिर्गमिष्यति भविष्यति सुप्रभातम् ।

**७. अनुष्टुब्वृत्तस्य लक्षणं सोदाहरणं ससमन्वयं च लिखत ।**

**८. आर्याछन्दसो जातित्वं सोदाहरणं प्रतिपादयत ।**

**९. अधस्तनानां पद्यानां वृत्तं परिचित्य वृत्तलक्षणे तेषां समन्वयं कुरुत**

(क) आस्वादवद्भिः कवलैस्तृणानां
कण्डूयनैर्दंशनिवारणैश्च ।
अव्याहतैः स्वैरगतैः स तस्याः
सम्राट् समाराधनतत्परोऽभूत् ॥

(ख) स्वराज्यचिन्तः सचिवः स्वसौख्यं
विहाय सर्वोदरपूरणाय ।
यतेत चित्तस्य शुचिं विधाय
व्रतेन बद्धोऽप्यपरिग्रहेण ॥

(ग) गणपतिं कविं गानपण्डितं
गणकमद्भुतं गौरवप्रदम् ।
गुणनिधिं शुभं गीष्पतिं च तं
प्रणिपताम्यहं प्राञ्जलिः श्रियै ॥

(घ) विधिताखिलशास्त्रसुधाजलधे
महितोपनिषत्कथितार्थनिधे ।
हृदये कलये विमलं चरणं
भव शङ्करदेशिक मे शरणम् ॥

**१०. अधःप्रदत्तानां वृत्तानां लक्षणं तदुदाहरणे सङ्गमयत**

(क) उपजातिः (ख) स्रग्विणी (ग) भुजङ्गप्रयातम्

**११. अधस्तनानां प्रश्नानां सङ्क्षेपेण उत्तराणि लिखत**

(क) संस्कृतवाङ्मये छन्दसो महत्त्वं प्रतिपादयत ।

(ख) सभेदं पद्यलक्षणं प्रदर्शयत ।

(ग) विषमवृत्तस्य परिचयं सोदाहरणं प्रदर्शयत ।

(घ) को नाम गणः ? स च कतिविधः ? सोदाहरणं प्रदर्शयत ।

(ङ) तोटकवृत्तस्य गणव्यवस्था का ?

(च) नभभरगणैर्निर्मितं वृत्तं किम् ? सोदाहरणं प्रदर्शयत ।

(छ) इन्दिरावृत्तस्य स्वनिर्मितं परनिर्मितं वा उदाहरणद्वयं विलिखत ।

१२. **पाठे पठितानां छन्दसां प्रत्येकमुदाहरणद्वयमन्विष्य लिखत ।**

## व्याकरणानुशीलनम्

१. **छन्दस्शब्दस्य सर्वाणि रूपाणि पठत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | छन्दः | छन्दसी | छन्दांसि |
| द्वितीया | छन्दः | छन्दसी | छन्दांसि |
| तृतीया | छन्दसा | छन्दोभ्याम् | छन्दोभिः |
| चतुर्थी | छन्दसे | छन्दोभ्याम् | छन्दोभ्यः |
| पञ्चमी | छन्दसः | छन्दोभ्याम् | छन्दोभ्यः |
| षष्ठी | छन्दसः | छन्दसोः | छन्दसाम् |
| सप्तमी | छन्दसि | छन्दसोः | छन्दःसु |
| सम्बोधनम् | हे छन्दः ! | हे छन्दसी ! | हे छन्दांसि ! |

२. **छन्दस्शब्दस्य रूपाणि पठित्वा तदनुसारेण मनस्-शब्दस्य यशस्शब्दस्य च सर्वाणि रूपाणि लिखत ।**

३. **पाठं पठित्वा छन्दःशास्त्रे प्रयुक्तानि पारिभाषिकपदानि अन्विष्य लिखत ।**

## रचनात्मकोऽभ्यासः

१. **'मम देशः' इति शीर्षके अनुष्टुब्वृत्ते पद्यपञ्चकं रचयत ।**

२. **'विराजते शीर्ष्णि नगाधिराजः' इति समस्यापूर्तौ उपेन्द्रवज्रया उपजात्या वा पद्यत्रयं विरचयत ।**

३. **द्रुतविलम्बितेन स्रग्विण्या भुजङ्गप्रयातेन वा एकस्मिन् पद्ये स्वपरिचयं प्रस्तुत ।**

४. **केनापि वृत्तेन विदेशं पलायितुकामानां कृते पञ्चभिः पद्यैः स्वदेशवासायानुरोधं कुरुत ।**

# सिद्धिदः साधुः



एकस्मिन् नगरे वसुप्रियनामा एको महाधनी निवसति स्म । तस्य पार्श्वे कोटिशो रूप्यकाणि, रत्नाभूषणानि, विशालानि भवनानि च आसन् । वसुप्रियो भूमिपतिश्च आसीत् । सन्तोषदाः सन्ततय आज्ञापालकाः सेवकाश्च प्रतिदिनं वसुप्रियं सेवन्ते स्म । तथापि वसुप्रियो मानसिकीं शान्तिं नानुभवति स्म । यतो हि धनेषु शान्तिर्न भवति । अतोऽन्यैर्बहिः सन्तुष्टो दृष्टोऽपि स मनसासन्तुष्ट एवासीत् ।

वसुप्रियस्य एकं मित्रमासीत् । कदाचिद् वसुप्रियस्तेन सह अमिलत्, मनोव्यथां चावर्णयत् । मित्रं वसुप्रियस्य स्थितिं बुद्ध्वा नगरस्य साधुना सह मेलितुं परामृशत् । नगरे इयं प्रख्यातिरासीत् यत् साधुरयं सर्वेभ्यो यथाकामं सिद्धिं ददाति । वसुप्रियो मित्रस्य वचनमनुसृत्य साधुना सह मेलितुमगच्छत् । स साधुतः शान्तिं कामयते स्म ।

वसुप्रियः साधुमनमत् अवदच्च, "स्वामिन् ! मम पार्श्वे सर्वाणि वस्तूनि सन्ति । धनेन सम्मानेन च न कोऽपि मां जेतुं शक्नोति । तथापि मम मनः सदैव अशान्तमेव । तमुपायं कथय येन मम मनसोऽशान्तिर्दूरं गच्छेत् ।"

इत्थं निवेद्य वसुप्रियो तूष्णीमतिष्ठत् । सोऽचिन्तयत्, "साधुर्मह्यं तद् वस्तु दद्याद् येन मम उपकारो भवेत् ।" परं साधुः किमपि नाकरोत् । अपरस्मिन् दिने साधुर्वसुप्रियमतितप्ते घर्मे कुटीराद् बहिरवासयत् । स च कुटीरस्य शीतलच्छायायां सुखेनोपाविशत् । वसुप्रियो घर्मपीडया पीडितोऽभवत् । स क्रोधाकुलश्च अजायत तदापि तूष्णीमेव अतिष्ठत् ।

द्वितीये दिवसे साधुर्वसुप्रियमवदत्, "अद्य आदिवसं तुभ्यं भोजनं न मिलति ।" इत्थमुक्त्वा साधुः कुटीरे स्थित्वा बहुविधानि मिष्टान्नानि अभुनक् । तद् दृष्ट्वा वसुप्रिय आश्चर्यचकितोऽभवत् । स आरात्रं चिन्तामग्नो जातः । साधुरसौ स्वार्थी परपीडकश्चास्तीति तेन मनसा निर्णीतम् ।

तृतीयदिने प्रातरेव वसुप्रियः स्वस्य आसनं प्रबाध्य गृहं प्रत्यावर्तितुं तत्परोऽभवत् । तदैव साधुर्वसुप्रियस्य सन्निधौ आगत्य अपृच्छत्, "का अस्ति वार्ता ? सुखेन तिष्ठसि न वा ?" वसुप्रियः प्रत्यवदत्, "अहं महतीमाशां धृत्वात्र समागत आसम्, परं किमपि न प्राप्तं प्रत्युत महद्दुःखमेवान्वभवम् । एतादृशं दुःखं मया न कदापि प्राप्तम् ।

अहं तु साम्प्रतमेव गृहं गच्छामि ।" साधुर्हसित्वा अवोचत्, "अहं तुभ्यं बहु अददां परं त्वं किमपि न अगृह्णाः ।" वसुप्रियो विस्मितो भूत्वा अकथयत्, "भवान् मह्यं किमपि न अददात् ।"

साधुः वसुप्रियं सान्त्वयन् आह, "प्रथमे दिनेऽहं त्वां घर्मेऽवासयम् । अहं च शीतलच्छायायामतिष्ठम् । अनेनाहं त्वामबोधयं यत् मम शीतलता तुभ्यं लाभदायिनी न भवति । त्वं तन्न अजानाः । द्वितीये दिवसेऽहं त्वां बुभुक्षितमस्थापयम् । अहं च मिष्टान्नानि अखादम् । अनेनाहं त्वामबोधयं यद् मम तृप्त्या तव तृप्तिर्न सम्भवति । अत्र चिन्तय, त्वया स्वपुरुषार्थेन धनमर्जितम् । तत् तव कृते एव भवति, न तु मत्कृते । एवमेव शान्तिरपि मया कठोरसाधनया अधिगता वर्तते । साधनया सिद्धिः प्राप्यते । अहं तुभ्यं शान्तिं दातुं न शक्नोमि । इमां स्वसाधनया सिद्ध्या च अर्जय ।" साधोर्वचनाद् वसुप्रियः सन्तुष्टो भूत्वा गृहं प्रत्यगच्छत् ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **पाठस्य सस्वरवाचनं कुरुत ।**

२. **पाठस्य समस्तपदानि अन्विष्य शिक्षकाद् आदर्शोच्चारणविधिं श्रुत्वा तेषामनुवाचनं कुरुत ।**

३. **अधोलिखितानां शब्दानामुच्चारणं कुरुत**

वसुप्रियनामा, रत्नाभूषणानि, आज्ञापालकाः, अनुसृत्य, मौनम्, शीतलच्छायायाम्, घर्मपीडया, आश्चर्यचकितः, अपृच्छत्, स्वपुरुषार्थेन, स्वसाधनया, अर्जय ।

४. **अधस्तनवाक्येषु अव्ययपदानि कथयत**

(क) स असन्तुष्ट एव आसीत् ।

(ख) कदाचिद् वसुप्रियस्तममिलत् ।

(ग) साधुः यथाकामं सिद्धिं ददाति ।

(घ) न कोऽपि मां जयति ।

(ङ) धनी कुटीराद् बहिः अवसत् ।

(च) स प्रातरेव तत्परोऽभवत् ।

(छ) मम तृप्त्या तव तृप्तिर्न सम्भवति ।

(ज) अत्र चिन्तय, त्वया स्वपुरुषार्थेन धनमर्जितम् ।

### ५. एकस्मिन् वाक्ये उत्तराणि कथयत

(क) वसुप्रियः कः आसीत् ?

(ख) वसुप्रियस्य सन्ततयः कीदृशा आसन् ?

(ग) वसुप्रियस्य मित्रं किं परामृशत् ?

(घ) वसुप्रियः साधुतः किमिच्छति स्म ?

(ङ) कस्य मनोऽशान्तमासीत् ?

(च) शीतलच्छायायां सुखेन क उपाविशत् ?

(छ) वसुप्रियो मनसा किं निर्णीतवान् ?

(ज) साधुर्वसुप्रियं किमपृच्छत् ?

(झ) शान्तिं कथमर्जयितुं शक्यते ?

(ञ) साधोर्वचनाद् वसुप्रियः कीदृशोऽभवत् ?

### ६. अधोलिखितं कथांशं पठित्वा सन्देशं श्रावयत

श्रीरामो राजसिंहासने उपविष्ट आसीत्। तदैव एकः शुनको राजप्रासादस्य निकटे आगत्य घण्टानादमकरोत्। श्रीरामस्य ध्यानं तत्र समाकृष्टम् । शुनकः श्रीरामस्य समीपे आनीतः । श्रीरामः शुनकं राजप्रासादे आगमनस्य कारणमपृच्छत् । शुनक एकेन जनेन आत्मने विहितस्य व्यर्थं ताडनस्य विषये न्यवेदयत् । श्रीरामस्तस्मै जनाय कीदृशो दण्डः प्रदातव्य इति वक्तुं शुनकमेव आदिशत्। शुनकस्तं जनं देवपूजकपदे नियोक्तुं प्रार्थितवान्। श्रीरामः आश्चर्येण अवदत्, "किमर्थम् ?"

शुनक आह, "अहमपि पूर्वजन्मनि देवपूजक एव आसम् । अन्यायेन देवस्वस्य गृहीता अहं सम्प्रति शुनकोऽभवम् । अयं जनोऽपि देवपूजको भूत्वा देवस्वं भक्षयिष्यति । ततः सोऽपि शुनको भविष्यति ।" शुनकस्य प्रार्थनाया अनुसारेण श्रीरामस्ताडकं तं जनं तस्मिन्नेव पदे नियुक्तवान् ।

## पठनम्

### १. सन्धिप्रक्रियां पठित्वा सखिभिस्सह विमृशत

| सन्धिपदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| रत्नाभूषणानि | रत्न+आभूषणानि | स्वरसन्धिः |
| भूमिपतिश्च | भूमिपतिः+ च | विसर्गसन्धिः |
| नानुभवति | न+अनुभवति | स्वरसन्धिः |

| | | |
|---|---|---|
| दृष्टोऽपि | दृष्टः +अपि | विसर्गसन्धिः |
| साधुरयम् | साधुः+अयम् | विसर्गसन्धिः |
| अवदच्च | अवदत्+च | व्यञ्जनसन्धिः |
| कोऽपि | कः + अपि | विसर्गसन्धिः |
| नाकरोत् | न+ अकरोत् | स्वरसन्धिः |
| क्रोधाकुलश्च | क्रोध+ आकुलः + च | स्वरसन्धिः/विसर्गसन्धिः |
| प्रातरेव | प्रातः + एव | विसर्गसन्धिः |
| काऽस्ति | का + अस्ति | स्वरसन्धिः |
| प्रत्यवदत् | प्रति + अवदत् | स्वरसन्धिः |
| तृप्तिर्न | तृप्तिः + न | विसर्गसन्धिः |
| शान्तिरपि | शान्तिः + अपि | विसर्गसन्धिः |

२. **अधोलिखितस्य गद्यांशस्य सस्वरवाचनं कुरुत**

अधुना सांस्कृतिकपर्यटनस्य विषये सर्वत्र चर्चा क्रियते, श्रूयते च । काऽपि संस्कृतिर्भिन्नसंस्कृतेर्जनानां मनो मोदयितुं सफला भवति । मानवस्य स्वभावोऽयं वर्तते यत् स आत्मानमन्यच्च ज्ञानरहस्यं ज्ञातुं सदैव उत्सुको भवति । संस्कृतौ सैव शक्तिर्वर्तते या सर्वान् आक्रष्टुं क्षमते । नेपालोऽपि सांस्कृतिकसम्पत्त्या समृद्धो देशो वर्तते । अत्र न केवलं प्रतिमासमपितु प्रतिदिनमेव संस्कृतिप्रधानाः कार्यक्रमाः समायोज्यन्ते । अतः संस्कृतिरपि नैकविधा एव । धार्मिककृत्य-सामाजिकजीवनपद्धति-भोजनावासपानव्यवसायादिकार्याणि संस्कृतौ परिगणयितुं शक्यन्ते । बह्वीनां जाति-भाषा-परम्पराणामभ्यासेन नेपालस्य संस्कृतिः सर्वान् आक्रष्टुं समर्था वर्तते । इत्यतो वयं वक्तुं शक्नुमो यद् नेपालदेशः संस्कृत्या सबलः सम्पन्नश्च आस्ते ।

३. **अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरयत**

तपोधनो वाल्मीकिराश्रमे आसीत् । आश्रमं परितो वृक्ष-पशु-पक्षिण आसन् । एकदा स कुशान् आनेतुं वनमगच्छत् । तदा एको व्याधस्तत्र आगतः । तत्रैव क्रौञ्चपक्षिद्वयं प्रेमलीलायां रतमासीत् । व्याधः क्रौञ्चयुगलं लक्ष्यीकृत्य बाणमक्षिपत् । तेन एकोऽम्रियत । अपरश्च शोकाकुलोऽभवत् । तद् दृष्ट्वा महर्षेर्वाल्मीकेर्हृदयं द्रवीभूतम् । स सहसा छन्दोबद्धां वाणीमुदैरयत् । सा वाणी करुणाभावभरिता आसीत् । ततो महर्षिर्वाल्मीकिरादिकाव्यं व्यरचयत् । तद् रामायणं निगद्यते । रामायणस्य रचनाकारो वाल्मीकिः आदिकविरूपेण विश्रुतोऽभवत् । रामायणं बहुविधं महत्त्वं बिभर्ति । ग्रन्थोऽयमार्षकाव्यमिति च कथ्यते । अत्र न केवलं धर्मस्य प्रतिपादनमेव अपितु काव्यस्य आस्वादनं रामगाथाकीर्तनं नीतिमार्गस्यानुसरणं च

प्राप्यन्ते । वाल्मीकि रामनामगायकः कोकिलो मन्यते । लौकिकसंस्कृतस्य उन्नायकं वाल्मीकिरामायणं सर्वैः समाद्रियते । वाल्मीकिश्च सर्वैः प्रपूज्यते ।

(क) आश्रमं परितः के आसन् ?

(ख) व्याधः किमकरोत् ?

(ग) वाल्मीकेर्हृदयं कीदृशमभवत् ?

(घ) वाल्मीकेर्वाणी कीदृशी आसीत् ?

(ङ) आर्षकाव्यं कस्य नाम वर्तते ?

(च) रामायणे कानि प्राप्यन्ते ?

(छ) वाल्मीकिः कीदृशः कोकिलो मन्यते ?

(ज) अस्य गद्यांशस्य शीर्षकं किं भवेत् ?

४. **अधोलिखितं गद्यभागं पठत**

पार्वती पशुपतिं पतिं वरितुमिच्छति स्म । सा तस्य प्राप्तिः सरला नास्तीति ज्ञात्वा तपश्चर्यायै गौरीशिखरं गन्तुमैच्छत् । मेनका पुत्रीं निवारयन्ती आह, "त्वया अभीप्सिता देवा अत्रैव हिमाद्रौ सन्त्येव कथं पत्युः कामनया कठोरं तपः समाचरषि ?" परन्तु पार्वती दृढप्रतिज्ञा आसीत् । सा तपश्चर्यायै गता । तपःस्थले ब्रह्मचारी वटुरागत्य शिवनिन्दां प्रारभत । पार्वती यथामति शिवनिन्दाया उत्तरं दत्तवती । चिराय श्रुतनिन्दा पार्वती ततः पलायितुं प्रायतत । तदैव श्रीशङ्करः स्वरूपमदर्शयत् । तद् विलोक्य सा युगपदेव निश्चलमनसा पूर्णकामा च अभवत् ।

५. **पाठस्य अन्तिमानुच्छेदस्य द्रुतपठनं कृत्वा शिक्षकं श्रावयत ।**

## लेखनम्

१. **अधोलिखितानां सूत्राणामाधारेण लघुकथां रचयत**

(क) राम-रावणयोर्युद्धं निश्चितम्

(ख) समुद्रो विशालः

(ग) समुद्रमत्तीर्य लङ्कायां गन्तव्यम्

(घ) सेतुबन्धनस्य विषये रामलक्ष्मणयोः सैन्यैः सह विमर्शनम्

(ङ) सेतुनिर्माणाय सर्वे कपयस्तत्पराः

(च) हनुमान् बुद्धिमान् धैर्यवान् च वीरभक्तः

(छ) हनुमतो निर्देशनस्यानुसारेण सर्वे कपयः शिलाया उपरि 'रामः' इति लिखित्वा समुद्रे प्रक्षिपन्ति

(ज) तादृश्यः शिला जले न निमज्जन्ति स्म

(झ) शिलासञ्चयेन सेतुनिर्माणम्

(ञ) रामसैन्यानां लङ्कायां प्रवेशः

(ट) रावणस्य पराजयः सीताया उद्धारश्च

(ठ) रामनाममहिमा सर्वत्र प्रशंसितः ।

## २. पर्यायान् मेलयत

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| साधुः | वाल्मीकिः |
| आदिकविः | भवनम् |
| समुद्रः | उष्णः |
| गृहम् | सज्जनः |
| तप्तः | उदधिः |

## ३. पदानि प्रयुज्य वाक्यं रचयत

भूमिपतिः, बहिः, अवर्णयत्, यथाकामम्, कामयते, धर्मः, आदिवसम्, प्रबाध्य, छायायाम्, तृप्तिः, साधना, अर्जय ।

## ४. प्रदत्तेषु पुंलिङ्गि-स्त्रीलिङ्गि-नपुंसकलिङ्गि-पदानि पृथक्कृत्य अधोनिर्दिष्टायां संरचनायां लिखत

रूप्यकाणि, सेवकाः, मित्रम्, मनोव्यथा, प्रख्यातिः, साधुः, मनः, वस्तु, छाया, मिष्टान्नानि, वार्ता, घर्मः, तृप्तिः, पुरुषार्थः, भवनम्, भूमिपतिः

| पुंलिङ्गिपदानि | स्त्रीलिङ्गिपदानि | नपुंसकलिङ्गिपदानि |
|---|---|---|
| ................. | ..................... | ....................... |
| ................. | ..................... | ....................... |
| ................. | ..................... | ....................... |
| ................. | ..................... | ....................... |
| ................. | ..................... | ....................... |

५. **समीचीनकथने 'आम्', असमीचीनकथने 'न' च लिखत**

(क) वसुप्रियः सुशान्त आसीत् । ( )

(ख) वसुप्रियो मित्रेण सह अमिलत् । ( )

(ग) साधुर्वसुप्रियेण सह मेलितुमिच्छति स्म । ( )

(घ) वसुप्रियः कोमलशय्यायामस्वपत् । ( )

(ङ) साधुर्वसुप्रियाय भोजनं नादात् । ( )

(च) वसुप्रियो गृहं गन्तुमैच्छत् । ( )

(छ) साधोर्वचनाद् वसुप्रियः सन्तुष्टोऽभवत् । ( )

६. **संशोधनं कृत्वा पुनर्लेखनं कुरुत**

(क) एको महाधनी तिष्ठन्ति स्म ।

(ख) अहं गृहं बहिर्गन्तुमिच्छामि ।

(ग) श्रीरामस्य मित्रं विभीषण आसीत् ।

(घ) छात्राः सरस्वत्या वन्दनां कुरुतः ।

(ङ) मनसः शान्तिः सुखदायकं भवति ।

(च) साधोर्वचनं मन्तव्यम् ।

(छ) शान्तिरात्मनैव प्राप्तव्यो भवति ।

७. **सङ्क्षेपेणोत्तरयत**

(क) वसुप्रियस्य जीवने कीदृशी समस्या आपतिता ? वर्णयत ।

(ख) साधोः समक्षं गत्वा वसुप्रियः किं न्यवेदयत् ?

(ग) साधुः प्रथमद्वितीयतृतीयदिवसेषु किं किमकरोत् ? लिखत ।

८. **वसुप्रियस्य शिक्षणाय साधुना विहितं कर्म समीचीनमसमीचीनं वा ? किं शिक्षणाय कदाचन परपीडनमुचितं भवति ? स्वस्य विचारं लिखत ।**

९. **कथां पठित्वा अस्याः कथायाः मूलसन्देशमनुच्छेदेनैकेन लिखत ।**

१०. **सूत्रवाक्यैः कथां सङ्क्षेप्य लिखत ।**

## व्याकरणानुशीलनम्

क्रियापदस्य मूलरूपं धातुर्भवति । यथा-

| **क्रियापदम्** | **धातुः** |
|---|---|
| बालिका <u>गच्छति</u> | गम् |
| शैलेशः <u>पश्यति</u> | दृश् |

धातूनां रूपाणि लकाराणामनुसारेण भवन्ति । लकाराः कालं सूचयन्ति । यथा-

| **लकारः** | **कालः** | **उदाहरणम्** |
|---|---|---|
| लट् | वर्तमानकालः | मार्गे मानवाः चलन्ति । |
| लङ् | भूतकालः | मार्गे मानवाः अचलन् । |
| लृट् | भविष्यत्कालः | मार्गे मानवाः चलिष्यन्ति । |

पुरुष-वचन-लकाराणामनुसारेण धातूनां रूपाणि इत्थं भवन्ति ।

**इक्ष्धातुः**

**लट्लकारः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः | ईक्षते | ईक्षेते | ईक्षन्ते |
| मध्यमः | ईक्षसे | ईक्षेथे | ईक्षध्वे |
| उत्तमः | ईक्षे | ईक्षावहे | ईक्षामहे |

**लङ्लकारः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः | ऐक्षत | ऐक्षेताम् | ऐक्षन्त |
| मध्यमः | ऐक्षथाः | ऐक्षेथाम् | ऐक्षध्वम् |
| उत्तमः | ऐक्षे | ऐक्षावहि | ऐक्षामहि |

**लृट्लकारः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः | ईक्षिष्यते | ईक्षिष्येते | ईक्षिष्यन्ते |
| मध्यमः | ईक्षिष्यसे | ईक्षिष्येथे | ईक्षिष्यध्वे |
| उत्तमः | ईक्षिष्ये | ईक्षिष्यावहे | ईक्षिष्यामहे |

**श्रुधातुः**

**लट्लकारः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः | शृणोति | शृणुतः | शृण्वन्ति |
| मध्यमः | शृणोषि | शृणुथः | श्रृणुथ |
| उत्तमः | शृणोमि | शृणुवः | शृणुमः |

**लङ्लकारः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः | अशृणोत् | अशृणुताम् | अशृण्वन् |
| मध्यमः | अशृणोः | अशृणुताम् | अशृणुत |
| उत्तमः | अशृणवम् | अशृणुव | अशृणुम |

**लृट्लकारः**

| **पुरुषः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमः | श्रोष्यति | श्रोष्यतः | श्रोष्यन्ति |
| मध्यमः | श्रोष्यसि | श्रोष्यथः | श्रोष्यथ |
| उत्तमः | श्रोष्यामि | श्रोष्यावः | श्रोष्यामः |

१. उदाहरणानि अनुसृत्य वृध्-मृ-ग्रह्धातूनां लट्-लङ्-लृट्लकाराणां रूपाणि लिखत ।

२. निर्देशानुसारेण रिक्तस्थानं पूरयत

| | |
|---|---|
| (क) छात्रा गृहकार्यम् ......... । | (कृ- बहुवचनम्-लङ्) |
| (ख) युधिष्ठिरः सत्यवादी राजा ......... । | (अस्-एकवचनम्-लङ्) |
| (ग) अहं धावितुं .......................। | (शक्-एकवचनम्-लृट्) |
| (घ) वयं मन्दिरं .......... । | (गम् (गच्छ्)-बहुवचनम्-लट्) |
| (ङ) गौः जलं ......... । | (पा (पिब्)- एकवचनम्-लट्) |
| (च) बालिकाः फलानि .... । | (खाद्-बहुवचनम्-लङ्) |

(छ) अहं पादकन्दुकेन ....... । (क्रीड्-एकवचनम्-लृट्)

(ज) भ्रातरौ अमरकोशम् ........ । (पठ्-द्विवचनम्-लट्)

(झ) महर्षयः आत्मानम् ...... । (चिन्त्-बहुवचनम्-लङ्)

(ञ) उद्याने पुष्पम् ....... । (शुभ्-एकवचनम्-लङ्)

३. **मुद्-शिक्ष्-वृत्-यत्-शङ्क-रुच्-रम्-कृत्-मुच्-लिप्-प्रच्छ्-ज्ञाधातूनां लट्लकारस्य प्रथमपुरुषस्य एकवचनस्य रूपाणि लिखत ।**

४. **तृतीये प्रश्नाङ्के निर्मितानि क्रियापदानि प्रयुज्य एकैकं वाक्यं रचयत ।**

## रचनात्मकोऽभ्यासः

१. **अधोलिखितं सङ्क्षिप्तं संवादं पठित्वा एकां लघुकथां लिखत**

खड्गधारी – आर्य, जीर्णे कुटीरे त्वं किमर्थं वससि ? मया सह प्रासादं चल ।

मुनिपुङ्गवः – अहमत्रैव तिष्ठामि । प्रासादे मम प्रयोजनं नास्ति ।

खड्गधारी – चल, तुभ्यमर्धराज्यं दास्यामि ।

मुनिपुङ्गवः – मम कृते राज्येन किं प्रयोजनम् ?

खड्गधारी – मां तिरस्करोषि, न जानासि कोऽहम् ?

मुनिपुङ्गवः – न जानामि, परं न तिरस्करोमि अपितु सम्मानयामि एव ।

खड्गधारी – खड्गेन तव भुजच्छेदनं करोमि ।

मुनिपुङ्गवः – त्वं मम भुजच्छेदनं कर्तुं शक्नोषि, परं मम आत्मनः छेदनं कर्तुं न शक्नोषि ।

खड्गधारी – कुत्रास्ति आत्मा ?

मुनिपुङ्गवः – जानासि चेत् त्वं खड्गमेव जहासि ।

खड्गधारी – तत्तु खड्गं त्यक्त्वा आत्मानं ज्ञातुमिच्छामि ।

मुनिपुङ्गवः – तर्हि त्वमपि साधुर्भविष्यसि ।

२. **पाठस्य कथां पठित्वा स्वात्मभिरनुभूतं परिवर्तनं परस्परं विमृशत ।**

३. **कामपि एकां नीतिकथां विलिख्य कक्षायां श्रावयत ।**

# महाभारतस्य सूक्तयः



अष्टौ गुणाः पुरुषं दीपयन्ति प्रज्ञा च कौल्यञ्च दमः श्रुतञ्च ।
पराक्रमश्चाबहुभाषिता च दानं यथाशक्ति कृतज्ञता च ॥१॥

क्षिप्रं विजानाति चिरं शृणोति विज्ञाय चार्थं भजते न कामात् ।
नासम्पृष्टो व्युपयुङ्क्ते परार्थे तत्प्रज्ञानं प्रथमं पण्डितस्य ॥२॥

यद्यच्छरीरेण करोति कर्म शरीरयुक्तः समुपाश्नुते तत् ।
शरीरमेवायतनं सुखस्य दुःखस्य चाप्यायतनं शरीरम् ॥३॥

आरोग्यमानृण्यमविप्रवासः सद्भिर्मनुष्यैः सह सम्प्रयोगः ।
स्वप्रत्यया वृत्तिरभीतवासः षड् जीवलोकस्य सुखानि राजन् ॥४॥

यस्मिन् यथा वर्तते यो मनुष्यः तस्मिन् तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः साध्वाचारः साधुना प्रत्युपेयः ॥५॥

सुदुर्बलं नावजानाति कञ्चिद् युक्तो रिपुं सेवते बुद्धिपूर्वम् ।
न विग्रहं रोचयते बलस्थैः काले च यो विक्रमते स धीरः ॥६॥

इष्टञ्च मे स्यादितरच्च न स्याद् एतत्कृते कर्मविधिः प्रवृत्तः ।
इष्टं त्वनिष्टं च न मां भजेतेत्येतत्कृते ज्ञानविधिः प्रवृत्तः ॥७॥

### प्रथमं पद्यम्

**अन्वयः** – प्रज्ञा, च, कौल्यम्, च, दमः, श्रुतम्, च, पराक्रमः, च, अबहुभाषिता, च, यथाशक्ति, दानम्, कृतज्ञता, च (एते) अष्टौ, गुणाः, पुरुषम्, दीपयन्ति, ।

**सरलार्थः** – सद्बुद्धिः, कुलीनता, इन्द्रियसंयमः, शास्त्राभ्यासः, पराक्रमः, मितभाषिता, यथासम्भवं दानम्, प्राप्तोपकारस्य स्मृतिश्च एते अष्टौ गुणा जनं प्रकाशयन्ति, ख्यातिङ्गमयन्ति वा ।

### द्वितीयं पद्यम्

**अन्वयः** – क्षिप्रम्, विजानाति, चिरम्, शृणोति, अर्थम्, च, विज्ञाय, भजते, न, कामात्, असम्पृष्टः, न, परार्थे, व्युपयुङ्क्ते, तत्, पण्डितस्य, प्रथमम्, प्रज्ञानम् ।

**सरलार्थः** – कार्यं झटिति अवबुध्यते । ज्ञानदाढ्र्याय बहुकालं यावदाकर्णयति । कर्तव्यजातं किं कर्तव्यम्, कदा कर्तव्यम्, कथं कर्तव्यमिति यथावत् ज्ञात्वा प्रारभते । कामवशात् न करोति । विवेकेन एव करोति । अपृष्टः सन् अन्यकार्ये मध्ये न ब्रूते । तद् विदुषः प्रधानं लक्षणम् ।

### तृतीयं पद्यम्

**अन्वयः** – (मनुष्यः) शरीरेण, यत्, यत्, कर्म, करोति, शरीरयुक्तः, (सन् सः) तत्, (फलम्) समुपाश्नुते, शरीरम्, एव, सुखस्य, आयतनम्, दुःखस्य, च, अपि, आयतनम्, शरीरम् ।

**सरलार्थः** – मनुष्यः शरीरद्वारा यत् किमपि कार्यमाचरति, शरीरेण युक्तः सन् हि स तेषां शुभाशुभकर्मणां फलं भुङ्क्ते । यतो हि शरीरं खलु सुखस्य दुःखस्य च भोगसाधनं वर्तते ।

### चतुर्थं पद्यम्

**अन्वयः** – राजन्, आरोग्यम्, आनृण्यम्, अविप्रवासः, सद्भिः, मनुष्यैः, सह, सम्प्रयोगः, स्वप्रत्यया, वृत्तिः, अभीतवासः, (एतानि) षट्, जीवलोकस्य, सुखानि (सन्ति) ।

**सरलार्थः** – हे नृप ! स्वास्थ्यम्, ऋणराहित्यम्, परदेशागमनम्, स्वगृहनिवासः, सज्जनैर्मानवैः सह सङ्गतिः, स्वाधीना जीविका, निर्भयं निवासः च एतानि षट् मर्त्यलोकस्य वासिनां कृते सुखप्रदानि भवन्ति ।

### पञ्चमं पद्यम्

**अन्वयः** – यः, मनुष्यः, यस्मिन्, यथा, वर्तते, तस्मिन्, तथा, वर्तितव्यम्, सः, धर्मः, मायाचारः, मायया, वर्तितव्यः, साध्वाचारः, साधुना, प्रत्युपेयः ।

**सरलार्थः** – भवता सह यो यथा व्यवहरति तेन सह तथैव व्यवहर्तव्यः । स एव धर्मः । कपटयुक्तेन सह कापट्येन व्यवहारः करणीयः, सज्जनेन च सह साधुव्यवहारः ।

### षष्ठं पद्यम्

**अन्वयः** – (यः) सुदुर्बलम्, कञ्चित्, न, अवजानाति, युक्तः (सन्), बुद्धिपूर्वम्, रिपुम्, सेवते, बलस्थैः, विग्रहम्, न, रोचयते, काले, च, विक्रमते, सः, धीरः ।

**सरलार्थः** – यो मनुष्योऽत्यन्तं निर्बलमपि जनं न अवमानयति, शत्रुदोषान्वेषणे समर्थः सन् बुद्धिपूर्वकं शत्रुणा सह व्यवहरति, बलवद्भिः सह युद्धं न वाञ्छति, उचिते समये सम्प्राप्ते हि पराक्रमं दर्शयति, स एव धीरो बुद्धिमान् वा भवति ।

### सप्तमं पद्यम्

**अन्वयः** – मे, च, इष्टम्, स्यात्, इतरत्, च, न, स्यात्, एतत्कृते, कर्मविधिः, प्रवृत्तः, माम्, तु, इष्टम्, अनिष्टम्, च, न, भजेत्, इति, एतत्कृते, ज्ञानविधिः, प्रवृत्तः ।

**सरलार्थः** – मम कृते इष्टस्य प्रियस्य वा वस्तुनः प्राप्तिर्भवेत्, न तु अनिष्टस्य । एतदर्थमेव कर्मणो विधिर्वर्तते परन्तु मम कृते इष्टमनिष्टञ्च न स्यातामिति भावयुतस्य साधकस्य कृते शास्त्रेण ज्ञानविधिः समुपदिष्टोऽस्ति ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **प्रदत्तानि पदानि श्रुत्वा अनूच्चारयत**

अष्टौ, दीपयन्ति, प्रज्ञा, कौल्यम्, श्रुतम्, पराक्रमः, अबहुभाषिता, यथाशक्ति, कृतज्ञता, क्षिप्रम्, विजानाति, चिरम्, शृणोति, विज्ञाय, अर्थम्, भजते, असम्पृष्टः, व्युपयुङ्क्ते, परार्थे, प्रज्ञानम्, प्रथमम् ।

२. **पाठस्य तृतीयचतुर्थे पद्ये यथालयमनुवाचयत ।**

३. **अधस्तनं पद्यं कक्षायां युगपत् प्रवाचयत**

यस्मिन् यथा वर्तते यो मनुष्यः
तस्मिन् तथा वर्तितव्यं स धर्मः ।
मायाचारो मायया वर्तितव्यः
साध्वाचारः साधुना प्रत्युपेयः ॥

## ४. पाठाद् गृहीतानि अधस्तनानि पदानि प्रयुज्य एकैकं वाक्यं कक्षायां श्रावयत

अष्टौ, दीपयन्ति, प्रज्ञा, कौल्यम्, दमः, श्रुतम्, अबहुभाषिता, यथाशक्ति, कृतज्ञता, क्षिप्रम्, चिरम्, विज्ञाय, असम्पृष्टः ।

## ५. अनुवाचनपूर्वकं शिक्षकादधस्तनपद्यस्य अर्थं श्रुत्वा प्रदत्तानां प्रश्नानामुत्तराणि कथयत

आचारहीनं न पुनन्ति वेदाः
यद्यप्यधीताः सह षड्भिरङ्गैः ।
छन्दांस्येनं मृत्युकाले त्यजन्ति
नीडं शकुन्ता इव जातपक्षाः ॥

(क) वेदाः कीदृशं जनं न पुनन्ति ?

(ख) वेदाः आचारहीनं जनं किं कुर्वन्ति ?

(ग) वेदाः आचारहीनं जनं कदा त्यजन्ति ?

(घ) जातपक्षाः पक्षिणः किं त्यजन्ति ?

## ६. अधस्तनीं कथां सम्यग् उच्चार्य कथासन्देशं कथयत

क्वचित् तीर्थक्षेत्रे एक आश्रम आसीत् । आश्रमे एक विद्वान् महात्मा आसीत् । स आश्रमे गुरुकुलं सञ्चालयति स्म । महात्मनो विद्वत्ताविषयिणी कीर्तिः सर्वत्र प्रसृता आसीत् । तत्र आश्रमे समागत्य साधका महात्मनः सकाशात् प्रवचनं शृण्वन्ति स्म । महात्मनः शास्त्रज्ञानेन अनुभवेन च युक्तं सदुपदेशं श्रुत्वा ते महात्मानं भृशं प्रशंसन्ति स्म परन्तु महात्मने प्रशंसा न रोचते स्म । एकदा सायङ्काले महात्मा स्वशिष्यैः, अतिथिभिः साधकैश्च अनुगम्यमानो नदीसङ्गमं प्रति गतः । नदीतीरे प्राप्ते हि एकः साधकोऽकथयत्, “महात्मन् ! नद्यां यावद् जलबिन्दवो भवेयुः, भवदीयं ज्ञानमपि तावदेव भवेत् ।” किञ्चिद् विहस्य महात्मा स्वहस्तस्थं दण्डं नदीजले न्यमज्जयत् । दण्डं जलाद् बहिर्निष्कास्य । सोऽवदत्, “नद्या विपुलाद् जलौघाद् दण्डे यावज्जलं बहिरागच्छत्, तावदेव मम ज्ञानम् । समग्रं ज्ञानन्तु नद्या जलौघ इव विपुलमस्ति ।” महात्मनो युक्तिपूर्णं प्रत्युत्तरं श्रुत्वा स साधकः, सर्वे शिष्याश्च स्तब्धा अभवन् ।

## ७. उदाहरणानुसारेण कोष्ठकस्थपदेभ्योऽर्थबोधं विधाय प्रदत्तपदानामर्थं वदत

क्वचित्, विद्वान्, कीर्तिः, सर्वत्र, शास्त्रज्ञानेन, सदुपदेशः, भृशम्, प्रशंसा, एकदा, दण्डः, जलम्, जलौघः, विपुलम्, स्तब्धाः ।

उदाहरणम् : कुत्रचित् = क्वचित्

(क) बुद्धिमान् = ..........................  (ख) सर्वदिक्षु = ..........................

(ग) शास्त्रस्य बोधेन = ..........................	(घ) अत्यन्तम् = ..........................

(ङ) पानीयम् = ..........................	(च) वाग्रहिताः = ..........................

(छ) जलसमूहः = ..........................	(ज) लगुडः = ..........................

(झ) एकस्मिन् दिने = ..........................	(ञ) उत्तम उपदेशः = ..........................

(ट) महत् = ..........................	(ठ) यशः = ..........................

८. **अधस्तनानि वाक्यानि श्रुत्वा सत्यवाक्ये 'आम्' असत्यवाक्ये 'नहि' इति वदत**

(क) मितभाषिता जनं ख्यातिङ्गमयति । ( )

(ख) विद्वान् कार्यं विलम्बेन बुध्यते । ( )

(ग) शरीरं भोगसाधनं वर्तते । ( )

(घ) बुद्धिमान् जनोऽपृष्टोऽपि ब्रूते । ( )

(ङ) मनुष्यो देहयुक्तः सन् कर्मफलं भुङ्क्ते । ( )

(च) सज्जनेन सह साधुव्यवहारः करणीयः । ( )

९. **कीदृशेन जनेन सह कथं व्यवहर्तव्यम् ? पाठाधारेण सखिभिः सह विमृश्य वदत ।**

१०. **ज्ञानविधौ इष्टानिष्टयोरुभयोः त्यागः किमर्थम् ? शिक्षकेण सह चर्चां कुरुत ।**

## पठनम्

१. **सन्धिप्रक्रियां पठित्वा सखिभिस्सह विमृशत**

| **सन्धिपदम्** | **सन्धिविच्छेदः** | **सन्धिनाम** |
|---|---|---|
| कौल्यञ्च | कौल्यम्+च | व्यञ्जनसन्धिः |
| पराक्रमश्च | पराक्रमः+च | विसर्गसन्धिः |
| चार्थम् | च+अर्थम् | स्वरसन्धिः |
| नासम्पृष्टः | न+असम्पृष्टः | स्वरसन्धिः |
| यद्यच्छरीरेण | यत्+यत्+शरीरेण | व्यञ्जनसन्धिः |
| समुपाश्नुते | समुप+अश्नुते | स्वरसन्धिः |
| चाप्यायतनं | च+अपि+आयतनम् | स्वरसन्धिः |

| | | |
|---|---|---|
| सद्भिर्मनुष्यैः | सद्भिः+मनुष्यैः | विसर्गसन्धिः |
| वृत्तिरभीतवासः | वृत्तिः+अभीतवासः | विसर्गसन्धिः |
| षड् जीवलोकस्य | षट्+जीवलोकस्य | व्यञ्जनसन्धिः |
| यो मनुष्यः | यः+मनुष्यः | विसर्गसन्धिः |
| स धर्मः | सः+धर्मः | विसर्गसन्धिः |
| मायाचारो मायया | मायाचारः+मायया | विसर्गसन्धिः |
| साध्वाचारः | साधु+आचारः | स्वरसन्धिः |
| प्रत्युपेयः | प्रति+उपेयः | स्वरसन्धिः |
| नावजानाति | न+अवजानाति | स्वरसन्धिः |
| युक्तो रिपुम् | युक्तः+रिपुम् | विसर्गसन्धिः |
| यो विक्रमते | यः+विक्रमते | विसर्गसन्धिः |
| स धीरः | सः+धीरः | विसर्गसन्धिः |
| स्यादितरच्च | स्याते+इतरत्+च | व्यञ्जनसन्धिः |
| त्वनिष्टम् | तु+अनिष्टम् | स्वरसन्धिः |
| मां भजेत | माम्+भजेत | व्यञ्जनसन्धिः |

२. **अधस्तनयोः पद्ययोः कक्षायां सामूहिकवाचनं कुरुत**

यद्यच्छरीरेण करोति कर्म
शरीरयुक्तः समुपाश्नुते तत् ।
शरीरमेवायतनं सुखस्य
दुःखस्य चाप्यायतनं शरीरम् ॥

आरोग्यमानृण्यमविप्रवासः
सद्भिर्मनुष्यैः सह सम्प्रयोगः ।
स्वप्रत्यया वृत्तिरभीतवासः
षड् जीवलोकस्य सुखानि राजन् ॥

## ३. श्रवणपाठं पठित्वा प्रश्नान् उत्तरयत

ऐतिहासिकं काव्यमस्ति महाभारतम् । एतस्य रचयिता महर्षिर्व्यास आसीत्, लेखकश्च श्रीगणेश इति श्रूयते । एतद्विषये गीतांशश्च प्रसिद्धोऽस्ति यद्- 'व्यासविरचिता गणेशलिखिता महाभारतपुण्यकथा' इति । ग्रन्थोऽयं लक्षश्लोकात्मकः । अत्यन्तं विपुलतया इदं काव्यं विश्वस्य बृहत्तरमहाकाव्यमिति निगद्यते ।

ग्रन्थेऽस्मिन् अष्टादश पर्वाणि सन्ति । विश्वप्रसिद्धा भगवद्गीता च एतस्यैव काव्यस्य लघुरंशः । भगवद्गीता अस्य अष्टादशसु पर्वसु भीष्मपर्वान्तर्गता वर्तते । महाभारते चतुर्विधानां पुरुषार्थानां समग्रेऽपि विषये ज्ञानं निहितमस्तीति प्रसिद्धिरस्ति । ग्रन्थेऽस्मिन् यदस्ति, तदन्यत्रापि प्राप्यते परन्तु यन्नास्ति तन्नहि क्वचिदन्यत्र प्राप्येत इति महाभारतस्य विषये सूक्तिश्च यथा-

**अर्थे धर्मे च कामे च मोक्षे च भरतर्षभ ।**

**यदिहास्ति तदन्यत्र यन्नेहास्ति न तत् क्वचित् ॥**

(क) महाभारतस्य रचयिता कः ?

(ख) महाभारते कति पर्वाणि सन्ति ?

(ग) का च महाभारतस्यैव लघुरंशः ?

(घ) महाभारते कति श्लोकाः सन्ति ?

(ङ) महाभारतं कीदृशं काव्यमस्ति ?

(च) महाभारतस्य लेखकः कः श्रूयते ?

(छ) महाभारते यन्नास्ति तदन्यत्र प्राप्येत वा ?

(ज) भगवद्गीता महाभारतस्य कस्मिन् पर्वणि वर्तते ?

(झ) महाभारतं किमर्थं विश्वस्य बृहत्तरमहाकाव्यमिति निगद्यते ?

(ञ) महाभारते कतिविधानां पुरुषार्थानां विषये ज्ञानं निहितमस्ति ?

## ४. श्रवणपाठस्य पठनानन्तरं महाभारतस्य विषये चत्वारि वाक्यानि कथयत ।

## ५. श्रवणपाठस्य द्वितीयमनुच्छेदं पठित्वा कक्षायां श्रावयत ।

## ६. श्रवणपाठस्याधारेण रिक्तस्थानस्य पदानि चिनुत

............ धर्मे च ............ च मोक्षे ........ भरतर्षभ ।

यदिहास्ति ........... यन्नेहास्ति ..... तत् ......... ॥

## लेखनम्

१. **अधस्तनानां पदानामशुद्धीः निराकुरुत**

सुदूर्बलम्, कञ्चीत्, अवजानति, यूक्तः, बुद्धीपुर्वम्, रीपुम्, वीग्रहम्, विक्रमाते, धिरः, ईष्टम्, कर्मवीधिः, अनीष्टम् ।

२. **अधस्तनानां पदानामर्थं लिखत**

आरोग्यम्, आनृण्यम्, अविप्रवासः, सद्भिः, सम्प्रयोगः, स्वप्रत्यया, वृत्तिः, अभीतवासः, जीवलोकस्य, यथा, वर्तते, वर्तितव्यम्, मायाचारः, मायया, वर्तितव्यः, साध्वाचारः, साधुना, प्रत्युपेयः ।

३. **पाठस्थपद्येभ्यः कानिचन पञ्च समस्तपदानि अन्विष्य अत्र लिखत ।**

यथा– शरीरयुक्तः

४. **पाठस्य पञ्चमस्य श्लोकस्य श्रुतलेखनं कुरुत ।**

५. **पाठस्य श्लोकान् भावार्थान् च पठित्वा प्रश्नान् उत्तरयत**

(क) कः धर्मः ?

(ख) कीदृशो जनो धीरो भवति ?

(ग) जनस्य अष्टौ सद्गुणाः के ?

(घ) शरीरं कयोर्भोगसाधनं वर्तते ?

(ङ) कः कार्यं झटिति अवबुध्यते ?

(च) कपटयुक्तेन सह कथं व्यवहारः करणीयः ?

(छ) विद्वान् किमर्थं बहुकालं यावत् आकर्णयति ?

(ज) मनुष्यः केन युक्तः सन् शुभाशुभकर्मणां फलं भुङ्क्ते ?

६. **पद्यखण्डान् परस्परं मेलयत**

| **खण्डः 'क'** | **खण्डः 'ख'** |
|---|---|
| क्षिप्रं विजानाति | व्युपयुङ्क्ते परार्थे |
| विज्ञाय चार्थम् | प्रथमं पण्डितस्य |

| | |
|---|---|
| नासम्पृष्टो | चिरं शृणोति |
| तत्प्रज्ञानम् | भजते न कामात् |
| यद्यच्छरीरेण | सुखस्य |
| शरीरयुक्तः | शरीरम् |
| शरीरमेवायतनम् | करोति कर्म |
| दुःखस्य चाप्यायतनम् | समुपाश्नुते तत् |
| यस्मिन् यथा वर्तते | वर्तितव्यः |
| तस्मिन् तथा वर्तितव्यम् | प्रत्युपेयः |
| मायाचारो मायया | यो मनुष्यः |
| साध्वाचारः साधुना | स धर्मः |
| इष्टञ्च मे | न मां भजेते- |
| एतत्कृते | ज्ञानविधिः प्रवृत्तः |
| इष्टं त्वनिष्टं च | स्यादितरच्च न स्याद् |
| त्येतत्कृते | कर्मविधिः प्रवृत्तः |

७. **पाठाधारेण मञ्जूषायां प्रदत्तानि विपरीतार्थपदानि चित्वा लिखत**

यथा– साध्वाचारः - मायाचारः

दोषाः - ................

आदानम् - ................

लघु - ................

अन्तिमम् - ................

दुःखम् - ................

सुबलम् - ................

मिलापः - ................

अनिष्टम् - ................

निवृत्तः - ................

**मञ्जूषा**

दानम्, प्रथमम्, सुदुर्बलम्, इष्टम्, गुणाः, चिरम्, सुखम्, विग्रहः, प्रवृत्तः

## ८. पदानि प्रयुज्य वाक्यं रचयत

पण्डितस्य, शरीरयुक्तः, आयतनम्, आरोग्यम्, मनुष्यैः, सम्प्रयोगः, वृत्तिः, जीवलोकस्य, मायाचारः, साध्वाचारः, सुदुर्बलः, अवजानाति, रिपुः, विग्रहः, इष्टम् ।

## ९. प्रदत्तेषु पुंलिङ्गि-स्त्रीलिङ्गि-नपुंसकलिङ्गि-पदानि पृथक्कृत्य अधोनिर्दिष्टायां संरचनायां लिखत

कर्म, शरीरम्, वृत्तिः, सुखानि, धर्मः, साध्वाचारः, रिपुः, विग्रहः, बहुभाषिता, काले, धीरः, इष्टम्, ज्ञानविधिः ।

| पुंलिङ्गिपदानि | स्त्रीलिङ्गिपदानि | नपुंसकलिङ्गिपदानि |
|---|---|---|
| ................. | ..................... | ....................... |
| ................. | ..................... | ....................... |
| ................. | ..................... | ....................... |
| ................. | ..................... | ....................... |
| ................. | ..................... | ....................... |

## १०. पाठस्य पद्यानां व्यवहारोपयोगेन प्राप्यस्य लाभस्य विषये कक्षायां विमर्शं कृत्वा वाक्यसूचीं निर्मात ।

## व्याकरणानुशीलनम्

धातूनां प्रकारत्रयं भवति- परस्मैपदी, आत्मनेपदी, उभयपदी च । एतस्याधारेण क्रियापदं द्विविधं भवति । यथा–

**पाठे प्रयुक्तो वृत्-धातुः, लट्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | वर्तते | वर्तेते | वर्तन्ते |
| मध्यमः | वर्तसे | वर्तेथे | वर्तध्वे |
| उत्तमः | वर्ते | वर्तावहे | वर्तामहे |

**लङ्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अवर्तत | अवर्तेताम् | अवर्तन्त |
| मध्यमः | अवर्तथाः | अवर्तेथाम् | अवर्तध्वम् |
| उत्तमः | अवर्ते | अवर्तावहि | अवर्तामहि |

**लृट्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | वर्तिष्यते | वर्तिष्येते | वर्तिष्यन्ते |
| मध्यमः | वर्तिष्यसे | वर्तिष्येथे | वर्तिष्यध्वे |
| उत्तमः | वर्तिष्ये | वर्तिष्यावहे | वर्तिष्यामहे |

**पाठे प्रयुक्तः श्रु-धातुः, लट्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | शृणोति | शृणुतः | शृण्वन्ति |
| मध्यमः | शृणोषि | शृणुथः | शृणुथ |
| उत्तमः | शृणोमि | शृणुवः | शृणुमः |

**लङ्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | अशृणोत् | अशृणुताम् | अशृण्वन् |
| मध्यमः | अशृणोः | अशृणुताम् | अशृणुत |
| उत्तमः | अशृणवम् | अशृणुव | अशृणुम |

**लृट्लकारः**

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमः | श्रोष्यति | श्रोष्यतः | श्रोष्यन्ति |
| मध्यमः | श्रोष्यसि | श्रोष्यथः | श्रोष्यथ |
| उत्तमः | श्रोष्यामि | श्रोष्यावः | श्रोष्यामः |

२. उदाहरणानुसारेण कृ-भज्-सेव्धातूनां लट्-लङ्-लृट्लकाराणां रूपाणि लिखत ।

३. तालिकायाः पदानां संयोजनेन वाक्यानि रचयत

| कर्ता | कर्म | क्रिया |
|---|---|---|
| वयम् | भगवत्कथाम् | करोति |
| भक्ताः | दीनान् | भजन्ते |
| वीरः | अध्ययनम् | दीपयसि |
| छात्रा | शत्रून् | सेवामहे |
| शिष्याः | दीपम् | शृण्वन्ति |
| त्वम् | गुरुम् | जयति |

४. पाठे प्रयुक्तानां धातूनां लकारत्रयस्य क्रियापदानि प्रयुज्य यथेच्छं विंशतिर्वाक्यानि रचयत ।

## रचनात्मकोऽभ्यासः

१. पुस्तकालयस्य अन्तर्जालकस्य वा प्रयोगं विधाय महाभारतस्य, रामायणस्य च परिचयात्मकं अधस्तननिदर्शनात्मकं विवरणं निर्माय कक्षायां प्रदर्शयत ।

ग्रन्थनाम :

ग्रन्थस्य रचयिता :

ग्रन्थस्य भागाः (सर्गाः, पर्वाणि वा) :

श्लोकसङ्ख्या :

काश्चन प्रसिद्धाः पञ्च कथाः : १)

२)

३)

४)

५)

कानिचन प्रसिद्धानि पात्राणि : १)....

२) ......

अस्य ग्रन्थस्य समाजे प्रभावः :

# आरोग्यधनम्

मानवः सुखार्थी प्राणी अस्ति । स सुखाय एव प्रतिदिनं नैकविधानि कार्याणि करोति । सुखाभिलाषेण मानवो धनं, विद्यां मित्राणि च अर्जयति । निष्कर्ष एतादृशो वर्तते यत् स यत् करोति तस्य मूलं प्रयोजनं सुखस्य प्राप्तिरेव भवति ।

किं नाम सुखं कथं चैतद् अवाप्यते इति विषयो बहोः कालाद् विमृश्यमानो वर्तते । व्यक्तेर्दर्शन-चिन्तनानुभवानुसन्धानैः सुखस्य स्वरूपं वर्णितं प्राप्तेरुपायश्च निर्दिष्टोऽस्ति । इत्थं सदपि आरोग्यं सर्वोत्तमं सुखं वर्तते । एतच्च सन्तुलितजीवनेन अवाप्यते । महर्षिभिरपि उक्तम् - 'धर्मार्थकाममोक्षाणामारोग्यमूलमुत्तमम्' इति ।

आरोग्यस्य प्राप्तये विविधोपायाः प्रचलिताः सन्ति । चिकित्साविज्ञानेन जगति महती उपलब्धिः प्रदर्शिता वर्तते । असाध्यरोगाणां शमनमपि सम्प्रति सम्भवं भवति । अत्र आयुर्वेदोपचारविधिरुत्तमो मन्यते ।

आयुर्वेदः प्राचीनं मानवोपयोगि विज्ञानं वर्तते । आयुर्वेदोऽथर्ववेदस्य उपवेदस्य रूपेण परिचितोऽस्ति । अथर्ववेदे रोगाणां निदानस्य, उपचारस्य औषधानां च विषये यत्र तत्र चर्चास्ति । अस्यैव अथर्ववेदस्य उपवेद आयुर्वेदो विद्यते । आयुर्वेद आयुषः संवर्धनस्य, आरोग्यसाधनस्य स्वास्थ्यरक्षायाश्च शास्त्रं वर्तते । आयुर्वेदस्य प्रयोजनद्वयं महर्षिभिरुक्तम् - रोगाणां प्रशमनम्, रोगाणामनुद्भवाय पूर्वसावधानता च । पाश्चात्त्याः सम्प्रति उपचारस्य अपेक्षया निरोध एव उत्तम इति यद् वदन्ति तद् आयुर्वेदशास्त्रे शताब्दीनां पूर्वमुक्तमासीत् । आधुनिकचिकित्साविज्ञानस्य प्राचीनाधार आयुर्वेद एव वर्तते । आयुर्वेदस्याष्टौ अङ्गानि भवन्ति । प्रथमं शल्यतन्त्रमाधुनिकशल्यक्रियाविज्ञानस्य आधारो वर्तते ।

एवमेव द्वितीये शालाक्यविज्ञाने नेत्र-नासिका-कर्ण-शिरोमुखानां रोगोपचारविधिरस्ति । तृतीयायां कायचिकित्सायां पाचनप्रक्रियाया अध्ययनं विधीयते । चतुर्थ्यां भूत-विद्यायामाधुनिकचिकित्साविज्ञानं न विश्वसिति । अनया विधया भूतप्रेतादिभिरुत्पन्नायाः शारीरिकविकृतेर्निवारणं विधीयते स्म । पञ्चमे कौमारभृत्ये शिशूनां भरण-पोषण-रोगोपशमनादिकार्याणि विधीयन्ते । षष्ठे अगदतन्त्रे विषनाशस्य उपाया निर्दिश्यन्ते । सप्तमे रसायनतन्त्रे शरीरे सप्तधातूनां स्थिरीकरणं नवीकरणं च क्रियेते । अष्टमे वाजीकरणे मानवस्य बलवीर्यादीनां क्रिया वर्णिताऽस्ति । आयुर्वेदस्य चरक-सुश्रुत-काश्यप-संहितासु अङ्गानां रोगोपशमनविधीनां च विस्तरेण चर्चा विहिता वर्तते ।

आयुर्वेदोपचारविधौ काष्ठादि-रसादि-भस्मादीनि औषधरूपेण प्रयुज्यन्ते । वृक्ष-वनस्पतीनां मूल-पत्र-वल्कलानां चूर्णरसादीन् निर्माय विहिते एतस्मिन् उपचारे हानिकारकस्य रासायनिकपदार्थस्य संयोजनं न भवति । अनेन शरीरस्य कस्मिन्नपि भागे पार्श्वप्रभावो नोत्पद्यते । रोगाणां स्थायि समाधानं च भवति ।

आयुर्वेदौषधानां प्रभावः सेवनस्य अनुक्षणमेव सक्रियो न भवति। एतदेव कारणमस्ति यद् आधुनिकचिकित्साविज्ञानस्य समर्थका आयुर्वेदं रथयात्राम् 'एलोपेथी' इति नामधेयामाधुनिक- चिकित्सापद्धतिं विमानयात्रां च निगदन्ति । रथयात्रा विलम्बेन समाप्यते तथापि अधिकसुरक्षिता भवति ।

आयुर्वेदोपचारपद्धतिरुत्तमा हानिरहिता सत्यपि जटिलासु शिरा-मस्तिष्क-हृदयशल्यक्रियासु आधुनिक-पद्धतिरधिका उपयोगिनी भवति । शास्त्रीयज्ञानस्य सम्यक् प्रयोगाभ्यासं विना आयुर्वेदस्य परिणामश्च अपेक्षितो भवितुं न शक्नोति । तदपि असौ उपचारविधिर्लोकप्रियो जायमानो वर्तते । पाश्चात्त्यानामत्याधुनिकसेवासौविध्यसहितानां राष्ट्राणां नागरिकाश्च आयुर्वेदं प्रति जिज्ञासवो दृश्यन्ते। ते आयुर्वेदपद्धत्या स्वीयमुपचारमिच्छन्ति। विकसितदेशेषु स्थापितानि आयुर्वेदोपचारकेन्द्राणि आयुर्वेदस्य विश्वासं, लोकप्रियतां हिताधायकत्वं च प्रमाणयन्ति ।

नेपालेऽपि आयुर्वेदस्य प्रयोगाभ्यासौ चिरकालाद् विधीयमानौ स्तः । अत्र आधुनिकचिकित्सापद्धतेः प्रारम्भात् प्राग् आयुर्वेद एव उपचारस्य निर्विकल्पो विधिरासीत् । सम्प्रति त्रिभुवनविश्वविद्यालये नेपालसंस्कृतविश्वविद्यालये च आयुर्वेदस्य अध्ययनाध्यापनानुसन्धानकार्याणि सञ्चाल्यमानानि सन्ति । नैजक्षेत्रेऽपि आयुर्वेदस्य प्रचलनं वर्धमानं दृश्यते ।

अन्यद् धनं याति आयाति च, परमारोग्यधनं यदा नश्यति तदा तस्य प्रत्यावर्तनं सरलं न भवति । आरोग्यधनेन सह मानवस्य सुखमपि दूरं गच्छति । ततो मानवो दुःखमवाप्नोति । व्याधिविरहितं जीवनमेव सुखस्य कारणं भवति । प्राचीनैः ऋषिमहर्षिभिः सुदीर्घाभ्यासानुभवैराविष्कृतां मौलिकायुर्वेदोपचारपद्धतिमवलम्ब्य जीवने सारल्येन सुलभतया आरोग्यधनं रक्षितुं शक्यते ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **शिक्षकात् पाठस्य वाचनं श्रुत्वा सर्वे छात्राः क्रमेण अनुच्छेदं विभज्य सस्वरवाचनं कुरुत ।**

२. **पाठे प्रयुक्तानि दीर्घतमानि समस्तपदानि अन्विष्य तेषां शुद्धोच्चारणं कुरुत ।**

३. **सन्धिनामानि वदत**

सुखाभिलाषेण, एतच्च, रोगोपशमनम्, एतदेव, भवतीति, क्षेत्रेऽपि, अभ्यासानुभवैः, ततो मानवः ।

४. **शब्दार्थान् कथयत**

मूलप्रयोजनम्, सन्तुलितजीवनम्, उपलब्धिः, आयुषः, निरोधः, प्रयुज्यन्ते, निर्माय, विलम्बेन, प्रचलनम्, दूरम्, ततः, व्याधिविरहितम् ।

## ५. अधोलिखितानां विशेष्याणां विशेषणानि अन्विष्य श्रावयत

प्राणी, सुखम्, उपलब्धिः, विज्ञानम्, रासायनिकपदार्थस्य, समाधानम्, जीवनम् ।

## ६. सङ्क्षेपेण उत्तरयत

(क) मानवः कीदृशः प्राणी अस्ति ?

(ख) सर्वोत्तमं सुखं किमस्ति ?

(ग) चिकित्साविज्ञानेन का प्रदर्शिता वर्तते ?

(घ) अथर्ववेदे केषां चर्चास्ति ?

(ङ) आयुर्वेदस्य प्रयोजनद्वयं किम् ?

(च) कायचिकित्सायां किं क्रियते ?

(छ) आयुर्वेदोपचारविधौ कस्य संयोजनं न भवति ?

(ज) आयुर्वेदं प्रति के जिज्ञासवो दृश्यन्ते ?

(झ) एतस्या उक्तेः क आशयः ?

‘धर्मार्थकाममोक्षाणामारोग्यमूलमुत्तमम्’ इति ।

(ञ) आरोग्यधनं कथं रक्षितुं शक्यते ?

# पठनम्

## १. सन्धिप्रक्रियां पठित्वा सखिभिस्सह विमृशत

| सन्धिपदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| सुखार्थी | सुख +अर्थी | स्वरसन्धिः |
| नैकविधानि | न + एकविधानि | स्वरसन्धिः |
| प्राप्तिरेव | प्राप्तिः +एव | विसर्गन्धिः |
| चैतत् | च + एतत् | स्वरसन्धिः |
| प्राप्तेरुपायश्च | प्राप्तेः + उपायः + च | विसर्गसन्धिः |
| सदपि | सत् + अपि | व्यञ्जनसन्धिः |
| पूर्वमुक्तमासीत् | पूर्वम्+ उक्तम् + आसीत् | वर्णसंयोगः |
| नोत्पद्यते | न + उत्पद्यते | स्वरसन्धिः |

| | | |
|---|---|---|
| आयुर्वेदोपचारः | आयुर्वेद + उपचारः | स्वरसन्धिः |
| विधिरासीत् | विधिः + आसीत् | विसर्गसन्धिः |
| प्रत्यावर्तनम् | प्रति + आवर्तनम् | स्वरसन्धिः |

२. **अधोलिखितं गद्यांशं पठित्वा प्रश्नान् उत्तरयत**

जगदिदं बहूनां पदार्थानां राशिरूपं वर्तते । वस्तु-प्राणि-पदार्थानां संहतिरेव ब्रह्माण्डो वर्तते । अत्र किमौषधं किञ्च विषमिति निर्धारयितुं कठिनं वर्तते । किञ्चिद् वस्तु औषधमयं दृश्यते परं यथार्थतो विषं भवति । एवञ्च कोऽपि पदार्थो विषमयोऽनुमीयते परं तदौषधं भवति । पृथिव्यां यानि तृण-मूल-पत्र-वल्कल-कुसुमानि सन्ति तानि औषधानि एव भवन्तीति कथनमस्ति । तेषामभिज्ञानमुचितः प्रयोगश्च आवश्यकौ भवतः । इयं प्रकृतिः सर्वौषधिशाला इव प्रतिभाति । एतत् प्रकृतिज्ञा एव जानन्ति । प्रकृतिं ज्ञात्वा सञ्चलितो मानव एव स्वस्थो भवतीति आयुर्विज्ञानविदो वदन्ति ।

(क) जगत् कीदृशं वर्तते ?

(ख) जगति कठिनं किमस्ति ?

(ग) पृथिव्या औषधानि कानि ?

(घ) प्रकृतिः कीदृशी प्रतिभाति ?

(ङ) प्रकृतिज्ञाः किं जानन्ति ?

(च) कीदृशो मानवः स्वस्थो भवति ?

३. **अधोलिखितं गद्यांशं पठित्वा शीर्षकं निर्धारयत**

मानवशरीरे विभिन्नानि अङ्गानि सन्ति । तेषां कार्यमपि भिन्नं भिन्नं वर्तते । एतेषु मुखं प्रधानमङ्गं वर्तते । मुखस्य बाह्यभागे ओष्ठ-नासिका-कपोल-ललाटादीनि अङ्गानि भवन्ति । आभ्यन्तरभागे च जिह्वादन्तादयो भवन्ति । यदा मानवो जायते तदा दन्ता नोद्भवन्ति । जन्मनः केभ्यश्चिद् वर्षेभ्योऽनन्तरमेव एते उद्भवन्ति । दर्शने कार्येषु च दन्ताः कठोरा भवन्ति । दन्तानां वृद्धावस्थायां स्वयमेव उन्मूलनं च जायते । अपरत्र जिह्वा वर्तते । इयं जन्मकालादारभ्य आजीवनं मुखे तिष्ठति । वार्धक्ये दन्तानामिव एतस्या उन्मूलनं न जायते । जिह्वा कोमला च भवति । दन्ता जिह्वा च मुखे सहैव तिष्ठन्ति परं मानवस्य अवस्थाया अनुसारेण दन्तानां जिह्वायाश्च आयुर्भिन्नं भवति । एतत् कथमिति चिन्तनीयम् ।

४. **अधोलिखितमनुच्छेदं पठित्वा महत्त्वपूर्णानि त्रीणि सूत्राणि अन्विषत**

चतुर्षु वेदेषु अथर्ववेदे बहवो व्यावहारिकविषयाः प्रतिपादिताः सन्ति । तत्र औषधानां सम्बन्धे रोचकं वर्णनं वर्तते । एतेषु अपामार्गनामकमौषधं तृष्णा-बुभक्षयोर्दूरकारकं मन्यते । शिशूनां कृतेऽपि एतद् अधिकं लाभदायकमुक्तम् । कृमिनाशाय सूर्यकिरणस्य उपयोगश्चर्चितोऽस्ति । शरीरस्य रक्तसञ्चारस्य

विषयेऽपि वेदेऽस्मिन् विशेषेण वर्णितम् । एतः विषयः पाश्चात्यजगति सप्तदशशताब्द्यामेव अधिगतम् । धर्मस्य विषये 'वेदाः प्रमाणम्' इति यदुच्यते तद् आयुर्विज्ञानस्य विषयेऽपि वक्तुं शक्यते । वेदः शास्त्राणां शास्त्रमिति कथ्यते ।

## लेखनम्

### १. कोष्ठकाद् उचितपदं विचित्य रिक्तस्थानं पूरयत

(क) सर्वेषां कार्याणां मूलप्रयोजनं सुखस्य ....... वर्तते । (प्राप्तिः/दर्शनम्)

(ख) ........ सर्वोत्तमं सुखं मन्यते । (सफलता/आरोग्यम्)

(ग) आयुर्वेदः ...... उपवेदो वर्तते । (अथर्ववेदस्य/सामवेदस्य)

(घ) आयुर्वेदस्य अष्टौ ..... भवन्ति । (अङ्गानि/उपचाराः)

(ङ) आयुर्वेदोपचारपद्धतिः ...... वर्तते । (सुरक्षिता/आधुनिकी)

(च) आरोग्यधनं सदैव ........ । (दर्शनीयम्/रक्षणीयम्)

### २. पदानि प्रयुज्य वाक्यं रचयत

प्रयोजनम्, अवाप्यते, उत्तमम्, असाध्यरोगाः, शमनम्, परिचितः, पाश्चात्याः, विधिः, नवीकरणम्, पार्श्वप्रभावः, शल्यक्रिया, जिज्ञासुः, प्रमाणयन्ति, सारल्येन, शक्यते ।

### ३. परस्परं मेलयत

| 'अ' खण्डः | 'आ' खण्डः |
| --- | --- |
| (क) आरोग्यम् | (क) सुखस्य कारणम् |
| (ख) आयुर्वेदः | (ख) अत्यावश्यकम् |
| (ग) आरोग्यधनस्य प्रत्यावर्तनम् | (ग) विषनाशोपायवर्णनम् |
| (घ) अगदतन्त्रम् | (घ) सरलं नास्ति |
| (ङ) रोगाणां शमनम् | (ङ) आरोग्यशास्त्रम् |
| (च) व्याधिरहितं जीवनम् | (च) सर्वोत्तमं सुखम् |

### ४. समीचीनकथने 'आम्', असमीचीनकथने 'न' इति च लिखत

(क) सुखस्य विषयः चिराय विमृश्यमानो वर्तते । (          )

(ख) असाध्यरोगाणां शमनं सम्भवं नास्ति । (      )

(ग) चिकित्सकैरायुर्वेदस्य प्रयोजनमुक्तम् । (   )

(घ) रोगोत्पत्तौ उपचारात् पूर्वसावधानता शोभनतरा भवति । (   )

(ङ) आयुर्वेदे रासायनिकपदार्थानां प्रयोगोऽत्यावश्यको भवति । (   )

(च) नेपाले आयुर्वेदस्य अध्ययनं न भवति । (   )

### ५. विपरीतार्थकशब्दान् मेलयत

| **'अ' खण्डः** | **'आ' खण्डः** |
|---|---|
| (क) दीर्घायुष्यम् | (क) लाभः |
| (ख) आरोग्यम् | (ख) आधुनिकः |
| (ग) हानिः | (ग) अल्पायुष्यम् |
| (घ) उत्तमम् | (घ) रुग्णता |
| (ङ) प्राचीनः | (ङ) अधमम् |

## व्याकरणानुशीलम्

### १. अधस्तनानि शब्दरूपाणि पठत

**प्राणिन्–शब्दः (पुंलिङ्गे)**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | प्राणी | प्राणिनौ | प्राणिनः |
| द्वितीया | प्राणिनम् | प्राणिनौ | प्राणिनः |
| तृतीया | प्राणिना | प्राणिभ्याम् | प्राणिभिः |
| चतुर्थी | प्राणिने | प्राणिभ्याम् | प्राणिभ्यः |
| पञ्चमी | प्राणिनः | प्राणिभ्याम् | प्राणिभ्यः |
| षष्ठी | प्राणिनः | प्राणिनोः | प्राणिनाम् |
| सप्तमी | प्राणिनि | प्राणिनोः | प्राणिषु |
| सम्बोधनम् | हे प्राणी ! | हे प्राणिनौ ! | हे प्राणिनः ! |

**धनिन्-शब्दः (नपुंसकलिङ्गे)**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | धनि | धनिनी | धनीनि |
| द्वितीया | धनि | धनिनी | धनीनि |
| तृतीया | धनिना | धनिभ्याम् | धनिभिः |
| चतुर्थी | धनिने | धनिभ्याम् | धनिभ्यः |
| पञ्चमी | धनिनः | धनिभ्याम् | धनिभ्यः |
| षष्ठी | धनिनः | धनिनोः | धनिनाम् |
| सप्तमी | धनिनि | धनिनोः | धनिषु |
| सम्बोधनम् | हे धनि ! | हे धनिनौ ! | हे धनिनः ! |

**मानिनी-शब्दः (स्त्रीलिङ्गे)**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | मानिनी | मानिन्यौ | मानिन्यः |
| द्वितीया | मानिनीम् | मानिन्यौ | मानिनीः |
| तृतीया | मानिन्या | मानिनीभ्याम् | मानिनीभिः |
| चतुर्थी | मानिन्यै | मानिनीभ्याम् | मानिनीभ्यः |
| पञ्चमी | मानिन्याः | मानिनीभ्याम् | मानिनीभ्यः |
| षष्ठी | मानिन्याः | मानिन्योः | मानिनीनाम् |
| सप्तमी | मानिन्याम् | मानिन्योः | मानिनीषु |
| सम्बोधनम् | हे मानिनि ! | हे मानिन्यौ ! | हे मानिन्यः ! |

२. **प्राणिन्-शब्दस्य रूपैर्वाक्यानि पूरयत**

(क) संसारे विविधाः .......... सन्ति ।

(ख) मानवो विवेकशीलः ........ अस्ति ।

(ग) .......... विचित्रता वर्तते ।

(घ) ............ मनःसु भिन्ना विचारा भवन्ति ।

३. **रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ब्रह्मचारी | ......... | ........... |
| द्वितीया | .......... | ....... | ब्रह्मचारिणः |
| तृतीया | ......... | ब्रह्मचारिभ्याम् | ........ |
| चतुर्थी | ब्रह्मचारिणे | ........... | ........ |
| पञ्चमी | ............ | ............... | ब्रह्मचारिभ्यः |
| षष्ठी | ........... | ब्रह्मचारिणोः | .......... |
| सप्तमी | ब्रह्मचारिणि | ......... | ........ |
| सम्बोधनम् | ........... | ......... | हे ब्रह्चारिणः ! |

४. **प्रहरिन्–शब्दस्य रूपावलीं लिखत ।**

५. **पदानि प्रयुज्य वाक्यानि रचयत**

ब्रह्मचारिणः, प्राणिभिः, ज्ञानिनाम्, धनिभ्यः, मानिनी ।

**रचनात्मकोऽभ्यासः**

१. **शैत्याक्रमणस्य प्रारम्भिकावस्थायां स्वगृहे कीदृश उपचारविधिरवलम्ब्यते ? सङ्क्षेपेण विलिख्य शिक्षकं मित्राणि च श्रावयत ।**

२. **विद्यालये प्राथमिकोपचारवस्तूनां स्थापनस्य विषये परस्परं विमृश्य तेषां सम्यग् व्यवस्थापनाय कार्यं कुरुत ।**

३. **स्वसमुदायस्य प्रौढप्रौढाः आयुर्वेदिकानि अत्याधुनिकानि वा कीदृशानि औषधानि सेवन्ते ? अभिभावकस्य सहायतया सङ्क्षिप्तं विवरणं निर्मात ।**

४. **सूक्त्योः व्याख्यां कुरुत**

(क) आरोग्यमूलमुत्तमम् ।

(ख) शरीरं व्याधिमन्दिरम् ।

# महाकाव्यपद्यानि

क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।
अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥१॥
स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
सदानुऽकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥२॥
तथाऽपि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः ॥३॥
प्रलीनभूपालमपि स्थिरायति प्रशासदावारिधि मण्डलं भुवः ।
स चिन्तयत्येव भियस्त्वदेष्यतीरहो दुरन्ता बलवद्विरोधिता ॥४॥
अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।
अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥५॥

(किरातार्जुनीयमहाकाव्यस्य प्रथमसर्गात्)

१.

### अन्वयः

(हे) नृप, ! क्रियासु, युक्तैः, अनुजीविभिः, चारचक्षुषः, प्रभवः, न वञ्चनीयाः । अतः, असाधु, वा साधु, क्षन्तुम्, अर्हसि । हितं, मनोहारि, च, वचः, दुर्लभं (भवति) ।

### पर्यायः

(हे) नृप ! = नरेश ! (युधिष्ठिर), क्रियासु = कर्तव्यकर्मसु, युक्तैः = नियुक्तैः, अनुजीविभिः = अनुचरैः, चारचक्षुषः = चारनयनाः, प्रभवः = स्वामिनः, न वञ्चनीयाः = न प्रतारणीयाः । अतः = अस्मात्कारणात्, असाधु = अप्रियम्, वा साधु = प्रियं (भवेत् तत्), क्षन्तुम् = सोढुम्, अर्हसि = योग्योऽसि । हितम् = कल्याणकारकम्, मनोहारि च = सद्यः प्रियं च, वचः= वचनम्, दुर्लभम् = दुष्प्रयोज्यम् (भवति) ।

### समासः

चरन्तीति चराः, चरा एव चाराः, चारा एव चक्षूंषि येषां ते चारचक्षुषः । मनो हरतीति मनोहारि । दुःखेन लभ्यते यत्तद् दुर्लभम् ।

**कोशः**

**नृपः** चक्रवर्ती सार्वभौमो नृपोऽन्यो मण्डलेश्वरः ।

**प्रभुः** अधिभूर्नायको नेता प्रभुः परिवृढोऽधिपः ।

**अनुजीवी** सेवकार्थ्यनुजीविन इति चामरः ।

**सरलार्थः**

सविश्वासं कार्यार्थं नियुक्तैः सेवकैः प्रभवे सर्वथा सत्यमेव वचो वाच्यम् । प्रभुरपि प्रियं वाप्रियं सदपि सेवकस्य वचनं श्रोतव्यं सोढव्यञ्च । यतो हि हितकारकं मनःप्रियञ्च वचनं दुर्लभं भवति ।

**भावार्थः**

प्रभवः सर्वतः पश्यन्ति जानन्ति च । तेभ्यः सेवकैः सदैव सत्यं निवेद्यं न तु प्रियमसत्यम् । हितकारकं मनोहारि च वचो दुर्लभमिति मत्वा स्वामिनोऽपि सेवकस्य प्रियमप्रियं वा वचनं शृणुयुस्तदनुरूपं कार्याणि च कुर्युः ।

२.

**अन्वयः**

यः, अधिपं, साधु, न शास्ति, स, किं, सखा, वा किंसखा, यः, हितात्, न संशृणुते, स, किं, प्रभुः? वा किंप्रभुः । हि, सदा, अनुकूलेषु, नृपेषु, अमात्येषु च , सर्वसम्पदः, रतिं, कुर्वते ।

**पर्यायः**

यः = कश्चित्, सखा = अमात्यादि, अधिपम् = स्वस्वामिनम्, साधु = सम्यक्, न शास्ति = नोपदिशति, स = असाधूपदेष्टा जनः, किं सखा = किं विचारकः ?, वा किंसखा = कुत्सितामात्यः, यः = कश्चित् प्रभुः, हितात् = हितोपदेशकात्, न संशृणुते = न शृणोति, स = हितवचनश्रवणविमुखः प्रभुः, किं प्रभुः = न प्रभुः, वा किंप्रभुः = कुत्सितप्रभुः । हि = यस्मात् कारणात्, सदा = सततं, अनुकूलेषु = अविरुद्धेषु, नृपेषु = स्वामिषु, अमात्येषु = मन्त्रिषु च, सर्वसम्पदः = निखिलसम्पत्तयः, रतिम् = अनुरागम्, कुर्वते = विदधति ।

**समासः**

सर्वाः सम्पदः सर्वसम्पदः ।

**कोशः**

**सखा** अथ मित्रं सखा सुहृत् ।

**साधु** सुन्दरं रुचिरं चारु सुषमं साधु शोभनम् ।

**सम्पत्तिः** सम्पत्तिः श्रीश्च लक्ष्मीश्च इति चामरः ।

**सरलार्थः**

यो हितवाक्यं वदति स योग्योऽमात्यः, यश्चामात्यस्य एवं हितवाक्यं शृणोति स सत्प्रभुर्भवति । ततः पराङ्मुखाः किंसखायः किंप्रभवश्च जायन्ते । राजामात्ययोर्मेलनेन राज्यसम्पदः स्थिरा भवन्ति ।

**भावार्थः**

अमात्येन राज्ञे हितवाक्यं वक्तव्यं राज्ञा च तच्छ्रोतव्यमन्यथा द्वावेव किंसखा किंप्रभुश्च भवतः । राजामात्ययोर्मेलनमेव सर्वाः सम्पदोऽधिवसन्ति ।

**३.**
**अन्वयः**

तथाऽपि, जिह्मः, स, भवज्जिगीषया, गुणसम्पदा, शुभ्रं, यशः, तनोति । भूतिं, समुन्नयन्, अनार्यसङ्गमात्, महात्मभिः, समं, विरोधः, अपि, वरम् ।

**पर्यायः**

तथाऽपि = साशङ्कोऽपि, जिह्मः = वञ्चकः, स = दुर्योधनः, भवज्जिगीषया = भवन्तं (युधिष्ठिरं) जेतुमिच्छया, गुणसम्पदा = दानदाक्षिण्यादिभिः, शुभ्रम् = निर्मलम्, यशः = कीर्तिम्, तनोति = विस्तारयति । भूतिम् = विभूतिम्, समुन्नयन् = संवर्धयन् (सन्) अनार्यसङ्गमात् = नीचजनसंसर्गात्, महात्मभिः = महानुभावैः, समम् = सह, विरोधः = विग्रहः, अपि, वरम् = ईषत्प्रियम् ।

**समासः**

जेतुमिच्छा जिगीषा, भवन्तं जेतुमिच्छा भवज्जिगीषा, तया भवज्जिगीषया । गुणानां सम्पद् गुणसम्पत्, तेन गुणसम्पदा । न आर्यः अनार्यः, अनार्यस्य सङ्गमः अनार्यसङ्गमस्तस्मात् अनार्यसङ्गमात् । महान् आत्मा यस्यासौ महात्मा, तैर्महात्मभिः ।

**कोशः**

| | |
|---|---|
| **जिह्मः** | जिह्मस्तु कुटिलेऽलसे । |
| **शुभ्रम्** | शुक्लशुभ्रशुचिश्वेतविशदश्येतपाण्डुराः । |
| **यशः** | यशः कीर्तिः समज्ञा च । |
| **भूतिः** | विभूतिभूतिरैश्वर्यमणिमादिकमष्टधा । |
| **अनार्यः** | नीचोऽनार्योऽकुलीनोऽपि शठो दुर्वृत्तः । |
| **वरम्** | देवाद् वृते वरः श्रेष्ठे त्रिषु क्लीबे मनाक् प्रिये इति चामरः । |

**सरलार्थः**

छली दुर्योधनो भवन्तं जेतुमाडम्बरप्रधानैर्गुणैर्निर्मलं यशो विस्तारयन्नस्ति । यतो हि ऐश्वर्याभिवर्धकजनस्य कृते नीचैः समं सङ्गतेरपेक्षया महता जनेन सह विरोधो वरं भवति ।

**भावार्थः**

वञ्चनशीलो दुर्योधनः सर्वोपायैर्युधिष्ठिरं जेतुं प्रदर्शनप्रधानैर्दानदाक्षिण्यादिगुणगणैर्यशो विस्तारयति । ऐश्वर्याभिवर्धनाभिलाषिणो जनस्य कृते नीचजनस्य संसर्गापेक्षया महात्मना समं विरोधनं वाढं मन्यते ।

४.

**अन्वयः**

स, प्रलीनभूपालं, स्थिरायति, आवारिधि, भुवः, प्रशासत् अपि, त्वदेष्यतीः, भियः, चिन्तयति एव । अहो, बलवद्विरोधिता, दुरन्ता (भवति) ।

**पर्यायः**

स = दुर्योधनः, प्रलीनभूपालम् = अप्रतिमभूपम्, स्थिरायति = सदा वर्तमानम्, आवारिधि = आसमुद्रम्, भुवः = पृथिव्याः, मण्डलम् = वलयम्, प्रशासत् अपि = आज्ञापयन् अपि, त्वदेष्यतीः = त्वदागमिष्यतीः, भियः = विपदः, चिन्तयति एव = आलोचयति एव । अहो = आश्चर्यम्, बलवद्विरोधिता = महाजनवैरिता, दुरन्ता = दुरवसाना (भवति) ।

**समासः**

प्रलीना भूपाला यस्मिन् तत् प्रलीनभूपालम् । आ वारिधिभ्य इति आवारिधि । बलमस्यास्तीति बलवान्, बलवद्भिर्विरोधिता बलवद्विरोधिता ।

**कोशः**

**आयतिः** उत्तरः काल आयतिः ।

**भीः** भीतिर्भीः साध्वसं भयमिति चामरः ।

**सरलार्थः**

सर्वान् वशीकृत्य विलोप्य च समुद्रपर्यन्तं कृतशासनोऽपि दुर्योधनो भवतो (युधिष्ठिरात्) भयं चिन्तयति । आत्मनो बलिष्ठेन सह विरोधनं दुःखाय एव भवति ।

**भावार्थः**

प्रतापवान्नपि शासको बलिष्ठविपक्षी अस्ति चेत्ततो बिभेति एव । यतो हि बलवता सह विरोधनं कदाचिद् दुःखं जनयति ।

५.
## अन्वयः

अबन्ध्यकोपस्य, आपदां, विहन्तुः, देहिनः, स्वयमेव, वश्याः, भवन्ति, अमर्षशून्येन, जन्तुना, जातहार्देन, जनस्य, आदरः, न, विद्विषा, दरः, न ।

## पर्यायः

अबन्ध्यकोपस्य = सफलक्रोधस्य, आपदाम् = विपदाम्, विहन्तुः = संहारकस्य, देहिनः = प्राणिनः, स्वयमेव = आत्मनैव, वश्याः = अधीनाः, भवन्ति = जायन्ते, अमर्षशून्येन = क्रोधहीनेन, जन्तुना = जनेन, जातहार्देन = प्राप्तप्रेम्णाऽपि, आदरः = सम्मानः, न (भवति), विद्विषा = विरोधिनाऽपि (समं) दरः = भयं न (भवति) ।

## समासः

न बन्ध्योऽबन्ध्यः, अबन्ध्यकोपो यस्य तस्य अबन्ध्यकोपस्य । देहोऽस्तीति देही तस्य देहिनः । अमर्षेण शून्योऽमर्षशून्यस्तेन अमर्षशून्येन । जातं हार्दं येन स जातहार्दस्तेन जातहार्देन ।

## कोशः

हार्दम्　　प्रेमा न प्रियता हार्दं प्रेम ।

दरः　　दरोऽस्त्रियां भये श्वभ्रे इति चामरः ।

## सरलार्थः

यस्य क्रोधो व्यर्थं न भवति तस्य सर्वे जना वशगा भवन्ति । परं यस्य क्रोधस्थाने क्रोधो नोद्भवति तादृशो जनो न मित्रादादरं न च शत्रोर्भयमाप्नोति ।

## भावार्थः

सर्वे क्रोधं शमयितुं यतन्ते तदपि शासकाय कदाचित् क्रोध आवश्यको भवति । क्रोधेनान्ये वशीकर्तुं शक्यन्ते । यस्य शासकस्य क्रोधस्य लेशोऽपि नास्ति तस्य जीवनं मित्रादादरं शत्रोः साध्वसञ्च नावाप्य व्यर्थं भवति ।

## छन्दोज्ञानम्

पञ्चस्वेव पद्येषु वंशस्थवृत्तं वर्तते-'जतौ तु वंशस्थमुदीरितं जरौ' इति तल्लक्षणात् ।

# अभ्यासः

## श्रवणं भाषणञ्च

१. **शिक्षकाच्छ्रुत्वा अनुकथयत**

प्रभवोऽनुजीविभिः, नृपेष्वमात्येषु, भवज्जिगीषया, भूतिमनार्यसङ्गमाद्, प्रलीनभूपालमपि, भियस्त्वदेष्यतीरहो, जातहार्देन ।

२. **सन्धिं विच्छिद्य श्रावयत**

अतोऽर्हसि, हितान्न, समुन्नयन्, प्रशासदावारिधि, विहन्तुरापदाम् ।

३. **पाठस्थपद्यानां पदानां वचनं वदत**

प्रभवः, वचः, शास्ति, सर्वसम्पदः, गुणसम्पदा, महात्मभिः, स्थिरायति, दुरन्ता, विहन्तुः, वश्याः ।

४. **शिक्षकात् प्रश्नान् श्रुत्वा उत्तराणि वदत**

(क) के कैर्न वञ्चनीयाः ?

(ख) कीदृशं वचो दुर्लभं भवति ?

(ग) किंसखा कः ?

(घ) सर्वसम्पदः कुत्र रतिं कुर्वते ?

(ङ) जिह्मः कः ?

(च) कैः समं विरोधो वरम् ?

(छ) कस्य शासनमावारिधि वर्तते ?

(ज) का दुरन्ता ?

(झ) केन के वश्या भवन्ति ?

(ञ) अमर्षशून्यस्य जनस्यावस्था कीदृशी भवति ?

५. **शिक्षकात् पद्यांशं श्रुत्वा छन्दोलक्षणं निगदत**

'श्रियः कुरूणामधिपस्य पालनीम्...' ।

६. **कारकाणि कथयत**

क्रियासु, हितात्, गुणसम्पदा, जन्तुना ।

७. **पाठस्य प्रतिपद्यं त्रीणि अव्ययपदानि विचित्य वदत ।**

८. **शिक्षकादनुच्छेदं श्रुत्वा सारांशं कथयत**

संस्कृतसाहित्ये त्रीणि महाकाव्यानि बृहत्त्रय्यां परिगण्यन्ते - किरातार्जुनीयम्, शिशुपालवधम्, नैषधीयचरितं च । एतेषु किरातार्जुनीयं महाभारतस्य वनपर्वणः कथामाश्रयते । स्वल्पां कथामाश्रित्य महाकविना भारविणाष्टादशसर्गात्मकं महाकाव्यं प्रणीतम् । किरातवेषधारिणः शिवस्य कौन्तेयस्यार्जुनस्य च युद्धेनार्जुनाय प्रसन्नचेतसः शिवात् पाशुपतास्त्रप्राप्तिर्महाकाव्यस्य कथाहृदयं वर्तते । वीररसोऽस्य महाकाव्यस्याङ्गीरसोऽस्ति । शृङ्गारादयोऽङ्गरसाः सन्ति । महाकाव्यस्य प्रारम्भः 'श्री' इति पदेन भवति । प्रतिसर्गमन्तिमपद्ये 'लक्ष्मी' पदं प्रयुक्तमस्ति । भारवेर्महाकाव्येऽर्थगौरवं वैशिष्ट्यं मन्यते । अस्य महाकवेः कतिचित्पद्येषु न केवलं काव्यत्वमपितु काव्यलक्षणञ्च स्फुटीभवति । यथा- 'स्फुटता न पदैरपाकृता न च न स्वीकृतमर्थगौरवम् । रचिता पृथगर्थता गिरां न च सामर्थ्यमपोहितं क्वचित् ॥' इति । चित्रालङ्कारप्रदर्शने त्वयं महाकविरतुल्य एव । एकाक्षरेण पद्यविरचनमस्य काव्यचातुरी दृश्यते । यथा- 'न नोननुन्नो नुन्नोनो नाना नानानना ननु । नुन्नोऽनुन्नो ननुन्नेनो नानेना नुन्ननुन्ननुत् ॥' इति । काव्ये बहुत्र सूक्तयो विलसन्ति । यथा- 'हितं मनोहारि च दुर्लभं वचः, न वञ्चनीयाः प्रभवोऽनुजीविभिः, वरं विरोधोऽपि समं महात्मभिः' इति । वंशस्थवृत्तं भारवेः प्रियतरं दृश्यते । किरातार्जुनीयं नीते राजनीतेश्च महाकाव्यं वर्तते । महाकविः क्षेमेन्द्रो राजनीतिवर्णने वंशस्थवृत्तस्यौचित्यमाह - 'षाड्गुण्यप्रगुणा नीतिर्वंशस्थेन विराजते' इति । भारवी रवेर्भा इव संस्कृतसाहित्यं प्रकाशयति ।

९. **पद्यस्य सूक्तिं विचित्य भावार्थं कथयत**

तथाऽपि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।

समुन्नयन् भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः ॥

१०. **पदानां विभक्तीर्निगदत**

क्रियासु, नृप !, अधिपम्, रतिम्, अनार्यसङ्गमाद्, महात्मभिः, भुवः, विरोधिता, विहन्तुः, दरः ।

११. **'हितं मनोहारि च दुर्लभं वचः' इति सूक्तेरर्थगौरवं वदत ।**

## पठनम्

१. **पाठस्य पञ्चैव पद्यानि सलयं पठत ।**

२. **पद्यं गद्ये परिवर्त्य गद्यरूपं पठत**

अबन्ध्यकोपस्य विहन्तुरापदां भवन्ति वश्याः स्वयमेव देहिनः ।

अमर्षशून्येन जनस्य जन्तुना न जातहार्देन न विद्विषादरः ॥

### ३. पद्यस्य अन्वयं कृत्वा पठत

सुखस्य दुःखस्य न कोऽपि दाता परो ददातीति कुबुद्धिरेषा ।

अहं करोमीति वृथाऽभिमानः स्वकर्मसूत्रग्रथितो हि लोकः ॥

### ४. पदानि एकवचन-द्विवचन-बहुवचनेषु पृथक्कृत्य पठत

अर्हसि, नृपामात्यौ, युक्तैः, कुर्वते, सर्वसम्पदः, कुरुते, किंसखा, युधिष्ठिरदुर्योधनौ, किंप्रभवः, पाण्डवाः, मण्डलम्, भियः, आपदाम्, भवज्जिगीषया ।

### ५. वाक्यैरनुच्छेदं निर्माय सङ्गतिं विधाय च पठत

(क) पाण्डवा वनवासे सन्ति ।

(ख) युधिष्ठिरस्य मनसि दुर्योधनस्य प्रजापालनीं वृत्तिं ज्ञातुं जिज्ञासा उद्भवति ।

(ग) स कञ्चन वनेचरं तज्ज्ञातुं हस्तिनापुरं प्रेषयति ।

(घ) वनेचरस्तत्र गच्छति ।

(ङ) स दुर्योधनस्य प्रजापालनीं वृत्तिं पश्यति साधु अवगच्छति च ।

(च) वनेचरो युधिष्ठिरमुपगच्छति ।

(छ) स हस्तिनापुरस्य यथायथं युधिष्ठिरं निवेदयति ।

(ज) भारविर्महाकाव्यप्रणयनं प्रारभते ।

### ६. अनुच्छेदं सम्पठ्य प्रश्नानामुत्तराणि दत्त

काव्यस्य बहूनि रूपाणि सन्ति । तेषु महाकाव्यं प्राचीनः काव्यभेदो वर्तते । किं नाम महाकाव्यमिति विषये काव्यशास्त्रेषु विशदचर्चा उपलभ्यते । भामह-दण्डि-रुद्रट-विश्वनाथादयः काव्यशास्त्रकारा महाकाव्यस्य लक्षणं सम्यग् व्यवेचयन् । एभिर्यानि लक्षणानि विवेचितानि तानि रामायणं, महाभारतमश्वघोष-कालिदास-भारविप्रणीतानि काव्यरत्नानि चानुगच्छन्ति । 'महाकाव्यम्' इति समस्तपदे 'महत्' 'काव्यम्' चेति द्वे पदे स्तः । 'महत्' पदेन गुणैराकारेण च गौरवपूर्णमिति ज्ञायते । 'काव्यम्' इति पदेन च कवेः कर्म स्फुटीभवति । एतावता महाकाव्यस्यार्थो भवति- आकारेण विशालं गुणैर्गरिमपूर्णं कविप्रतिभाबलेन हृदयावर्जकं रसमयं काव्यं महाकाव्यमिति । महाकाव्यं मङ्गलाचरणेन प्रारभ्यते । अत्र धीरोदात्तनायको भवति । महाकाव्यं पौराणिकवृत्तमपेक्षते । नागरसभ्यता, वन्यसमृद्धिः, धार्मिक-सामाजिक-सांस्कृतिकपर्वोत्सवाः, युद्ध-पुत्रजन्म-ऋष्याश्रमाश्च महाकाव्यस्य वर्ण्या विषया भवन्ति । शृङ्गार-वीर-शान्तानां मध्ये एको रसोऽङ्गीकर्तव्यः । महाकाव्येऽष्टाधिकाः सर्गा अपेक्ष्यन्ते । सर्गान्ते

भाविसर्गस्य कथायाः सूचनं विधीयते । प्रधानवस्तु नायकं कविं वाऽऽधृत्य महाकाव्यस्य नामकरणं क्रियते । महाकाव्यं संयोगान्तं विधातव्यम् । इमानि महाकाव्यस्य शास्त्रीयलक्षणानि सन्ति । अद्यतने युगे महाकाव्यस्य नवीनं स्वरूपं दृग्गोचरीभवति । परिवर्तिनि संसारे महाकाव्यमप्यपवादं न याति ।

(क) महाकाव्यस्य लक्षणकाराः के ?

(ख) 'महत्' पदेन किं ज्ञायते ?

(ग) महाकाव्यं किम् ?

(घ) महाकाव्ये कीदृशो नायको भवति ?

(ङ) महाकाव्येऽङ्गीरसाः के ?

(च) महाकाव्ये न्यूनतोऽपि कति सर्गा भवन्ति ?

(छ) महाकाव्यस्य नामकरणं कथं क्रियते ?

(ज) अधुना महाकाव्यस्य कीदृशं स्वरूपं दृश्यते ?

## ७. अधो लिखितेषु वंशस्थवृत्तस्य पद्यं परिचित्य सलयं वाचयत

(क) ऋतुर्व्यतीतः परिवर्तते पुनः क्षयं प्रयातः पुनरेति चन्द्रमाः ।
गतं गतं नैव तु सन्निवर्तते जलं नदीनाञ्च नृणाञ्च यौवनम् ॥

(ख) शशिना सह याति कौमुदी सह मेघेन तडित्प्रलीयते ।
प्रमदाः पतिवर्त्मगा इति प्रतिपन्नं हि विचेतनैरपि ॥

(ग) कृतप्रणामस्य महीं महीभुजे जितां सपत्नेन निवेदयिष्यतः ।
न विव्यथे तस्य मनो न हि प्रियं प्रवक्तुमिच्छन्ति मृषा हितैषिणः ॥

## ८. प्रतिपदं सन्धिविच्छेदनं कृत्वा पद्ये पठत

(क) स किंसखा साधु न शास्ति योऽधिपं हितान्न यः संशृणुते स किंप्रभुः ।
सदानुऽकूलेषु हि कुर्वते रतिं नृपेष्वमात्येषु च सर्वसम्पदः ॥

(ख) तथाऽपि जिह्मः स भवज्जिगीषया तनोति शुभ्रं गुणसम्पदा यशः ।
समुन्नयन् भूतिमनार्यसङ्गमाद्वरं विरोधोऽपि समं महात्मभिः ॥

## लेखनम्

१. **पदं प्रयुज्य एकैकं वाक्यं निर्मात**

चारचक्षुषः, मनोहारि, किंसखा, अनुकूलेषु, तनोति, स्थिरायति, दुरन्ता, वश्याः, दरः ।

२. **अव्ययपदानि प्रयुज्य लघ्वनुच्छेदं रचयत**

वा, सदा, हि, अतः, समम्, वरम्, आवारिधि, एव, स्वयम् ।

३. **सङ्क्षेपेणोत्तराणि लिखत**

(क) के चारचक्षुषो भवन्ति ?

(ख) वनेचरोऽसाधु वा साधु क्षन्तुं कं निवेदयति ?

(ग) किंप्रभोर्लक्षणं किम् ?

(घ) बलवता समं विरोधेन किं भवति ?

(ङ) क्रोधस्य लाभः कः ?

४. **वृत्तलक्षणं सङ्गमयत**

क्रियासु युक्तैर्नृप ! चारचक्षुषो न वञ्चनीयाः प्रभवोऽनुजीविभिः ।

अतोऽर्हसि क्षन्तुमसाधु साधु वा हितं मनोहारि च दुर्लभं वचः ॥

५. **कोष्ठकस्योचितपदेन रिक्तस्थानं पूरयत**

(क) किरातार्जुनीये .... वृत्तं वर्तते । (पौराणिकम्/सामाजिकम्)

(ख) दुर्योधनः पाण्डवान् ... स्म । (सम्मानयति/पीडयति)

(ग) भारवेः ... प्रसिद्धमस्ति । (अर्थगौरवम्/काव्यगौरवम्)

(घ) योऽधिपं साधु न निवेदयति स ... भवति । (कुसखा/किंसखा)

(ङ) दुर्योधनस्यापरं नाम... आसीत् । (सुयोधनः/संयोधनः)

६. **भावार्थं लिखत**

'अहो ! दुरन्ता बलवद्विरोधिता ।'

## ७. अनुच्छेदं पठित्वा पृष्टान् प्रश्नान् उत्तरयत

महाभारतं संसारस्यैव पृथुलसाहित्यं वर्तते । अत्र चत्वारः पुरुषार्थाः प्रतिपादिताः सन्ति । महाभारते यदस्ति तत् सर्वत्रास्ति अत्र यन्नास्ति तत् कुत्रापि नास्तीति भणित्यापि महाभारतस्य विश्वकोषत्वं सिद्धयति । महाभारतमुपजीव्यं विधाय अर्वाचीनाः साहित्यकारा विविधासु भाषासु कमनीयानि काव्यानि लिलिखुः । महाभारतस्य प्रणेता महर्षिर्वेदव्यासः । वेदव्यासो महता यत्नेनापरिमितया मनीषया च इदं ग्रन्थरत्नं विरचयामास । ग्रन्थस्याादिपर्वणि उक्तमेवास्ति- 'त्रिभिर्वर्षैः सदोत्थायी कृष्णद्वैपायनो मुनिः । महाभारतमाख्यानं कृतवानिमदमुत्तमम् ॥' इति । महाभारतं त्रिभिश्चरणैर्विकसितं वर्तते । प्रथममेतद् 'जय' इति नाम्ना प्रसिद्धमासीत् 'ततो जयमुदीरयेत्' इति प्रमाणेन । जये अष्टशताधिकाष्टसहस्राणि श्लोका आसन् । तदनु 'जय' 'भारत' इति नाम्ना प्रसिद्धिं प्रापत् । भारते चतुर्विंशतिसहस्राणि श्लोकाः परिगणिता आसन् । वर्तमानसमयेऽस्य नाम 'महाभारतं' वर्तते । महाभारते यथार्थतः कति श्लोकाः सन्तीति निश्चप्रचं वक्तुं न शक्यते तदपि लक्षकल्पश्लोकाः परिगण्यन्ते 'शतसाहस्रसंहिता' पदोल्लेखनात् । महाभारतेऽष्टादश पर्वाणि सन्ति । एतेषु शान्तिपर्व सप्तचत्वारिंशत्सहस्रश्लोकैर्विपुलतमं वर्तते । महाप्रास्थानिकपर्व लघुतममस्ति । अस्मिन् पर्वणि द्वादशाधिकशतत्रयं श्लोकाः सन्ति । श्रीमद्भगवद्गीता महाभारतस्याप्रतिमनिधिरस्ति । गीताया वैशिष्ट्यं सर्वे मनीषिणः साधु विदन्त्येव । श्रीकृष्णस्य मुखारविन्दान्निःसृतेयं वाणी भीष्मपर्वणि विराजते । 'सत्यमेव जयते' इति महाभारतस्य सन्देश उपदेशश्चास्ति । महाभारते महामुनिना व्यासेन किमुक्तमिति जिज्ञासां शमयितुमिदं पद्यमलमेव- 'वासुदेवस्य माहात्म्यं पाण्डवानाञ्च सत्यताम् । दुर्वृत्तिं धार्तराष्ट्राणामुक्तवान् भगवान् ऋषिः ॥ ' इति ।

(क) महाभारतस्य विश्वकोषत्वं कथं सिद्धयति ?

(ख) महाभारतस्य विकासचरणाः के ?

(ग) महाभारतस्याप्रतिमनिधिः कः ?

(घ) महाभारतं किमुपदिशति ?

(ङ) ऋषिः किमुक्तवान् ?

(च) पदानां कारकाणि लिखत

महाभारते, भणित्या, प्रणेता, नाम्ना, उल्लेखनात्, सत्यताम्, ऋषिः ।

(छ) अधो लिखितं वाक्यं पञ्चसु वाक्येषु पुनर्लिखत

महाभारते यदस्ति तत् सर्वत्रास्ति अत्र यन्नास्ति तत् कुत्रापि नास्तीति भणित्यापि महाभारतस्य विश्वकोषत्वं सिद्धयति ।

(ज) 'सत्यमेव जयते' इत्युक्तिं साधयितुं काञ्चन स्वज्ञातां सङ्क्षिप्तकथां लिखत ।

(झ) श्रीमद्भगवद्गीताया महत्त्वं वर्णयित्वा अनुच्छेदं रचयत ।

(ञ) विग्रहं विलिखत

पृथुलसाहित्यम्, ग्रन्थरत्नम्, सदोत्थायी, वर्तमानसमये, अप्रतिमनिधिः, महामुनिना, धार्तराष्ट्राणाम् ।

८. **महाकवेर्भारवेः परिचयं शिक्षकस्य साहाय्येन लिखत ।**

९. **शिक्षकस्य साहाय्येन किरातार्जुनीयमहाकाव्यस्य वैशिष्ट्यं दर्शयत ।**

१०. **पाठादतिरिक्तं वंशस्थवृत्तस्य पद्यैकमन्विष्य लिखत ।**

## व्याकरणानुशीलनम्

**मनस्-शब्दः**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | मनः | मनसी | मनांसि |
| द्वितीया | मनः | मनसी | मनांसि |
| तृतीया | मनसा | मनोभ्याम् | मनोभिः |
| चतुर्थी | मनसे | मनोभ्याम् | मनोभ्यः |
| पञ्चमी | मनसः | मनोभ्याम् | मनोभ्यः |
| षष्ठी | मनसः | मनसोः | मनसाम् |
| सप्तमी | मनसि | मनसोः | मनःसु |
| सम्बोधनम् | हे मनः ! | हे मनसी ! | हे मनांसि ! |

१. **मनस्-शब्दस्य रूपैः वाक्यानि पूरयत**

(क) बुद्धिमन्तः ..... विचार्य एव वदन्ति । (ख) .......... चञ्चलता न भवतु ।

(ग) अहं स्थिरं ..... इच्छामि । (घ) ...... शान्त्यै ध्यानं कुरु ।

२. **रूपावलीं पूरयत**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | यशः | ......... | .......... |
| द्वितीया | ........ | ........ | वचांसि |
| तृतीया | .......... | श्रेयोभ्याम् | ........... |
| चतुर्थी | रजसे | ....... | ...... |
| पञ्चमी | ........ | ........ | सरोभ्यः |
| षष्ठी | ............ | तपसोः | ............. |
| सप्तमी | वयसि | ............. | ........... |
| सम्बोधनम् | .......... | .......... | हे वासांसि ! |

३. **पदानि प्रयुज्य वाक्यानि रचयत**

पयसाम्, सरसः, वासः, वचांसि, श्रेयसा, रजोभ्यः, वयः, तपसे ।

## रचनात्मकोऽभ्यासः

१. **पाठस्य पञ्च पद्यानि आधृत्य कथासारं लिखत ।**

२. **शिक्षकस्य साहाय्येन पाठादतिरिक्तां किरातार्जुनीयस्य सूक्तिमन्विष्य विशदीकुरुत ।**

३. **पाठात् सर्वप्रियं पद्यं विलिख्य प्रियतायाः कारणं निर्दिशत ।**

# दानशीलः शिविः



प्राचीनकाले शिविनामा दानशीलः सकलभूपालमणिरिव मान्यो महीपतिर्बभूव। तदीयं यशः स्वर्गपर्यन्तं प्रसृतमासीत्।

अथ कदाचिद् देवराज इन्द्रो विचारितवान् यद्, 'नास्ति कश्चन दानशीलः शिविना तुल्यः। तस्य दानशीलताया बलं कियदस्ति ?' इति जिज्ञासायाः समाधानाय असौ अग्निमाहूतवान्। तत्पश्चात् स्वयं श्येनोऽभूत्, अग्निश्च कपोतोऽभूत्। कपोतस्य पृष्ठतः त्वरितगतिः सन् अमुमभिभवितुं प्रवृत्तः।

अथ तस्य राज्ञः सुखासनस्थस्य प्रभातसमय एव कपोतः सभामण्डपं प्राप। स च कम्पमानो भयतरलनेत्रः करुणरसितमाविष्कुर्वन् राज्ञः चरणसमीपे सहसैव सन्निपतितः। ततो भयगद्गदया गिरा प्रोवाच, "राजन्, शरणागतोऽस्मि ते, परित्रायस्व मां श्येनात्।" ततः श्येनोऽपि राज्ञः पुरतः पपात। सोऽपि "राजन्, मुञ्च, क्षुधातुरस्य मे भक्ष्यं समर्पय" इति प्रोच्चैरुवाच।

कपोत आह, "देव, शरणागतं मां त्रायस्व। स्वशरीराण्यपि शरणागतार्थं त्यजन्ति साधवो नित्यम्, न शरणागतम्।" श्येन उक्तवान्, "राजन्, सकलमनोरथदाता किं श्रूयसे ? भक्ष्यमेनं दातुमर्हसि, प्राणसंशयमापन्नोऽस्मि" इति। असावपि राजा जातकारुण्यः कथमेतदिति संभ्रान्तो दोलारूढ इव सान्त्वयन् श्येनमाह, "नैष सतां पन्थाः शरणागतपरित्यागः। अतस्तदहं मांसमन्यदेव ते दापयामि यावत् तृप्तिमवाप्नोषि" इति। श्येन आह, "न वयं परहतपिशितभुजः, स्वयं जीवतो मांसोष्णरुधिरकललान्यास्वादयामहे, राजन्! कपोतं त्रातुमिच्छसि चेन्मदीयं शपथं शृणु। यावन्मात्रमितं कपोतमांसं तुलितं भवति, तावन्मितं तव मांसं मे प्रयच्छ" इति।

बाढं दातास्मीति राज्ञि प्रतिज्ञाते हाहाकारः समभूद् भूभुजाम् । "देव, मा साहसं कार्षीः, एष श्येनरूपी राक्षसस्त्वद्विनाशहेतोरागत" इति । एवमार्तनादे वर्तमाने शिविः तुलायां कपोतं स्थापितवान् । स्वहस्तं तुलासमं कृत्वा असिना असौ स्वमांसमङ्गादुत्कृत्यारोपितवान् । परन्तु तस्य मांसं कपोतसमं नाभवत् । अङ्गेषु प्रायेण मांसरहितः शिविर्यदा कपोतस्य तुल्यतां न सञ्जगाम तदा 'नमः सर्वविदे धर्माय' इति उक्त्वा स स्वयमेव तुलामधिरूढः ।

अथ दिवि देवदुन्दुभयः प्रणेदुः । अविरलकुसुमवृष्टिसारः समीरणो ववौ । साधु साध्विति दशस्वपि दिक्षु वाचो विचेरुः । अत्रान्तरे अग्निपाकशासनौ प्रकटितरूपौ अभवताम् । तौ राजानमवदताम्, "साधु महीनाथ, शोभनस्तेऽतिनिपुणः प्राणिधर्मो विज्ञातः परमार्थतस्त्वमेव परीक्षितः शरीरं ते पुरातनमिवास्तु, कोशोऽक्षयोऽस्तु, धर्मे च ते सदा मतिर्भवतु इत्युक्त्वा तावन्तर्हितौ अभवताम् ।"

## अभ्यासः

### श्रवणं भाषणञ्च

१. **अधो लिखितानि पदानि उच्चारयत**

महीपतिः, जिज्ञासा, आहूतवान्, तत्पश्चात्, त्वरितगतिः, आविष्कुर्वन्, प्रोच्चैः, जातकारुण्यः, भूभुजाम्, देवदुन्दुभयः ।

२. **शिक्षकात् श्रुत्वा पदानां विभक्तीर्निर्दिशत**

प्राचीनकाले, देवराजः, दानशीलतायाः, समाधानाय, कपोतस्य, अमुम्, राज्ञः, गिरा, श्येनात्, माम्, साधवः, सताम्, राजन्, मे, असिना, धर्माय, दिक्षु, अग्निपाकशासनौ, राजानम् ।

३. **मित्रात् कथायाः तृतीयानुच्छेदं श्रुत्वा अव्ययपदानि वदत ।**

४. **शिक्षकात् पाठं श्रुत्वा सङ्क्षिप्तमुत्तरं वदत**

(क) शिविः कीदृशो राजा आसीत् ?

(ख) अग्निः कोऽभूत् ?

(ग) कः सतां पन्थाः ?

(घ) कः तुलामधिरूढः ?

(ङ) देवदुन्दुभयः कुत्र प्रणेदुः ?

(च) कौ राज्ञे वरं प्रदाय अन्तर्हितौ अभवताम् ?

५. **शिक्षकाद् अधो लिखितां लघ्वीं कथां श्रुत्वा प्रश्नानुत्तरयत**

पुरा एकं घनं वनमासीत् । तस्मिन् वने बहवः पशुपक्षिणो निवसन्ति स्म । वनस्य राजा सिंह आसीत् । वनस्य जन्तवः क्रमेण तस्य आहारार्थं गुहां गच्छन्ति स्म । एकदा जन्तवो वनस्य राज्ञो विषये विमर्शं विधातुं सभामाह्वयन् परन्तु सिंहं न निमन्त्रितवन्तः । तेषु चतुरो वानरः सभायां स्वमतमुपास्थापयत्, "भो मित्राणि, वयं सदा किमर्थं सिंहायैव राजपदं प्रयच्छामः ? कार्यकालं निश्चित्य अस्मभ्यमेको राजा भवेद्" इति । तस्य कथनमाकर्ण्य जन्तवः तस्मै एव पञ्च वर्षाणि यावद् राजपदभारमयच्छन् । सिंहः सर्वं वृत्तान्तमजानात् । कोपेन रक्तनयनः स यत्र कुत्रापि पशून् हत्वा खादितुं प्रारभत । एकदा स एकं मृगशावकं भक्षणाय गुहायामानयत् । मृगी च स्वशावकं सिंहाद् मोचनाय राजानं वानरमनुरोद्धुं अगच्छत् । सा अन्वरोधत्, "भो राजन्, मम शावकः सिंहेन अपहृतः । भवान् तु राजा अस्ति । भवतः कार्यमेव प्रजानां समस्यायाः समाधानं भवति । अतो मम शावकं सिंहाद् मोचयित्वा मां समर्पयतु" इति । वानरः तस्यै आश्वासनं प्रदाय तामपि सहैव नीत्वा सिंहगुहां प्रति अगच्छत् । सिंहः स्वभावेन क्रूरो भवत्येव । वानराय राजपदस्य प्रदानेन कोपज्वलितनेत्रः सन् सिंहो गुहामुखे स्थितः आसीत् । तादृशं सिंहं दृष्ट्वा वानरो वृक्षमारूढवान् । ततश्च एकशाखातः अन्यां, अन्यशाखातश्च अपरां शाखां गत्वा स सिंहं द्रष्टुमारभत । वानरस्य तादृशेन कार्येण रुष्टा मृगी अवदत्, "हे राजन्, मम शावकः गुहाया अन्तः अस्ति । अत्र विलम्बो न करणीयः । शीघ्रं मम शावकं गुहायाः निष्काशयतु" इति । एतत् श्रुत्वा वानरः प्रत्युदतरत्, "कथं नानुभवसि, मम परिश्रमम् ? अहं तव शावकं मोचयितुमेव श्रमं कुर्वन् अस्मि । श्रमेण मम शरीरे आगतान् स्वेदबिन्दून् न पश्यसि किम् ?" इति ।

(क) वानरः सभायां किमकथयत् ?

(ख) क्रुद्धः सिंहः किं कर्तुं प्रारभत ?

(ग) मृगी किमर्थं वानरमाहूतवती ?

(घ) राज्ञः कार्यं किं भवति ?

(ङ) वानरः किमर्थं वृक्षमारूढवान् ?

(च) वृक्षमारुह्य वानरः किमकरोत् ?

(छ) मृगी किमर्थं रुष्टा जाता ?

(ज) वानरस्य प्रत्युत्तरं तर्कपूर्णमस्ति न वा ?

६. **पञ्चमप्रश्नस्य कथां श्रुत्वा सन्देशं प्रकटयत ।**

७. **पञ्चमप्रश्नमाधृत्य नेतृकार्यविषये विमृशत ।**

८. **सङ्क्षेपेण पाठस्य कथां कक्षायां श्रावयत ।**

## पठनम्

### १. अधोलिखितं गद्यांशं पठित्वा शीर्षकं दत्त

'जातककथा' इति बौद्धेषु प्रसिद्धं वर्तते । बुद्धस्य जन्मान्तराणां कथानां सङ्कलनमेव 'जातककथा' वर्तते । स पूर्वजन्मसु पक्षिपशुमनुष्यादियोनिषु जन्म गृहीत्वा जीवनमयापयत्, तस्य पूर्वजन्मानां कथा एव जातककथा अस्तीति विद्वांसः कथयन्ति । जातककथान्तर्गतकथासु बुद्धस्य स्वजनाः, प्रियशिष्याश्च पात्ररूपेण आगताः सन्ति । ताः कथा नैतिकीं शिक्षां प्रयच्छन्ति । बौद्धसिद्धान्तानुरूपं चरित्रं तत्र प्रकटितं वर्तते । जातककथान्तर्गताः ५४७ कथा मानवेभ्यो दानस्य, अहिंसायाः, शान्तेश्च सन्देशं प्रददति । सामान्या जना अपि 'जातककथा' इति अधीत्य बौद्धमतमनुकर्तुं प्रेरिता भवन्ति । पाठस्य शिविनामकस्य राज्ञः प्रसङ्गश्च 'जातककथा' इति बौद्धग्रन्थे मिलति ।

### २. पाठस्य चतुर्थमनुच्छेदं पठित्वा प्रश्नानुत्तरयत

(क) "देव, शरणागतं मां त्रायस्व ।" अत्र देव इति पदं कस्मै प्रयुक्तम् ?

(ख) 'राजन्' अस्य मूलशब्दः कः ?

(ग) 'चेन्मदीयम्' अस्य सन्धिविच्छेदं कुरुत ।

(घ) 'शृणु' अस्य धातुम्, लकारम्, पुरुषम्, वचनं च लिखत ।

(ङ) 'तृप्तिम्' अत्र कः प्रत्ययः प्रयुक्तः ?

### ३. अधो लिखितं गद्यांशमाधारीकृत्य सूर्यस्य चरित्रविषये कक्षायां विमृशत

अरुण एष प्रकाशः पूर्वस्यां भगवतो मरीचिमालिनः । एष भगवान् मणिराकाशमण्डलस्य, चक्रवर्ती खेचरचक्रस्य, कुण्डलमाखण्डलदिशः, दीपको ब्रह्माण्डभाण्डस्य, प्रेयान् पुण्डरीकपटलस्य, शोकविमोकः कोकलोकस्य, अवलम्बो रोलम्बकदम्बस्य, सूत्रधारः सर्वव्यवहारस्य, इनश्च दिनस्य । अयमेव अहोरात्रं जनयति, अयमेव वत्सरं द्वादशसु भागेषु विभनक्ति, अयमेव कारणं षण्णामृतूनाम्, एष एवाङ्गीकरोति उत्तरं दक्षिणं चायनम्, एतेनैव सम्पादिता युगभेदाः, एतेनैव कृताः कल्पभेदाः, एनमेवाश्रित्य भवति परमेष्ठिनः परार्द्धसङ्ख्या, असावेव चर्कर्ति, बर्भर्ति, जर्हर्ति च जगद् । वेदा एतस्यैव वन्दिनः, गायत्री अमुमेव गायति, ब्रह्मनिष्ठा ब्राह्मणा अमुमेवाहरहरूपतिष्ठन्ते । धन्य एष कुलमूलं श्रीरामचन्द्रस्य ।

(शिवराजविजयः)

### ४. अधो लिखितं श्लोकं पठित्वा धनोपयोगं वर्णयत

दानं भोगो नाशस्तिस्रो गतयो भवन्ति वित्तस्य ।

यो न ददाति न भुङ्क्ते तस्य तृतीया गतिर्भवति ॥

५.  **अधो लिखितं गद्यांशं पठित्वा प्रश्नानुत्तरयत**

मल्लकालीनो नृपः सिद्धिनरसिंहमल्लः कार्तिकनृत्यस्य प्रचलनमारब्धवान् । इदं नृत्यं कार्तिकमासे ललितपुरस्य प्रासादक्षेत्रे प्रदर्श्यते । देशस्य जनतायाश्च कल्याणाय अस्य नृत्यस्य प्रचलनमारब्धमिति विश्वसन्ति जनाः । इतिहासेषु १६१५ तमाद् वैक्रमाब्दाद् ७६१ तमाद् नेपालसंवत्सराद् वा अस्य नृत्यस्य प्रदर्शनारम्भः अभवदिति उल्लेखः प्राप्यते । सम्प्रति कार्तिकमासं यावद्, सामान्यतया कार्तिकमासस्य सप्तविंशतिदिनानि यावद् वा इदं नृत्यं प्रदर्श्यते । अत एव अस्य नाम कार्तिकनृत्यमिति अभवत् । कार्तिकमासस्य प्रत्येकस्मिन् दिने भिन्नकथामाधारीकृत्य नृत्यस्य प्रदर्शनं भवति । इदं नृत्यं नागरिकेभ्यो भयं निराकृत्य आनन्दं सञ्चारयति इति जनाः स्वीकुर्वन्ति । सिद्धिनरसिंहमल्लः पूर्वं पञ्चदिनपर्यन्तं नृत्यप्रदर्शनस्य परम्परां सञ्चालितवान् परन्तु तस्य पुत्रः नृत्यप्रदर्शनस्य समयावधिं विस्तारितवान् ततश्च श्रीनिवासमल्लः पुनः समयावधिं परिवर्त्य पञ्चदशदिनानि यावद् नृत्यप्रदर्शनस्य परम्परा प्रचलितेसे कथयन्तीतिहासज्ञाः । राजोपाध्याय-श्रेष्ठ-प्रधान-जोशी-मल्लामात्यादीनां प्रतिनिधित्वमस्मिन् नृत्ये दृश्यते । उषा-अनिरुद्रशृङ्गारकथा, देवीनृत्यम्, बाणासुरवधः, विष्णोः जलशयनम्, मधुकैटभवधः, नृसिंह-वराहावतारकथा, वस्त्रहरणम्, दधिलीला इत्यादयो विषया अस्मिन् नृत्ये समाविष्टा भवन्ति । मल्लकालिकमेतन्नृत्यं नेपालस्य इतिहासं जनयति । अस्याः संस्कृतेः प्रवर्धनाय सर्वैः प्रयासो विधेयः ।

(क) जनानां कार्तिकनृत्यस्य विषये कीदृशो विश्वासो वर्तते ?

(ख) कार्तिकनृत्यस्य प्रचलनं कदा आरब्धम् ?

(ग) कार्तिकनृत्यस्य नामकरणं कथं जातम् ?

(घ) कार्तिकनृत्यं किं कारयति ?

(ङ) इतिहासज्ञाः कार्तिकनृत्यस्य विषये किं कथयन्ति ?

(च) कार्तिकनृत्ये केषां प्रतिनिधित्वं भवति ?

(छ) नृत्ये कीदृशा विषयाः समाविष्टा भवन्ति ?

(ज) सर्वैः किमर्थं प्रयासो विधेयः ?

६.  **पञ्चमप्रश्नस्य गद्यांशाधारेण सिद्धिनरसिंहमल्लस्य चरितं वर्णयत ।**

७.  **पाठं पठित्वा राजधर्मविषये स्वाभिमतमुपस्थापयत ।**

८.  **पाठस्य कथां पठित्वा तत्रोल्लिखितं परिवेशं वर्णयत ।**

## लेखनम्

### १. पदानि प्रयुज्य एकैकं वाक्यं रचयत

दानशीलः, मान्यः, यशः, कदाचित्, विचारितवान्, तुल्यः, तत्पश्चात्, स्वयम्, एव, गिरा, पपात, समर्पय, सताम्, मे, तुलायाम्, नमः, दिवि ।

### २. उचितपदेन रिक्तस्थानं पूरयत

(पुरतः, समाधानाय, तुलायाम्, दिक्षु, साधवः)

(क) जिज्ञासायाः ............... असौ अग्निमाहूतवान् ।

(ख) ततः श्येनोऽपि राज्ञः ............ पपात ।

(ग) स्वशरीराण्यपि शरणागतार्थं त्यजन्ति ............... नित्यम्, न शरणागतम् ।

(घ) शिविः ................ कपोतं स्थापितवान् ।

(ङ) साधु साध्विति दशस्वपि ............... वाचो विचेरुः ।

### ३. अधस्तनेभ्यो वाक्येभ्यो विशेष्यपदानि अन्विष्य लिखत

(क) तदीयं यशः स्वर्गपर्यन्तं प्रसृतमासीत् ।

(ख) राज्ञः सुखासनस्थस्य प्रभातसमय एव कपोतः सभामण्डपं प्राप ।

(ग) ततो भयगद्गदया गिरा प्रोवाच ।

(घ) तस्य मांसं कपोतसमं नाभवत् ।

(ङ) कोशोऽक्षयोऽस्तु ।

### ४. पाठाधारेण प्रश्नानुत्तरयत

(क) एकदा देवराजः किं विचारितवान् ?

(ख) कपोतो भयेन राज्ञः समीपे किमुवाच ?

(ग) साधूनामाचरणं कीदृशं भवति ?

(घ) अन्यमांसभक्षणं निषिध्य श्येनः किमाह ?

(ङ) किमर्थं हाहाकारः समभूत् ?

(च) आर्तनादे जातेऽपि शिविः किं कृतवान् ?

(छ) शिविः किमर्थं तुलामधिरूढः ?

(ज) कीदृशः समीरणो ववौ ?

(झ) कदा अग्निपाकशासनौ प्रकटितौ ?

(ञ) इन्द्राग्नी शिवेर्दानशीलतां ज्ञात्वा किमवदताम् ?

५. **पाठाधारेण राज्ञः शिवेः चरित्रचित्रणं कुरुत ।**

६. **प्रदत्तानां पदावलीनां साहाय्येन 'दानवीरः कर्णः' इति विषये अनुच्छेदमेकं रचयत**

कुन्तीपुत्रः कर्णो महावीरः,

धनुर्विद्यायां कुशलः,

परशुरामस्य शिष्यः,

दानवीरस्य कर्णस्य सकाशाद् न कश्चन याचको दुःखितः सन् प्रत्यागतः,

याचकानामिच्छापूर्त्यै सततं सन्नद्धः,

जन्मना एव कवचधारी कर्णो याचकरूपाय इन्द्राय कवचदानेन सङ्कटापन्नः परं वचनस्य पालने न च्युतः,

दुर्योधनस्य सखा कर्णो युद्धे अर्जुनेन हतः ।

७. **घटनानां संयोजनेन कथां रचयत**

एकस्मिन् ग्रामे याचकस्य निवासः,

एकदा याचनार्थं याचको गृहाद् बहिर्निर्गतः,

याचनक्रमे स नगरं प्राप्तः,

एको योगी तस्य समीपमागत्य याचितवान्,

स्वभावेन लुब्धः स मुष्टिपरिमितान् तण्डुलानेव अयच्छत्,

तेनापि सन्तुष्टो योगी ततो गतः,

याचनेन श्रान्तः स गृहं प्रत्यागतः,

भोजननिर्माणार्थं स प्राप्तान्नं सूर्पे स्थापितवान्,

तत्र मुष्टिपरिमिताः तण्डुलाः स्वर्णतण्डुला आसन्,

ततः स पश्चात्तापेन दुःखितो जातः ।

८. **अधस्तनानि पद्यानि पठित्वा पञ्च प्रश्नान् निर्मात**

अल्पमपि क्षितौ क्षिप्तं वटबीजं प्रवर्धते ।
जलयोगाद् यथा दानात् पुण्यवृक्षोऽपि वर्धते ॥

देयं भेषजमार्तस्य परिश्रान्तस्य चासनम् ।
तृषितस्य च पानीयं क्षुधितस्य च भोजनम् ॥

देयं भो ह्यधने धनं सुकृतिभिर्नो सञ्चितं सर्वदा
श्रीकर्णस्य बलेश्च विक्रमपतेरद्यापि कीर्तिः स्थिता ।
आश्चर्यं मधु दानभोगरहितं नष्टं चिरात् सञ्चितम्
निर्वेदादिति पाणिपादयुगलं घर्षन्त्यहो मक्षिकाः ॥

९. **अधस्तने पद्ये पठित्वा प्रश्नानुत्तरयत**

दानेन प्राप्यते स्वर्गो दानेन सुखमश्नुते ।
इहामुत्र च दानेन पूज्यो भवति मानवः ॥

हस्तस्य भूषणं दानं सत्यं कण्ठस्य भूषणम् ।
श्रोत्रस्य भूषणं शास्त्रं भूषणैः किं प्रयोजनम् ? ॥

(क) स्वर्गः कथं प्राप्यते ?
(ख) दानेन किमश्नुते ?
(ग) मानवः कथं पूज्यो भवति ?
(घ) हस्तस्य भूषणं किमस्ति ?
(ङ) शास्त्रं कस्य भूषणमस्ति ?

## व्याकरणानुशीलनम्

१. **प्रदत्तं रूपावलिं पठित्वा सखिभिस्सह विमृशत**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | राजा | राजानौ | राजानः |
| द्वितीया | राजानम् | राजानौ | राज्ञः |
| तृतीया | राज्ञा | राजभ्याम् | राजभिः |
| चतुर्थी | राज्ञे | राजभ्याम् | राजभ्यः |

| | | | |
|---|---|---|---|
| पञ्चमी | राज्ञः | राजभ्याम् | राजभ्यः |
| षष्ठी | राज्ञः | राज्ञोः | राज्ञाम् |
| सप्तमी | राज्ञि/राजनि | राज्ञोः | राजसु |
| सम्बोधनम् | हे राजन् ! | हे राजानौ ! | हे राजानः ! |

२. **राजन्-शब्दस्य रूपैः रिक्तस्थानं पूरयत**

(क) पुरा दशरथः अयोध्यायाः ......... आसीत् ।

(ख) ........ रामस्य राज्ये प्रजाः सुखेन जीवनं यापयन्ति स्म ।

(ग) विदुरः ........ धृतराष्ट्राय परामर्शमयच्छत् ।

(घ) प्रजाः ......... सम्मानयन्ति ।

३. **पदानि प्रयुज्य वाक्यानि रचयत**

राजानः, राज्ञे, राज्ञि, राजसु, राज्ञाम्, राज्ञा ।

## रचनात्मकोऽभ्यासः

१. **समीपस्थस्य कस्यचन अनाथालयस्य, वृद्धाश्रमस्य वा साहाय्यार्थं किं कर्तुं शक्यते ? परस्परं विमृश्य कक्षायां श्रावयत ।**

२. **स्वस्य समाजे प्रसिद्धस्य कस्यचन दानपरायणस्य समाजसेविनश्चरितं वर्णयित्वा कक्षायां श्रावयत ।**

# सामाजिकसञ्जालस्य सदुपयोगः

(श्रमाय विदेशं गतो मोहनः गृहमागतोऽस्ति । मध्याह्नकालिकमल्पाहारं कृत्वा स भगिन्याः प्रकोष्ठं प्रविशति । तत्र तद्भगिनी निर्मला पर्यङ्कमुपस्थाय फेसबुकाभिधेयं सामाजिकसञ्जालं पश्यन्ती दृश्यते ।)

**मोहनः** किं कुर्वन्ती असि निर्मले । (ईषत्त्रस्ता निर्मला दूरभाषमुपधान्यां गोपयति) किं स्थापितमुपधान्या अधस्तात् ?

**निर्मला** (कम्पमानेन स्वरेण) अग्रज, किमपि नास्ति । विश्रामाय पर्यङ्के तिष्ठन्ती अस्मि । (सा उत्तिष्ठति । मोहनः ! उपधान्या दूरभाषं गृह्णाति ।)

**मोहनः** भगिनि ! सत्यं ब्रूहि, त्वं दूरभाषे सामाजिकसञ्जालं प्रयुञ्जाना आसीः ?

**निर्मला** आम्, मित्रैः सह अक्षरवार्तां कुर्वन्ती आसम् । (आसन्द्यां तिष्ठति ।)

**मोहनः** (निर्मलायाः समीपे वसन्) त्वं अध्ययनमुपेक्ष्य सामाजिकसञ्जाले निष्प्रयोजनं संलग्ना वर्तसे इति माता विदेशस्थं मां प्रायः श्रावयति स्म । अद्याऽहमपि तव तदवस्थां प्रत्यक्षं दृष्टवान् ।

**निर्मला** नहि अग्रज, अहं सर्वदा सामाजिकसञ्जालं न चालयामि । माता वृथा मद्विषये वदति ।

**मोहनः** त्वं मम एकाकिनी भगिनी वर्तसे । भ्रातास्मि तव । जानाम्यहं त्वं किं किं कुर्वन्ती वर्तसे । फेसबुकाभिधेयं सञ्चाल्य युट्युबाभिधेयं सञ्जालं च परिपश्य त्वं वृथा कालं क्षिपसि । एवं मा कुरु भगिनि । सामाजिकसञ्जालस्य दुरुपयोगो महतीं हानिं निमन्त्रयति ।

**निर्मला** भ्रातः ! कीदृशी हानिर्भवति सामाजिकसञ्जालस्य प्रयोगेन ?

**मोहनः** सामाजिकसञ्जालस्य प्रयोगेण हानिर्न भवति किन्तु अनावश्यकप्रयोगेण दुरुपयोगेन च हानिर्भवति ।

**निर्मला** (मोहनस्य मुखं दृष्ट्वा) सत्यं ब्रमीमि चेत् अहमपि फेसबुक-युट्युब-ट्विटर-इत्यादीन् सामाजिकसञ्जालान् च चालयामि पश्यामि च । किन्तु इतः पर्यन्तं मम कापि हानिर्नैव जाता ।

**मोहनः** समयस्य अपव्ययोऽभवत् । तवाध्ययनं क्षयमगच्छत् । पारिवारिकेषु कर्मसु तव निष्क्रियता परिदृष्टा । मातापितरौ चिन्तितौ अभवताम् । एतत् किम् ? इयमपि हानिरेवास्ति ।

**निर्मला** तर्हि अहं विज्ञानप्रदत्तं सौविध्यं त्यजेयम् ? नैतदुचितं सम्भवञ्च । यतो हि वर्तमाने विज्ञानप्रविधियुते समये सामाजिकसञ्जालाद् दूरस्थो भूत्वा कथं स्थातुं शक्यते ?

**मोहनः** सामाजिकसञ्जालस्य प्रयोगं न कुरु; तस्माद् दूरस्था भव इति तु अहं नैवोक्तवान् ।

**निर्मला** तर्हि अहं किं कुर्याम् ? प्राप्तेऽवसरे कार्यं नास्ति चेत् सामाजिकसञ्जालस्य प्रयोगे मनो रमते । अहं जानामि, सामाजिकसञ्जालस्य अन्तः प्रविश्य यस्य वा तस्य वा चालनं नोचितमिति । तथापि मनोरञ्जनाय अहं सायंप्रातः तत्र निमग्नीभूय तिष्ठामि । (क्षणं मौनीभूय) सामाजिकसञ्जालविषये अस्य लाभक्षयविषये च मां कथ्यतामग्रज ।

(थालिकायामल्पाहारस्य पानीयस्य च वर्तनं संस्थाप्य मातुः रुक्मिण्याः प्रवेशः)

**रुक्मिणी** भ्रातृभगिन्योः कस्मिन् विषये वार्ता चलन्ती वर्तते । वार्ता क्षणं त्यज । पुत्रि ! अल्पाहारं कुरु । (उत्पीठिकायां संस्थाप्य मोहनस्य निकटे तिष्ठति ।)

**निर्मला** सामाजिकसञ्जालविषयिणी वार्ता अस्ति । कथ्यतामग्रज ! सामाजिकसञ्जालः कः ?

**मोहनः** भगिनि, इन्टरनेटमाध्यमेन सङ्गणकयन्त्रादिषु उपलब्धोऽन्तरक्रियात्मकः प्रविधिः सामाजिकसञ्जाल उच्यते ।

**रुक्मिणी** सङ्गणकयन्त्रे दूरभाषे वा अन्तरसञ्जालप्रविधिद्वारा स्वविचारसर्जनडिजिटलचित्रचलचित्रादेः आदानप्रदानार्थं प्रयुज्यमानः प्रविधिरेव सामाजिकसञ्जालोऽस्ति ।

**मोहनः** एतद् अन्तरसञ्जालमाध्यमेन वार्तालापाय सूचनायाः आदानाय प्रदानाय च विश्वस्मिन् बहुभिः प्रयुक्तं साधनमस्ति । एतस्य सहयोगनेन समुदाये सामग्रीणामादानं प्रदानं च भवति । अतोऽयं सञ्जालः सामाजिकसञ्जालो निगदितः । फेसबुकट्विटरइन्स्टाग्रामादयः सामाजिकसञ्जालेऽग्रस्थानीया मन्यन्ते ।

**निर्मला** (पानीयं पीत्वा) अहं तु प्रायः फेसबुकाख्यं सञ्जालं पश्यामि । टिकटकाख्यं सञ्जालं चालयामि । कदाचित् स्वस्य चित्राणि फेसबुकाख्ये सञ्जाले स्थापयामि । तच्च मम मित्राणि पश्यन्ति; रोचनपूर्वकं टिप्पणीं कुर्वन्ति । तथा करणं मह्यमपि रोचते ।

**मोहनः** (भगिन्या अभिमुखो भूत्वा) भवतु नाम, कुरु तथा कदाचित् । वस्तुतस्तु सामाजिकसञ्जाला विचारस्य रुचेरभिव्यक्तेः सर्जनस्य च प्रकाशनाय सौविध्यं ददति किन्तु तत्र प्रदर्शिता अभिव्यक्ताः प्रस्तुताश्च सामग्र्योऽनुचिता अपि भवितुं शक्नुवन्ति । तादृशीभ्योऽनुचिताभ्यः सामग्रीभ्योऽस्माभिः सावधानैः सचेष्टैश्च भाव्यम् ।

**निर्मला** अहं सद्यस्कसमाचारेषु सामाजिकसञ्जालमाध्यमेन कृतमपराधं यदा कदा पश्यामि किन्तु न पठामि । तादृशा अपराधाः के भवन्ति ?

**रुक्मिणी** सामाजिकसञ्जालेन कतिपयानां जनानां प्रतिष्ठा क्षयीकृतापि दृश्यते । तन्माध्यमेन परेषां खेदजनकं

टिप्पणीकरणम्, सामाजिकैकताघातकसामग्रीणां प्रचारः, व्यक्तेः चारित्रिकलाञ्छनायुक्तो विषयविन्यासः, अनावश्यकी अनुचिता अक्षरवार्ता चेत्यादिरूपा अपराधाः समाजे जायमानाः सन्ति ।



**निर्मला** अहो ! सामाजिकसञ्जालस्य प्रयोक्त्रा सचेतसा भाव्यमिति मया सम्प्रति एव ज्ञातम् । एतस्य प्रयोगं कुर्वन्ती अपि अहमिमं विषयं कदापि नैव विचारितवती । मातः, इतोऽहं मनोरञ्जनाय अपि नाधिकं सामाजिकसञ्जालं प्रयुनज्मि ।

**रुक्मिणी** एवं भवेत् पुत्रि ! अध्ययने यद् आवश्यकं तदेव सामाजिकसञ्जाले द्रष्टव्यम् । (उत्पीठिकातः वर्तनं एकत्रीकुर्वन्ती) मनोरञ्जनाय तत्र कृतोऽधिकसमयव्ययोऽपि त्वादृशानां विद्यार्थिनां कृते तु दोष एव ।

**निर्मला** एवं स्यात्तर्हि मया एतावद्दिनपर्यन्तं सामाजिकसञ्जालस्य अनावश्यकप्रयोग एव विहितः । मातः ! अहं तस्य सदुपयोगं चिकीर्षामि । कथं तस्य सदुपयोगो भवति ?

**रुक्मिणी** सामाजिकसञ्जाले स्वप्रतिभाया रचनायाः क्षमतायाश्च प्रदर्शनं विधाय वयं स्वस्य क्षमतायाः प्रचारं कर्तुं शक्नुमः । जीविकायै अङ्गीकृतस्य व्यापारस्य व्यवसायस्यापि प्रचारं विधाय तस्यापि प्रवर्धनं कर्तुं शक्यते ।

**मोहनः** इदानीं फेसबुकटिकटकादिषु नृत्यगानचित्रलेखनादिकलायाः प्रचारं विधाय कतिपयैः कलाकारैः समाजे राष्ट्रे च महती प्रतिष्ठा लब्धास्तीति त्वया ज्ञातमेव स्यात् ।

**निर्मला** जानामि अग्रज । कैश्चित् स्वप्रतिभाविकासाय सामाजिकसञ्जालस्य सदुपयोगः कृतो वर्तते ।

**रुक्मिणी** पुत्रि ! त्वं गानकलायां निष्णाता वर्तसे । त्वं गीतं गात्वा सामाजिकसञ्जाले सार्वजनिकीकरणं कर्तुं शक्नोसि किन्तु तत्र तव चेतो न गच्छति इति दुःखस्य विषयः ।

**निर्मला** शनैः शनैः तथा करोमि । मातः ! सामाजिकसञ्जालस्य सदुपयोगं वयं कया रीत्या कर्तुं शक्नुमः ।

**मोहनः** (मातरमवरुध्य) अहं ब्रवीमि । शृणु, प्रयोजनमनुसृत्य सामाजिकसञ्जालस्य प्रयोगः कर्तव्यः । यथा इमेलम्यासेन्जरादिमाध्यमेन सूचनाया आदानप्रदानादि शीघ्रं कर्तुं शक्यते । गृहमेवोपस्थाय विश्वस्मिन् यत्र कुत्रापि स्थितेन जनेन सह श्रव्यदृश्यात्मिकां प्रत्यक्षवार्तां कर्तुं शक्यते । कस्याश्चन घटनायाः प्रत्यक्षप्रसारणम्, वस्तुनो गृहादेव विक्रयणम्, कस्यचन विषयसम्बद्धस्य स्वविचारस्य उपस्थापनं च सरलतया कर्तुं शक्यते ।

**रुक्मिणी** मुख्यतो विद्यार्थिणामनुसन्धानकर्मिणां वा अनुसन्धाने सहायतायै सामाजिकसञ्जालो नितरामुपयोगी भवति । त्वयापि तस्य प्रयोगः शैक्षिकलाभाय कार्यः ।

**निर्मला** एवं मातः ! अहमेतदनन्तरं तदेव करोमि ।

**मोहनः** तर्हि मम भगिनी इतोऽनावश्यककर्मसु कालक्षेपणाय वा सामाजिकसञ्जालप्रयोगं न करिष्यतीति विश्वसीमि ।

**निर्मला** अवश्यं भ्रातः !

**रुक्मिणी** अहो ! पुत्रपुत्रीभ्यां सह वार्तां कुर्वन्ती अहं भोजननिर्माणाय विलम्बिता अभवम् । युवां वार्तां कुरुतम् । अहं तु पाकशालां गच्छामि । (रुक्मिणी उत्पीठिकास्थं भाण्डं गृहीत्वा निर्गच्छति ।)

**मोहनः** भगिनि ! त्वमपि अध्ययनाय सज्जीभव । अहं पितुः कक्षं गच्छामि । (सोऽपि निर्गच्छति ।)

## अभ्यासः

### श्रवणं भाषणञ्च

१. **पाठस्थं संवादं साभिनयं पठत ।**

२. **मोहनस्य संवादात् अव्ययपदानि, रुक्मिण्याः संवादात् क्रियापदानि, निर्मलायाः संवादात् समस्तपदानि च अन्विष्य कक्षायां श्रावयत ।**

३. **पाठप्रयुक्तानि कानिचन दश समासयुक्तानि पदानि अन्विष्य तेषां शुद्धोच्चारणं कुरुत ।**

४. **अधो लिखितानि पदानि शुद्धतया उच्चारयत**

मध्याह्नकालिकम्, पर्यङ्कम्, ईषत्त्रस्ता, उपधान्याः, सौविध्यम्, कस्मिन् विषये, चारित्रिकलाञ्छनायुतः, स्वविचारस्य उपस्थापनम्

५. **शब्दार्थान् कथयत**

उपस्थाय, प्रत्यक्षतः, जल्पति, परिदृष्टा, उत्पीठिकायाम्, विकृतयः, आत्मघातम्, अङ्गीकृतस्य, विक्रयणम्, तर्हि, अक्षरवार्ता

६. **प्रदत्तानां विशेषणपदानां विशेष्यपदं पाठानुसारं कथयत**

विदेशं गतः, एकाकिनी, महती, प्राप्ते, अन्तरक्रियात्मकः, प्रयुक्तम्, आहतानाम्, कृतः

## ७. अधस्तनमनुच्छेदं पठित्वा कांश्चन पञ्च प्रश्नान् निर्मात

अस्माकं समाजस्य विकासाय अस्माभिरेव कार्यं कर्तव्यम् । तदर्थं सम्प्रति अनेकानि कार्याणि कर्तव्यानि सन्ति । तेषु एकं महत्त्वपूर्णञ्च कार्यमस्ति विद्युतः उपलब्धता । पर्वतीयग्रामेभ्योऽनेका नद्यो वहन्ति । ताभ्यो विद्युदुत्पादनमपि कृतमस्ति किन्तु तत्रत्या एव नागरिका अन्धकारे जीवितुं विवशाः सन्ति । तत्र विद्युद्विस्तारः सहजो नास्ति नूनम् । तत्र भौगोलिकी जटिलता कारणं भवितुं शक्नोति किन्तु कामपि युक्तिं पुरस्कृत्य ग्रामा विद्युत्प्रकाशेन प्रकाशिता भवेयुः । विद्युदभावेन विकटस्था ग्रामीणा नितरां कष्टकरं जीवनं जीवन्तः सन्ति । विद्युतोऽभावेन ग्रामेषु उद्योगानां स्थापनं सञ्चालनं च कठिनं जातम् । विद्युदभावाद् विद्यार्थिनोऽध्ययने समस्यामनुभवन्तः सन्ति । वर्तमान आधुनिकः संसारः प्रविधिमैत्री वर्तते । प्रविधेर्मूलं तत्त्वं विद्युदेव । येषु येषु ग्रामेषु विद्युन्नास्ति ते ते ग्रामा अविकसिता भवन्त्येव । अतो ग्राम्यसमाजे विद्युद्विस्तारपूर्वकं ग्रामविकासाय सर्वैः प्रयतनीयम् । यतो हि ग्रामविकासादेव देशविकासः सम्भवति ।

## ८. अधो दत्तं गद्यं पठित्वा प्रदत्तप्रश्नान् वाक्येनैकेनोत्तरं कथयत

श्रमाय विदेशं गतो मोहनो गृहमागतोऽस्ति । मध्याह्नकालिकमल्पाहारं कृत्वा स भगिन्याः प्रकोष्ठं प्रविशति । तत्र तद्भगिनी निर्मला पर्यङ्कमुपस्थाय फेसबुकाख्यं सञ्जालं पश्यन्ती दृश्यते ।

(क) मोहनः किमर्थं विदेशं गतः आसीत् ?
(ख) मोहनः इदानीं कुत्र वर्तते ?
(ग) कदा मोहनः चायं पीतवान् ?
(घ) मोहनस्य भगिन्याः नाम किम् ?
(ङ) निर्मला कुत्र स्थिता आसीत् ?
(च) कः कस्याः प्रकोष्ठं प्रविशति ?
(छ) निर्मला किं कुर्वन्ती अस्ति ?
(ज) गद्ये कः समयः सङ्केतितः ?

# पठनम्

## १. सन्धिप्रक्रियां पठित्वा सखिभिस्सह विमृशत

| सन्धिपदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| तद्भगिनी | तत्+भगिनी | व्यञ्जनसन्धिः |
| संलग्ना | सम्+लग्ना | व्यञ्जनसन्धिः |
| तदवस्थाम् | तत्+अवस्थाम् | व्यञ्जनसन्धिः |
| अपव्ययोऽभवत् | अपव्ययः+अभवत् | विसर्गसन्धिः |
| दूरस्थो भूत्वा | दूरस्थः+भूत्वा | विसर्गसन्धिः |
| नोचितम् | न+उचितम् | स्वरसन्धिः |

| | | |
|---|---|---|
| तथापि | तथा+अपि | स्वरसन्धिः |
| सचेष्टैश्च | सचेष्टैः+च | विसर्गसन्धिः |
| जनास्तु | जनाः+तु | विसर्गसन्धिः |
| समाचारांश्च | समाचारान्+च | व्यञ्जनसन्धिः |
| अतस्तत्र | अतः+तत्र | विसर्गसन्धिः |
| नूनमस्ति | नूनम्+ अस्ति | वर्णसंयोगः |
| इत्यस्मिन् | इति+अस्मिन् | स्वरसन्धिः |
| अस्तीति | अस्ति+इति | स्वरसन्धिः |
| त्वयापि | त्वया+अपि | स्वरसन्धिः |

२. **अनुच्छेदं पठित्वा शीर्षकं प्रदाय सारांशं कथयत**

आङ्गलभाषायां प्रसिद्धः कम्प्युटरशब्दः संस्कृते सङ्केगणकशब्देन निगद्यते । सङ्गणक आधुनिकविज्ञानस्य सर्वोत्कृष्ट आविष्कारो मन्यते । अतोऽयमाधुनिकः कालः सङ्गणकयुगं भण्यते । सङ्गणकस्य आविष्कारः १८३३ ईसवीयवर्षे बेलायतदेशीयेन चार्ल्सबाबेजमहोदयेन कृतः । अतः स सङ्गणकस्य पिता इति कथ्यते । सङ्गणकः स्वचालितं विद्युद्यन्त्रमस्ति । सङ्गणको गणितस्य जटिलतमानामपि समस्यानां तीव्रगत्या समुचितं समाधानं कुरुते । इत्येव न, एकस्मिन्नेव समये अनेककार्याणां सम्पादनं सङ्गणकस्य वैशिष्ट्यमस्ति । उपन्यस्तानां तथ्यानां दीर्घकालपर्यन्तं संरक्षणाय स्मरणाय च सङ्गणकः सक्षमो भवति । इदानीमेकमपि क्षेत्रं नास्ति यत्र सङ्गणक उपयोगी न स्यात् । अनेन मानवजीवने नवीना क्रान्तिर्विहिता । सङ्गणके इन्टरनेटप्रविधिद्वारा अधुना यद्वा तद्वा सर्वं कार्यं कर्तुं शक्यते । इन्टरनेटप्रविधिना कामपि सूचनां झटिति विश्वस्मिन् प्रापयितुं शक्यते । विशेषतोऽध्ययनानुसन्धानादिकार्यं विना इन्टरनेटमसम्भवमिव सञ्जातमस्ति । अत इन्टरनेटसङ्गणकौ साम्प्रतिकानां मानवानां कृते वरदानभूतौ वर्तेते ।

३. **अधोलिखितं पत्रं पठित्वा प्रश्नान् उत्तरयत**

कानेपोखरी ६, रमणीयग्रामः
दिनाङ्कः २०७८/१०/१३

**पूज्यपितृचरणयोः**
सादरं प्रणमामि

अत्राहं भवतामाशीर्वचसा कुशली एवास्मि । तत्र सपरिजनो भवान् अपि कौशल्यमनुभवन् वर्तत इति कामये । मम अध्ययनस्य सफलतायै भवता प्रत्यहं कृषिकर्मणि कृतं दुःखं फलीभूतं वर्तते । द्वितीयत्रैमासिकपरीक्षायां मया सर्वोत्कृष्टाङ्काः प्राप्ताः । इदानीं वार्षिकपरीक्षायाः कृते मनोयोगेन पठन्

अस्मि । मम पठनोद्योगं विलोक्य विद्यालये शिक्षकाः प्रसन्नाः सन्ति । वर्षेऽस्मिन् अतिरिक्तक्रियाकलापेषु विशेषतः कवितालेखने पादकन्दुकक्रीडने च मया कौशलं प्रदर्शितम् । अन्यत् सर्वं मङ्गलमेव विद्यते । वार्षिकपरीक्षायाः कृते पुस्तिकादिसामग्रीक्रयणाय त्रिसहस्ररूप्यकाणामावश्यकता वर्तते । ईसेवामाध्यमेन भवान् यथाशीघ्रं प्रेषयतु इति निवेदयन् विरमामि ।

भवत्पत्रस्य प्रतीक्षारतः पुत्रः

**हरिकृष्णः यादवः**

(क) पत्रं केन कस्मै लिखितम् ?

(ख) हरिकृष्ण इदानीं कुत्र निवसति ?

(ग) पिता प्रत्यहं किं कर्म करोति ?

(घ) हरिकृष्णस्य कौशलं कुत्र दृष्टम् ?

(ङ) शिक्षकाणां प्रसन्नतायै को हेतुः ?

(च) रूप्यकाणामावश्यकता कस्मिन् कार्ये कथिता ?

(ज) हरिकृष्णः केन माध्यमेन रूप्यकप्रेषणाय निवेदयति ?

### ४. अधस्तनं नीतिपद्यं सलयं वाचयित्वा भावार्थं पठत

स हि गगनविहारी कल्मषध्वंसकारी

दशशतकरधारी ज्योतिषां मध्यचारी ।

विधुरपि विधियोगात् ग्रस्यते राहुणासौ

लिखितमपि ललाटे प्रोज्झितुं कः समर्थः ॥

**भावार्थः**– आकाशे विचरन् चन्द्रो रात्रौ जगति व्याप्तमन्धकारं दूरीकरोति । सहस्रसः किरणैः सम्पन्नः स नक्षत्राणां मध्यस्थो भूत्वा सर्वदा विराजते । तादृशश्चन्द्रोऽपि सर्वदा स्वतन्त्रो नास्ति; दैवाधीनो वर्तते । यतो हि स समये समये राहुणा ग्रस्तो भवति । अतो दैवेन ललाटे यल्लिखितं तद् मार्जयितुं संसारे कोऽपि जनः समर्थो न भवति ।

## लेखनम्

### १. कोष्ठकस्य समुचितपदं प्रयुज्य रिक्तस्थानं पूरयत

(क) निर्मला दूरभाषम् .............. गोपयति । (उपधानी, उपधान्याम्, उपधान्याय)

(ख) त्वं मम .............. भगिनी वर्तसे । (एकाकि, एकाकी, एकाकिनी)

(ग) तवाध्ययनं क्षयम् ............. । (अगच्छत्, गतम्, गतः)

(घ) वार्ता ............. त्यज । (क्षणे, क्षणेन, क्षणम्)

(ङ) सामाजिकसञ्जालस्य दुष्प्रयोक्तृभ्यः दण्डव्यवस्था ............. । (कर्तव्यः, कर्तव्या, कर्तव्यम्)

२. **प्रदत्तपदानि प्रयुज्य वाक्यरचनां कुरुत**

सह, अवश्यम्, एवम्, किन्तु, झटिति, तर्हि, चेत्, पुनः, अपि, वृथा

| | | | | | |
|---|---|---|---|---|---|
| अन्तः | अग्रजः | लाभः | दूरस्थः | आदानम् | सुकृत्यम् |
| हानिः | कुकृत्यम् | बहिः | प्रदानम् | निकटस्थः | अनुजः |

३. **विपरीतार्थकपदानि मञ्जूषातः अन्विष्य लिखत**

४. **समीचीनकथने 'आम्' असमीचीनकथने 'न' इति लिखत**

(क) निर्मला पाकशालायां स्थिता अस्ति ।

(ख) सामाजिकसञ्जालस्य दुरुपयोगः महतीं हानिं निमन्त्रयति ।

(ग) मोहनः स्वदेशे एव व्यवसायं करोति ।

(घ) रुक्मिणी भोजनं गृहीत्वा निर्मलायाः प्रकोष्ठं प्राविशत् ।

(ङ) मोहनो निर्मलाया अनुजोऽस्ति ।

(च) निर्मला गानकलायां दक्षा वर्तते ।

५. **मञ्जूषायां प्रदत्तपदानि लिङ्गानुसारं वर्गीकृत्य लिखत**

माता, भ्राता, भाव्यम्, प्रविधिः, प्रयोक्ता, पश्यन्ती, उपयोगि, विकृतिः, हानिः, मातापितरौ, सौविध्यम्, मनः, महती, विलम्बितः, वस्तु

| पुंलिङ्गिपदानि | स्त्रीलिङ्गिपदानि | नपुंसकलिङ्गिपदानि |
|---|---|---|
| | | |
| | | |
| | | |
| | | |
| | | |

६. **उदाहरणमनुसृत्य प्रदत्तवाक्यं वाक्यद्वये विश्लेषयत**

**यथा** – परिश्रमी कृषकः प्रत्यहं क्षेत्रं गच्छति ।

कृषकः परिश्रमी अस्ति । स प्रत्यहं क्षेत्रं गच्छति ।

(क) विनयिनः साधवः सर्वैः सह प्रेम्णा व्यवहरन्ति ।

(ख) भग्नस्य छत्रस्य धारणं न कुरु ।

(ग) उचितं कर्म कुर्वन् नरो मधुरं फलमश्नाति ।

(घ) क्रीडत्सु वानरेषु वृक्षशाखाः कम्पन्ते ।

(ङ) प्रातः उत्तिष्ठन् पुत्रः पितरौ प्रणमति ।

(च) व्यवसायी सखा मिथिलानगरं गमिष्यति ।

७. **वाक्यगतामशुद्धिं संशोध्य पुनर्लेखनं कुरुत**

(क) स मम सफलताय भगवन्तं प्रार्थयन्ते ।

(ख) अस्माकं पुर्वजा समरे विरतां प्रादर्शयन् ।

(ग) गीता स्पष्टवादी सुशिला च गृहबधूरस्ति ।

(घ) संस्कृतं पठित्वा संस्कृतीं रक्षामि ।

(ङ) माहान्तो जनाः लोकहीतं चरन्ति ।

(च) पर्याबरणरक्षायै वनश्य सुरक्षा कर्तव्यम् ।

९. **सर्वोपयुक्तमुत्तरमन्विष्य लिखत**

(क) संगणकादियन्त्रेषु उपलब्धोऽन्तरक्रियात्मकः प्रविधिः किमुच्यते ?

(अ) इन्टरनेटः (आ) सामाजिकसञ्जालः (इ) जिमेलः

(ख) सामाजिकसञ्जालः किं प्रदर्शयितुं सौविध्यं ददाति ?

(अ) समाजम् (आ) वैशिष्ट्यम् (इ) प्रतिभाम्

(ग) विद्यार्थिनां कृते कस्मिन् कार्ये सामाजिकसञ्जाल उपयोगी भवति ?

(अ) लेखने (आ) अध्ययने (इ) खेलने

(घ) सामाजिकसञ्जाले स्थापिता सामग्री झटिति किं भवति ?

(अ) प्रसिद्धा (आ) सर्वजनदृष्टा (इ) विश्वव्यापीकृता

(ङ) सामाजिकसञ्जालस्य प्रयोगः कीदृशे कर्मणि कर्तव्यः ?

(अ) रचनात्मककर्मणि (आ) अपराधकर्मणि (इ) आत्मप्रशंसाकर्मणि

## व्याकरणानुशीलनम्

**भ्रातृ-शब्दस्य रूपावली**

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | भ्राता | भ्रातरौ | भ्रातरः |
| द्वितीया | भ्रातरम् | भ्रातरौ | भ्रातॄन् |
| तृतीया | भ्रात्रा | भ्रातृभ्याम् | भ्रातृभिः |
| चतुर्थी | भ्रात्रे | भ्रातृभ्याम् | भ्रातृभ्यः |
| पञ्चमी | भ्रातुः | भ्रातृभ्याम् | भ्रातृभ्यः |
| षष्ठी | भ्रातुः | भ्रात्रोः | भ्रातॄणाम् |
| सप्तमी | भ्रातरि | भ्रात्रोः | भ्रातृषु |
| सम्बोधनम् | हे भ्रातः ! | हे भ्रातरौ ! | हे भ्रातरः ! |

१. **भ्रातृशब्दस्य समुचितपदं प्रयुज्य वाक्यानि पूरयत**

(क) मम .............. द्वादशकक्षायां पठति ।

(ख) .............. सहाय्येनाहं गृहकार्यमकरवम् ।

(ग) पितुः ............. विश्वासो वर्तते ।

(घ) ................ पायसोऽतीव रोचते ।

(ङ) अनुजः ............. आहूतवान् ।

२. रूपावलीं पूरयत

**मातृ-शब्दस्य रूपावली** (स्त्रीलिङ्गे)

| विभक्तिः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमा | ........... | मातरौ | ........... |
| द्वितीया | मातरम् | ........... | मातॄन् |
| तृतीया | ........... | मातृभ्याम् | ........... |
| चतुर्थी | ........... | ........... | मातृभ्यः |
| पञ्चमी | मातुः | मातृभ्याम् | ........... |
| षष्ठी | ........... | मात्रोः | मातॄणाम् |
| सप्तमी | मातरि | ........... | मातृषु |
| सम्बोधनम् | ........... | हे मातरौ ! | ........... |

३. कर्तृशब्दस्य रूपावलीं लिखत ।

४. पदानि प्रयुज्य वाक्यरचनां कुरुत

भोक्तुः, पितरम्, मात्रा, कर्तृषु, मातरः

## रचनात्मकोऽभ्यासः

१. सामाजिकसञ्जालस्य प्रयोगः त्वया कस्मिन् कस्मिन् कार्ये कृतोऽस्ति ? तेन कियन्त्य उपलब्धयः हानयश्च जाताः ? त्वया प्राप्ता उपलब्धयो हानयश्च मञ्जूषां निर्माय पृथक् पृथक् लिखत ।

२. विद्यार्थिना सामाजिकसञ्जालस्य सदुपयोगः कथं कर्तव्यः ? त्रिचतुरैश्छात्रैः सह विमर्शं विधाय लिखत ।

३. त्रयाणां पात्राणां प्रयोगं कृत्वा अधो लिखितयोर्विषययोर्नातिदीर्घं संवादं लिखत

(क) वनसंरक्षणम्

(ख) मातृसेवा

# महाकविः श्रीहर्षः

श्रीहर्षः संस्कृतसाहित्यस्य ख्यातनामा महाकविरासीत् । अस्य कवित्वं विद्वत्त्वं च संस्कृतसाहित्ये बहु चर्च्यते । कल्पनाया अद्भुततताप्रदर्शने, अतिशयोक्तेर्मनोहरतोद्भावने, प्रकृतेः सजीवतानिर्दशने च श्रीहर्षस्य वैशिष्ट्यं प्रसिद्धमस्ति । संकृतसाहित्ये बृहत्त्रयीनाम्ना भारवेः किरातार्जुनीयम्, माघस्य शिशुपालवधम्, श्रीहर्षस्य नैषधीयचरितं चेति महाकाव्यानि गण्यन्ते । एतेष्वपि विविधदृष्ट्या नैषधीयचरितस्य सर्वाधिकं महत्त्वं प्रमाणितं वर्तते ।

श्रीहर्षस्य पितुर्नाम हीरःमातुर्नाम च मामल्लदेवी आस्ताम् । हीरः काशीनरेशस्य गहडवालवंशिनो विजयचन्द्रस्य सभायाः प्रधानपण्डितः आसीत् । हीरस्य पुत्रः श्रीहर्षः द्वादशशताब्द्या उत्तरार्धस्य महाकविरासीत् । राजसभायां केनापि पण्डितेन सह हीरस्य शास्त्रार्थोऽभवत् यतो हीरः पराजितोऽभवत् । आसन्ने मरणे हीरः पराजयस्य दुःखं प्रकटयन् पुत्रं श्रीहर्षं पण्डितान् शास्त्रार्थे जेतुं निर्दिष्टवान् । श्रीहर्षः गङ्गायास्तीरमेत्य चिन्तामणिमन्त्रं वर्षावधि अजपत् । ततः प्रसन्ना भूत्वा भगवती त्रिपुरा श्रीहर्षाय प्रत्यक्षं दर्शनं दत्त्वा अतुलनीयपाण्डित्यस्य वरदानमदात् । तेन श्रीहर्षस्य चतुरस्रं वैदुष्यं प्रकटितम् । वैदुष्याधिक्येन श्रीहर्षस्य काव्यं न केनापि बुद्धम् । पुनः तपः कृत्वा तेन भगवती प्रसन्ना अभवत् । तस्या आशीर्वादेन उपायकथनेन च काव्यरचनासु किञ्चित् सरलता जातेति प्रसिद्धिरस्ति ।

श्रीहर्षः कीदृशः श्रुतिधर आसीदिति ज्ञातुमेका घटना उल्लिख्यते । एकदा स काश्मीरनरेशेन सह मेलितुं तत्र अगच्छत् । तत्रत्यानां कुटिलजनानां कारणेन राज्ञा सह मेलितुमसौ समर्थो नाभवत् । श्रीहर्ष एकस्मिन् मन्दिरे जपन् आसीत् । तत्र जलमानेतुं महिले आगतवत्यौ । जलभरणस्य विषये तयोर्मध्ये विवादोऽभवत् । विवादस्य निर्णयार्थं ते राज्ञा सह अमिलताम् । राजा च प्रमाणं प्रस्तोतुं ते निरदिशत् । ते च प्रमाणपुरुषस्य रूपेण राजसभायां श्रीहर्षं प्रस्तुतवत्यौ । श्रीहर्षोऽवदत्, “अहं काश्मीरवास्तव्यो नास्मि । अतोऽत्रत्यां भाषां न जानामि । परमनयोः कथनोपकथनं यथावत् श्रावयितुं शक्नोमि ।” राज्ञा आज्ञा प्रदत्ता । श्रीहर्षः तत् सर्वमश्रावयत् । राजा अतीव आश्चर्यचकितोऽभवत् । स सर्वं वृत्तान्तं निशम्य पाण्डितानां मत्सरतां प्रति दुःखं च प्रकटय्य श्रीहर्षं यथोचितं सममानयत् । ततः श्रीहर्षः काशीमागत्य घटनामिमां राजानमश्रावयत् । तदनन्तरं श्रीहर्षस्य कीर्तिः सर्वत्र व्यापृता अभवत् ।

श्रीहर्षः प्रशस्तिकारः, दार्शनिकग्रन्थकारः, महाकाव्यकारश्च आसीत् । स ‘विजयप्रशस्ति’नामकं ग्रन्थं व्यरचयत् । अत्र जयचन्द्रस्य पितुर्विजयचन्द्रस्य प्रशस्तिः वर्णिताऽस्ति । विजयचन्द्रस्य वीरताविजयौ ग्रन्थेऽस्मिन् विशेषेण वर्णितौ स्तः । ‘खण्डनखण्डखाद्यम्’ श्रीहर्षस्य वेदान्तविषयग्रन्थो वर्तते । एतद् वेदान्तशास्त्रस्य अनुपमं रत्नं मन्यते । अद्वैतवेदान्तस्य सिद्धान्तोऽत्र स्थिरीकृतो वर्तते । पाण्डित्यस्य दृष्ट्या ग्रन्थोऽयमुच्चस्तरीयो वर्तते । नैषधीयचरितमहाकाव्ये निषधदेशस्य राज्ञो नलस्य चरित्रं वर्णितमस्ति । राज्ञो नलस्य विदर्भदेशस्य राज्ञो

भीमस्य पुत्र्या दमयन्त्या सह सम्पन्नो विवाहस्तयोः प्रेमप्रसङ्गाश्चात्र वर्णिताः सन्ति । द्वाविंशतिसर्गात्मकस्य नैषधीयचरितस्य बहुशः टीकाश्च कृताः सन्ति । संस्कृतमहाकाव्यकलायाश्चूडान्तनिदर्शनं नैषधीयचरितमेव मन्यते । अत्र वस्तु-भाव-शिल्प-कल्पना-सौन्दर्यचेतसामपूर्वं सम्मिश्रणं प्राप्यते ।

कविः स्वयमेव कथयति यत् काव्यमेतत् केवलं विद्वज्जनानां कृते रचितं न तु खलेभ्यो मूर्खेभ्यो वा । कथनानुसारेण काव्यमपि विदुषां विद्यावैभवं परीक्षते । अत एव नैषधस्य विषये उक्तमस्ति, 'नैषधं विद्वदौषधम् ।' शृङ्गाररसपरिपूर्णेऽपि महाकाव्येऽस्मिन् शिष्टता-मर्यादा-परम्परानुशासनानामुल्लङ्घनं विहितं नास्ति । नैषधस्य गरिम्णो विषये 'उदिते नैषधे काव्ये क्व माघः क्व च भारविः' इत्युक्तिरपि प्रसिद्धा वर्तते ।

श्रीहर्षस्य समयाद् इतोऽपि संस्कृतसाहित्ये महाकाव्यानि रचितानि सन्ति, परं तानि नैषधं जेतुं समर्थानि न दृश्यन्ते । संस्कृतमहाकाव्यस्य उत्कर्षः श्रीहर्षं प्राप्य विश्रान्त इव दृश्यते । काव्योत्कर्षः श्रीहर्षः निखिलं संस्कृतसाहित्यमलङ्करोति ।

## अभ्यासः

### श्रवणं भाषणञ्च

१. **एकस्मात् छात्रात् पाठस्य वाचनं श्रुत्वा अन्ये छात्रा अनुवाचयत ।**

२. **पाठस्य प्रथमानुच्छेदात् क्रियापदानि, द्वितीयानुच्छेदाद् अव्ययपदानि, तृतीयानुच्छेदात् समस्तपदानि च अन्विष्य श्रावयत ।**

३. **शुद्धमुच्चारयत**

बृहत्त्रयी, गण्यन्ते, गहडवालवंशिनः, चिन्तामणिमन्त्रम्, वैदुष्याधिक्येन, श्रुतिधरः, तत्रत्यानाम्, प्रमाणपुरुषस्य, खण्डनखण्डखाद्यम्, काव्योत्कर्षः ।

४. **पदार्थान् कथयत**

विद्वत्त्वम्, निदर्शने, विवदनम्, मत्सरता, अनुपमम्, अपूर्वम्, सगर्वम्, विद्यावैभवम्, परीक्षते, अलङ्करोति ।

५. **सन्धिं विच्छेद्य उच्चारयत**

मातुर्नाम, शास्त्रार्थमभवत्, वैदुष्याधिक्येन, श्रीहर्षोऽवदत्, घटनामिमाम्, ग्रन्थोऽयम्, टीकाश्च, निर्मितेति, इतोऽपि ।

### ६. एकवाक्येन उत्तरयत

(क) बृहत्त्रयीगणनायां कति महाकाव्यानि सन्ति ?

(ख) श्रीहर्षस्य समयः कः ?

(ग) प्रसन्ना भगवती श्रीहर्षाय किमदात् ?

(घ) महिलयोः कस्मिन् विषये विवदनमभवत् ?

(ङ) 'खण्डनखण्डखाद्यम्' कीदृशो ग्रन्थोऽस्ति ?

(च) नौषधीयचरितस्य नायिका का ?

(छ) संस्कृतमहाकाव्यस्य उत्कर्षः कुत्र प्राप्यते ?

## पठनम्

### १. सन्धिप्रक्रियां पठित्वा सखिभिस्सह विमृशत

| सन्धिपदम् | सन्धिविच्छेदः | सन्धिनाम |
|---|---|---|
| चेति | च + इति | स्वरसन्धिः |
| एतेष्वपि | एतेषु + अपि | स्वरसन्धिः |
| पराजितोऽभवत् | पराजितः + अभवत् | विसर्गसन्धिः |
| जनैश्च | जनैः + च | विसर्गसन्धिः |
| तयोर्मध्ये | तयोः + मध्ये | विसर्गसन्धिः |
| ततस्ताडनम् | ततः + ताडनम् | विसर्गसन्धिः |
| सिद्धान्तोऽत्र | सिद्धान्तः + अत्र | विसर्गसन्धिः |
| चात्र | च + अत्र | स्वरसन्धिः |
| मूर्खेभ्यो वा | मूर्खेभ्यः + वा | विसर्गसन्धिः |
| सूक्तिरस्ति | सूक्तिः + अस्ति | विसर्गसन्धिः |
| काव्योत्कर्षः | काव्य + उत्कर्षः | स्वरसन्धिः |

### २. अधोलिखितं गद्यांशं पठित्वा सारांशं निगदत

संस्कृतसाहित्ये प्रतिभाशालिन्याः कवयित्र्याः विज्जकायाश्च नामापि श्रूयते । सा रसभावभरितां कवितामलिखत् । तस्याः कवितायां मधुरा पदावली, हृदयहारी भावश्च प्राप्येते । प्रतिभासम्पन्नायाः विज्जकायाः जीवनस्य विषये स्पष्टं ज्ञानं न प्राप्यते। अस्या नामैव विज्जका विज्जाका विद्या वेति आसीदिति

अनुमीयते । विज्जकायाः आविर्भावकालो दण्डिनः पश्चाद् निर्धार्यते । विज्जकायाः कतिचित् पद्यानि संस्कृतकाव्याचार्यैः उद्धृतानि सन्ति । अस्याः कवितासु शृङ्गाररस व्यक्तो वर्तते । स्वभावोक्त्यलङ्कारस्य सौन्दर्यमपि चित्तमाह्लादयति । प्रकृतिवर्णनं रम्यं संवेद्यं च दृश्यते ।

### ३. अधोलिखितं गद्यखण्डं पठित्वा प्रश्नान् उत्तरयत

गद्यं वा पद्यं कीदृशं काव्यं पठितुं सरलं भवतीति विषये काव्यविदो मुहुर्मुहुर्विमृशन्ति । गद्यमपि काव्यं पद्यमपि काव्यमेव वर्तते । बाण-दण्डि-सुबन्धु-अम्बिकादत्तव्यासादयः कवयो गद्यकाव्यादपि कीर्तिपात्राणि अभवन् । वाल्मीकिरश्वघोष-कालिदास-भारवि-माघ-श्रीहर्षादयो महाकवयः पद्यकाव्यात् लोकविश्रुता अजायन्त । गद्येऽपि पद्यस्य गुणाः सन्निविष्टा भवन्ति । पद्येऽपि गद्यस्य प्रवाहो भवत्येव । कवीनां निकषं गद्यमिति काव्यज्ञानां कथनमस्ति । पद्ये लयोत्पादने सङ्गीताधाने प्रवाचने त यत् सौकर्यं भवति गद्ये तन्न सम्भवति । गद्ये च स्वातन्त्र्येण यद् वर्णितुं शक्यते पद्ये तत् सौविध्यं न मिलति । तदपि गद्यकाराः पद्यकाराः सर्वे एव साहित्यकारा इति निश्चयेन कथयितुं शक्यते ।

(क) गद्यकवयः के ?

(ख) महाकवयः के ?

(ग) गद्ये कस्य गुणाः सन्निविष्टाः भवन्ति ?

(घ) काव्यज्ञानां कथनं किम् ?

(ङ) गद्ये किं न सम्भवति ?

(च) पद्ये कीदृशं सौविध्यं न भवति ?

(छ) साहित्यकाराः के ?

### ४. अधोलिखितं गद्यांशं पठित्वा शीर्षकं निर्धारयत

जीवनीनां पठनेन को लाभ इति विद्यार्थिनो गुरून् पृच्छन्ति । ततः कीदृशी प्रेरणा मिलतीति च तेषां जिज्ञासा वर्तते । जीवनी विशिष्टव्यक्तेरेव लिख्यते । यो देशजनतयोर्हिताय कार्यं करोति तस्य जीवनी लिखितव्या । विद्या-क्रीडा-परोपकारादिकार्येषु दत्तमनसामपि जनानां जीवनी प्रेरणादायिनी भवति । ततो जीवने सत्कार्याणि कर्तुमुत्साहो वर्धते । विशिष्टजनानामनुभवेन शिक्षा च अवाप्यते । जीवनी कृतज्ञतायाः स्वरूपमपि अस्ति । महात्मनां कार्येण लाभो भवति । तस्य लाभस्य मूल्यं मापनेन निर्धारयितुं न शक्यते । जीवनीत इतिहासोऽपि ज्ञायते । जीवनीपठनात् प्राप्तव्यो लाभोऽतुलनीय एव भवति ।

## लेखनम्

### १. अधस्तनानि कथनानि संशोध्य लिखत

(क) श्रीहर्षो मूलतः प्रशस्तिकार आसीत् ।

(ख) श्रीहर्षः शास्त्रार्थे पण्डितैः पराजितोऽभवत् ।

(ग) हीरः श्रुतिधरो महाकविरासीत् ।

(घ) महिले श्रीहर्षं सममानयताम् ।

(ङ) नैषधीयचरिते द्वादशसर्गाः सन्ति ।

(च) श्रीहर्षेण स्वपरिचयः कुत्रापि दत्तो नास्ति ।

## २. पदानि प्रयुज्य वाक्यं रचयत

कवित्वम्, वैशिष्ट्यम्, प्रमाणितम्, पराजितः, वरदानम्, तपः, तत्रत्यानाम्, प्रमाणम्, कीर्तिः, अनुपमम्, सिद्धान्तः, टीकाः, औषधम्, प्रदर्शितः ।

## ३. निर्देशानुसारेण क्रियापदानि परिवर्तयत

(क) श्रीहर्षस्य महाकाव्यमन्यानि महाकाव्यानि अजयत् । (लट्लकारे)

(ख) श्रीहर्षः भागवतीं तोषयति । (लङ्लकारे)

(ग) हीरः पण्डितान् जेतुं श्रीहर्षं निर्दिशति । (लङ्लकारे)

(घ) श्रीहर्षः स्वकाव्ये परिचयमदात् । (लट्लकारे)

(ङ) नैषधीयचरितं प्रसिद्धं भवति । (लृट्लकारे)

## ४. कविभिः सह सूक्तिसंयोजनं कुरुत

| ‘अ’ खण्डः | ‘आ’ खण्डः |
|---|---|
| (क) बाणोच्छिष्टं जगत् सर्वम् | (क) कालिदासः |
| (ख) दण्डिनः पदलालित्यम् | (ख) माघः |
| (ग) उपमा कालिदासस्य | (ग) बाणः |
| (घ) नवसर्गगते माघे नव शब्दो न विद्यते | (घ) भवभूतिः |
| (ङ) वन्दे वाल्मीकिकोकिलम् | (ङ) वाल्मीकिः |
| (च) उत्तरे रामचरिते भवभूतिर्विशिष्यते | (च) दण्डी |

## ५. उदाहरणमनुसृत्य अधोलिखितं वाक्यद्वयमेकस्मिन् वाक्ये लिखत

**यथा–** शिष्यो गुरुं प्रणमति । स पुस्तकं पठति ।

शिष्यो गुरुं प्रणम्य पुस्तकं पठति ।

(क) शिशुः मातरं पश्यति । स हसति ।

(ख) पक्षिणः उड्डीयन्ते । ते दूरं यान्ति ।

(ग) भारवाहको भारं नयति । स गृहे प्रापयति ।

(घ) कोकिलो मधुरं कूजति । स मनो हरति ।

(ङ) मालाकारः पुष्पाणि सङ्कलयति । स मालां ग्रथ्नाति ।

## ६. अधोलिखितेषु वाक्येषु अशुद्धिं संशोधयत

(क) जीवनीलेखनं सरलो नास्ति ।

(ख) श्रीहर्षः नैषधीयचरितं लिखिष्यति ।

(ग) त्रिशुली गोसाइँकुण्डेन प्रवहति ।

(घ) भीमसेनस्तम्भः काष्ठमण्डपाद् वर्तते ।

(ङ) छात्रैः परिश्रमेण भाव्यम् ।

(च) महाकविर्माघो दानशीला आसीत् ।

## व्याकरणानुशीलनम्

**पथिन्-शब्दः**

| **विभक्तिः** | **एकवचनम्** | **द्विवचनम्** | **बहुवचनम्** |
|---|---|---|---|
| प्रथमा | पन्थाः | पन्थानौ | पन्थानः |
| द्वितीया | पन्थानम् | पन्थानौ | पथः |
| तृतीया | पथा | पथिभ्याम् | पथिभिः |
| चतुर्थी | पथे | पथिभ्याम् | पथिभ्यः |
| पञ्चमी | पथः | पथिभ्याम् | पथिभ्यः |
| षष्ठी | पथः | पथोः | पथाम् |
| सप्तमी | पथि | पथोः | पथिषु |
| सम्बोधनम् | हे पन्थाः ! | हे पन्थानौ ! | हे पन्थानः ! |

## १. पथिन्-शब्दस्य रूपैः रिक्तस्थानं पूरयत

(क) अहं ........................ चलामि ।

(ख) ............... रम्याः दृश्यन्ते ।

(ग) ............... निर्माणाय वित्तं नास्ति ।

(घ) महाजनो येन गतः स ...................... ।

२. **पदानि प्रयुज्य वाक्यानि रचयत**

पथा, पथिषु, पथे, पथोः, पन्थानम्

३. **पथिन्-शब्दस्य रूपाणिं विलोक्य मथिन्-शब्दस्य रूपावलिं लिखत ।**

## सृजनात्मकोऽभ्यासः

१. **अधोलिखिताः मुख्यपदावली आधृत्य सङ्क्षिप्तां जीवनीं लिखत**

**पाणिनिः**

– माता - दाक्षी

– जन्मस्थानम् -शालातुर

– स्थितिकालः –ई.पू.७००

– व्याकरणम् - अष्टाध्यायी

– काव्यम् - जाम्बवतीजयम्/पातालविजयं वा

– व्याकरणे - मानवमेधसः अपूर्वप्रदर्शनम्

– काव्ये - शृङ्गाररसाभिव्यक्तिः, प्रकृतिचित्रणं च

– व्याकरणग्रन्थरचनाप्रेरणा - माहेश्वराशीर्वादानुसरणम्

२. **जीवनीलेखने आवश्यकानि सूत्राणि विलिख्य परस्परं विमृशत, तानि शिक्षकं दर्शयित्वा अन्तिमरूपस्य आधारेण यथेच्छमेकस्य जनस्य जीवनीं सङ्क्षेपेण लिखत ।**

३. **गतवर्षस्य प्रवेशिकापरीक्षायां स्वकीयविद्यालयात् सर्वाधिकान् अङ्कान् प्राप्तवतः छात्रस्य सङ्क्षिप्तं परिचयं लिखित्वा शिक्षकं दर्शयत ।**

# आर्यसंस्कृतेर्वैज्ञानिकत्वम्

*(काष्ठमण्डपस्थे भानुभक्त-संस्कृत-माध्यमिक-विद्यालये वार्षिकोत्सवस्यावसरो वर्तते । विचित्राभिर्ध्वजाभिः पताकाभिश्च विद्यालयः सुसज्जितो विद्यते । वार्षिकोत्सवस्यावसरे विद्यालये वक्तृतायाः स्पर्द्धा समायोजितास्ति । वक्तृतायाः संयोजनाय नवमकक्षायामधीयाना विद्यार्थिनो नियोजिताः सन्ति । प्रधानाध्यापकस्य विक्रमचौधरीमहोदयस्य आज्ञानुसारेण विद्यार्थिनो विद्यालयस्य प्राङ्गणे मञ्चं सज्जीकृतवन्तः सन्ति । प्रधानाध्यापकस्याध्यक्षत्वे कार्यक्रमस्य शुभारम्भो जायमानो वर्तते । काष्ठमण्डपमहानगरस्य शिक्षासंयोजकः (शिक्षाधिकारी) रमेशझा प्रमुखोऽतिथिर्वर्तते । कार्यक्रमस्य सञ्चालनाय नवमकक्षायाः छात्रा शुभेच्छा महतो उद्यताऽस्ति । सा कार्यक्रमस्य सञ्चालनमारभते । स्पर्द्धायां हृदयेशः परियारः, नवीना रोकाया, समीरः पण्डितश्चेति त्रयः प्रतियोगिनो वर्तन्ते ।)*

उद्घोषिका

नमस्काराः !

अहमस्मि शुभेच्छा महतो । अहमस्मिन्नेव विद्यालये नवमकक्षायामधीयाना छात्रास्मि । सर्वप्रथममहं मम गुरुजनान् नौमि ।

वार्षिकोत्सवस्य निमन्त्रणं स्वीकृत्य विद्यालये सम्प्राप्ता अभ्यागताः ! अस्माकमभिभावकाः ! सञ्चारकर्मिणः ! पूर्वविद्यार्थिनः ! मम छात्रबान्धवाश्च ! वार्षिकोत्सवस्यावसरे समायोजितायामस्यां सभायां हृदयतः स्वागतं व्याहरामि ।

*(इत्युक्त्वा सा प्रथमं सा सभाध्यक्षस्य, प्रमुखातिथेः, निर्णायकानाम्, विशिष्टानां चामन्त्रितानां महानुभावानां च मञ्चे आसनग्रहणं कारयति । मञ्चस्याग्रे संस्थापिते सरस्वत्याश्चित्रे माल्यं समर्प्य दीपं च प्रज्वाल्य प्रमुखाऽतिथिः कार्यक्रमस्य शुभारम्भं विदधाति । प्रतियोगिनां क्रमचयनादयः कार्यक्रमाश्च समाप्यन्ते । अनन्तरं उद्घोषिका पुनः कथयति ।)*

अद्यत्वे वक्तृतायाः विषयो वर्तते- 'आर्यसंस्कृतेर्वैज्ञानिकत्वम्' । एतं विषयमवलम्ब्य त्रयो वक्तारः स्वस्य मन्तव्यं प्रस्तोष्यन्ति । एतस्यां स्पर्द्धायां पालनीयान् नियमान् श्रावयितुमहं निर्णायकस्यासने संस्थितं गुरुवर्यं सरोजथापामहाभागमनुरुणध्मि ।

*(सरोजथापा अग्रे आगत्य नियमान् श्रावयति ।)*

प्रियवक्तारः ! अहं स्पर्द्धाया नियमान् श्रावयामि, ध्यानेन शृण्वन्तु ।

- वक्त्रा पञ्चभिः क्षणैः स्वस्य विचाराः प्रस्तोतव्या भविष्यन्ति । चतुर्थे क्षणे समाप्ते समाप्तिकल्पः समयः सूचयिष्यते । तदनु वक्ता स्वस्य वक्तव्यं उपसंहर्तुमर्हति । समाप्ते पञ्चमे क्षणे समयसमापनस्य द्योतनाय घण्टानादो जायते । तदनन्तरमुक्ता विषया निर्णयार्थं न स्वीक्रियन्ते ।
- राष्ट्रविरुद्धाः, सद्भावनाविरुद्धाश्च विचारा निषिद्धास्सन्ति । वैयक्तिकजीवनसम्बद्धा आक्षेपाश्च वक्तृतायां नैवापेक्ष्यन्ते ।
- स्वस्य वक्तव्यं प्रस्तोतुं चिटिकादिसामग्र्याः प्रयोगो निषिद्धोऽस्ति ।
- निर्णायकानां निर्णय एवान्तिमो भवति । तत्र विवादस्यावसरो नैव भविष्यति ।

**उद्घोषिका**

धन्यवादान् व्याहरामि गुरुवर्यं प्रति ।

अतः परमहं प्रथमं वक्तारं मित्रवरं समीरपण्डितं स्वस्य विचारान् प्रस्तोतुमामन्त्रयामि ।

*(समीरपण्डितः मञ्चे गच्छति, ध्वनियन्त्रं सम्यक् संयोज्य इतस्ततो निरीक्षमाणः स्वस्य मन्तव्यमारभते ।)*

**समीरपण्डितः**

अस्याः सभायाः सभापतित्वं निर्वहमाणाः सभापतिमहोदयाः ! अस्माकं महानगरस्य शिक्षासंवाहकाः प्रमुखा अतिथयः ! नीरक्षीरविवेकिनो निर्णायकाः ! अज्ञानध्वान्तविध्वंसका गुरवः ! विद्यालयस्य निमन्त्रणं स्वीकृत्य मम वक्तृत्वं श्रोतुं सम्प्राप्ता अभ्यागताः ! सञ्चारकर्मिणः ! अस्माकमभिभावकाः ! मम अग्रजाः ! अनुजाः ! सहपाठिनः सखायश्च !

विद्यालयस्य वार्षिकोत्सवावसरे समायोजितायां वक्तृत्वस्पर्द्धायां भवतां पुरतः समुपस्थाय आर्यसंस्कृतेर्वैज्ञानिकताया विषये स्वस्य विचारान् प्रस्तोतुमहमुपस्थितोऽस्मि । एतदर्थमात्मानं धन्यं मन्ये ।

आर्यावर्तवासिनां संस्कृतिः आर्यसंस्कृतिरिति संसारे प्रसिद्धा वर्तते । आर्यशब्दः पूज्यार्थे प्रसिद्धो वर्तते । आर्याणामेष संस्कृतिरपि विश्वस्मिन् पूज्या संस्कृतिर्विद्यते । अत एवैषा आर्यसंस्कृतिरुच्यते । यस्यां संस्कृतौ मानवैरहरहः विधीयमानात् कर्मण आरभ्य जीवनशैलीपर्यन्ता विषयाः सम्यक् समाविष्टाः सन्ति । किं कर्तव्यम् ?

किमकर्तव्यम् ? किं भोक्तव्यम् ? किं वा नैव भोक्तव्यम् ? इत्यादि सर्वमार्यसंस्कृतौ सम्यग् व्यवस्थितं वर्तते । अस्याः संस्कृतेरनुशीलनेन जनः शरीरेण मनसा च स्वस्थः सन् सुखमयं जीवनं यापयितुं शक्नोति ।

अधुना विश्वस्मिन् जना आहारस्य विहारस्य च अनुशासनं नैव पालयन्ति । तेनैव कारणेन बहुभी रोगैर्ग्रस्ताः सन्तोऽल्पायुषो जायमानाः सन्ति । किन्तु सात्त्विकस्य राजसस्य तामसस्य वऽहारस्य किं फलं भवतीति आर्यसंस्कृतिर्निर्दिशति । सात्त्विकस्याहारस्य परिपालनेन स्वास्थ्यलाभो भवतीति अधुना वैज्ञानिका अपि मन्वते । अधुना जनाः शारीरिकसज्जतायै स्वास्थ्यलाभाय च निराहारं दिवसं नयन्ति । किन्तु आर्यसंस्कृतौ पूर्वमेव मुनय उपवासादीनां व्यवस्थां कृतवन्त आसन्, यदत्यन्तं वैज्ञानिकमस्तीति आधुनिकाश्चिकित्सका अपि स्वीकुर्वन्ति । उपवासादिद्वारा रोगप्रतिरोधिका शक्तिर्वर्धते येन अर्बुदादयो रोगाः शरीरे नोत्पद्यन्ते इति वैज्ञानिकानामनुसन्धानेन प्रमाणितं वर्तते ।

सूर्योदयात् प्राग् ब्रह्ममुर्हूते जागरितव्यम्, ततो ध्यानं, चिन्तनं योगाभ्यासादिकं च कर्तव्यमित्यादिका आर्यसंस्कृतेर्नियमा वर्तन्ते । जना अधुना मानसिकं स्वास्थ्यमाधृत्य चिन्तिता वर्तन्ते । योगाभ्यासस्तु विशेषतो मनसः स्थिरताया विषये उपदिशति, येन मनसि शान्तिरुत्पद्यते । किन्तु दिवाशयाद् रात्रौ जागरणाच्च रोगः प्रभवतीति आर्यसंस्कृतौ सहस्रवर्षैर्मुनिभिरुपदिष्टमासीत् ।

आर्यसंस्कृतिर्न केवलं शरीरस्य मनसश्च विषये उपदिशति । अपि तु जनस्य सामाजिकी प्रतिष्ठा कथं वर्तते, समाजे न्यायस्य व्यवस्था कथं सुदृढा भवति ? जनानां व्यावसायिकं कर्तव्यं किम् ? इत्यपि निर्दिशति । अध्यापकैः, विद्यार्थिभिः, राजभिः, नेतृभिः, गृहस्थैर्वा पालनीया व्यावहारिका नियमाः आर्यसंस्कृतौ सम्यग् व्यवस्थिताः सन्ति । *(समयसूचकः समाप्तिकल्पां समयसूचनां विधत्ते ।)*

किमधिकं ब्रूयाम् ? आर्यसंस्कृतौ किं नास्ति ? यदस्माकं जीवनस्य, विश्वस्य च शान्तये आवश्यकं तत्सर्वमार्यसंस्कृतौ निर्दिष्टं वर्तते । तच्च सर्वं वैज्ञानिकं वर्तते । वयमधुना स्वकीयां संस्कृतिं विस्मृत्य परकीयां संस्कृतिमङ्गीकुर्वन्तः स्मः, फलतः समाजे व्यभिचारो वर्धमानो वर्तते, नैतिकता क्षीयमाणा अस्ति, रोगैर्जना आक्रान्ता विद्यन्ते, समाजे शान्तिर्नैव दृश्यते, सच्चरित्रस्याभावः सर्वत्र व्याप्तो वर्तते । अधुना पाश्चात्त्याः आर्यसंस्कृतिमङ्गीकुर्वन्तः सन्ति, किन्तु वयं स्वकीयामाढ्यां संस्कृतिं विस्मरन्तः परसंस्कृतिमनुसरन्तः स्मः । एतादृशीमवस्थां दृष्ट्वा 'करस्थं पायसं त्यक्त्वा कूर्परं लेढि मूढधीः' इति उक्तिर्मम स्मृतिपथमायाति । परकीयां संस्कृतिमननुसृत्य स्वस्य संस्कृतिरेव दृढं पालनीया, येनास्माकं समाजश्शान्तो भविष्यति । किमधिकं सम्भाषणं विदधानि ? आर्योऽस्मीति गौरवेण हृदयं मे प्रफुल्लं वर्तते इति व्याहरन् इतो विरमामि । जयत्वस्माकमार्यसंस्कृतिः, जयत्वस्माकं देशो नेपालः, जयत्वस्माकं आर्यावर्तदेशः, जयतु संस्कृतम् ।

**उद्घोषिका**

ओजस्विनः सम्भाषणस्य कृते मित्रवरः समीरपण्डितो धन्यवादार्हः । इतः परं स्वकीयं वक्तव्यं प्रस्तोतुं प्रियसखीं नवीनारोकायामनुरुणध्मि ।

**नवीनारोकाया**

नमः सभाभ्यः सभापतिभ्यश्च ! सभापतेरासने विराजमानाः सभापतिमहोदयाः ! प्रमुखा अतिथयः ! मम गुरवः ! अभिभावकाः ! अग्रजाः ! अनुजाः ! सखायश्च ! भवतां सर्वेषां मे अभिभावदनम् ।

अहं भवतां पुरत आर्यसंस्कृतेर्वैज्ञानिकतां प्रस्तोतुमुपस्थिताऽस्मि । एतेन मम हृदयमतीव मोदमानं वर्तते । मित्रवरेण पूर्ववक्त्रा यत् पूर्वं प्रतिपादितं, तस्य पिष्टपेषणमावश्यकं नैव मन्ये । आर्यसंस्कृतेर्वैज्ञानिकत्वं तेनानेकैः प्रमाणैः प्रत्यपादि ।

आर्यसंस्कृतिः समाजे पौरस्त्यसंस्कृतिः, वैदिकसंस्कृतिः, सनातनसंस्कृतिरित्यादिभिः नामभिरपि प्रसिद्धा वर्तते याऽस्माकं संस्कृतिरस्ति । अहन्तु अस्माकं संस्कृतेः पर्यावरणमैत्रीं व्यवस्थां दृष्ट्वा अधिकं प्रसन्ना भवामि । आर्यसंस्कृतौ प्रकृतिः पूज्यते । अतः प्रकृतेर्विनाशः पापाय भवतीति आर्यसंस्कृतिरुपदिशति । जना अधुना पशूनामधिकारस्य विषये वार्तां कुर्वते, किन्तु आर्यसंस्कृतौ गावः, काकाः, कुक्कुराः, सर्पाश्च पूज्यन्ते, येऽस्माकं जीवने साहाय्यं कुर्वन्ति, पर्यावरणस्य शुद्धतायै च तेषां भूमिका महत्त्वपूर्णा भवति । 'मा हिंस्यात् सर्वा भूतानि' इति आर्यसंस्कृतेरुपदेशः सर्वप्राणिहिताय विद्यते । ऋषीणामाश्रमेषु मृगाः, व्याघ्राश्च निर्भयं विचरन्ति स्म इति श्रुत्वा अधुनापि अस्माकं चेतो मोमुद्यते ।

अस्माकं संस्कृतौ वृक्षा वनस्पतयश्च देवरूपा मन्यन्ते । तेषु जलसेचनं पुण्यलाभाय भवतीति अस्माकं संस्कृतौ व्यवस्था वर्तते । अश्वत्थस्य, तुलस्याश्च पूजनमार्यसंस्कृतौ प्रशस्यते । मानवानां प्राणवायोः संरक्षणायावश्यकमक्सिजनाभिधेयं प्राणवायुतत्त्वमश्वत्थे तुलस्यां च सर्वाधिकं भवतीति वैज्ञानिका अनुसन्धानेन प्रमाणयन्तः सन्ति । तुलसी तु सर्वविधरोगनियन्त्री औषधमाता वर्तते । गृहे तुलस्या रोपणम्, मार्गेषु वटपिप्पलयोः रोपणञ्चास्माकं सनातनी संस्कृतिर्वर्तते । अस्माकं पूर्वजाः सहस्रवर्षेभ्यः पूर्वमेव तेषां वृक्षाणां महिमानं जानन्ति स्म । आकाशः प्रदूषितो जायमानो वर्तते इति पूर्ववक्त्रा मित्रेण उक्तम्, तिलयवगोघृतादिकस्य हवनेन निःसृतेन धूमेन आकाशः स्वच्छो भवतीति वैज्ञानिकानामनुसन्धानेन सिद्धं वर्तते ।

भूमिरस्मभ्यं अन्नानि ओषधींश्च ददातीति तस्या उपकारकत्वं मत्वा तां मातृरूपेण आर्याः पूजयन्ति । जलस्रोतसां नदीनाम्, पुष्करिणीनाम्, समुद्रस्य च पूजनपरम्परा अस्मत्संस्कृतौ वर्तते एव । जना अधुना मृत्तिकाप्रदूषणस्य जलप्रदूषणस्य च विषये वार्तां कुर्वन्ति । किन्तु मुनयो वैदिककालादेव नद्यादिजलानां शुद्धतायै उपदिशन्ति स्म ।

आधुनिके समाजे भूगर्भविदो वदन्ति यत् पृथिवी प्रतिदिनं अनूर्वरा जायमाना विद्यते । तेन अन्नानामुत्पादनं क्षीयमाणं वर्तते । केभ्यश्चन वर्षेभ्यः पश्चात् पृथिव्यामन्नानामभावो भविता, अतोऽन्नानां सम्मानं कर्तव्यम्, तस्य पूजा विधेया इति । किन्तु वैदिकीं संस्कृतिमनुशीलयन्तोऽस्माकं पूर्वजाः 'अन्नं न निन्द्याद्, अन्नं ब्रह्म' इति पूर्वमेव उपदिदिशुः ।

पुरा वैदिका मुनयो मृत्तिकाभिः, शिलाभिः, वनस्पतिभिश्च निर्मितेषु उटजेषु वसन्ति स्म । ग्रामेष्वपि गृहाणां निर्माणं तथा भवति स्म, येषामुपभोगे समाप्ते ध्वंसः सहजतया भवति स्म, यत् पर्यावरणे शैघ्र्येण आनुकूल्यं लभते स्म । किन्तु आधुनिकानि नगराणि पाषाणकाननानि वर्तन्ते । एतादृशेषु गृहेषु निवासः सौविध्याय तु भवत्येव, किन्तु सौविध्यस्य कारणेन मानवानां जीवने ये रोगा वर्धन्ते तेषां गणना नैव सम्भवति । जनानामुपभोगाय अनेके सामग्र्यो निर्मिता भवन्ति । एतेषां निर्माणाय प्राकृतिकानां संसाधनानामत्यधिकः प्रयोगो भवति । अधुना सञ्चाल्यमानानामत्याधुनिकानामुद्योगानां कारणेन प्रत्यहं पर्यावरणं प्रदूषितं जायमानं वर्तते । पृथिव्यास्तापमानं प्रतिदिनमेधमानमस्ति । आकाशः प्रदूषितोऽस्ति । सौविध्यस्य नाम्ना मानवसमाजः स्वस्यैव पादयोः परशुप्रहारं कुर्वन्निव दृश्यते । (समयसूचकः समाप्तिकल्पां समयसूचनां विधत्ते ।)

किमधिकं ब्रवीमि ? आर्यसंस्कृतौ भोगो न, योगः प्रशस्यते । आर्यसंस्कृतौ 'त्यागेनैके अमृतत्त्वमानशुः' इत्यादीनि वाक्यानि आदर्शवाक्यत्वेन मन्यन्ते । पर्यावरणे रक्षिते एव मानवा रक्षिता भविष्यन्तीति वैदिकानामार्याणां विचारो दृश्यते । अस्माकमेव अज्ञानस्य कारणेन वयं स्वसंस्कृतेः सम्यगनुशीलनं नैव कुर्मः, केवलं प्रदर्शनाय परसंस्कृतेरनुसरणं कुर्मः । पुरा एतादृशं भौतिकं सौविध्यमवश्यमेव नासीत्, किन्तु स्वास्थ्यं विकृतं नासीत्, मनसि शान्तिश्चासीत् । शुद्धेषु नदीजलेषु स्नानं कृत्वा वृक्षवनस्पतीन् संसिच्य मानवैः पशुभिश्च सह मैत्र्या जीवनं निर्वहतामार्याणां धन्यं जीवनं स्मारं स्मारं मनो मोमुद्यते । पुनः सौविध्यस्य नाम्ना अहरहः क्षीयमाणामाधुनिकीं जीवनपद्धतिं च दृष्ट्वा च हृदयं प्रतिक्षणं च रोरुद्यते । किं बहुना ? आर्यसंस्कृतिर्विश्वसंस्कृतिर्भवेदिति आशासाना इतो विरमामि ।

आर्यसंस्कृतिर्विजयतेतराम् ।

**उद्घोषिका**

धन्यवादं व्याहरामि प्रियसखीं नवीनारोकायां प्रति । आर्यसंस्कृतेर्वैज्ञानिकताया विषये सा स्वकीयं मन्तव्यं प्रस्तुत्य अगमत् । इतः परं स्वकीयान् विचारान् प्रस्तोतुं मत्सखो हृदयेशपरियारोऽनुरुध्यते ।

*(हृदयेशपरियारो मञ्चस्याग्रे गत्वा स्वस्य भाषणमारभते)*

अस्याः सभायाः सभाध्यक्षमहोदयाः ! प्रमुखातिथयः ! निर्णायका गुरवः ! ज्ञानदातारोऽन्ये गुरवः ! अस्माकमभिभावकाः ! अन्येऽभ्यागताः ! मम मार्गदर्शका अग्रजाः ! स्नेहशीला अनुजाः ! सहपाठिनः सखायश्च !

अहमस्मि हृदयेशः परियारः, भवतां पुरत आर्यसंस्कृतेर्महिमानं प्रस्तोतुमुपस्थितोऽस्मि । अस्मिन् गरिममये कार्यक्रमे समुपस्थाय स्वसंस्कृतेर्महिमानं गायन्नस्मीति मे हृदयं हर्षातिरेकेण उत्फुल्लं वर्तते । महिमशालिनीं स्वकीयामार्यसंस्कृतिं स्मारं स्मारं आत्मानं धन्यं मन्वानो वर्तेऽहमधुना ।

पञ्चसु क्षणेषु आर्यसंस्कृतेर्महिम्नो वर्णनं कथं सम्भवेत् ? तथापि स्वसंस्कृतेर्महिमगानेन स्वकीयं चेतो वचश्च शुद्धं कारयितुं वाञ्छामि । आर्यसंस्कृतिः खलु विश्वसंस्कृतिर्वर्तते । विश्वस्य सर्वाभ्यः पुरातनी, सनातनी सभ्यता एव आर्यसंस्कृतिरिति नाम्ना प्रसिद्धाऽस्ति । वेदेऽपि उद्घोषितं वर्तते यत्- 'सा संस्कृतिः प्रथमा विश्ववारा' इति । विश्वस्य प्राचीनतमा सिन्धुसभ्यता वैदिकी संस्कृतिरेवासीद् इति जनाः स्वीकुर्वन्ति ।

वैदिकसाहित्यस्य पौराणिकसाहित्यस्य वा पर्यालोचनेन एतस्याः संस्कृतेः समृद्धिः ज्ञातुं शक्यते । अस्माकं पूर्वजा मन्त्रद्रष्टारो मुनयः सर्वसमर्था आसन् । वैदिकसाहित्येषु विमानादिनिर्माणस्य विधिः प्रदर्शिता विद्यते । भारद्वाजस्य विमानविद्यामधुनापि जनाः प्रशंसन्ति । मुनयो भूगोलस्य खगोलस्य च विषये वर्षाणां सहस्रेभ्यः पूर्वमेव चर्चामकार्षुः । पृथिवी गोलाकारा वर्तते इति वैज्ञानिकाः पश्चादेव प्रामाणयन्, किन्तु पौरस्त्या ज्योतिर्विदः पूर्वमेव पृथिव्या आकारस्य विषये जानन्ति स्म, येन 'भूगोलम्' इति ज्योतिषशास्त्रे तैरनेकस्थलेषु प्रयुक्तं वर्तते । तथैव आकाशीयपिण्डानामपि सम्यगध्ययनं ज्योतिर्विद्यायां लभ्यते, येनार्यसंस्कृतिः वैज्ञानिकी वर्तते इति प्रमाणितं भवति । अस्माकं वैदिकसभ्यतायां गणितस्यापि गभीरमध्ययनं लभ्यते । न्यूटननामा वैज्ञानिको गुरुत्वाकर्षणस्य विषयेऽनुसन्धानं विहितवान् । किन्तु अस्माकं पूर्वजाः 'आद्यपतनासमवायिकारणं गुरुत्वम्' इति पूर्वमेव चर्चां विदधुः । अधुना वेदस्याध्ययनमध्यापनं च पाश्चात्त्येषु बहुषु विश्वविद्यालयेषु भवति । क्वान्टम-फिजिक्सद्वारा आधुनिकविज्ञाने ये सिद्धान्ताः प्रतिपादिताः सन्ति ते सिद्धान्ता उपनिषत्सु लभ्यन्ते इति अध्येतारो वदन्ति ।

न केवलं गणितस्य विज्ञानस्य वा विषये अपि तु पश्चात् प्रतिपादिता दार्शनिकासिद्धान्ता अपि आर्यसंस्कृतौ पूर्वमेव आसन् । जना आधुनिकेषु दिवसेषु विश्वशान्तेर्मानवतायाश्च विषये वार्तां कुर्वन्ति, तदर्थं संयुक्तराष्ट्रसङ्घादयः नैकाः संस्थाः प्रयतमाना विद्यन्ते । केचन च विश्वशान्तये साम्यवादस्य अनुशीलनमावश्यकमिति वदन्ति । किं 'शुनि चैव श्वपाके च पण्डिताः समदर्शिनः' 'सर्वे भवन्तु सुखिनः' इत्यतः परः साम्यवादसिद्धान्तो भवितुमर्हति ? 'द्यौः शान्तिरन्तरिक्षं शान्तिः पृथिवी शान्तिः.. सर्वं शान्तिः' इत्यादिभिर्मन्त्रैर्विश्वशान्तेः प्रार्थनां विदधाना आर्यसंस्कृतिर्महिमशालिनी न वर्तते किम् ? अस्माकं संस्कृतिः 'परोपकारः पुण्याय पापाय परपीडनम्', 'परोपकारार्थमिदं शरीरम्' इत्यादिसिद्धान्तानामनुशीलनाय प्रेरयति, येन विश्वस्मिन् मानवतायाः शान्तेश्च प्रसारो भवति । सत्पात्रे दानं चास्माकं संस्कृतौ प्रशस्यते ।

जनाः आधुनिके समये समाजवादस्य वार्तां कृत्वा स्वसिद्धान्तस्य सर्वोपरित्वं साधयितुं पाश्चात्त्यानां नामग्रहणं कुर्वन्ति । समाजवादस्य सूत्रमितः उच्चं किं भवेत् ? यद् वेदव्यासेन श्रीमद्भागवते निरूपितं विद्यते-

**यावद् भ्रियेत जठरं तावत् सत्त्वं हि देहिनाम् ।**

**अधिकं योऽभिमन्येत स स्तेनो दण्डमर्हति ॥** इति ।

सर्वतो विचारणे एतादृशी संस्कृतिर्विश्वस्मिन् अन्यत्र कुत्रापि नास्ति, यत्र न क्वचन विकृतिर्दृश्यते । इयं न कथञ्चित् त्याज्या भवति, वस्तुतः सर्वतोभावेन ग्राह्या एव वर्तते ।

*(समयसूचकः समाप्तिकल्पं समयं सूचयति ।)*

किन्तु आधुनिके समाजे जनाः 'मातृदेवो भव, पितृदेवो भव' इति वाक्यं विस्मरन्तो मातापितरौ वृद्धाश्रमे नयन्ति । प्रशासकेषु उत्कोचस्य लोभो वर्धमानो दृश्यते, समाजे परस्परं विभेदो वर्धमानोऽस्ति । शक्तेः स्वार्थस्य च प्राबल्यं संसारं जयद् वर्तते । किन्तु अस्माभिरार्यसंस्कृतौ वर्धमाना विकृतीर्निराकृत्य अस्याः परिष्काराय, शुद्धायाः संस्कृतेरनुशीलनाय च यतनीयम् । किं बहुना ? इत्येव उक्त्वा विरमामि । जयतु आर्यसंस्कृतिः । जयतु संस्कृतम् ।

**उद्घोषिका**

धन्यवादं व्याहरामि आर्यसंस्कृतेः सामाजिकं महिमानं प्रस्तुत्य इतो गतवन्तं मत्सखं हृदयेशपरियारं प्रति ।

*(इतः परं निर्णायकः सागरथापा वक्तॄणां वक्तृतायाः समालोचनपूर्वकं निर्णयं श्रावयति । ततः प्रमुखातिथिः छात्राणां प्रेरणास्पदं भाषणं प्रस्तौति । ततश्च सभापतेर्धन्यवादज्ञापनानन्तरं कार्यक्रमः समाप्तिं गच्छति ।)*

# अभ्यासः

## श्रवणं भाषणञ्च

१. **पाठस्य सर्वाननुच्छेदान् एकैकशः पठत, अन्ये च शृणुत ।**

२. **हृदयेशपरियारस्य वक्तव्यं पठित्वा उत्तरयत–**

(क) हृदयेशस्य हृदयं किमर्थं हर्षातिरेकेण उत्फुल्लं वर्तते ?

(ख) प्राचीना सिन्धुसभ्यता कीदृशी सभ्यतासीत् ?

(ग) आकाशीयपिण्डानामध्ययनं कुत्र लभ्यते ?

(घ) बहुवचनान्तानि पञ्च तिङन्तानि पञ्च सुबन्तानि च पदानि लिखत ।

३. **त्रयाणां वक्तॄणां सम्बोधनं पठत । ततः स्वयमग्रे गत्वा तादृशस्यैव सम्बोधनस्य अभ्यासं कुरुत ।**

४. **अधोनिर्दिष्टानां पदानां पूर्वं यथायथं शुद्धोच्चारणं कृत्वा तदनु च सन्धिं विच्छिद्य उच्चारणं कुरुत**

आर्यसंस्कृतेर्वैज्ञानिकत्वम्, वैयक्तिकजीवनसम्बद्धाः, अज्ञानध्वान्तविध्वंसकाः, शारीरिकसज्जतायै, आधुनिकाश्चिकित्सकाः, आर्यसंस्कृतेर्महिमानम्, संस्कृतिमनुसरन्तः, जयत्वस्माकम्, धन्यवादार्हः, रोपणञ्चास्माकम्, अन्नानामभावः

५. **अधस्तनपदानि प्रयुज्य एकैकं सुललितं वाक्यं रचयित्वा श्रावयत**

समर्प्य, श्रावयितुम्, निषिद्धाः, विश्वस्मिन्, स्वास्थ्यलाभः, उपदिशति, पाश्चात्त्याः, शुद्धतायै, सहजतया

६. **पाठात् पञ्च भूतकालिकानि क्रियापदानि अन्विष्य तेषां वाक्येषु प्रयोगं कुरुत ।**

७. **अधस्तनमनुच्छेदं पठित्वा अनुवर्तिप्रश्नान् उत्तरयत**

यो मधुरं भाषते तस्य जगति प्रशंसा भवति । मधुरया एव वाण्या कोकिलो जगति प्रशस्तो वर्तते । मधुरया वाण्या एव साधवः प्रशस्ताः सन्ति । वाङ्माधुर्येण युतो जनः कुरूपोऽपि सुरूपो भवति । यस्य वाण्यां पारुष्यं दृश्यते सः सुरूपोऽपि निन्दाभाग् भवति । जनानां पुरतः स्वस्याभिमतं प्रकटयितुं सम्भाषणशिल्पमपेक्ष्यते । विचारः सर्वेषां भवति किन्तु तस्य समुचिततया प्रकाशने सर्वेषां सामर्थ्यं न भवति । ज्ञानिनोऽपि जना भाषया विना स्वस्य ज्ञानं प्रसारयितुं न पारयन्ते । मधुराया वाण्या एव कारणाद् बुद्धोऽद्यापि जगति प्रशस्यते । जना अद्यापि विवेकानन्दस्य वक्तृतामुदाहरन्ति । ओशो इत्यपरनामा रजनीशः सम्भाषणेन एव जनानां हृदयेषु स्थानं लेभे । मधुरभाषणेन विना नेतारो नैव शोभन्ते । अत एवोच्यते, 'वक्तुरेव हि तज्जाड्यं यत्र श्रोता न बुद्ध्यते' इति । तेन मनोहारि वक्तव्यं

दुर्लभतमं मन्यते । उक्तं च-

**शतेषु जायते शूरः सहस्रेषु च पण्डितः ।**

**वक्ता दशसहस्रेषु दाता भवति वा न वा ॥**

(क) प्रदत्तानुच्छेदतः पञ्च सूत्रवाक्यानि वदत ।

(ख) एकवाक्येन उत्तरयत

(अ) कीदृशो जनः कुरूपः सन्नपि सुरूपो भवति ?

(आ) सर्वेषां सामर्थ्यं कुत्र न भवति ?

(इ) जना अद्यापि कस्य वक्तृतामुदाहरन्ति ?

(ई) श्रोता न बुद्ध्यते चेत् तत्र कस्य जाड्यं भवति ?

(उ) वक्ता कतिषु जनेषु एको लभ्यते ?

८. **आर्यसंस्कृतिः किमर्थं वैज्ञानिकी वर्तते ? स्वस्य विचारान् प्रकटयत ।**

## पठनम्

१. **पाठे प्रदत्तानां वक्तृतानियमान् क्रमेण पठत ।**

२. **पाठस्थायाः कार्यक्रमस्य भूमिकाया द्रुतपठनं कुरुत ।**

३. **समीरपण्डितस्य वक्तृतायाश्चतुर्थमनुच्छेदं पठित्वा तदाशयं प्रकटयत ।**

४. **नवीनारोकायाया वक्तृतायास्तृतीयमनुच्छेदं मौनेन पठित्वा अधस्तनान् प्रश्नानुत्तरयत**

(क) आर्यसंस्कृतिः कैर्नामभिः प्रसिद्धा वर्तते ?

(ख) नवीना आर्यसंस्कृतेः कया व्यवस्थया आधिक्येन प्रसीदति ?

(ग) आर्यसंस्कृतौ का पूज्यते ?

(घ) आर्यसंस्कृतौ कीदृशानां पशूनां पूजाया व्यवस्था वर्तते ?

(ङ) आर्यसंस्कृतेः क उपदेशः सर्वप्राणिहिताय वर्तते ?

(च) किंश्रवणेन अस्माकं चेतो मोमुद्यते ?

५. **अधस्तनं प्रसङ्गं पठित्वा तात्पर्यं प्रकाशयत**

पुरा पाश्चात्यदेशे विल्सननामा कश्चन विद्वान् आसीत् । स विद्वांस्तु आसीत् किन्तु तस्य सम्भाषणे

सामर्थ्यं नासीत् । जनानां पुरतः सम्यक् सम्भाषणं कर्तुं स नैव शक्नोति स्म । एकदा कस्मिंश्चन कार्यक्रमे स प्रमुखातिथिरूपेण आहूत आसीत् । सोऽपि प्रमुखमातिथ्यं स्वीकृत्य कार्यक्रमे गतवान् । मञ्चे उपविश्य स सर्वेषां वक्तृणां मन्तव्यमश्रौषीत् । अन्त्ये च प्रमुखातिथेर्मन्तव्यस्य समयोऽभूत् । स जनानां पुरतः समुपस्थाय सम्भाषणं कर्तुमारेभे । स आङ्गलभाषायां सम्भाषणं कर्तुमियेष । स जनान् वीक्ष्य उक्तवान्, 'आइ कन्सिभ्...' इति । तदनु स किमपि वक्तुं नाशकत्, यतः स जनानां पुरतो वक्तुं न शक्नोति स्म । पुनः स जनान् वीक्ष्य 'आइ कन्सिभ्...' इति उक्तवान् । 'आइ कन्सिभ्...' इत्यस्यार्थः 'अहं विचारयामि' इति, 'अहं गर्भं धारये' इति च भवति । तस्मिन् कार्यक्रमे काचन धृष्टा महिला उपस्थिता आसीत् । अग्रे आगत्य सा उक्तवती, 'एकवारं गर्भधारणे विहिते अस्माकं सन्ततिरुत्पद्यते, किन्तु विल्सनः द्विवारं गर्भं धारयित्वापि न किमपि जनयामास' इति । एतच्छ्रुत्वा स लज्जया लोहितवर्णः सन् ततो न्यवर्तत । तस्या महिलाया वचनं स्मारं स्मारं स भृशं दुःखितो बभूव । वक्तृताया अभ्यासाय स वनं जगाम । वनस्य वृक्षान् सम्बोध्य सम्भाषणं कर्तुमारेभे । अन्त्ये च सः प्रसिद्धो वक्ता बभूव ।

## ६. अधस्तनं गद्यांशं पठित्वा उत्तराणि लिखत

यो जनानां पुरतः सम्यग् वक्तुं शक्नोति स वक्ता उच्यते । जनानां पुरतः सम्भाषणस्य कला वक्तृतेति नाम्ना प्रसिद्धा अस्ति । वक्तृतायां सर्वेषां समाना गतिर्नैव भवति । वक्तृतायाः कृते आत्मविश्वासोऽपेक्षितो भवति । कुशलो वक्ता जनानां पुरतः समुपस्थाय अक्षियोगेन मधुरशब्दैः तान् सम्बोधयितुं समर्थो भवति । सर्वप्रथममुपस्थितजनान् सम्बोध्य सम्भाषणमारभ्यते । सम्भाषणाय औपचारिकी पद्धतिरपि अपेक्षिता भवति । जनानां पुरतः किं वक्तव्यं किं वा नैव वक्तव्यमिति प्रथमं तावद् ज्ञातव्यम् । सम्भाषणक्रमे शब्दस्यैव न शारीरिकचेष्टाया अपि भूमिका अपरिहार्या भवति । स्वस्य य आशयो वर्तते तस्य प्रकटनाय लोकोक्तयः सूक्तयश्च मध्ये मध्ये उच्चारणीयाः । अधुना त्वस्माभिर्ध्वनियन्त्रस्य व्यवस्थापनं कथं विधेयम्, किं धारणीयमित्याद्यपि विचार्यमस्ति । सरला, सरसा, प्रवाहमयी च भाषा सम्भाषणे अपेक्ष्यते । यो वक्ता अल्पेन कालेन बहु वक्तुं शक्नोति स एव कुशलो वक्ता भवति । एकस्यैव विषयस्य पुनः पुनरुच्चारणं सम्भाषणे समुचितं नैव भवति । अतो वक्तृतायाः कृते अध्ययनाभ्यासौ आवश्यकौ भवतः ।

(क) कः वक्ता उच्यते ?

(ख) वक्तृतायाः कृते किमपेक्षितं भवति ?

(ग) आशयस्य प्रकटनाय किं किं संयोजनीयम् ?

(घ) सम्भाषणे कीदृशी भाषा अपेक्ष्यते ?

(ङ) किं सम्भाषणे समुचितं न ?

## ७. अधस्तनं पद्यं पठित्वा वाण्याः माधुर्यं प्रकाशयत

केयूराणि न भूषयन्ति पुरुषं हारा न चन्द्रोज्ज्वला

न स्नानं न विलेपनं न कुसुमं नालङ्कृता मूर्धजाः ।
वाण्येका समलङ्करोति पुरुषं या संस्कृता धार्यते
क्षीयन्ते खलु भूषणानि सततं वाग्भूषणं भूषणम् ॥

## लेखनम्

१. **पाठात् स्वरसन्धियुतानि कानिचन दश पदानि अन्विष्य लिखत ।**

२. **पाठमाधृत्य सत्यासत्यं विवेचयत**

(क) आर्यशब्दः पूज्यार्थे प्रसिद्धो वर्तते ।

(ख) सात्त्विकस्य आहारस्य परिपालनेन स्वास्थ्यलाभो भवति इति अधुना वैज्ञानिका न मन्वते ।

(ग) वयं स्वकीयां संस्कृतिं सम्यगनुशीलयन्तः स्मः ।

(घ) आर्यसंस्कृतेरनुसारेण प्रकृतेर्विनाशः पापाय भवति ।

(ङ) जलस्रोतसां प्रदूषणं कल्याणाय भवतीति आर्यसंस्कृतिरुपदिशति ।

(च) विमानविद्या वसिष्ठद्वारा प्रतिपादिता वर्तते ।

(छ) परकीयां संस्कृतिं विस्मृत्य अस्माभिः स्वसंस्कृतेरनुशीलनाय यतनीयम् ।

३. **प्रदत्तसूत्राणामाधारेणास्माकं राष्ट्रस्य विषये वक्तृतामेकां रचयत**

(क) ऋषीणां तपोभूमिर्नेपालदेशः

(ख) हिमालयानां देशः, मनोहारिणी च प्रकृतिः

(ग) बुद्धस्य जन्मभूमिः, शान्तिसन्देशस्य प्रसारः

(घ) शान्तिप्रियाः सहिष्णवो कारुणिकाश्च नेपालिनः

(ङ) विविधानां संस्कृतीनां समागमः

४. **पाठाद् विपरीतार्थवाचकानि पदानि अन्विष्य लिखत**

प्राचीनाः, चञ्चलता, स्वकीया, अव्यवस्थितम्, रोगकारिका, स्मरन्तः, प्रदूषितः

५. **बहुवचने परिवर्त्य लिखत**

यो मधुरं भाषते, लोकस्तं प्रशंसति । मधुरं वाक्यं श्रुत्वा मानवः प्रसन्नो भवति । ओजस्विनो भाषणस्य

श्रवणेन मानवस्य मनसि सुविचारः प्रसृतो भवति । ज्ञानिनो मधुरं वचनं श्रुत्वा जगति दुर्जनोऽपि सज्जनायते ।

## ६. पाठे प्रयुक्तानामधोनिर्दिष्टानां सूक्तीनां सरलभाषया आशयं लिखत

(क) करस्थं पायसं त्यक्त्वा कूर्परं लेढि मूढधीः

(ख) मा हिंस्यात् सर्वा भूतानि

(ग) त्यागेनैके अमृतत्वमानशुः

(घ) परोपकारार्थमिदं शरीरम्

(ङ) शुनि चैव श्वपाके च पण्डिताः समदर्शिनः ।

## ७. अधस्तनस्य श्लोकस्य आशयं प्रकटयत

मूर्खोऽपि शोभते तावत् सभायां वस्त्रवेष्टितः ।
तावद्धि शोभते मूर्खो यावत्किञ्चिन्न भाषते ॥

## ८. समीरपण्डितस्योपसंहाराद् अधस्तनानां प्रश्नानामुत्तराणि अन्विष्य लिखत

(क) किं वैज्ञानिकं वर्तते ?

(ख) स्वसंस्कृतेर्विस्मरणेन परकीयसंस्कृतेरङ्गीकरणस्य फलानि कानि ?

(ग) समीरः किमर्थं 'करस्थं पायसं त्यक्त्वा कूर्परं लेढि मूढधीः' इत्युक्तिं स्मरति ?

(घ) समाजः कथं शान्तो भविष्यति ?

(ङ) केन समीरस्य गौरवेण हृदयं प्रफुल्लं वर्तते ?

## ९. सङ्क्षेपेण उत्तरयत

(क) आर्यसंस्कृतेरनुशीलनेन जनः कथं सुखमयं जीवनं यापयितुं शक्नोति ?

(ख) रोगकारणं किम् ? के च तन्निराकरणोपायाः ?

(ग) अश्वत्थतुलस्योः पूजनं किमर्थं वैज्ञानिकमस्ति ?

(घ) 'अन्नं न निन्द्याद्, अन्नं ब्रह्म' इत्यादिवाक्यानां सान्दर्भिकत्वं वर्तमाने कथमस्ति ?

(ङ) सौविध्यस्य नाम्ना मानवसमाजः कथं स्वस्यैव पादयोः परशुप्रहारं कुर्वन्निव दृश्यते ?

(च) वैदिकवाङ्मये पौराणिकसाहित्ये च आर्यसंस्कृतेरुत्कर्षः कथं पर्यालोच्यते ?

(छ) साम्यवादसमाजवादयोर्बीजं पौरस्त्यवाङ्मयेषु कथं संलक्ष्यते ?

१०. आर्यसंस्कृतिः कथं विश्वं जेतुं समर्था भवेत् ? युक्त्या विवेचयत ।

## व्याकरणानुशीलनम्

१. रेखाङ्कितानां पदानां सन्धिविरहितं वास्तविकं पदं परिचित्य लिखत

(क) कृष्णोऽत्र वर्तते । बालक आगच्छति गृहम् । सुजित एधते नित्यम् । सुशीलो लिखति समीचीनम् । अरुणष्टीकां धारयति, आशुतोषश्च धारयितुमिच्छति, सागरस्तु पूर्वमेव धारितवानस्ति । नरेशः पठति । प्रकाशः कार्यं करोति । सरोजस्सत्यं वदति । लोकेन्द्रः सन्दीपमनुधावति ।

(ख) वृद्धा अधितिष्ठन्ति मञ्चम् । बालका आगच्छन्ति गृहम् । रुग्णा औषधं सेवन्ते । युवका विदेशं गच्छन्ति । चकोराश्चटकं पश्यन्ति । भक्ताष्ठक्कुरं पूजयन्ति । आर्यास्तुलसीपूजनं कुर्वते । सज्जनास्सदैव सत्यं भाषन्ते । दुर्जनाः सज्जनान् वञ्चयन्ति ।

(ग) गुरुरस्मान् शिक्षयति । भानुरुदेति पूर्वस्याम् । वयं मुनेर्मार्गमनुसरामः । गौश्चरति । हरिष्टीकते । साधुस्तरति नौकया । हरिः सात्त्विको वर्तते । गुरुस्सन्ध्यामुपास्ते ।

२. अधस्तनान् विसर्गसन्धिनियमान् पठित्वा प्रतिनियमं द्वे उदाहरणे लिखत

| क्र.सं. | अग्रवर्णः | पश्चवर्णः | आदेशः | निष्पन्नावस्था | उदाहरणम् |
|---|---|---|---|---|---|
| १. | अ | अ | उ | ओ ऽ | बालकोऽयम् |
| २ | अ | आ | विसर्गलोपः | अ | बालक आगतः |
| ३. | अ | इच् | विसर्गलोपः | अ | सूर्य उदेति |
| ४. | अ | हश् | उ | ओ | पुत्रो हसति |
| ५. | आ | अश् | विसर्गलोपः | आ | सज्जना उपदिशन्ति |
| ६. | इच् | अश् | र् | र् | हरेर्लोकम् |
| ७. | अच् | च्/छ्<br>ट्/ठ्<br>त्/थ् | स् | श्<br>ष्<br>स् | पटुश्छात्रः<br>नरष्टीकते<br>मुनिस्तनुते |
| ८. | अच् | क/ख<br>प/फ | ः | ः | पितुः कार्यम्<br>गुरोः पाठः |
| ९. | अच् | स्<br>श्<br>ष् | स्/ः | स्/ः<br>श्/ः<br>ष्/ः | पूज्यस्साधुः/पूज्यः साधुः<br>चन्द्रश्शुक्लः/चन्द्रः शुक्लः<br>रामष्षष्ठः/रामः षष्ठः |
| १०. | स/एष | हल् | विसर्गलोपः | | स बालकः, एष युवा |

३. पाठात् प्रतिनियममेकं विसर्गसन्धियुतं पदमन्विष्य क्रमेण सन्धिं विच्छिद्य लिखत ।

४. अधस्तनानां पदानां सन्धिं विच्छेदयत

रामस्त्राता, बालोऽत्र, शिवो गच्छति, को बालः, कोऽयम्, बाला रमन्ते, वृक्षश्छायाम्, साधुस्सरति, शान्तोऽनलः, अशान्तो वायुः, साधव एते, सज्जना मोदन्ते, मूषकाश्चैते ।

५. पाठाद् विसर्गसन्धियुतानि द्वादश पदानि अन्विष्य सन्धिविच्छेदं कुरुत ।

६. पाठे विसर्गसन्धिनियमानुसारं सन्धेयेषु केषुचित् पदेषु सन्धिर्विहितो नास्ति । तानि पदानि अन्विष्य तेषां सन्धिगतानि पदानि लिखत ।

## रचनात्मकोऽभ्यासः

१. 'प्राकृतिकसंसाधानानां समुचितः प्रयोगः' इति शीर्षके पञ्चसु कलासु वक्तव्यां वक्तृतां लिखत ।

२. 'एकतया विलसिता वैविध्यपूर्णाऽस्माकं राष्ट्रियसंस्कृतिः' इति विषये स्वविचारं कक्षाया अग्रे गत्वा श्रावयत ।

३. 'शिक्षाविकासे सकलो विकासः' इति शीर्षके कक्षायां वक्तृत्वस्पर्द्धामायोजयत । यत्र सभापत्यादीनां सर्वेषां व्यवस्थां कक्षायाश्छात्रेभ्य एव कुरुत ।

# व्याकरणखण्डः

## माहेश्वरसूत्राणि

# संज्ञाप्रकरणे वर्णज्ञानं पारिभाषिक्यः संज्ञाश्च

| | | | | |
|---|---|---|---|---|
| १. अइउण् । | २. ऋलृक् । | ३. एओङ् । | ४. ऐऔच् । | ५. हयवरट् । |
| ६. लण् । | ७. ञमङणनम् । | ८. झभञ् । | ९. घढधष् । | १०. जबगडदश् । |
| ११. खफछठथचटतव् । | १२. कपय् । | १३. शषसर् । | १४. हल् ॥ | |

इति माहेश्वराणि सूत्राण्यणादिसंज्ञार्थानि । एषामन्त्या इतः । हकारादिष्वकार उच्चारणार्थः । लण्मध्ये त्वित्संज्ञकः ॥

महेश्वरप्रसादात् पाणिनिना लब्धानि इमानि चतुर्दशसूत्राणि व्याकरणशास्त्रस्य मूलभूतानि सन्ति । अत्र लोकप्रसिद्धं क्रमं त्यक्त्वा वर्णानामयं क्रमोः व्याकरणशास्त्रगतानां व्यवहारोपयोगिनाम् अण्, अक्, इक् इत्यादीनां प्रत्याहाराणां निर्माणाय स्वीकृतः अस्ति । 'ह य व र' इत्यादिषु वर्णेषु पठितः अकारः उच्चारणार्थो वर्तते । लण्सूत्रस्थः अकारो र-प्रत्याहाराय इत्-संज्ञकः अस्ति । एतानि सूत्राणि वर्णसमाम्नायः, माहेश्वरसूत्राणि, चतुर्दशसूत्राणि, शिवसूत्रजालम् इत्यादिभिः नामभिः व्यवह्रियन्ते ।

**हकारो द्विरुपात्तोऽयमटि शल्यपि वाञ्छता ।**

**अर्हेणाधुक्षदित्यत्र द्वयं सिद्धं भविष्यति ॥**

अस्यायंभावो यत्- अटि = अट्प्रत्याहारे, शलि = शल्प्रत्याहारे च हकारस्य ग्रहणं भवतु इति वाञ्छता आचार्येण हकाररूपो वर्णः, द्विः = द्विवारम्, उपात्त = उपदिष्टः । तत्र अट्प्रत्याहारे ग्रहणेन 'अर्हेण' इत्यत्र "अट्कुप्वाङ्नुम्व्यवायेऽपि" इति सूत्रेण णत्वम्, शल्प्रत्याहारे ग्रहणेन 'अधुक्षत्' इत्यत्र "शल इगुपधादनिट क्सः" इति क्सश्च द्वयम् = कार्यद्वयं सिद्ध्यतीति ।

**हलन्त्यम्** १ । ३ । ३ ॥

**उपदेशेऽन्त्यं हलित्स्यात् । उपदेश आद्योच्चारणम् । सूत्रेष्वदृष्टं पदं सूत्रान्तरादनुवर्तनीयं सर्वत्र ॥**

प्रथमोच्चारितानां प्रातिपदिक-निपात-प्रत्याहार-सूत्र-प्रत्यय-आदेशानाम् अन्त्यं हल् इत्संज्ञकं भवति ।

यथा- अइउण्, ऋलृक् इत्यादिषु सूत्रेषु णकारादीनाम् अनेन इत्संज्ञा भवति ।

'उप' इत्युपसर्गपूर्वकाद् दिश्-धातोर्भावे घञ्-प्रत्यये निष्पन्नस्य उपदेश-शब्दस्यार्थः 'आद्योच्चारणम्' भवति ।

पाणिनि-कात्यायन-पतञ्जलीनां व्याकरणशास्त्रविषयकं प्रथममुच्चारणमुपदेशः कथ्यते । केचित्तु उपदेशपदेन धातुसूत्रादीनां ग्रहणं भवतीति प्रतिपादयन्ति । तथा हि-

**धातु-सूत्र-गणोणादि-वाक्य-लिङ्गानुशासनम् ।**

**आगम-प्रत्ययादेशा उपदेशाः प्रकीर्तिताः ॥**

धातुः, सूत्रम्, गणः, उणादिः, वाक्यम्, लिङ्गानुशासनम्, आगमः, प्रत्ययः, आदेशः, इत्येते नव उपदेशपदार्थाः, एते त्रिमुनिकृता व्याकरणशास्त्रगता आद्योच्चारणविषयाः सन्तीति कारिकार्थः ।

सूत्रेषु अविद्यमानानि पदानि इतरेभ्यः सूत्रेभ्य आनीय सर्वत्र सूत्राणामर्थः कर्तव्यः । यथा- हलन्त्यम् इति सूत्रे **'उपदेशेऽजनुनासिक इत्'** इत्यतः **'उपदेशे'**, **'इत्'** इत्यनयोः पदयोः अनुवृत्तिः ।

**अदर्शनं लोपः १ । १ । ६० ॥**

**प्रसक्तस्यादर्शनं लोपसंज्ञं स्यात् ।**

प्रसक्तस्य = उच्चार्यत्वेन प्राप्तस्य, अदर्शनम् = अश्रवणम्, प्रक्रियायां जायमानस्य वर्णस्य वर्णसमुदायस्य वा दर्शनस्य अभावो लोप-संज्ञको भवति ।

**तस्य लोपः १ । ३ । ९ ॥**

**तस्येतो लोपः स्यात् । णादयोऽणाद्यर्थाः ॥**

तस्य इतः = इत्संज्ञकवर्णस्य, लोपः स्यात् = लोपो भवति । णादयः = अइउण्, ऋलृक् इत्यादीनां सूत्राणामन्ते स्थिताः ण्, क् इत्यादयः अनुबन्धाः, अणाद्यर्थाः = अण्, अक् इत्यादि-प्रत्याहारनिर्माणाय वर्तन्ते ।

**आदिरन्त्येन सहेता १ । १ । ७१ ॥**

**अन्त्येनेता सहित आदिर्मध्यगानां स्वस्य च संज्ञा स्यात् । यथाऽणिति अइउवर्णानां संज्ञा । एवमच् हल् अलित्यादयः ॥**

अन्ते स्थितेन इत्संज्ञक-वर्णेन सहितः उच्चार्यमाणः आदिवर्णो मध्यवर्तिनां वर्णानाम्, आदिवर्णस्य च बोधको भवति । यथा- अ इ उ ण् इत्यत्र अन्त्येन इत्संज्ञकवर्णेन णकारेण सहितः उच्चार्यमाणः आदिवर्णः 'अण्' इति समुदायः अ, इ, उ इति वर्णानां संज्ञा (बोधकः) भवति । एवंरीत्या अच्, इक् इत्यादयः अन्ये अपि प्रत्याहाराः ज्ञेयाः ।

**ऊकालोऽज्झ्रस्वदीर्घप्लुतः १ । २ । २७ ॥**

**उश्च ऊश्च ऊ३श्च वः; वां काल इव कालो यस्य सोऽच् क्रमाद् ह्रस्वदीर्घप्लुतसंज्ञः स्यात् । स प्रत्येकमुदात्तादिभेदेन त्रिधा ।**

'उ' इत्यस्य उच्चारणकालसदृशः (एकमात्रिकः) उच्चारणकालो येषां स्वरवर्णानां भवति, तेषां 'ह्रस्वः' इति संज्ञा भवति । 'ऊ' इत्यस्य उच्चारणकालसदृशः (द्विमात्रिकः) उच्चारणकालो येषां स्वरवर्णानां भवति, तेषां 'दीर्घः'

इति संज्ञा भवति । 'उ३' इत्यस्य उच्चारणकालसदृशः (त्रिमात्रिकः) उच्चारणकालो येषां स्वरवर्णानां भवति, तेषां 'प्लुतः' इति संज्ञा भवति ।

| ह्रस्वाः | दीर्घाः | प्लुताः |
|---|---|---|
| अ, इ, उ, ऋ, लृ | आ, ई, ऊ, ॠ, ए, ओ, ऐ, औ | अ३, इ३, उ३, ऋ३, लृ३, ए३, ओ३, ऐ३, औ३ |

स च उदात्तादिसंज्ञाविशिष्टः अच् उदात्तानुदात्तस्वरितस्वराणां भेदेन प्रत्येकं त्रिधा ज्ञेयः ।

**उच्चैरुदात्तः** १ । २ । २९ ॥

कण्ठः, तालु इत्यादिषु उच्चारणस्थानेषु सभागेषु ऊर्ध्वभागे निष्पन्नस्य अच्-वर्णस्य उदात्त-संज्ञा भवति ।

**नीचैरनुदात्तः** १ । २ । ३० ॥

कण्ठः, तालु इत्यादिषु उच्चारणस्थानेषु सभागेषु अधो भागे निष्पन्नस्य अच्-वर्णस्य अनुदात्त-संज्ञा भवति ।

**समाहारः स्वरितः** १ । २ । ३१ ॥

उदात्तत्वम्, अनुदात्तत्वं च इत्यनयोः वर्णधर्मयोः यस्मिन् अच्-वर्णे समाहारो भवति, तादृशस्य अच्-वर्णस्य स्वरितसंज्ञा भवति ।

**स नवविधोऽपि प्रत्येकमनुनासिकत्वाननुनासिकत्वाभ्यां द्विधा ।**

तादृशः उदात्तानुदात्तस्वरितस्वरविशिष्टो ह्रस्वदीर्घप्लुतसंज्ञाविशिष्टश्च अच् अनुनासिकत्वाननुनासिकत्वधर्माभ्यां पुनः द्विधा भवति ।

**मुखनासिकावचनोऽनुनासिकः** १ । १ । ८ ॥

**मुखसहितनासिकयोच्चार्यमाणो वर्णोऽनुनासिकसंज्ञः स्यात् ।**

मुखेन सह नासिकया उच्चार्यमाणो वर्णः अनुनासिकसंज्ञको भवति ।

ङ्, ञ्, ण्, न्, म् एते वर्णाः नित्यम् अनुनासिकाः । यँ, वँ, लँ इति यकार-वकार-लकाराणाम् अनुनासिकभेदाः । अँ, आँ, अँ३, इँ, ईँ, इँ३... इत्यादीनि स्वरवर्णानाम् अनुनासिकस्वरूपाणि ।

**तदित्थम् – अ इ उ ऋ एषां वर्णानां प्रत्येकमष्टादश भेदाः । लृवर्णस्य द्वादश तस्य दीर्घाभावात् । एचामपि द्वादश तेषां ह्रस्वाभावात् ।**

## लोकप्रसिद्धवर्णानां क्रमदर्शिका सारिणी

| वर्गाः | प्रथमः | द्वितीयः | तृतीयः | चतुर्थः | पञ्चमः |
|---|---|---|---|---|---|
| कवर्गः (कु) | क | ख | ग | घ | ङ |
| चवर्गः (चु) | च | छ | ज | झ | ञ |
| टवर्गः (टु) | ट | ठ | ड | ढ | ण |
| तवर्गः (तु) | त | थ | द | ध | न |
| पवर्गः (पु) | प | फ | ब | भ | म |
| अन्तःस्थाः | य र ल व | | | | |
| ऊष्माणः | श ष स ह | | | | |
| संयुक्तवर्णाः | क्ष त्र ज्ञ | | | | |
| स्वरवर्णाः | अ, आ, इ, ई, उ, ऊ, ऋ, ऌ, ए, ऐ, ओ, औ<br>अं = अनुस्वारः<br>अः = विसर्गः | | | | |

## वर्णानामनुनासिकत्वाननुनासिकत्वभेददर्शिका सारिणी

| स्वरवर्णाः | | व्यञ्जनवर्णाः | | | |
|---|---|---|---|---|---|
| अननुनासिकभेदाः (उदात्तानुदात्तस्वरिताः) | अनुनासिकभेदाः (उदात्तानुदात्तस्वरिताः) | नित्यम् अननुनासिकाः | नित्यम् अनुनासिकाः | अननुनासिक -भेदाः | अनुनासिक -भेदाः |
| अ, आ, अ३ | अँ, आँ, अँ३ | क्, ख्, ग्, घ् | ङ् | य् | यँ् |
| इ, ई, इ३ | इँ, ईँ, इँ३ | च्, छ्, ज्, झ् | ञ् | व् | वँ् |
| उ, ऊ, उ३ | उँ, ऊँ, उँ३ | ट्, ठ्, ड्, ढ् | ण् | ल् | लँ् |
| ऋ, ॠ, ऋ३ | ऋँ, ॠँ, ऋ३ | त्, थ्, द्, ध् | न् | | |
| ऌ, ऌ३ | ऌँ, ऌँ३ | प्, फ्, ब्, भ् | म् | | |
| ए, ए३ | एँ, एँ३ | र्, श्, ष्, स्, ह् | | | |
| ओ, ओ३ | ओँ, ओँ३ | | | | |
| ऐ, ऐ३ | ऐँ, ऐँ३ | | | | |
| औ, औ३ | औँ, औँ३ | | | | |

## स्वराणां भेददर्शिका सारिणी

| ह्रस्वः | दीर्घः | प्लुतः | |
|---|---|---|---|
| उ | ऊ | ऊ३ | उदात्तः अननुनासिकः |
| उँ | ऊँ | ऊँ३ | उदात्तः अनुनासिकः |
| उ | ऊ | ऊ३ | अनुदात्तः अननुनासिकः |
| उँ | ऊँ | ऊँ३ | अनुदात्तः अनुनासिकः |
| उ | ऊ | ऊ३ | स्वरितः अननुनासिकः |
| उँ | ऊँ | ऊँ३ | स्वरितः अनुनासिकः |
| अ, इ, उ, ऋ, लृ | आ, ई, उ, ॠ, ए, ओ, ऐ, औ | अ३, इ३, उ३, ऋ३, लृ३, ए३, ओ३, ऐ३, औ३ | |

## माहेश्वरसूत्रस्थैः हल्भिः इद्भिः कृताः पाणिनीयसूत्रेषु व्यवहृता द्वाचत्वारिंशत्प्रत्याहाराः

| | | | | | |
|---|---|---|---|---|---|
| १. अक् | ८. अश् | १५. ऐच् | २२. जश् | २९. भष् | ३६. रल् |
| २. अच् | ९. इक् | १६. खय् | २३. झय् | ३०. मय् | ३७. वल् |
| ३. अट् | १०.इच् | १७. खर् | २४. झर् | ३१. यञ् | ३८. वश् |
| ४. अण् | ११. इण् | १८. ङम् | २५. झल् | ३२. यण् | ३९. शर् |
| ५. अण् | १२. उक् | १९. चय् | २६. झश् | ३३. यम् | ४०. शल् |
| ६. अम् | १३. एङ् | २०. चर् | २७. झष् | ३४. यय् | ४१. हल् |
| ७. अल् | १४. एच् | २१. छव् | २८. बश् | ३५. यर् | ४२. हश् |

### प्रत्याहारसिद्धिप्रकारः

अणप्रत्यहारसिद्धौ **'अइउण्'** इत्यत्र पूर्वं **'हलन्त्यम्'** इति सूत्रेण णकारस्य इत्संज्ञायाम्, **'आदिरन्त्येन सहेता'** इति सूत्रेण अन्त्येन इत्संज्ञकवर्णेन णकारेण सह उच्चार्यमाणो यः आदिवर्णः अकारः अर्थात् **'अण्'** इत्ययं शब्दः मध्यवर्तिनोः इ, उ इत्यनयोः वर्णयोः आदिवर्णस्य अकारस्य च संज्ञा (बोधकः) भवति । अर्थात् **'अण्'** इति शब्दः अ, इ, उ इति वर्णान् बोधयति । एवमेव **'अच्'** इति इत्संज्ञकेन चकारेण सहितः उच्चार्यमाणः अकारः अकारचकारयोः मध्यवर्तिनाम् इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इति वर्णानाम् आद्यस्य अकारस्य च बोधको भवति । एवंरीत्या अन्ये अपि प्रत्याहाराः बोद्धव्याः ।

# अभ्यासः

१. **कोष्ठस्थम् उपयुक्तं पदं विन्यस्य रिक्तस्थानं पूरयत**

(अकारः, ऊकालोऽज्झ्रस्वदीर्घप्लुतः, आदिरन्त्येन सहेता, इत्संज्ञा, माहेश्वराणि, इत्संज्ञकः)

अइउण् इत्यादीनि ........................................ सूत्राणि सन्ति ।

हकारादिषु ............................................ उच्चारणार्थो वर्तते ।

लण्मध्ये तु अकारः ...................................................... ।

'हलन्त्यम्' इति सूत्रेण ..................................... भवति ।

प्रत्याहारसंज्ञा ........................................ इति सूत्रेण विधीयते ।

ह्रस्वदीर्घप्लुतसंज्ञाः ................................. इति सूत्रेण भवन्ति ।

२. **परस्परं मेलयत**

| | |
|---|---|
| हलन्त्यम् | लोपादेशः |
| अदर्शनं लोपः | ग ज ड द ब |
| तस्य लोपः | अनुनासिकसंज्ञा |
| उच्चैरुदात्तः | त थ द ध न |
| नीचैरनुदात्तः | ङ ञ ण न म |
| मुखनासिकावचनोऽनुनासिकः | उदात्तसंज्ञा |
| वर्गतृतीयाः | लोपसंज्ञा |
| वर्गपञ्चमाः | इत्संज्ञा |
| तवर्गः | अनुदात्तसंज्ञा |

३. **अधो लिखितान् प्रश्नान् उत्तरयत**

(क) चतुर्दश सूत्राणि कानि ?

(ख) माहेश्वरसूत्रेषु णकारादीनामनुबन्धानां प्रयोजनं किम् ?

(ग) 'आदिरन्त्येन सहेता' इति सूत्रस्य अर्थं लिखत ।

(घ) 'सूत्रेषु अदृष्टं पदं सूत्रान्तराद् अनुवर्तनीयं सर्वत्र' इत्यस्य आशयः कः ?

(ङ) उपदेशपदार्थः कः ?

(च) अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इत्येतेषां वर्णानां प्रत्येकं कति भेदाः सन्ति ?

(छ) ह्रस्व-वर्णाः कति ? के च ते ?

(ज) दीर्घवर्णाः के ? किञ्च दीर्घसंज्ञाविधायकं सूत्रम् ?

(झ) प्लुतः कतिमात्रो भवति ?

(ञ) एचां कथं द्वादशभेदा भवन्ति ?

(ट) माहेश्वरसूत्राणां प्रयोजनं किम् ?

(ठ) हकारादिष्वकारस्य पुनः पुनरुच्चारणं किमर्थम् ?

(ड) कस्य लोपो भवति ?

(ढ) अन्त्यहल्-वर्णानामित्संज्ञाविधायकं सूत्रं किम् ?

(ण) 'मुखनासिकावचनोऽनुनासिकः' इति सूत्रं किं करोति ?

४. **द्वाचत्वारिंशत्प्रत्याहारान् तत्र समागतान् वर्णान् च विलिख्य कक्षायां श्रावयत ।**

५. **समीचीनमसमीचीनं वा सङ्केतयत**

(क) अइउण् इत्यादीनि माहेश्वरसूत्राणि सन्ति ।

(ख) हकारादिषु अकारः उच्चारणार्थः ।

(ग) प्रत्याहारेषु अनुबन्धाः अपि समायान्ति ।

(घ) ऋकारस्य दीर्घो न भवति ।

(ङ) प्रत्यहारसंज्ञाविधायकं सूत्रम् 'आदिरन्त्येन सहेता' अस्ति ।

(च) जश्-प्रत्याहारे वर्गाणां चतुर्थवर्णाः समायान्ति ।

६. **उदात्तानुदात्तस्वरितसंज्ञाविधायकानि सूत्राणि लिखत ।**

७. **यवलाः कथं द्विधा भवन्ति ?**

७. **वर्णसमाम्नायानुसारेण प्रत्याहारनिर्माणप्रकारं प्रदर्शयत ।**

### संज्ञाप्रकरणे

# वर्णोच्चारणस्थान-प्रयत्न-पारिभाषिकसंज्ञाः

**तुल्यास्यप्रयत्नं सवर्णम्** १ । १ । ९ ॥

**ताल्वादिस्थानमाभ्यन्तरप्रयत्नश्चेत्येतद् द्वयं यस्य येन तुल्यं तन्मिथः सवर्णसंज्ञं स्यात् ।**

यस्य वर्णस्य येन वर्णेन सह स्थानम् आभ्यन्तरप्रयत्नश्च तुल्यौ स्तः, तयोः वर्णयोः परस्परं सवर्णसंज्ञा भवति ।

**ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्** (वा.)

ऋवर्णस्य लृवर्णस्य च मिथः = परस्परं सवर्णसंज्ञा भवति । अत एव ऋकारस्य अष्टादश भेदाः लृकारस्य द्वादशभेदाश्चेति समाहृत्य ऋकारस्य लृकारस्य च प्रत्येकं त्रिंशत् सवर्णिनो भवन्ति ।

**अथ स्थानानि**

कस्य वर्णस्य किं स्थानमिति जिज्ञासायामाह-

**अकुहविसर्जनीयानां कण्ठः । इचुयशानां तालु । ऋटुरषाणां मूर्धा । लृतुलसानां दन्ताः । उपूपध्मानीयानामोष्ठौ । ञमङणनानां नासिका च । एदैतोः कण्ठतालु । ओदौतोः कण्ठोष्ठम् । वकारस्य दन्तोष्ठम् । जिह्वामूलीयस्य जिह्वामूलम् । नासिकाऽनुस्वारस्य ।**

अ इति अष्टादश अकाराः, कु इति कवर्गः कखगघङवर्णाः, ह इति हकारः, विसर्जनीयो नाम विसर्गः, इत्येतेषां वर्णानां कण्ठ-स्थानं भवति । एवंरीत्या अन्येषामपि बोध्यम् । तथा हि-

**अकुहविसर्जनीयानां कण्ठः** = अष्टादश अकाराः, क्, ख्, ग्, घ्, ङ्, ह्, ':' इत्येतेषां वर्णानां कण्ठः स्थानं भवति ।

**इचुयशानां तालु** = अष्टादश इकाराः, च्, छ्, ज्, झ्, ञ्, य्, श् इत्येतेषां वर्णानां तालु स्थानं भवति ।

**ऋटुरषाणां मूर्धा** = अष्टादश ऋकाराः, ट्, ठ्, ड्, ढ्, ण्, र्, ष् इत्येतेषां वर्णानां मूर्धा स्थानं भवति ।

**लृतुलसानां दन्ताः** = द्वादश लृकाराः, त्, थ्, द्, ध्, न्, ल्, स् इत्येतेषां वर्णानां दन्ताः स्थानं भवति ।

**उपूपध्मानीयानामोष्ठौ** = अष्टादश उकाराः, प्, फ्, ब्, भ्, म्, उपध्मानीयविसर्गः (पफ) इत्येतेषां वर्णानां ओष्ठौ स्थानं भवति ।

**ञमङणनानां नासिका च** = ञ्, म्, ङ्, ण्, न् इत्येतेषां वर्णानां नासिका स्थानम् अपि भवति ।

**एदैतोः कण्ठतालु** = एकारस्य ऐकारस्य च कण्ठतालु स्थानं भवति ।

**ओदौतोः कण्ठोष्ठम्** = ओकारस्य औकारस्य च कण्ठोष्ठं स्थानं भवति ।

**वकारस्य दन्तोष्ठम्** = वकारस्य दन्तोष्ठं स्थानं भवति ।

**जिह्वामूलीयस्य जिह्वामूलम्** = जिह्वामूलीयस्य विसर्गस्य (कख) जिह्वामूलं स्थानं भवति ।

**नासिकाऽनुस्वारस्य** = अनुस्वारस्य () नासिका स्थानं भवति ।

**अथ प्रयत्नाः**

**वर्णानां स्थानानि निर्दिश्य प्रयत्नान् निर्दिशति–**

**यत्नो द्विधा– आभ्यन्तरो बाह्यश्च ।**

**आद्यः पञ्चधा– स्पृष्टेषत्स्पृष्टेषद्विवृतविवृतसंवृतभेदात् । तत्र स्पृष्टं प्रयत्नं स्पर्शानाम् । ईषत्स्पृष्टमन्तःस्थानाम् । ईषद्विवृतमूष्मणाम् । विवृतं स्वराणाम् । ह्रस्वस्यावर्णस्य प्रयोगे संवृतम् । प्रक्रियादशायां तु विवृतमेव ।**

आभ्यन्तर-बाह्यप्रयत्नभेदाद् यत्नो द्विविधो भवति । तत्र आभ्यन्तरप्रयत्नः पञ्चविधः । ते च- १. स्पृष्टम् २. ईषत्स्पृष्टम् ३. ईषद्विवृतम् ४. विवृतम् ५. संवृतम् ।

कादिमावसानानां क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म् इत्येतेषां स्पर्शवर्णानां स्पृष्टः प्रयत्नो भवति ।

अन्तःस्थानां य्, व्, र्, ल् इत्येतेषां वर्णानाम् ईषत्स्पृष्टः प्रयत्नो भवति ।

ऊष्मणां श्, ष्, स्, ह् इत्येतेषां वर्णानाम् ईषद्विवृतः प्रयत्नो भवति ।

स्वराणाम् अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ इत्येतेषां वर्णानां विवृतः प्रयत्नो भवति ।

ह्रस्वस्य अवर्णस्य प्रयोगकाले संवृतः प्रयत्नो भवति, प्रक्रियादशायां तु तस्य विवृत एव प्रयत्नो भवति ।

**बाह्यप्रयत्नस्त्वेकादशधा– विवारः संवारः श्वासो नादो घोषोऽघोषोऽल्पप्राणो महाप्राण उदात्तोऽनुदात्तः स्वरितश्चेति । खरो विवाराः श्वासा अघोषाश्च । हशः संवारा नादा घोषाश्च । वर्गाणां प्रथमतृतीयपञ्चमा यणश्चाल्पप्राणाः । वर्गाणां द्वितीयचतुर्थौ शलश्च महाप्राणाः ।**

विवारः, संवारः, श्वासः, नादः, घोषः, अघोषः, अल्पप्राणः, महाप्राणः, उदात्तः, अनुदात्तः स्वरितश्चेति भेदाद् बाह्यप्रयत्नः एकादशधा भवति । तत्र-

खर्प्रत्याहारान्तर्गतानां वर्णानां विवारः, श्वासः, अघोषश्च प्रयत्नाः भवन्ति । हश्-प्रत्याहारान्तर्गतानां वर्णानां संवारः, नादः, घोषश्च प्रयत्नाः भवन्ति ।

वर्गाणां प्रथम-तृतीय-पञ्चमानाम् अर्थात् क्, च्, ट्, त्, प्, ग्, ज्, ड्, द्, ब्, ङ्, ञ्, ण्, न्, म् इत्येतेषां वर्णानाम्, यण् = य्, व्, र्, ल् इत्येतेषां वर्णानां च अल्पप्राणः प्रयत्नो भवति । वर्गाणां द्वितीय-चतुर्थयोः अर्थात् ख्, छ्, ठ्, थ्, फ्, घ्, झ्, ढ्, ध्, भ् इत्येतेषां वर्णानाम्, शल् = श्, ष्, ह् इत्येतेषां वर्णानां च महाप्राणः प्रयत्नो भवति । उदात्तः, अनुदात्तः, स्वरितश्च अच्-वर्णानां प्रयत्नाः सन्ति ।

## वर्णानां पारिभाषिक्यः संज्ञाः

**कादयो मावसानाः स्पर्शाः । यणोऽन्तःस्थाः । शल ऊष्माणः । अचः स्वराः । कख इति कखाभ्यां प्रागर्धविसर्गसदृशो जिह्वामूलीयः । पफ इति पफाभ्यां प्रागर्धविसर्गसदृश उपध्मानीयः । अं अः इत्यचः परावनुस्वारविसर्गौ ।**

क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्, ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्, प्, फ्, ब्, भ्, म् इत्येते स्पर्शसंज्ञकाः वर्णाः सन्ति । य्, व्, र्, ल् इत्येते अन्तःस्थसंज्ञकाः वर्णाः वर्तन्ते । श्, ष्, स्, ह् इत्येते ऊष्मसंज्ञकाः वर्णाः सन्ति । अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ इत्येते स्वरसंज्ञकाः वर्णाः वर्तन्ते । कख इत्युक्तौ कखाभ्यां पूर्वः लेखने उच्चारणे च अर्धविसर्गसदृशो वर्णो वर्तते, स जिह्वामूलीयो वर्तते । पफ इत्युक्तौ पफाभ्यां पूर्वः लेखने उच्चारणे च अर्धविसर्गसदृशो वर्णो वर्तते, सः उपध्मानीयः अस्ति । अं अः इत्यत्र अच्-वर्णात् परे स्थितौ क्रमेण अनुस्वार-विसर्गौ स्तः ।

**अणुदित् सवर्णस्य चाप्रत्ययः** १ । १ । ६९ ॥

**प्रतीयते विधीयत इति प्रत्ययः । अविधीयमानोऽणुदिच्च सवर्णस्य संज्ञा स्यात् । अत्रैवाण् परेण णकारेण । कु चु टु तु पु एते उदितः । तदेवम्- अ इत्यष्टादशानां संज्ञा । तथेकारोकारौ । ऋकारस्त्रिंशतः । एवं ऌकारोऽपि । एचो द्वादशानाम् । अनुनासिकाननुनासिकभेदेन यवला द्विधा, तेनाननुनासिकास्ते द्वयोर्द्वयोस्संज्ञा ॥**

अ, इ, उ, ऋ, ऌ, ए, ओ, ऐ, औ, ह्, य्, व्, र्, ल् अर्थात् अण्प्रत्यहारान्तर्गताः वर्णाः स्वस्वसवर्णिनां संज्ञाः सन्ति । अविधीयमानाः एते वर्णाः स्वस्वसवर्णिनामपि बोधका भवन्तीति सूत्रस्याशयः । अस्मिन् सूत्रे एव **'अण्'** प्रत्याहारः **'लण्'** सूत्रस्थेन णकारेण गृह्यते।

उदित् = कु, चु, टु, तु, पु एते च स्वस्य स्वस्य आद्यवर्णानां सवर्णिनां संज्ञाः सन्ति । अत एव कु इत्ययं शब्दः स्वस्य आद्यवर्णस्य ककारस्य सवर्णिनां क्, ख्, ग्, घ्, ङ् इत्येतेषां संज्ञास्ति । एवंरीत्या चु इत्ययं च्, छ्, ज्, झ्, ञ् इत्येतेषाम्, टु इत्ययं ट्, ठ्, ड्, ढ्, ण् इत्येतेषाम्, तु इत्ययं त्, थ्, द्, ध्, न् इत्येतेषाम्, पु इत्ययञ्च प्, फ्, ब्, भ्, म् इत्येतेषां बोधको वर्तते ।

**परः सन्निकर्षः संहिता** १ । ४ । १०९ ॥

**वर्णानामतिशयितः सन्निधिः संहितासंज्ञः स्यात् ॥**

वर्णानाम् अतिशयितः = अत्यधिकम्, सन्निधिः = सामीप्यम् (अर्धमात्राधिक-कालव्यवधानस्य अभावः) संहिता-संज्ञको भवति । वर्णोच्चारणानन्तरं वर्णान्तरोच्चारणे यावत्कालस्य व्यवधानम् अवश्यम्भावि, तदधिककालव्यवधानशून्यत्वं यत्र तत्र संहितात्वं भवति । तदधिककालव्यवधाने सन्ध्यादिकार्यं न भवतीत्याशयः ।

**हलोऽनन्तराः संयोगः १ । १ । ७ ॥**

**अज्भिरव्यवहिता हलः संयोगसंज्ञाः स्युः ॥**

द्वयोः हल्वर्णयोः बहूनां वा हल्वर्णानां मध्ये यत्र अच् न भवति, ते हलः संयोगसंज्ञकाः भवन्ति । यथा- 'विद्या' इत्यत्र दकार-यकारयोः संयोगः, 'उष्ट्रः' इत्यत्र षकार-टकार-रेफाणां संयोगः ।

**सुप्तिङन्तं पदम् १ । ४ । १४ ॥**

**सुबन्तं तिङन्तं च पदसंज्ञं स्यात् ॥**

सुप्-प्रत्ययान्तम्, तिङ्-प्रत्ययान्तं च शब्दरूपं पद-संज्ञकं भवति ।

## स्थानसारिणी

| वर्णाः | स्थानानि |
|---|---|
| अ, क्, ख्, ग्, घ्, ङ्, ह् विसर्गः (:) | कण्ठः |
| इ, च्, छ्, ज्, झ्, ञ्, य्, श् | तालु |
| ऋ, ट्, ठ्, ड्, ढ्, ण्, र्, ष् | मूर्धा |
| लृ, त्, थ्, द्, ध्, न्, ल्, स् | दन्ताः |
| उ, प्, फ्, ब्, भ्, म्, उपध्मानीयविसर्गः (पफ) | ओष्ठौ |
| ञ्, म्, ङ्, ण्, न्, अनुस्वारः ( ) | नासिका |
| ए, ऐ | कण्ठतालु |
| ओ, औ | कण्ठोष्ठम् |
| व् | दन्तोष्ठम् |
| जिह्वामूलीयविसर्गः (≍क≍ख) | जिह्वामूलम् |

## आभ्यन्तरप्रयत्नसारिणी

| वर्णाः | आभ्यन्तरप्रयत्नाः | संज्ञाः |
|---|---|---|
| क्, ख्, ग्, घ्, ङ्, च्, छ्, ज्, झ्, ञ्<br>ट्, ठ्, ड्, ढ्, ण्, त्, थ्, द्, ध्, न्<br>प्, फ्, ब्, भ्, म् | स्पृष्टम् | स्पर्शाः |
| य्, व्, र्, ल् | ईषत्स्पृष्टम् | अन्तःस्थाः |
| श्, ष्, स्, ह् | ईषद्विवृतम् | ऊष्माणः |
| अ, इ, उ, ऋ, लृ, ए, ओ, ऐ, औ | विवृतम् | स्वराः |
| अ (प्रयोगे एव) | संवृतम् | |

## बाह्यप्रयत्नसारिणी

| विवारः, श्वासः, अघोषः | संवारः, नादः, घोषः | अल्पप्राणः | महाप्राणः | उदात्तः, अनुदात्तः, स्वरितः |
|---|---|---|---|---|
| क्, च्, ट्, त्, प्<br>ख्, छ्, ठ्, थ्, फ्<br>श्, ष्, स् | ग्, ज्, ड्, द्, ब्<br>घ्, झ्, ढ्, ध्, भ्<br>ङ्, ञ्, ण्, न्, म्,<br>य्, व्, र्, ल्, ह् | क्, च्, ट्, त्, प्<br>ग्, ज्, ड्, द्, ब्<br>ङ्, ञ्, ण्, न्, म्<br>य्, व्, र्, ल् | ख्, छ्, ठ्, थ्, फ्<br>घ्, झ्, ढ्, ध्, भ्<br>श्, ष्, स्, ह् | अ, इ, उ, ऋ, लृ,<br>ए, ओ, ऐ, औ |

## अभ्यासः

१. **रिक्तस्थानं पूरयत**

(क) **'तुल्यास्यप्रयत्नं सवर्णम्'** इति सूत्रेण ................ भवति । (सवर्णसंज्ञा, पदसंज्ञा)

(ख) ....................-वर्णयोः परस्परं सवर्णसंज्ञा भवति । (क-च, ऋ-लृ)

(ग) लृतुलसानां .................... स्थानं भवति । (ओष्ठौ, दन्ताः)

(घ) कादयो मावसानाः ......................... । (स्वराः, स्पर्शाः)

(ङ) **'सुप्तिङन्तं पदम्'** इति सूत्रेण ................ विधीयते । (इत्संज्ञा, पदसंज्ञा)

(च) संयोगसंज्ञाविधायकं सूत्रं .............................. वर्तते । (परः सन्निकर्षः संहिता, हलोऽनन्तराः संयोगः)

(ज) .................. विवाराः श्वासा अघोषाश्च । (खरः, हशः)

२. **अधस्तनवर्णानां स्थानानि निदर्शयत**

क, फ, झ, म, छ, ढ, य, ष, उ

३. **अधस्तनवर्णानामाभ्यन्तरप्रयत्नं लिखत**

ग, प, र, स, उ, ल, ह, ऋ, अ

४. **अधस्तनवर्णानां बाह्यप्रयत्नान् निर्दिशत**

प, उ, ग, भ, ख, स, झ, त, आ, द, ल, ह

५. **अधस्तनवर्णानां सवर्णान् निर्दिशत**

य्, अ, ए, लृ, ऋ, ग्, ध्, वँ, ल्, इ, उ, औ

६. **समीचीनासमीचीनं समुचितचिह्नाभ्यां निर्दिशत**

(क) गकारस्य कण्ठस्थानं वर्तते ।

(ख) एदैतोः कण्ठोष्ठम् ।

(ग) अनुस्वारस्य नासिकास्थानं भवति ।

(घ) यण्-प्रत्याहारान्तर्गतवर्णानाम् ईषत्स्पृष्ट-प्रयत्नो भवति ।

(ङ) कु, चु, टु, तु, पु एते उदितः सन्ति ।

## ७. अधस्तनप्रश्नानामुत्तराणि लिखत

(क) सवर्णसंज्ञाविधायकस्य सूत्रस्य अर्थं निरूपयत ।

(ख) आभ्यन्तरप्रयत्नाः कति ? के च ते ?

(ग) बाह्यप्रयत्नानां नामानि लिखत ।

(घ) उदितः के ? तैः केषां बोधो भवति ?

(ङ) ऋ-लृवर्णयोः सवर्णिनः कति ?

(च) वर्णोच्चारणस्थानानि कानि ?

(छ) पदसंज्ञा कस्य भवति ?

(ज) केषां वर्णानां परस्परं सवर्णसंज्ञा भवति ?

(झ) स्पर्शसंज्ञका वर्णाः के ?

(ञ) ऊष्मसंज्ञकेषु के वर्णा आयान्ति ?

## ८. 'अत्रैवाण् परेण णकारेण' इत्यस्याशयं प्रकाशयत ।

### अच्-सन्धिप्रकरणे

# यणादिसन्धिः

**इको यणचि ६ । १ । ७७ ॥**

**इकः स्थाने यण् स्यादचि संहितायां विषये । सुधी उपास्यः इति स्थिते ॥**

इ, उ, ऋ, लृ इत्येतेषां वर्णानां स्थाने य्, व्, र्, ल् एते आदेशाः भवन्ति स्वरवर्णेषु परेषु सत्सु । **'सुधी उपास्यः'** इति स्थिते धकारोत्तरवर्तिनः ईकारस्य अनेन सूत्रेण यण् भवति । ननु सकारोत्तरवर्तिनः उकारस्य, उपास्य-शब्दावयस्य उकारस्य च कुतो न यण् ? उभयत्रापि व्यवहिताच्परत्वसत्वाद् इति जिज्ञासायाम् आह-

**तस्मिन्निति निर्दिष्टे पूर्वस्य १ । १ । ६६ ॥**

**सप्तमीनिर्देशेन विधीयमानं कार्यं वर्णान्तरेणाव्यवहितस्य पूर्वस्य बोध्यम् ॥**

सप्तम्यन्तस्य पदस्य निर्देशेन विधीयमानं कार्यम् अव्यवहितस्य पूर्वस्य स्थाने एव बोद्धव्यम्, न तु वर्णान्तरेण व्यवहितस्य स्थाने अपि । तेन **'सुधी उपास्यः'** इत्यत्र धकारोत्तरवर्तिनः ईकारस्य स्थाने एव **'इको यणचि'** इत्यनेन यणादेशः ।

**स्थानेऽन्तरतमः १ । १ । ५० ॥**

**प्रसङ्गे सति सदृशतम आदेशः स्यात् । सुध्य् उपास्य इति जाते ॥**

प्रसङ्गे सति = प्राप्ते सति, सदृशतमः अतिशयेन सदृशः आदेशो भवति । सादृश्यञ्च अत्र स्थानार्थगुणप्रमाणैः गृह्यते । तत्र स्थानं कण्ठताल्वादिः, अर्थः इत्यनेन शब्दस्य अर्थो ज्ञेयः, गुणो नाम आभ्यन्तरबाह्यप्रयत्नौ, प्रमाणम् इत्यनेन वर्णानां मात्राः ग्रहणीयाः । यत्र अनेकविधमान्तर्यं तत्र स्थानतः आन्तर्यं बलीयो बोध्यम् । 'सुधी उपास्यः' इत्यत्र तालुस्थानतः आन्तर्याद् ईकारस्य स्थाने यकारे कृते 'सुध्य् उपास्य' इति जाते-

**अनचि च ८ । ४ । ४७ ॥**

**अचः परस्य यरो द्वे वा स्तो न त्वचि । इति धकारस्य द्वित्वेन सुध्ध्य् उपास्य इति जाते ॥**

अच्-वर्णाद् उत्तरस्य यर्-वर्णस्य विभाषया द्वित्वं भवति, न तु अच्-वर्णे परे । अनेन सूत्रेण अवसाने परे अपि द्वित्वं भवति, 'अनचि' इत्यत्र प्रसज्यप्रतिषेधार्थकस्य नञः सत्त्वात् । अनेन सूत्रेण धकारस्य वैकल्पिके द्वित्वे 'स ु ध् ध् य् उपास्यः' इति जाते-

**झलां जश् झशि ८ । ४ । ५३ ॥**

झल्-वर्णस्य स्थाने जश्-वर्णः आदेशो भवति, झश्-वर्णे परे सति । इति पूर्वधकारस्य जश्त्वे, स्थानकृतेन आन्तर्येण दकारे **'सु द् ध् य् उपास्यः'** इति जाते-

**संयोगान्तस्य लोपः ८ । २ । २३ ॥**

**संयोगान्तं यत्पदं तस्य लोपः स्यात् ॥**

यस्य अन्ते संयोगो भवति, तादृशस्य पदस्य लोपो भवति । **'सु द् ध् य् उपास्यः'** इत्यत्र 'द्ध्य्' इति पदान्त-संयोगः, एतेन सहितस्य **'सुद्ध्य्'** इत्यस्य लोपे प्राप्ते-

**अलोऽन्त्यस्य १ । १ । ५२ ॥**

**षष्ठीनिर्दिष्टोऽन्त्यस्याल आदेशः स्यात् । इति यलोपे प्राप्ते-**

स्थानषष्ठ्यन्तं पदमुच्चार्य विहितः आदेशः अन्त्यस्य वर्णस्य स्थाने भवति ।

'**संयोगान्तस्य लोपः**' इति सूत्रे स्थानषष्ठ्यन्तं **'संयोगान्तस्य'** इति पदम्, तेन निर्दिष्टः आदेशः संयोगान्तपदस्य लोपादेशः, सः च अन्त्यस्य यकारमात्रस्य भवति । अनेन यकारस्य लोपे प्राप्ते-

**यणः प्रतिषेधो वाच्यः (वा.) सुद्ध्युपास्यः । मद्ध्वरिः । धात्त्रंशः । लाकृतिः ॥**

संयोगान्तस्य पदस्य अन्त्यस्य यण्-वर्णस्य लोपो न भवति ।

इति यकारलोपस्य निषेधे **'सुद्ध्य् उपास्यः'** इत्यवस्थायां वर्णसम्मेलने सति **'सुद्ध्युपास्यः'** इति रूपं सिद्ध्यति । धकारस्य द्वित्वाभावपक्षे **'सुध्य् उपास्यः'** इत्यवस्थायामपि अनेन संयोगान्त-लोपनिषेधे, वर्णयोगे **'सुध्युपास्यः'** इति च सिद्ध्यति । **'मधु+अरिः'** इत्यत्र उकारस्य यणादेशे वकारे **'मध्व् अरिः'** इति जाते पूर्ववत् **'मद्ध्वरिः/मध्वरिः'** इति । **'धातृ अंशः'** इत्यत्र यणि ऋकारस्य स्थाने रेफादेशे **'धात्र् अंशः'** इति जाते, तकारस्य वैकल्पिके द्वित्वे **'धात्त्रंशः'** द्वित्वाभावे च **'धात्रंशः'** इति रूपे । **'लृ आकृतिः'** इत्यत्र तु लृकारस्य यणि लकारे **'ल् आकृतिः'** इत्यवस्थायां वर्णयोगे 'लाकृतिः' इत्येव रूपम् ।

**एचोऽयवायावः ६ । १ । ७८ ॥**

**एचः स्थाने अय् अव् आय् आव् एते स्युरचि ॥**

ए, ओ, ऐ, औ इत्येतेषां वर्णानां स्थाने क्रमेण अय्, अव्, आय्, आव् एते आदेशाः भवन्ति । तथा हि-

**यथासङ्ख्यमनुदेशः समानाम् १ । ३ । १० ॥**

**समसम्बन्धी विधिर्यथासङ्ख्यं स्यात् । हरये । विष्णवे । नायकः । पावकः ॥**

यत्र स्थानिनः आदेशाः निमित्ताश्च वा समसङ्ख्यकाः भवन्ति तत्र क्रमेण कर्तव्यम् ।

एचोऽयवायावः इति सूत्रे स्थानिनः ए, ओ, ऐ, औ, आदेशाः अय्, अव्, आय्, आव् एते च समसङ्ख्यकाः सन्ति, अतः अत्र यथासङ्ख्यम् ।

'हरे ए' इति स्थितौ 'एचोऽयवायावः' इति सूत्रेण एकारस्य स्थाने अयादेशे 'हर् अय् ए' इति जाते, वर्णसम्मेलने 'हरये' इति रूपं निष्पन्नम् ।

एवंक्रमेण ओकारस्य स्थाने अवादेशे 'विष्णवे', ऐकारस्य स्थाने आयादेशे 'नायकः', औकारस्य स्थाने आवादेशे च 'पावकः' इति रूपाणि निष्पद्यन्ते । 'विष्णो ए' = विष्णवे = नारायणाय; 'नै अकः' = नायकः = नेता; 'पौ अकः' = पावकः = अग्निः चेत्यर्थः ।

**वान्तो यि प्रत्यये ६ । १ । ७९ ॥**

**यकारादौ प्रत्यये परे ओदौतोः अव् आव् एतौ स्तः । गव्यम् । नाव्यम् ।**

यकारः आदौ यस्य, तादृशे प्रत्यये परे ओकार-औकारयोः स्थाने क्रमेण अव् आव्, एतौ आदेशौ भवतः ।

गोर्विकारः इत्यर्थे यत्-प्रत्यये 'गो य' इति स्थिते अनेन ओकारस्य स्थाने अवादेशः । 'नावा तार्यम्' इति विग्रहे नौशब्दात् यत्-प्रत्यये 'नौ य' इति स्थिते अनेन औकारस्य स्थाने आवादेशः ।

अध्वपरिमाणे च (वा.) गव्यूतिः ॥

मार्गस्य परिमाणे अर्थे द्योत्ये गो-शब्दावयवस्य ओकारस्य स्थाने अवादेशो भवति, यूति-शब्दे परे । 'गो यूतिः' = गव्यूतिः नाम कोशद्वयपरिमाणयुतो मार्गः ।

## प्रयोगसिद्धिप्रकारः

**सुद्ध्युपास्यः/सुध्युपास्यः**

'सुधी उपास्यः' इति स्थितौ 'परः सन्निकर्षः संहिता' इति सूत्रेण संहितासंज्ञायाम्, 'तस्मिन्निति निर्दिष्टे पूर्वस्य', 'स्थानेऽन्तरतमः' इति सूत्रद्वयसहकारेण 'इको यणचि' इति

सूत्रेण यणि ईकारस्य स्थाने यकारादेशे, 'सुध्य् उपास्यः' इति जाते, 'अनचि च' इति सूत्रेण धकारस्य विभाषया द्वित्वे 'सुध्ध्य् उपास्य' इति जाते, 'झलां जश् झशि' इति सूत्रेण जश्त्वे पूर्वधकारस्य स्थाने दकारादेशे 'सुद्ध्य् उपास्यः' इति जाते, 'अलोऽन्त्यस्य' इति सूत्रसहकारेण 'संयोगान्तस्य लोपः' इति सूत्रेण संयोगान्तस्य यकारस्य लोपे प्राप्ते, 'यणः प्रतिषेधो वाच्यः' इति वार्तिकेन तन्निषेधे 'सुद्ध्य् उपास्यः' इत्यवस्थायां वर्णसम्मेलने 'सुद्ध्युपास्यः' इति, 'अनचि च' इति द्वित्वाभावपक्षे एकधकारघटितं 'सुध्युपास्यः' इति च रूपद्वयं सिद्धम् । सुद्ध्युपास्यः = सुधीभिः उपास्यः, भगवान् विष्णुः इत्यर्थः ।

### सिद्धपदप्रयोगप्रकारः

१. भक्ताः सुध्युपास्यं नारायणं प्रार्थयन्ते ।

२. हरये भक्ती रोचते ।

३. वाल्मीकीयरामायणस्य नायको रामोऽस्ति ।

४. आयुर्वेदे गव्यम् अतीव महत्त्वं बिभर्ति ।

५. राधायाः सीतायाश्च ग्रामयोर्मध्ये गव्यूतिर्मार्गो वर्तते ।

## अभ्यासः

१. **रिक्तस्थानानि पूरयित्वा सन्धिप्रक्रियां प्रदर्शयत**

**(अ) यण्-सन्धिः**

**यथा–** इति आदिः - इत् य् आदिः - इत्यादिः - इकारस्य स्थाने यकारः ।

(क) ............ - ............. - प्रत्येकम् - ........................

(ख) ............ - ............. - पठत्वत्र - ........................

(ग) ............. - ............. - यद्यपि - ........................

(घ) ............ - ............. - अन्वयः- ........................

(ङ) गुरु आज्ञा - ............. - ........... - ........................

(च) इति आह - ............. - ............ - ........................

(छ) पितृ आज्ञा - ............. - ............ - ........................

(ज) ............ - ............. - मात्रनुमतिः - ........................

**(आ) अयादिसन्धिः**

**यथा** – कपे ए - कप् अय् ए - कपये - एकारस्य स्थाने अयादेशः ।

(क) ............ - ................. - नयनम् - ............................. ।

(ख) ............ - ................. - शयनम् - ............................. ।

| | | | | |
|---|---|---|---|---|
| (ग) | ........... | - ................ | - पवनः | - ........................... । |
| (घ) | भानो ए | - ................ | - ................ | - ........................... । |
| (ङ) | भो अनम् | - ................ | - ................ | - ........................... । |
| (च) | गै अकः | - ................ | - ................ | - ........................... । |
| (छ) | द्वौ एव | - ................ | - ................. | - ........................... । |

२. **युक्तकथनेषु ✓ इति चिह्नम्, अयुक्तकथनेषु ✗ इति चिह्नं योजयत**

(क) उकारस्य स्थाने यणादेशे सति वकारादेशो भवति ।

(ख) 'संयोगान्तस्य लोपः' इति सूत्रं लोपसंज्ञां करोति ।

(ग) अचि परे एकारस्य आयादेशो भवति ।

(घ) 'अनचि च' इति यरो द्वित्वं करोति ।

(ङ) 'गो यम्' इत्यत्र 'एचोऽयवायावः' इति सूत्रेण अवादेशो भवति ।

३. **सन्धिं कृत्वा सन्धिनाम च लिखत**

गौरी+अस्ति, सु+आगतम्, वागर्थौ+इव, अभि+उन्नतिः, सवितृ+एव, गो+यम्, शै+इका ।

४. **सन्धिविच्छेदं विधाय सन्धिविधायकसूत्रञ्च निर्दिशत**

मात्रालयः, प्रत्येकम्, स्वल्पम्, वध्वपि, गौर्यस्ति, कर्त्रादिशः, गुरवे, लादेशः, गायनम्, श्रावकः, अत्युत्साहः ।

५. **अधस्तनप्रयोगाणांससूत्रं सिद्धिप्रक्रियां दर्शयत**

मद्ध्वरिः, धात्त्रंशः, लाकृतिः, विष्णवे, नायकः, पावकः, नाव्यम् ।

६. **'अलोऽन्त्यस्य' इति सूत्रस्य नेपालिभाषायामर्थं लिखत ।**

७. **'एचोऽयवायावः' इति सूत्रस्यार्थं प्रकाशयत ।**

८. **यणसन्धियुतानि पञ्च पदानि अन्विष्य पञ्च वाक्यानि रचयत ।**

### अच्सन्धिप्रकरणे

# गुणसन्धिः

**अदेङ्गुणः १ । १ । २ ॥**

**अदेङ् च गुणसंज्ञः स्यात् ॥**

अ, ए, ओ एते वर्णा गुणसंज्ञका भवन्ति ।

**तपरस्तत्कालस्य १ । १ । ७० ॥**

**तः परो यस्मात्स च तात्परश्चोच्चार्यमाणसमकालस्यैव संज्ञा स्यात् ॥**

तकारपरकाः वर्णाः, तकारात्पराश्च वर्णाः तात्कालिकसवर्णिनामेव बोधका भवन्ति । अत एव **'अदेङ् गुणः'** इति सूत्रे अत् इत्यनेन षण्णाम् ह्रस्वाकाराणामेव बोधो भवति, अकारस्य दीर्घ-प्लुतभेदानां बोधो न भवति । एवमेव तकारात् परेण एङ् इत्यनेन दीर्घयोः एकार-ओकारयोः एव बोधो भवति, न तु प्लुतभेदयोः ।

**आद् गुणः ६ । १ । ८७ ॥**

**अवर्णादचि परे पूर्वपरयोरेको गुण आदेशः स्यात् । उपेद्रः । गङ्गोदकम् ॥**

अवर्णाद् अच्-वर्णे परे पूर्वपरयोः स्थाने गुणः एकादेशो भवति ।

**'उप इन्द्रः'** इति स्थितौ संहितासंज्ञायाम्, **'अदेङ् गुणः'**, **'स्थानेऽन्तरतमः'** इति सूत्रद्वयसहकारेण **'आद् गुणः'** इति सूत्रेण गुणे, पूर्वपरयोः स्थाने एकार एकादेशे **'उप् एन्द्रः'** इति जाते वर्णसम्मेलने **'उपेन्द्रः'** इति रूपं सिद्धम् । उपेन्द्रः = विष्णुः इत्यर्थः । **'गङ्गा उदकम्'** इत्यत्र अनेन सूत्रेण आकर-उकारयोः स्थाने ओकारगुणे **'गङ्गोदकम्'** इति ।

**उपदेशेऽजनुनासिक इत् १ । ३ । २ ॥**

**उपदेशेऽनुनासिकोऽजित्संज्ञः स्यात् । प्रतिज्ञानुनासिक्याः पाणिनीयाः । लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो रेफो रलयोः संज्ञा ॥**

उपदेशे स्थितः अनुनासिकः अच् इत्संज्ञको भवतीति सूत्रार्थः । **'लण्'** इति माहेश्वरसूत्रस्थस्य अकारस्य अनेन सूत्रेण इत्संज्ञायाम्, **'आदिरन्त्येन सहेता'** इति सूत्रेण अन्त्येन इत्संज्ञकेन लण्सूत्रस्थेन अकारेण सह उच्चार्यमाणः हयवरट्-सूत्रस्थः रेफः अर्थात् **'र'** अयं मध्यवर्तिनो लकारस्य आदिवर्णस्य रेफस्य च बोधको भवति । तेन रप्रत्यहारः सिद्धः ।

**उरण् रपरः १ । १ । ५१ ॥**

**ऋ इति त्रिंशतः संज्ञेत्युक्तम् । तत्स्थाने योऽण् स रपरः सन्नेव प्रवर्तते । कृष्णर्द्धिः । तवल्कारः ॥**

ऋकारस्य लृकारस्य च स्थाने विधीयमानोऽण् रपरो भूत्वा प्रवर्तते । अत्र 'र' इति प्रत्याहारः, तेन र्, ल् इत्यनयोः बोधो भवति ।

**'कृष्ण ऋद्धिः'** इति स्थितौ संहितासंज्ञायाम्, **'आद्गुणः'** इति सूत्रेण गुणे, पूर्वपरयोः स्थाने अकारे, **'उरण् रपरः'** इति सूत्रेण तस्य अकारस्य रपरत्वे कृते **'कृष्ण् अर् द्धिः'** इति जाते वर्णसम्मेलने **'कृष्णर्द्धिः'** इति रूपं सिद्धम् । कृष्णर्द्धिः = कृष्णस्य समृद्धिः ।

**'तव लृकारः'** इत्यवस्थायां पूर्वपरयोः अकारगुणे, रपरत्वे **'तव् अल् कारः'** इति जाते, वर्णयोगे **'तवल्कारः'** इति ।

**लोपः शाकल्यस्य ८ । ३ । १९ ॥**

**अवर्णपूर्वयोः पदान्तयोर्यवयोर्लोपो वाऽशि परे ॥**

अवर्णात् परयोः पदान्तयोः यकार-वकारयोः विकल्पेन लोपो भवति, अश्- वर्णे परे सति ।

**'हरे इह'** इति स्थिते **'एचोऽयवायावः'** इत्यनेन एकारस्य अयादेशे **'हर् अय् इह'** इति जाते, अनेन सूत्रेण विकल्पेन यलोपे, वर्णयोगे, **'हर इह'** इत्यवस्थायाम् **'आद् गुणः'** इति गुणे प्राप्ते-

**पूर्वत्रासिद्धम् ८ । २ । १ ॥**

**सपादसप्ताध्यायीं प्रति त्रिपाद्यसिद्धा, त्रिपाद्यामपि पूर्वं प्रति परं शास्त्रमसिद्धम् । हर इह, हरयिह । विष्ण इह, विष्णविह ॥**

सपादसप्ताध्यायीस्थानि सूत्राणि प्रति त्रिपादीस्थसूत्राणि असिद्धानि भवन्ति । त्रिपादीस्थसूत्रेषु च पूर्वं प्रति परं सूत्रम् असिद्धं भवति । आदितः अष्टमाध्यायस्य प्रथम-पादपर्यन्तं सङ्गृहीतानि सूत्राणि सपादीसूत्राणि, अन्त्येषु त्रिषु पादेषु (अष्टमाध्यायस्य द्वितीय-तृतीय-चतुर्थपादेषु) स्थितानि च त्रिपादी-सूत्राणि सन्ति ।

## प्रयोगसिद्धिप्रकारः

### हर इह, हरयिह

**'हरे इह'** इति स्थितौ **'एचोऽयवायावः'** इति सूत्रेण एकारस्य स्थाने अयादेशे **'हर् अय् इह'** इति जाते वर्णसम्मेलने **'हरय् इह'** इति जाते **'लोपः शाकल्यस्य'** इति सूत्रेण विकल्पेन यकारस्य लोपे **'हर इह'** इत्यवस्थायाम् **'आद् गुणः'** इति सूत्रेण गुणे प्राप्ते **'पूर्वत्रासिद्धम्'** इति सूत्रेण **'लोपः शाकल्यस्य'** इति सूत्रेण विहितस्य यकारलोपस्य **'आद् गुणः'** इति सूत्रं प्रति असिद्धत्वाद् गुणाऽभावे **'हर इह'** इति रूपं सिद्धम् । यकारस्य लोपाऽभावे **'हरय् इह'** इति स्थिते वर्णसम्मेलने **'हरयिह'** इति च रूपं सिद्धम् । अस्य च 'हे विष्णो ! अत्र' इत्यर्थः ।

**एकादेशगुणसन्धि-प्रक्रिया**

| | | |
|---|---|---|
| अ/आ + इ/ई | = | ए । (रमा + ईशः = रमेशः) |
| अ/आ + उ/ऊ | = | ओ । (प्रश्न + उत्तरम् = प्रश्नोत्तरम्) |
| अ/आ + ऋ/ॠ | = | अर् । (राज + ऋषिः = राजर्षिः) |
| अ/आ + ऌ | = | अल् । (तव + ऌकारः = तवल्कारः) |

## अभ्यासः

### १. कोष्ठकात् समुचितानि पदानि आदाय रिक्तस्थानानि पूरयत

(उरण् रपरः, अचि, गुणसंज्ञकाः, त्रिपादी, लोपः शाकल्यस्य, रेफः, ओकारः)

(क) अ ए ओ इति ................... वर्णाः सन्ति ।

(ख) अवर्णाद् ........................ परे पूर्वपरयोर्गुण आदेशः स्यात् ।

(ग) रपरविधायकं सूत्रम् .................................... अस्ति ।

(घ) सपादसप्ताध्यायीं प्रति.............................. असिद्धा ।

(ङ) लण्सूत्रस्थावर्णेन सहोच्चार्यमाणो .......... रलयोः संज्ञा ।

(च) विभाषया यवयोर्लोपविधायकं सूत्रं............................ अस्ति ।

(छ) अकार-उकारयोः स्थाने गुणे सति .............................. भवति ।

### २. सन्धिं सन्धिविच्छेदं वा कुरुत

| | |
|---|---|
| देव + ईशः = ................ | पर + उपकारः = ................ |
| माता + इव = ................ | वसन्त + ऋतुः = ................ |
| वर्षर्तुः = .......... + .......... | तथोक्तम् = .......... + .......... |
| सर्वेश्वरः = .......... + .......... | तस्योपरि = .......... + .......... |

## ३. अधो लिखितप्रश्नानामुत्तराणि लिखत

(क) 'आद् गुणः' इति सूत्रं किं करोति ?

(ख) 'प्रतिज्ञानुनासिक्याः पाणिनीयाः' इत्यस्याशयः कः ?

(ग) 'उपदेशेऽ............' इति सूत्रं पूरयत ।

(घ) 'पूर्वत्रासिद्धम्' इति सूत्रस्यार्थं लिखत ।

(ङ) 'अत्' इत्यनेन किं ज्ञायते ?

(च) गुणसंज्ञका वर्णाः के ?

(छ) ऋकारस्य स्थानेऽण् कथं प्रवर्तते ?

(ज) गुणसंज्ञकं सूत्रं किम् ?

(झ) 'तपरस्तत्कालस्य' इति सूत्रस्य कार्यं किम् ?

(ञ) अशि परे पदान्तयोर्यकारवकारयोर्वैकल्पिकलोपविधायकं सूत्रं किम् ?

## ४. अधो निर्दिष्टशब्दानां सिद्धरूपाणि लिखित्वा वाक्यानि रचयत

**यथा–** जन्म + उत्सवः = जन्मोत्सवः - अद्य मम जन्मोत्सवो वर्तते ।

उमा + ईशः = ............................ पर + उपकारः = .............................

महा + ऋषिः = ........................... हित + उपदेशः = .............................

उप + इन्द्रः = ............................. ग्रीष्म + ऋतुः = ..............................

## ५. ससूत्रं सिद्धिप्रकारं दर्शयत

गङ्गोदकम्, तवल्कारः, विष्ण इह/विष्णविह

## ६. गुणसन्धियुतानि पञ्च पदानि अन्विष्य तेषां वाक्येषु प्रयोगं दर्शयत ।

### अच्सन्धिप्रकरणे

# वृद्धिसन्धिः

**वृद्धिरादैच् १। १। १॥**

**आदैच्च वृद्धिसंज्ञः स्यात् ॥**

आ, ऐ, औ एते वर्णा वृद्धिसंज्ञका भवन्ति ।

**वृद्धिरेचि ६। १। ८८॥**

**आदेचि परे वृद्धिरेकादेशः स्यात् । गुणापवादः । कृष्णैकत्वम् । गङ्गौघः । देवैश्वर्यम् । कृष्णौत्कण्ठ्यम् ॥**

अवर्णाद् एच्-वर्णे परे पूर्वपरयोः स्थाने वृद्धिसंज्ञकः एकादेशो भवति । विधिरयं गुणस्याऽपवादो वर्तते । आन्तरतम्याद् एकार-ऐकारयोः ऐकारः, ओकार-औकारयोः औकारः ।

**'कृष्ण एकत्वम्'** इति स्थिते संहितासंज्ञायाम् **'आद्गुणः'** इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य **'वृद्धिरादैच्'**, **'स्थानेऽन्तरतमः'** इति सूत्रद्वयसहकारेण **'वृद्धिरेचि'** इति सूत्रेण पूर्वपरयोः स्थाने वृद्धिसंज्ञके ऐकारादेशे **'कृष्ण् ऐकत्वम्'**, वर्णसम्मेलने **'कृष्णैकत्वम्'** इति रूपं सिद्धम् । एवमेव- **'देव ऐश्वर्यम्'** - देव् ऐ श्वर्यम् - देवैश्वर्यम् । **'गङ्गा ओघः'** इत्यत्र आकर-ओकारयोः स्थाने औकारवृद्धिः, तेन **'गङ्गौघः'** इति रूपम् । **'कृष्ण औत्कण्ठ्यम्'** - कृष्ण् औ त्कण्ठ्यम् - कृष्णौत्कण्ठ्यम् ।

**एत्येधत्यूठ्सु ६। १। ८९॥**

**अवर्णादेजाद्योरेत्येधत्योरूठि च परे वृद्धिरेकादेशः स्यात् । उपैति । उपैधते । प्रष्ठौहः । एजाद्योः किम् ? उपेतः । मा भवान्प्रेदिधत् ।**

अवर्णाद् एच्वर्ण आदौ यस्य तादृशे इण्-धातौ परे, एजादौ एध्-धातौ च परे, ऊठ्-शब्दे च परे सति पूर्वपरयोः स्थाने वृद्धिः एकादेशो भवति ।

**'उप एति'** इति स्थिते, गुणं बाधित्वा 'वृद्धिरेचि' इति वृद्धौ प्राप्तायाम्, तामपि प्रबाध्य **'एङि पररूपम्'** इति सूत्रेण पररूपे प्राप्ते तत् च प्रबाध्य अनेन सूत्रेण पूर्वपरयोः स्थाने वृद्धिसंज्ञके एकादेशे, वर्णयोगे **'उपैति'** इति रूपं सिद्धम् ।

एवंरीत्या **'उप एधते'** = उपैधते, **'प्रष्ठ ऊहः'** = प्रष्ठौहः इत्यादीनि उदाहरणानि साधनीयानि ।

एजाद्योः किम् ? एत्येधत्योः इत्यत्र एजाद्योः इति विशेषणाभावे 'उप इतः', मा भवान् 'प्र इदिधत्' इत्यत्रापि इण्धातोः एध्धातोश्च सत्त्वाद् वृद्धिः स्यात्, तन्माभूद् एतदर्थम् 'एजाद्योः' इति विशेषणमत्र प्रदत्तमस्ति ।

**स्वादिरेरिणोः (वा.) स्वैरम् । स्वैरी । स्वैरिणी ।**

स्व-शब्दाद् ईरशब्दे परे पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति । स्व + ईरम् = स्वैरम् । स्व + ईरी = स्वैरी । स्व + ईरिणी = स्वैरिणी ।

**अक्षादूहिन्यामुपसङ्ख्यानम् (वा.) अक्षौहिणी सेना ।**

अक्ष-शब्दाद् ऊहिनीशब्दे परे पूर्वपरयोः अच्-वर्णयोः स्थाने वृद्धिरेकादेशो भवति ।

'अक्ष ऊहिनी' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'अक्षादूहिन्यामुपसङ्ख्यानम्' इति वार्तिकेन पूर्वपरयोः स्थाने वृद्धिसंज्ञके ओकार-एकादेशे, वर्णसम्मेलने 'अक्षौहिनी' इति जाते 'पूर्वपदात् संज्ञायामगः' इति नकारस्य णत्वे 'अक्षौहिणी' इति रूपं सिद्ध्यति ।

**प्रादूहोढोढ्येषैष्येषु (वा.) । प्रौहः । प्रौढः । प्रौढिः । प्रैषः । प्रैष्यः ।**

'प्र' इति उपसर्गाद् ऊह, ऊढ, ऊढि, एष, एष्य एतेषु शब्देषु परेषु पूर्वपरयोः अच्-वर्णयोः स्थाने वृद्धिरेकादेशो भवति ।

'प्र ऊहः' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'प्रादूहोढोढ्येषैष्येषु' इति वार्तिकेन पूर्वपरयोः स्थाने औकारे वृद्धिसंज्ञके एकादेशे वर्णसम्मेलने 'प्रौहः' इति रूपं सिद्ध्यति । एवंरीत्या 'प्र ऊढः' = प्रौढः, 'प्र उढि' = पौढिः, 'प्र एषः' = प्रैषः, 'प्र एष्यः' = प्रैष्यः इति च रूपाणि सिद्ध्यन्ति ।

**ऋते च तृतीयासमासे (वा.) सुखेन ऋतः सुखार्तः । तृतीयेति किम् ? परमर्तः ।**

अवर्णाद् 'ऋत' इति शब्दे परे पूर्वपरयोः अच्-वर्णयोः स्थाने वृद्धिरेकादेशो भवति ।

'सुख ऋतः' इति स्थिते गुणं प्रबाध्य 'ऋते च तृतीयासमासे' इति वार्तिकेन पूर्वपरयोः अकार-ऋकारयोः स्थाने आकार एकादेशे 'उरण् रपरः' इति सूत्रेण रपरत्वे 'आर्' इति कृते वर्णसम्मेलने 'सुखार्तः' इति रूपं सिद्ध्यति ।

**प्रवत्सतरकम्बलवसनार्णदशानामृणे (वा.) । प्रार्णम्, वत्सतरार्णम्, इत्यादि ॥**

प्र, वत्सतर, कम्बल, वसन, ऋण इत्येतेभ्यः शब्देभ्यः ऋणशब्दे परे पूर्वपरयोः अच्-वर्णयोः स्थाने वृद्धिरेकादेशो भवति ।

'प्र ऋणम्' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'प्रवत्सतरकम्बल-वसनार्णदशानामृणे' इति वार्तिकेन पूर्वपरयोः अकार-ऋकारयोः स्थाने आकाररूपे वृद्धिसंज्ञके एकादेशे 'उरण् रपरः' इति सूत्रेण रपरत्वे 'आर्' इति च कृते वर्णसम्मेलने 'प्रार्णम्' इति रूपं सिद्ध्यति ॥

**उपसर्गाः क्रियायोगे १ । ४ । ५९ ॥**

**प्रादयः क्रियायोगे उपसर्गसंज्ञाः स्युः । प्र परा अप सम् अनु अव निस् निर् दुस् दुर् वि आङ् नि अधि अपि अति सु उत् अभि प्रति परि उप – एते प्रादयः ॥**

क्रियायामन्विताः प्रादयः उपसर्गसंज्ञकाः भवन्ति ।

**भूवादयो धातवः १ । ३ । १ ॥**

**क्रियावाचिनो भ्वादयो धातुसंज्ञाः स्युः ॥**

क्रियावाचिनो भू, वा, गम् इत्यादयो धातुसंज्ञकाः भवन्ति ।

**उपसर्गादृति धातौ ६ । १ । ९१ ॥**

**अवर्णान्तादुपसर्गादृकारादौ धातौ परे वृद्धिरेकादेशः स्यात् । प्रार्च्छति ॥**

अवर्णान्ताद् उपसर्गाद् ऋकारादौ धातौ परे पूर्वपरयोः स्थाने वृद्धिरेकादेशो भवति ।

**'प्र ऋच्छति'** - प्र् आर् ऋच्छति - प्रार्च्छति ।

**वा सुप्यापिशलेः ६ । १ । ९२ ॥**

**आदुपसर्गादृकारादौ सुब्धातौ परे वृद्धिर्वा । आपिशलिग्रहणं पूजार्थम् ।**

**अचो रहाभ्यां द्वे ८ । ४ । ४६ ॥**

**अचः पराभ्यां रेफहकाराभ्यां परस्य यरो द्वे वा स्तः । गौर्य्यौ ।**

अच्-वर्णाद् उत्तराभ्यां रेफहकाराभ्यां परस्य यर्-वर्णस्य विभाषया द्वित्वं भवति । अनेन सूत्रेण यकारस्य द्वित्वे, वर्णसम्मेलने **'गौर्य्यौ'** इति रूपं सिद्ध्यति ।

**शरोऽचि ८ । ४ । ४६ ॥**

**द्वे न । प्रार्षभीयति, प्रर्षभीयति ।**

'प्र + ऋषभीयति' इत्यवस्थायां प्रेत्यस्योपसर्गकत्वाद् ऋषभीयतीत्यस्य सुब्धातुत्वाद् "वा सुप्यापिशलेः" इति सूत्रेण वैकल्पिकायां वृद्धौ, रपरत्वे च कृते "अचो रहाभ्यां द्वे" इत्यनेन वैकल्पिके द्वित्वे प्राप्तेऽनेन सूत्रेण तन्निषेधे- प्रार्षभीयति, वृद्ध्यभावे गुणे, रपरत्वे- प्रर्षभीयति इति रूपद्वयम् ।

## प्रयोगसिद्धिप्रकारः

**प्राच्छीति**

'**प्र ऋच्छति**' इति स्थिते, '**प्र**' इत्यस्य '**उपसर्गाः क्रियायोगे**' इति उपसर्गसंज्ञायाम्, '**ऋच्छति**' इत्यस्य '**भूवादयो धातवः**' इति धातुसंज्ञायाम्, '**आद् गुणः**' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य '**उपसर्गादृति धातौ**' इति सूत्रेण वृद्धौ '**उरण् रपरः**' इति रपरत्वे, पूर्वपरयोः स्थाने '**आर्**' इत्येकादेशे, '**प्र् आर् च्छति**' इति जाते, वर्णसम्मेलने '**प्राच्छीति**' इति रूपं सिद्धम् ।

## एकादेश-वृद्धिसन्धि-प्रक्रिया

**प्रायशः –**

| | | |
|---|---|---|
| अ/आ + ए/ऐ | = | ऐ । (तथा + एव = तथैव) |
| अ/आ + ओ/औ | = | औ । (तव + औत्सुक्यम् = तवौत्सुक्यम्) |

**कदाचित् –**

| | | |
|---|---|---|
| अ/आ + इ/ई | = | ऐ । (स्व + ईरम् = स्वैरम्) |
| अ/आ + उ/ऊ | = | औ । (प्र + ऊढिः = प्रौढिः) |
| अ/आ + ऋ/ॠ | = | आर् । (उप + ऋच्छति = उपार्च्छति) |

**सिद्धपदप्रयोगप्रकारः**

१. देवैश्वर्यं जगति व्याप्तमस्ति ।

२. हरिद्वारे रमेशः गङ्गौघम् आश्चर्येण पश्यति ।

३. रामः ग्रामम् उपैति ।

४. महाभारतयुद्धे दुर्योधनस्य पार्श्वे अक्षौहिणी सेना आसीत् ।

५. ऋणार्णं धनं स्वस्य पार्श्वे अधिककालं यावद् न स्थापनीयम् ।

## अभ्यासः

### १. कोष्ठकाद् उपयुक्तानि पदानि चित्वा रिक्तस्थानानि पूरयत

(क) आ, ऐ, औ इति .................... वर्णाः सन्ति ।

(वृद्धिसंज्ञकाः, गुणसंज्ञकाः)

(ख) .................... इति सूत्रं वृद्धिसंज्ञां करोति ।

(वृद्धिरादैच्, वृद्धिरेचि)

(ग) .................... उपसर्गसंज्ञाविधायकं सूत्रं वर्तते ।

(उपसर्गाः क्रियायोगे, उपसर्गादृति धातौ)

(घ) वृद्धिसन्धिः .................... अपवादो वर्तते ।

(यण्सन्धेः, गुणसन्धेः)

(ङ) अकार-एकारयोः वृद्धौ सत्याम् .................... भवति ।

(एकारः, ऐकारः)

### २. समीचीनमसमीचीनं वा निर्दिशत

(क) 'वृद्धिरेचि' इति सूत्रेण वृद्ध्यादेशो भवति ।

(ख) क्रियायोगे सत्येव प्रादयः उपसर्गाः सन्ति ।

(ग) प्रादिगणपठितः 'सु' इति उपसर्गो नास्ति ।

(घ) 'भूवादयो धातवः' इति धातुसंज्ञां करोति ।

(ङ) 'उप एधते' इत्यत्र पररूपं बाधित्वा वृद्धिर्भवति ।

### ३. अधस्तनप्रश्नानामुत्तरं लिखत

(क) 'वृद्धिरादैच्' इति सूत्रं किं करोति ।

(ख) प्रादीनां कस्यामवस्थायामुपसर्गसंज्ञा भवति ?

(ग) धातुसंज्ञाविधायकं सूत्रं किम् ? धातुसंज्ञा केषां भवति ?

(घ) वृद्धिपदेन केषां ग्रहणं भवति ?

(ङ) 'उप एति' इत्यत्र कस्य सूत्रस्य प्रवृत्तिर्भवति ? किञ्चात्र रूपं निष्पद्यते ?

### ४. प्रदत्तावस्थासु सिद्धरूपाणि विलिख्य वाक्यानि रचयत

तण्डुल + ओदनम् = ...................

सा + एषा =.............................

राष्ट्र + एकता = .....................

देव + ऐश्वर्यम् = ......................

प्र + ऋच्छति = .........................

कृष्ण + औत्कण्ठ्यम् = ...............

### ५. सन्धिविच्छेदं कुरुत

तवैव = .......... + .........

तवौदार्यम् = .......... + .........

वनौषधम् = ......... + .........

जनैकता = ......... + .........

मतैक्यम् = ......... + .........

मैवम् = ......... + .........

### ६. अधस्तनानां प्रयोगाणां सिद्धिपथं दर्शयत

गङ्गौघः, देवैश्वर्यम्, उपैधते, प्रष्ठौहः, ऋणार्णम्, प्रार्षभीयति

### ७. उपसर्गाः कति ? के च ते ?

### अच्सन्धिप्रकरणे

# पररूप-दीर्घ-पूर्वरूप-प्रकृतिभाव-अवङ्सन्धिः

**एङि पररूपम् ६ । १ । ९४ ॥**

**आदुपसर्गादेङादौ धातौ पररूपमेकादेशः स्यात् । प्रेजते । उपोषति ॥**

अवर्णान्तादुपसर्गाद् एङादौ धातौ परे पूर्वपरयोः स्थाने पररूपम् एकादेशः भवति । पररूपम् एकादेशो नाम पूर्वपरयोः स्थाने परस्य रूपं भवति इत्यर्थः ।

**'प्र एजते'** इत्यत्र अवर्णान्तोपसर्गः 'प्र' इति, तस्माद् 'एजते' इति एङादौ धातौ परे गुणवृद्धी बाधित्वा अनेन सूत्रेण पूर्वपरयोः स्थाने पररूपे, एकार-एकादेशे **'प्रेजते'** इति रूपं सिद्ध्यति । **'उप ओषति'** - उप् ओषति - उपोषति ।

**अचोऽन्त्यादि टि १ । १ । ६४ ॥**

**अचां मध्ये योऽन्त्यः स आदिर्यस्य तट्टिसंज्ञं स्यात् ।**

शब्देषु स्थितेषु अच्-वर्णेषु यः अन्त्यः अच्-वर्णः, सः अन्त्यः अच् आदिः यस्य तादृशः यः शब्दसमुदायः, तस्य टि-संज्ञा भवति ।

**'मनस्'** इति शब्दे अन्त्यः अच् नकारोत्तरवर्ती अकारः, अयं च अकारः सकारस्य आदौ वर्तते, अतः अत्र **'अस्'** इति अन्त्यादिसमुदायः **'टि'** उच्यते । यदि अन्त्याद् अचः परं किमपि नास्ति चेद् व्यपदेशिवद्भावेन तस्यैव टि-संज्ञा भवति । यथा- **'शक'** शब्दस्य अन्त्यः अकारः टि ।

**शकन्ध्वादिषु पररूपं वाच्यम्** (वा.) **तच्च टेः । शकन्धुः । कर्कन्धुः । कुलटा । सीमन्तः केशवेशे । सीमान्तोऽन्यः । मनीषा । हलीषा । लाङ्गलीषा । पतञ्जलिः । सारङ्गः पशुपक्षिणोः । साराङ्गोऽन्यः । आकृतिगणोऽयम् । मार्त्तण्डः ॥**

शकन्ध्वादि-गणपठितानां शब्दानां सिद्धिविषये पररूपमेकादेशो भवति । तत् च पररूपं टि-भागस्य भवति ।

**'शक अन्धुः'** इत्यत्र **'शक'** शब्दस्य अन्त्यस्य अकारस्य **'अचोऽन्त्यादि टि'** इति टिसंज्ञायाम्, अनेन वार्तिकेन तस्यैव पररूपे **'शक् अन्धुः'** इत्यत्र वर्णयोगे **'शकन्धुः'** इति । एवंरीत्या **'मनस्'** इत्यस्य अस्-भागस्य टिसंज्ञायां तस्यैव पररूपे **'मन् ईषा'** इति जाते वर्णयोगे **'मनीषा'** इति । एवं **'कर्क अन्धुः'** = कर्कन्धुः, **'मार्त्त अण्डः'** = मार्त्तण्डः इति ।

**एवे चानियोगे (वा.) क्वेव भोक्षसे । अनियोगे किम् ? तत्रैव ।**

अकाराद् अनिधारणार्थके एवशब्दे परे पररूपं भवति ।

**ओत्वोष्ठयोः समासे वा (वा.) स्थूलोतुः, स्थूलौतुः । बिम्बोष्ठः, बिम्बौष्ठः । समासे किम् ? तवौष्ठः ।**

अवर्णाद् ओतुशब्दे ओष्ठशब्दे च परे विकल्पेन पररूपं भवति । स्थूल + ओतुः = स्थूलोतुः, पक्षे वृद्धौ- स्थूलौतुः । बिम्ब + ओष्ठः = बिम्बोष्ठः, पक्षे वृद्धौ- बिम्बौष्ठः ।

**ओमाङोश्च ६ । १ । ९५ ॥**

**ओमि आङि चात्परे पररूपमेकादेशः स्यात् । शिवायों नमः । शिव एहि ॥**

आद् = अवर्णाद् ओम्-शब्दे, आङ्-शब्दे च परे पूर्वपरयोः स्थाने पररूपम् एकादेशो भवति ।

**'शिवाय ओं नमः'** इति स्थिते **'वृद्धिरेचि'** इति सूत्रेण वृद्धौ प्राप्तायां तां प्रबाध्य अनेन सूत्रेण पूर्वपरयोः स्थाने पररूपैकादेशे ओकारे जाते, वर्णसम्मेलने **'शिवायों नमः'** इति रूपं सिद्धयति । आङि परे 'शिव आ इहि' इत्यवस्थायां **'धातूपसर्गयोः कार्यमन्तरङ्गम्, अन्यत् कार्यं बहिरङ्गम्, असिद्धं बहिरङ्गमन्तरङ्गे'** इति परिभाषासहकारेण पूर्वम् **'आ इहि'** इत्यत्र गुणे कृते **'शिव एहि'** इति जाते-

**अन्तादिवच्च ६ । १ । ८५ ॥**

**योऽयमेकादेशः स पूर्वस्यान्तवत्परस्यादिवत् । शिवेहि ॥**

पूर्वपरयोः स्थाने विहितः एकादेशः पूर्वस्थानिघटितसमुदायस्य अन्त्यवत्, परस्थानिघटितसमुदायस्य आदिवच्च भवति ।

**'शिव एहि'** इत्यत्र पूर्वपरयोः स्थाने विहितः एकादेशः **'ए'** इति तस्य पूर्वस्थानी **'आ'** इति, तद्घटितः समुदायोऽपि **'आ'** एव तद्वत् भवति । तथा च एकारस्य आङ्त्वात् तस्मिन् परे **'ओमाङोश्च'** इति सूत्रेण पररूपे वर्णयोगे **'शिवेहि'** इति सिद्धयति ।

**अकः सवर्णे दीर्घः ६ । १ । १०१ ॥**

**अकः सवर्णेऽचि परे पूर्वपरयोर्दीर्घ एकादेशः स्यात् । दैत्यारिः । श्रीशः । विष्णूदयः । होतॄकारः ॥**

अक्-वर्णेभ्यः सवर्णे अच्-वर्णे परे सति पूर्वरयोः स्थाने दीर्घः एकादेशो भवति ।

**'दैत्य अरिः'** इति स्थिते **'आद् गुणः'** इति सूत्रेण गुणे प्राप्ते, तं बाधित्वा अनेन सूत्रेण पूर्वपरयोः स्थाने दीर्घ-एकादेशे, आन्तरतम्याद् आकारे, वर्णसम्मेलने **'दैत्यारिः'** इति रूपं सिद्धयति । एवंरीत्या **'श्री ईशः'** = श्रीशः, **'विष्णु उदयः'** = विष्णूदयः, **'होतृ ऋकारः'** = होतॄकारः इति च रूपाणि सिद्धयन्ति ।

**ऋति सवर्णे ऋ वा (वा.) होतृकारः, होतॄकारः ।**

द्वयोः ऋकारयोः स्थाने विलक्षणो रेफद्वयवान् ऋकारो विकल्पेन भवति । तथा च होतृ + ऋकारः = होतृकारः, पक्षे सवर्णदीर्घे- होतॄकारः ।

**एङः पदान्तादति ६ । १ । १०९ ॥**

**पदान्तादेङोऽति परे पूर्वरूपमेकादेशः स्यात् । हरेऽव । विष्णोऽव ॥**

पदान्ताद् एङ्वर्णाद् ह्रस्वाकारे परे पूर्वपरयोः स्थाने पूर्वरूपमेकादेशो भवति ।

'**हरे अव**' इति स्थिते '**एचोऽयवायावः**' इति सूत्रेण एकारस्य स्थाने अयादेशे प्राप्ते तं प्रबाध्य अनेन सूत्रेण पूर्वपरयोः पूर्वरूपैकादेशे एकारे, वर्णसम्मेलने '**हरेव**' इति जाते चम्पकपुष्पकन्यायेन खण्डाकारे '**हरेऽव**' इति रूपं सिद्ध्यति । सुगन्धयुतं पुष्पं जले निपात्य पुनः तस्य बहिरानयने यथा जले गन्धः तिष्ठति तथैव अत्रापि अकारस्य पूर्वरूपे कृतेऽपि सः अकारः खण्डाकाररूपेण शब्देषु तिष्ठति इति चम्पकपुष्पकन्यायस्य आशयः । एवंरीत्या '**विष्णो अव**' = विष्णोऽव इति च रूपं सिद्ध्यति ।

**सर्वत्र विभाषा गोः ६ । १ । १२२ ॥**

**लोके वेदे चैङन्तस्य गोरति वा प्रकृतिभावः पदान्ते । गोअग्रम्, गोऽग्रम् । एङन्तस्य किम् ? चित्रग्वग्रम् । पदान्ते किम् ? गोः ॥**

लौकिके प्रयोगे, वैदिके प्रयोगे च एङन्तस्य गोशब्दस्य विभाषया प्रकृतिभावो भवति, पदान्ते । स्वेन रूपेण अवस्थानं प्रकृतिभावः ।

'**गो अग्रम्**' अत्र '**एचोऽयवायावः**' इति सूत्रेण अवादेशे प्राप्ते तं प्रबाध्य '**एङः पदान्तादति**' इति सूत्रेण पूर्वरूपे प्राप्ते, तदपि प्रबाध्य अनेन सूत्रेण प्रकृतिभावे '**गो अग्रम्**' इति रूपं सिद्ध्यति । प्रकृतिभावस्य अभावपक्षे पूर्वरूपे कृते- गोऽग्रम् ।

**अनेकाल्शित्सर्वस्य १ । १ । ५५ ॥**

**इति प्राप्ते ॥**

अनेकाल्-आदेशः, शिदादेशश्च यस्य स्थाने विहितौ, तस्य सर्वस्य स्थाने भवतः । एकश्चासौ अल् एकाल्, न एकाल् इति अनेकाल् । शकारः इत् यस्य सः शित् इति ।

**ङिच्च १ । १ । ५३ ॥**

**ङिदनेकालप्यन्त्यस्यैव स्यात् ॥**

ङिदादेशः (ङकारः इत्संज्ञकः अस्ति यत्र, तादृशः आदेशः) यस्य स्थाने विधीयते, सः अनेकाल् सन्नपि अन्त्यस्य एव स्थाने भवति ।

**अवङ् स्फोटायनस्य ६ । १ । १२३ ॥**

**पदान्ते एङन्तस्य गोरवङ् वाऽचि । गवाग्रम्, गोऽग्रम् । पदान्ते किम् ? गवि ॥**

एङन्तस्य गोशब्दस्य स्थाने विभाषया **'अवङ्'** आदेशो भवति, अचि परे, पदान्ते । अवङादेशस्य ङकारः इत्, तस्य लोपे **'अव'** इति अवशिष्यते ।

**'अनेकाल्शित्सर्वस्य'** इति सूत्रेण अनेकाल्त्वात् सम्पूर्णस्य गोशब्दस्य स्थाने अवङादेशे प्राप्ते तं प्रबाध्य अनेन सूत्रेण ङित्वाद् अन्त्यस्य ओकारस्य स्थाने अवङादेशः । **'गो अग्रम्'** - ग् अव - अग्रम (अवङ् स्फोटायवस्य) - ग् अव् आ ग्रम् (अकः सवर्णे दीर्घः) - गवाग्रम् ।

**इन्द्रे च ६ । १ । १२४ ॥**

**गोरवङ् स्यादिन्द्रे । गवेन्द्रः ॥**

गोशब्दस्य स्थाने अवङादेशो भवति, इन्द्र-शब्दे परे ।

**'गो इन्द्रः'** - ग् अव इन्द्रः - ग् अव् एन्द्रः (आद् गुणः) - गवेन्द्रः ।

### प्रयोगसिद्धिप्रकारः

**शिवेहि**

'शिव आ इहि' इति स्थिते 'शिव आ' इत्यत्र 'अकः सवर्णे दीर्घः' इति सूत्रेण दीर्घे प्राप्ते 'आ इहि' इत्यत्र 'आद् गुणः' इति सूत्रेण गुणे च प्राप्ते 'धातूपसर्गयोः कार्यमन्तरङ्गम् अन्यत्कार्यं बहिरङ्गम्, असिद्धं बहिरङ्गम् अन्तरङ्गे' इत्यनया परिभाषया 'आ इहि' इत्यत्र गुणे 'शिव एहि' इति जाते 'अन्तादिवच्च' इति सूत्रसहकारेण 'ओमाङोश्च' इति सूत्रेण पररूपे, पूर्वपरयोः स्थाने एकारे, वर्णयोगे 'शिवेहि' इति रूपं सिद्ध्यति ।

**सवर्णदीर्घ-सन्धिप्रक्रिया-**

| | | |
|---|---|---|
| अ/आ + अ/आ | = | आ । (विद्या + आलयः = विद्यालयः) |
| इ/ई + इ/ई | = | ई । (रवि + इन्द्रः = रवीन्द्रः) |
| उ/ऊ + ऊ/ऊ | = | ऊ । (बहु + उपयोगी = बहूपयोगी) |
| ऋ/ॠ/ऌ + ऋ/ॠ/ऌ | = | ॠ । (होतृ + ऋकारः = होतॄकारः) |

## सिद्धपदप्रयोगप्रकारः

१. प्रद्युम्नः भरतपुरे प्रेजते ।

२. मम मनीषा मां बाधते ।

३. घनश्यामः प्रतिक्षणं 'शिवायों नमः' इति मन्त्रं जपति ।

४. दैत्यारिः विष्णुः प्रह्लादं ररक्ष ।

५. गोशालां गत्वा गवाग्रं पश्य ।

## अभ्यासः

१. **कोष्ठकात् समुचितविकल्पं चित्वा रिक्तस्थानं पूरयत**

| |
|---|
| अचोऽन्त्यादि टि, पररूपम्, अवर्णान्तादुपसर्गाद्, अवङादेशम्, अन्त्यस्य |

(क) ................. एङादौ धातौ परे पररूपमेकादेशः ।

(ख) शकन्ध्वादिषु .................... वाच्यम् ।

(ग) .................. टिसंज्ञाविधायकं सूत्रं वर्तते ।

(घ) ङिदादेशः ......................... भवति ।

(ङ) 'इन्द्रे च' इति सूत्रम् ............. करोति ।

२. **सन्धिविच्छेदं प्रदर्श्य प्रदत्तैः शब्दैर्वाक्यानि रचयत**

हिमालयः = ................. गुरूपदेशः = .........................

इतीदम् = ..................... श्रीशः = ..............................

३. **अधस्तनप्रश्नानुत्तरयत**

(क) 'प्रकृतिभावः' इत्यस्य कोऽर्थः ?

(ख) दीर्घवर्णाः कति ? के च ते ?

(ग) अ-इ-उ-ऋ-लृवर्णानां सवर्णान् निर्दिशत ।

(घ) अवङादेशविधायकं सूत्रं किम् ?

(ङ) 'अचोऽन्त्यादि टि' इति सूत्रेण कस्य का संज्ञा विधीयते ?

(च) 'अन्तादिवच्च' इति सूत्रस्य किं कार्यम् ?

(छ) 'धातूपसर्गयोः कार्यमन्तरङ्गम्...' इति कारिकार्थं सोदाहरणं लिखत ।

(ज) 'गवि' इत्यत्रावङादेशः कथन्न भवति ?

(झ) 'शकन्ध्वादिषु पररूपं वाच्यम्' इति वार्तिककार्यं सोदाहरणं निर्दिशत ।

(ञ) ङिदादेशः कस्य स्थाने भवति ? तन्नियामकं सूत्रं किम् ?

## ४. सन्धिविच्छेदं विधाय सन्धिनाम च लिखत

कृष्णेहि, गोऽग्रम्, वधूत्सवः, महाशयः, पुस्तकालयः, विद्यार्थीः, गिरीशः, उपोषति, विष्णोऽव, गवेन्द्रः ।

## ५. अधस्तनप्रयोगेषु प्रवर्तमानसूत्राणि निर्दिश्य सन्धिं कुरुत

प्रधान + अध्यापकः, गुण + आदेशः, तथा + अपि, क्षुधा + आतुरः, गिरि + ईशः, सु + उक्तिः, कुल + अटा, धन + अर्थी, मही + ईशः, उप + एषयति, पतत् + अञ्जलिः, लघु + ऊर्मिः, अव + आ + इहि ।

## ६. ससूत्रं सन्धिप्रक्रियां दर्शयत

प्रेजते, मनीषा, विष्णूदयः, गवेन्द्रः, हरेऽव, दैत्यारिः ।

## ७. अधो निर्दिष्टसूत्राणामर्थं लिखत

(क) अचोऽन्त्यादि टि (ख) अन्तादिवच्च

(ग) अनेकाल् शित्सर्वस्य (घ) इन्द्रे च

### अच्सन्धिप्रकरणे

# प्रकृतिभावसन्धिः

**दूराद्धूते च ८ । २ । ८४ ॥**

**दूरात्सम्बोधने वाक्यस्य टेः, प्लुतो वा ॥**

दूरात् सम्बोधने अर्थे प्रयुक्तं यद् वाक्यं तस्य टि-भागस्य विभाषया प्लुतः आदेशो भवति ।

**प्लुतप्रगृह्या अचि नित्यम् ६ । १ । १२५ ॥**

**एतेऽचि प्रकृत्या स्युः । आगच्छ कृष्ण३ अत्र गौश्चरति ॥**

प्लुतसंज्ञकाः, प्रगृह्यसंज्ञकाश्च ये शब्दाः सन्ति तेषाम् अच्-वर्णे परे नित्यं प्रकृतिभावो भवति ।

**'आगच्छ कृष्ण३ अत्र गौश्चरति'** इत्यत्र **'अकः सवर्णे दीर्घः'** इति सूत्रेण पूर्वपरयोः स्थाने सवर्णे दीर्घे प्राप्ते तं प्रबाध्य कृष्णशब्दस्य अन्त्यस्य अकारस्य टेः स्थाने **'दूराद्धूते च'** इति सूत्रेण प्लुतादेशे **'आग्च्छ कृष्ण३ अत्र गौश्चरति'** इति जाते **'प्लुतप्रगृह्या अचि नित्यम्'** इति सूत्रेण प्रकृतिभावे **'आगच्छ कृष्ण३ अत्र गौश्चरति'** इति रूपं सिद्धचम् ।

**ह्रस्वं लघु १ । ४ । १० ॥**

ह्रस्वस्य लघुसंज्ञा भवति ।

**संयोगे गुरु १ । ४ । ११ ॥**

**संयोगे परे ह्रस्वं गुरुसंज्ञं स्यात् ।**

संयोगे परे सति ह्रस्वसंज्ञकस्य वर्णस्य गुरुसंज्ञा भवति ।

**दीर्घं च १ । ४ । १२ ॥**

**गुरु स्यात् ।**

दीर्घसंज्ञकस्य वर्णस्यापि गुरुसंज्ञा भवति ।

**गुरोरनृतोऽनन्त्यस्याप्येकैकस्य प्राचाम् ८ । २ । ८६ ॥**

**प्लुतो वा । दे३वदत्त, देवद३त्त, देवदत्त३ । गुरोः किम् ? वकारादकारस्य माभूत् । अनृतः किम् ? कृष्ण३ । एकैकग्रहणं पर्यायार्थम् ।**

दूरात् सम्बोधने यद्वाक्यं तत्र सम्बोध्यमानवाचकं यत्पदं तदवयवस्य ऋकारभिन्नस्याऽनन्त्यस्य गुरोः स्थाने विकल्पेन प्लुतादेशो भवति, अन्त्यस्य तु गुरोरगुरोश्चापि प्लुतो भवतीत्यर्थः ।

दे३वदत्त, इत्यत्र 'दीर्घं च' इति सूत्रेण दकारोत्तरवर्तिन एकारस्य गुरुसंज्ञायामनेन सूत्रेण प्लुतो भवति । देवद३त्त, इत्यत्र दकारोत्तरवर्तिनोऽकारस्य 'संयोगे गुरु' इति गुरुसंज्ञायामनेन प्लुतो भवति । एकैकग्रहणसामर्थ्याद् युगपत् सर्वेषां प्लुतो न भवति किन्तु पर्यायेणेति बोध्यम् ।

**ईदूदेद्द्विवचनं प्रगृह्यम् १ । १ । ११ ॥**

**ईदूदेदन्तं द्विवचनं प्रगृह्यं स्यात् । हरी एतौ । विष्णू इमौ । गङ्गे अमू ॥**

ईकारान्तम्, ऊकारान्तम्, एकारान्तं च द्विवचनं प्रगृह्यसंज्ञकं भवति ।

**'हरी एतौ'** इत्यत्र ईकारान्तं द्विवचनं व्यवदेशिवद्भावेन ईकारः, तस्य च अनेन सूत्रेण प्रगृह्यसंज्ञायां **'इको यणचि'** इति यणादेशे प्राप्ते **'प्लुतप्रगृह्या अचि नित्यम्'** इत्यनेन प्रकृतिभावे **'हरी एतौ'** इत्येव सन्धिरहितं सिद्धम् । एवंरीत्या **'विष्णू इमौ'**, **'गङ्गे अमू'** इत्यत्रापि अनेनैव ऊकार-एकारयोः प्रगृह्यसंज्ञायां सन्धेरभावो बोध्यः ।

**अदसो मात् १ । १ । १२ ॥**

**अस्मात्परावीदूतौ प्रगृह्यौ स्तः । अमी ईशाः । रामकृष्णावमू आसाते । मात्किम् ? अमुकेऽत्र ॥**

अदस्-शब्दस्य मकारात् परौ ईकार-ऊकारौ प्रगृह्यसंज्ञकौ स्तः ।

**'अमी ईशाः'** इत्यत्र अदस्शब्दस्य मकारात् परः ईकारः **'अमी'** इत्यस्य ईकारः, तस्य अनेन प्रागृह्यसंज्ञायां प्रकृतिभावे सति प्राप्तः सवर्णदीर्घादेशो न भवति । एवम् **'रामकृष्णौ अमू आसाते'** इत्यत्र **'एचोऽयवायावः'** इत्यनेन औकारस्य आवादेशे **'रामकृष्णावमू आसाते'** इत्यवस्थायाम् अनेन ऊकारस्य प्रगृह्यसंज्ञायां यणादेशाभावो ज्ञेयः ।

**'अदसो मात्'** इति सूत्रे **'मात्'** इत्यस्य ग्रहणं न कृत्वा **'ईदुदेद्विवचनं प्रगृह्यम्'** इति सूत्राद् ईदुदेदित्यस्य अनुवृत्तौ हि **'अमुके अत्र'** इत्यत्रापि प्रगृह्यसंज्ञा स्यात् । सा माभूत् एतदर्थं मादग्रहणं कृतम् । कृते हि मादग्रहणे मकारात्परस्य एकारस्य कुत्रापि असत्वात् न दोषः । ईदूतौ इत्यस्य एव तु नानुवृत्तिः **'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः'** इति परिभाषया ।

**चादयोऽसत्त्वे १ । ४ । ५७ ॥**

**अद्रव्यार्थाश्चादयो निपाताः स्युः ॥**

सत्त्वं द्रव्यम्, न सत्त्वम् इति असत्त्वम्, तस्मिन् असत्त्वे । अद्रव्यवाचिनः चादयो निपातसंज्ञकाः भवन्ति । चादयः = चादिगण-पठिताः शब्दाः ।

**प्रादयः १।४।५८॥**

**एतेऽपि तथा ।**

द्रव्यार्थकभिन्नाः प्रादयः अपि निपातसंज्ञकाः भवन्ति ।

**निपात एकाजनाङ् १ । १ । १४ ॥**

**एकोऽज् निपात आङ्वर्जः प्रगृह्यः स्यात् । इ इन्द्रः । उ उमेशः । वाक्यस्मरणयोरङित्** (वा.९) **। आ एवं नु मन्यसे । आ एवं किल तत् । अन्यत्र ङित्, आ ईषदुष्णम् ओष्णम् ॥**

'**आङ्**' इत्यमुं विहाय एकः अच् रूपो यो निपातः, स प्रगृह्यसंज्ञको भवति ।

'**इ इन्द्रः**' इत्यत्र एकोऽच् निपातः '**इ**' इति, तस्य अनेन प्रगृह्यसंज्ञायां प्रकृतिभावे '**इ इन्द्रः**' इति रूपं सिद्धम् । अत्र हि प्राप्तः सवर्णदीर्घो न भवति । एवम् '**उ उमेशः**' इत्यत्रापि ।

**इषदर्थे क्रियायोगे मर्यादाभिविधौ च यः ।**

**एतमातं ङितं विद्याद्वाक्यस्मरणयोरङित् ॥**

वाक्यस्मरणयोः अर्थयोः प्रयुक्तः आकारः अङिद् ज्ञेयः । इषदर्थे, क्रियायोगे, मर्यादार्थे, अभिविध्यर्थे च वर्तमानः आकारः **ङित् (आङ्)** ज्ञेयः । ङितः आकारस्य '**निपात एकाजनाङ्**' इत्यनेन प्रगृह्यसंज्ञा न भवति, अङितस्तु भवत्येव इति वार्तिकस्य आशयः ।

**ओत् १ । १ । १५ ॥**

**ओदन्तो निपातः प्रगृह्यः स्यात् । अहो ईशाः ॥**

ओकारान्तः निपातः प्रगृह्यसंज्ञको भवति ।

'**अहो ईशाः**' इत्यत्र अनेन '**अहो**' इति ओदन्त-निपातस्य प्रगृह्यसंज्ञायाम् अवादेशाभावः ।

**सम्बुद्धौ शाकल्यस्येतावनार्षे १ । १ । १६ ॥**

**सम्बुद्धिनिमित्तक ओकारो वा प्रगृह्योऽवैदिके इतौ परे । विष्णो इति, विष्ण इति, विष्णविति ॥**

सम्बुद्धौ परतः विहितः ओकारः विभाषया प्रगृह्यसंज्ञको भवति, लौकिके इतिशब्दे परे ।

विष्णुशब्दात् सम्बोधनस्य एकवचने सु-प्रत्यये, उकारस्य सम्बुद्धौ परतः '**ह्रस्वस्य गुणः**' इति सूत्रेण गुणे, सलोपे '**विष्णो**' इति जाते तस्माद् लौकिके इतिशब्दे परे अनेन विभाषया प्रगृह्यसंज्ञायाम्, प्रकृतिभावे च कृते '**विष्णो इति**', प्रगृह्यसंज्ञायाः अभावपक्षे ओकारस्य अवादेशे, वकारस्य '**लोपः शाकल्यस्य**' इति विकल्पेन लोपे, तस्य असिद्धत्वाद् गुणाभावे '**विष्ण इति**', वलोपाभावे च वर्णयोगे '**विष्णविति**' इति त्रीणि रूपाणि ज्ञेयानि ।

**मय उञो वो वा ८ । ३ । ३३ ॥**

**मयः परस्य उञो वो वाऽचि । किम्वुक्तम्, किमु उक्तम् ॥**

मयः परस्य 'उञ्' इत्यस्य स्थाने विभाषया वकारः आदेशो भवति, अचि परे । 'उञ्' इति उकाररूपो निपातः ।

'किम् उ उक्तम्' इत्यवस्थायां मकाराद् उत्तरस्य उकारस्य 'मय उञो वो वा' इति सूत्रेण विभाषया वकारादेशे किम्वुक्तम्, वकारादेशाऽभावे उकारस्य निपातसंज्ञायां 'निपात एकाजनाङ्' इत्यनेन प्रगृह्यसंज्ञायाम्, प्रकृतिभावे 'किमु उक्तम्' इति च रूपे सिद्ध्यतः ।

**इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च ६ । १ । १२७ ॥**

**पदान्ता इको ह्रस्वा वा स्युरसवर्णेऽचि । ह्रस्वविधिसामर्थ्यान्न स्वरसन्धिः । चक्रि अत्र, चक्र्यत्र । पदान्ता इति किम् ? गौर्यौ–**

असवर्णे अचि परे पदान्तस्य इक्-वर्णस्य स्थाने विभाषया ह्रस्वादेशो भवति ।

'चक्री अत्र' इति स्थिते 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति सूत्रेण विभाषया ईकारस्य ह्रस्वादेशे 'चक्रि अत्र' इति रूपं सिद्धम् । अत्र ह्रस्वादेशविधानसामर्थ्याद् 'इको यणचि' इति सूत्रेण यण् न, यणि सति ह्रस्वादेशस्य वैयर्थ्यापत्तेः । ह्रस्वाभावपक्षे 'इको यणचि' इति यणि 'चक्र्यत्र' इति रूपं सिद्धम् । पदान्तस्य इको ह्रस्वविधानाद् 'गौरी औ' इत्यत्र ईकारस्य ह्रस्वादेशो न भवति किन्तु 'इको यणचि' इति यणेव, ईकारस्य यकारे 'गौर् य् औ' इत्यवस्थायाम्-

**न समासे** (वा.) **वाप्यश्वः ॥**

समासे असवर्णे अचि परे पदान्तस्य इकः स्थाने ह्रस्वादेशो न भवति ।

'वाप्याम् अश्वः' इति विग्रहे, समासे विभक्तिलोपे 'वापी अश्वः' इत्यवस्थायाम् 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति ईकारस्य ह्रस्वसमुचितप्रकृतिभावो न, किन्तु 'इको यणचि' इति यणेव - वाप्यश्वः ।

**ऋत्यकः ६ । १ । १२८ ॥**

**ऋति परे पदान्ता अकः प्राग्वद्वा । ब्रह्म ऋषिः, ब्रह्मर्षिः । पदान्ताः किम् ? आर्च्छत् ॥**

ह्रस्वे ऋकारे परे पदान्तस्य अकः स्थाने विभाषया ह्रस्वसमुचितः प्रकृतिभावो भवति ।

## प्रयोगसिद्धिप्रकारः

ब्रह्म ऋषिः/ब्रह्मर्षिः

'ब्रह्मा ऋषिः' इति स्थिते 'आद् गुणः' इति सूत्रेण गुणे प्राप्ते तं प्रबाध्य 'ऋत्यकः' इति सूत्रेण विभाषया ह्रस्वसमुचिते प्रकृतिभावे 'ब्रह्म ऋषिः' इति, ह्रस्वसमुचितप्रकृतिभावाभावपक्षे 'उरण् रपरः' इति सूत्रसहकारेण 'आद् गुणः' इति सूत्रेण पूर्वपरयोः 'अर्'गुणे वर्णसम्मेलने 'ब्रह्मर्षिः' इति च रूपे सिद्ध्यतः ।

## अभ्यासः

### १. कोष्ठकस्थैः पदैः रिक्तस्थानानि पूरयत

| |
|---|
| प्रादयः, दूराद्धूते च, मय उञो वो वा, वाक्यस्मरणयोः, ऋत्यकः |

(क) प्लुतादेशविधायकं सूत्रं ...................... वर्तते ।

(ख) प्रादीनां निपातसंज्ञाविधायकं सूत्रं ..................... इत्यस्ति ।

(ग) ...................... अङित् ।

(घ) ............................ इति सूत्रम् उञः वकारादेशं करोति ।

(ङ) 'ब्रह्म ऋषिः' ........................ इति सूत्रस्य उदाहरणं वर्तते ।

### २. अधो निर्दिष्टप्रश्नानामुत्तराणि लिखत

(क) 'प्लुतप्रगृह्या अचि नित्यमि'ति सूत्रं किं करोति ?

(ख) 'ईदूदेद्द्विवचनं प्रगृह्यम्' इत्यस्यार्थं सोदाहरणं लिखत ।

(ग) 'एकोऽच् निपातः' इत्यस्य क आशयः ?

(घ) 'अदसो मात्' इति सूत्रे 'मात्' ग्रहणं किमर्थम् ?

(ङ) 'इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च' इति सूत्रं किं करोति ?

(च) 'गुरोरनृतो...' इति सूत्रं पूरयत ।

(छ) केषां निपातसंज्ञा विधीयते ?

(ज) लघुसंज्ञा केन कस्य भवति ?

(झ) गुरुसंज्ञाविधायके सूत्रे के ?

(ञ) कयोरर्थयोराङङिद् भवति ?

### ३. अधो लिखितान् प्रयोगान् ससूत्रं साधयत

विष्णू इमौ, रामकृष्णौ अमू आसाते, उ उमेशः, अहो ईशाः, किम्वुक्तम्

४. **रेखाङ्कनेन उपयुक्तं पदं योजयत**

| | |
|---|---|
| दूराद्धूते च | अमुकेऽत्र |
| वाक्यस्मरणयोरङित् | प्रकृतिभावः |
| प्लुतप्रगृह्या अचि नित्यम् | प्लुतादेशः |
| मात् किम् ? | वाप्यश्वः |
| न समासे | आ एवं नु मन्यसे |

**संयुक्ताभ्यासः**

५. **प्रमुखसूत्र–सन्धिनाम–निदर्शनपूर्वकं सन्धिं कुरुत**

| | | | | | |
|---|---|---|---|---|---|
| **यथा –** | अनु + अयः | = | अन्वयः | यण्सन्धिः | इको यणचि |
| | दातृ + एव | = | ............. | ............. | ............. |
| | भो + अनम् | = | ............. | ............. | ............. |
| | उमा + इव | = | ............. | ............. | ............. |
| | वने + अपि | = | ............. | ............. | ............. |
| | तस्य + एव | = | ............. | ............. | ............. |
| | लघु + उपधस्य | = | ............. | ............. | ............. |
| | राज + ऋषिः | = | ............. | ............. | ............. |
| | लते + अमू | = | ............. | ............. | ............. |
| | प्र + एषयति | = | ............. | ............. | ............. |

## हल्सन्धिप्रकरणे

# श्चुत्वष्टुत्वादिसन्धिः

**स्तोः श्चुना श्चुः ८ । ४ । ४० ॥**

**सकारतवर्गयोः शकारचवर्गाभ्यां योगे शकारचवर्गौ स्तः । रामश्शेते । रामश्चिनोति । सच्चित् । शाङ्र्गिञ्जयः ॥**

योगो नाम अव्यवहितः पूर्वः परो वा । सकारतवर्गयोः स्थाने क्रमेण शकारतवर्गौ भवतः, शकारेण चवर्गेण वा योगे सति ।

**'रामस् शेते'** इत्यत्र **'रामस्'** इत्यस्य दन्त्यसकारस्य स्थाने **'शेते'** इति शब्दावयवेन शकारेण योगे शकार आदेशो भवति । एवंरीत्या अन्यान्यपि रूपाणि ज्ञेयानि ।

पदच्छेदोऽर्थश्च- **'रामस् शेते'** = रामः स्वपिति । **'रामस् श्चिनोति'** = रामः चयनकार्य करोति । **'सत् चित्'** = सत् स्वरूपं चित्स्वरूपञ्च । **'शाङ्र्गिन् जयः'** = हे विष्णो ! तव जयः अस्तु ।

**शात् ८ । ४ । ४४ ॥**

**शात्परस्य तवर्गस्य चुत्वं न स्यात् । विश्नः । प्रश्नः ॥**

शकारादुत्तरस्य तवर्गस्य स्थाने चवर्गादेशो न भवति ।

**'विश् नः'** इत्यत्र विश्शब्दावयवात् शकाराद् उत्तरस्य **'नः'** इत्यस्य नकारस्य स्थाने **'स्तोः श्चुना श्चुः'** इत्यनेन प्राप्तस्य चवर्गादेशस्य अनेन निषेधो भवति । **'विश् नः'** = प्रवेशनमित्यर्थः । **'प्रश् नः'** = पृच्छा इत्यर्थः ।

**ष्टुना ष्टुः ८ । ४ । ४१ ॥**

**स्तोः ष्टुना योगे ष्टुः स्यात् । रामष्षष्ठः । रामष्टीकते । पेष्टा । तट्टीका । चक्रिण्ढौकसे ॥**

सकार-तवर्गयोः स्थाने क्रमेण षकार-टवर्गौ भवतः, षकारेण टवर्गेण वा योगे सति ।

**'रामस् षष्ठः'** इत्यत्र **'रामस्'** इत्यस्य दन्त्यसकारस्य **'षष्ठः'** इति शब्दावयवेन षकारेण योगे षकारः आदेशो भवति । एवंरीत्या अन्यानि उदाहरणानि ज्ञेयानि ।

**'रामस् टीकते'** - रामष् टीकते - रामष्टीकते । **'पेष् ता'** - पेष् टा - पेष्टा । **'तत् टीका'** - तट् टीका - तट्टीका । **'चक्रिन् ढौकसे'** - चक्रिण् ढौकसे - चक्रिण्ढौकसे ।

**न पदान्ताट्टोरनाम् ८ । ४ । ४२ ॥**

**पदान्ताट्टवर्गात्परस्यानामः स्तोः ष्टुर्न स्यात् । षट् सन्तः । षट् ते । पदान्तात्किम् ? ईट्टे । टोः किम् ? सर्पिष्टमम् ।**

पदान्तात् टवर्गात् परयोः नाम्-शब्दभिन्नयोः सकारतवर्गयोः स्थाने षकारटवर्गादेशौ न भवतः ।

**'षट् सन्तः'** इत्यत्र टकारात् परस्य सकारस्य स्थाने **'ष्टुना ष्टुः'** इति सूत्रेण षकारादेशे प्राप्ते अनेन सूत्रेण तस्य निषेधे **'षट् सन्तः'** इत्येव रूपम् । एवम् **'षट् ते'** इत्यत्रापि ।

पदान्तात् टवर्गादिति कथनेन **'इड् ते'** इत्यत्र **'खरि च'** इति सूत्रेण चर्त्वे **'इट् ते'** इति जाते **'ष्टुना ष्टुः'** इति सूत्रेण ष्टुत्वम् (तकारस्य टकारादेशः) भवत्येव, तिङन्तस्यैव पदत्वात् ।

सूत्रेऽस्मिन् **'टोः'** ग्रहणाभावे **'एकयोगनिर्दिष्टानां सह वा प्रवृत्तिः सह वा निवृत्तिः'** इत्यनया परिभाषया **'ष्टुना ष्टुः'** सूत्रात् **'ष्टुः'** इत्यस्यैव अनुवृत्तिः स्यात्, एवञ्च सति **'सर्पिष् तमम्'** इत्यत्र तकारस्यापि ष्टुत्वनिषेधः स्यात्, तन्मा भूत्, ष्टुत्वं स्यादेतदर्थं **'टोः'** ग्रहणं कृतम्, सति ग्रहणे अत्र टवर्गात् परत्वाभावाद् तमम् इत्यस्य तकारस्य ष्टुत्वं भवत्येव ।

अनाम्नवतिनगरीणामुपसंख्यानम् (वा.) । षण्णाम् । षण्णवतिः । षण्णगर्य्यः ॥

**'न पदान्ताट्टोरनाम्'** इत्यस्य स्थाने **'न पदान्ताट्टोरनामनवतिनगरीणाम्'** इति सूत्रं कर्तव्यम् इत्यर्थः । तेन नवतिनगरीशब्दयोरपि अनेन वार्तिकेन ष्टुत्वनिषेधस्य प्रतिषेधः ।

अतः पदान्त-टवर्गात् परयोः नाम्-नवति-नगरीशब्दभिन्नयोः सकार-तवर्गयोरेव ष्टुत्वं न भवति ।

**'षड् नाम्'** इत्यत्र डकारस्य योगे नकारस्य ष्टुत्वेन णकारे **'षड् णाम्'** इति जाते **'प्रत्यये भाषायां नित्यम्'** इति वार्तिकेन डकारस्य अनुनासिके णकारे 'षण्णाम्' इति । **'षड् नवतिः'** इत्यत्र तु नकारस्य **'न पदान्ताट्टोरनाम्'** इत्यनेन ष्टुत्वनिषेधे प्राप्ते अनेन तस्य प्रतिषेधे सति **'ष्टुना ष्टुः'** इति ष्टुत्वेन णकारे **'षड् णवतिः'** इति जाते **'यरोऽनुनासिकेऽनुनासिको वा'** इति सूत्रेण डकारस्य विकल्पेन अनुनासिके **'षण्णवतिः'**, अनुनासिकाभावे **'षड्णवतिः'** इति च सिद्ध्यतः । एवम् **'षड् नगर्य्यः'** इत्यस्य **'षण्णगर्य्यः'**, **'षड्णगर्य्यः'** इति ।

**तोः षि ८ । ४ । ४३ ॥**

**न ष्टुत्वम् । सन्षष्ठः ॥**

तवर्गस्य स्थाने षकारे परे टुत्वं न भवति ।

**'सन् षष्ठः'** इति स्थितौ नकारस्य स्थाने **'ष्टुना ष्टुः'** इति सूत्रेण प्राप्तस्य ष्टुत्वस्य अनेन सूत्रेण निषेधे **'सन् षष्ठः'** इत्येव रूपम् ।

**झलां जशोऽन्ते ८ । २ । ३९ ॥**

**पदान्ते झलां जशः स्युः । वागीशः ॥**

पदस्य अन्ते स्थितानां झल्-वर्णानां स्थाने 'जश्' इत्यादेशो भवति ।

**'वाक् ईशः'** इति स्थिते **'झलां जशोऽन्ते'** इति सूत्रेण ककारस्य जश्त्वे, आन्तरतम्याद् गकारे, वर्णयोगे **'वागीशः'** इति रूपं सिद्ध्यति ।

**यरोऽनुनासिकेऽनुनासिको वा ८ । ४ । ४५ ॥**

**यरः पदान्तस्यानुनासिके परेऽनुनासिको वा स्यात् । एतन्मुरारिः, एतद् मुरारिः ।**

पदान्तस्य यरः स्थाने अनुनासिके परे विभाषया अनुनासिकः आदेशो भवति ।

**'एतद् मुरारिः'** इति स्थिते अनेन सूत्रेण पदान्तस्य यरः दकारस्य स्थाने परे विभाषया अनुनासिकादेशे, तत्र स्थानतः आन्तर्याद् नकारादेशे **'एतन्मुरारिः'** इति, अनुनासिकाऽभावपक्षे **'एतद् मुरारिः'** इति च रूपे सिद्ध्यतः ।

**प्रत्यये भाषायां नित्यम्** (वा.)

**तन्मात्रम् । चिन्मयम् ॥**

अनुनासिकादौ प्रत्यये परे पदान्तस्य यरः स्थाने नित्यमनुनासिकः आदेशो भवति ।

**'तद् मात्रम्'** इति स्थिते दकारस्य स्थाने **'यरोऽनुनासिकेऽनुनासिको वा'** इति सूत्रेण प्राप्तं वैकल्पिकम् अनुनासिकं बाधित्वा अनेन वार्तिकेन अनुनासिक-मकारादि-मात्रच्प्रत्यये परे नित्यतया अनुनासिके नकारादेशे **'तन्मात्रम्'** इति रूपं सिद्ध्यति ।

**'चित् मयम्'** = चिद् मयम् (झलां जशोऽन्ते) - चिन् मयम् - चिन्मयम् ।

**तोर्लि ८ । ४ । ६० ॥**

**तवर्गस्य लकारे परे परसवर्णः । तल्लयः । विद्वाँल्लिखति । नस्यानुनासिको लः ॥**

तवर्गस्य स्थाने लकारे परे परसवर्णः (लकारस्य सवर्णिनोः लकारलँकारयोः मध्ये एकः अन्यतरः) आदेशो भवति ।

**'तद् लयः'** इति स्थिते अनेन सूत्रेण दकारस्य परसवर्णे लकारादेशे **'तल्लयः'** इति रूपम् । **'विद्वान् लिखति'** इत्यत्र च नकारस्य स्थाने परसवर्णे, स्थानतः आन्तर्याद् अनुनासिके लँकारे **'विद्वालँ लिखति'** इत्यत्र वर्णयोगे 'विद्वाँल्लिखति' इति रूपम् ।

## प्रयोगसिद्धिप्रकारः

**पेष्टा**

**'पेष् ता'** इति स्थिते षकारेण योगे **'ता'** इत्यस्य तकारस्य स्थाने **'ष्टुना ष्टुः'** इति सूत्रेण ष्टुत्वे यथासङ्ख्य-परिभाषया टकारादेशे **'पेष् टा'** इति जाते, वर्णमेलने **'पेष्टा'** इति सिद्ध्यति ।

## अभ्यासः

१. **समुचितं पदं चित्वा रिक्तस्थानं पूरयत**

जशः, शकारचवर्गौ, अनुनासिकः, षकारटवर्गौ, जशः, परसवर्णः

(क) सकारतवर्गयोः स्थाने श्चुत्वे सति .................... आदेशौ भवतः ।

(ख) सकारतवर्गयोः स्थाने ष्टुत्वे सति ...................... आदेशौ भवतः ।

(ग) झलां स्थाने ......................... स्युः पदान्ते ।

(घ) तवर्गस्य लकारे परे ......................................... ।

(ङ) पदान्तस्य यरः अनुनासिके परे सति ................... वा ।

२. **अधो निर्दिष्टशब्दानां सन्धिकार्यं प्रदर्श्य वाक्येषु प्रयोगं कुरुत**

| श्चुत्वसन्धिः | सन्धिगतरूपम् | वाक्यानि |
|---|---|---|
| (क) रामस् + च = | ...................... | ........................................ |
| (ख) सद् + जनः = | ...................... | ........................................ |
| (ग) कस् + चन = | ...................... | ........................................ |
| (घ) सत् + चरित्रम् = | ...................... | ........................................ |
| (ङ) उत् + चारणम् = | ...................... | ........................................ |

| ष्टुत्वसन्धिः | सन्धिगतरूपम् | वाक्यानि |
|---|---|---|
| (क) इष् + तः = | ...................... | ........................................ |
| (ख) विष् + नुः = | ...................... | ........................................ |
| (ग) उद् + डयनम् = | ...................... | ........................................ |
| (घ) कृष् + नः = | ...................... | ........................................ |

| जश्त्वसन्धिः | सन्धिगतरूपम् | वाक्यानि |
|---|---|---|
| (क) अच् + अन्तः = | ...................... | ........................................ |
| (ख) चित्+ आनन्दः = | ...................... | ........................................ |
| (ग) उत् + देश्यम् = | ...................... | ........................................ |
| (घ) दिक् + अम्बरः = | ...................... | ........................................ |
| (ङ) षट् + आनन्दः = | ...................... | ........................................ |

### ३. समीचीनासमीचीननिर्देशनं कुरुत

(क) पदान्तात् टोः परस्य नाम्-नवति-नगरीभिन्नस्य स्तोः ष्टुः भवति ।

(ख) शात्परस्य तवर्गस्य चुत्वं भवति ।

(ग) तवर्गस्य षकारे परे टुत्वं न भवति ।

(घ) लकारे परे तवर्गस्य लकारो भवति ।

(ङ) 'षड्+नवतिः' इति स्थिते 'नवतिः' इत्यस्य नकारस्य णकारो भवति ।

### ४. अधो निर्दिष्टशब्दानां सिद्धिप्रक्रियां ससूत्रं लिखत

सच्चित्, प्रश्नः, तट्टीका, षण्णाम्, चिन्मयम्, विद्वाँल्लिखति

### हल्सन्धिप्रकरणे

# पूर्वसवर्णादिसन्धिः

**उदः स्थास्तम्भोः पूर्वस्य ८ । ४ । ६१ ॥**

**उदः परयोः स्थास्तम्भोः पूर्वसवर्णः ॥**

उद्-शब्दात् परयोः स्थाधातोः, स्तम्भधातोश्च स्थाने पूर्वसवर्णः आदेशो भवति ।

**तस्मादित्युत्तरस्य १ । १ । ६७ ॥**

**पञ्चमीनिर्देशेन क्रियमाणं कार्यं वर्णान्तरेणाव्यवहितस्य परस्य ज्ञेयम् ।**

पञ्चम्यन्तं पदमुच्चार्य विधीयमानं कार्यं साक्षाद् उत्तरस्य अनन्तरस्य स्थाने बोध्यम् ।

**आदेः परस्य १ । १ । ५४ ॥**

**परस्य यद्विहितं तत्तस्यादेर्बोध्यम् । इति सस्य थः ॥**

पञ्चम्यन्तं पदमुच्चार्य परस्य स्थाने विहितं यत् कार्यं तत् तस्य आद्यवर्णस्य **स्थाने बोध्यम् ।**

**सूत्रत्रयस्य उदाहर**णानि यथा- ‘उदः स्थास्तम्भोः पूर्वस्य’ इति सूत्रे उदः इति पञ्चम्यन्तं पदं वर्तते, तदुच्चार्य स्थास्तम्भो**ः पूर्वसवर्णो विधीय**मा**नोऽस्ति, अतः अत्र** ‘तस्मादित्युत्तरस्य’, ‘आदेः परस्य’ इति सूत्रद्वयमेव उपस्थितं भवति । तथा च- उदः अव्यवहितस्य परस्य स्थास्तम्भोः आदेः वर्णस्य स्थाने (सकारस्**य स्थाने**) **पूर्व**सवर्णः इति सूत्रा**र्थः सिद्ध्यति ।**

**‘उद् स्थानम्’ इति स्थिते ‘तस्मादित्युत्तरस्य’,** ‘आदेः परस्य’, ‘स्थानेऽन्तरतमः’ इति सूत्रत्रयसहकारेण **‘उदः स्थास्तम्भोः पूर्वस्य’** इति सूत्रेण सकारस्य स्थाने पूर्वसवर्णे, दकारस्य सवर्णेषु गुणकृतेन आन्तर्येण विवारस्य, श्वासस्य, अघोषस्य, महाप्राणस्य सकारस्य स्थाने तादृशे एव थकारे कृते **‘उद् थ् थानम्’** इति जाते-

**झरो झरि सवर्णे ८ । ४ । ६५ ॥**

**हलः परस्य झरो वा लोपः सवर्णे झरि ॥**

हल: उत्तरस्य झर्-वर्णस्य विभाषया लोपो भवति, सवर्णे झरि परे अनेन थकारस्य लोपे 'उद् थानम्' इति जाते-

**खरि च ८ । ४ । ५५ ॥**

**खरि झलां चरः स्युः । इत्युदो दस्य तः । उत्थानम् । उत्तम्भनम् ।**

झलां स्थाने चरः आदेशाः भवन्ति खरि परे । अनेन दकारस्य चर्त्वे, आन्तरतम्यात् तकारे 'उत् थानम्' इति जाते, वर्णमेलने 'उत्थानम्' इति, थलोपाभावपक्षे 'उद् थ्थानम्' इत्यवस्थायाम् उभयोः थकारयोः चर्त्वे 'उत्त्थानम्' इति रूपद्वयं सिद्धम् । एवम् 'उद् स्तम्भनम्' इत्यस्यापि पूर्ववद् 'उत्तम्भनम्/उत्त्तम्भनम्' इति ।

**झयो होऽन्यतरस्याम् ८ । ४ । ६२ ॥**

**झयः परस्य हस्य वा पूर्वसवर्णः । नादस्य घोषस्य संवारस्य महाप्राणस्य तादृशो वर्गचतुर्थः । वाग्घरिः, वाग्हरिः ॥**

झयः परस्य हकारस्य **स्थाने विभाषया** पूर्वस्य सवर्णः आ**देशो भवति । संवार-नाद-घोष-महाप्राण-प्रयत्नवतो हकारस्य स्थाने तादृश एव वर्गचतुर्थे घकारे सति 'वाग्घरिः' इति, पूर्वसवर्णाभावे 'वाग्हरिः' इति च रूपे सिद्धचतः ।**

**'वाक् हरिः'** - वाग् हरि (झलं जशोऽन्ते) - वाग् घरिः - वाग्घरिः/वाग्हरिः ।

**शश्छोऽटि ८ । ४ । ६३ ॥**

**झयः परस्य शस्य छो वाऽटि । 'तद् शिव' इत्यत्र दस्य श्चुत्वेन जकारे कृते 'खरि च' इति जकारस्य चकारः । तच्छिवः, तच्शिवः ।**

**झयः** उत्तरस्य शकारस्य स्थाने विभाषया **छकारादेशो भवति, अटि परे ।**

**'तद् शिवः' - तज् शिवः (स्तोः श्चुना श्चुः) - 'तच् शिवः'** (खरि च) - तच् छिवः - तच्छिवः/तच्शिवः ।

छत्वममीति वाच्यम् (वा.) । तच्छ्लोकेन ॥

**'शश्छोऽटि'** इत्यस्य स्थाने **'शश्छोऽमि'** इति सूत्रं कर्तव्यम्, अर्थात् झय्-वर्णाद् उत्तरस्य शकारस्य स्थाने विभाषया छकारादेशो भवति, अम्-वर्णे परे इत्यर्थः ।

**'तद् श्लोकेन'** - तज् श्लोकेन - तच् श्लोकेन - तच् छ्लोकेन - तच्छ्लोकेन/तच्श्लोकेन इति ।

## प्रयोगसिद्धिप्रकारः

**वाग्घरिः/वाग्हरिः**

'**वाक् हरिः**' इति स्थिते '**स्थानेऽन्तरमः**' इति सूत्रसहकारेण '**झलां जशोऽन्ते**' इति सूत्रेण ककारस्य जश्त्वेन गकारे '**वाग् हरिः**' इति जाते '**झयो होऽन्यतरस्याम्**' इति सूत्रेण विकल्पेन पूर्वसवर्णे, गुणकृतेन आन्तरतम्यात् संवारस्य नादस्य घोषस्य महाप्राणस्य हकारस्य स्थाने तादृशे एव वर्गचतुर्थे घकारादेशे '**वाग् घरिः**' इति जाते वर्णसंयोगे '**वाग्घरिः**' इति रूपं सिद्धम् । पूर्वसवर्णाभावपक्षे '**वाग्हरिः**' इत्यपि रूपं सिद्ध्यति ।

## अभ्यासः

१. **रिक्तस्थानं पूरयत**

(क) झर्-प्रत्याहारे ............................. वर्णाः समायान्ति ।

(ख) ................................... इति सवर्णसंज्ञाविधायकं सूत्रं वर्तते ।

(ग) खरि परे झलां ............................... भवन्ति ।

(घ) हकारस्य बाह्यप्रयत्नाः ......................... वर्तन्ते ।

(ङ) अम्-प्रत्याहारे ............................ वर्णाः समागच्छन्ति ।

(च) दकारस्य श्चुत्वे कृते ...................... भवति ।

२. **सन्धिं कुरुत**

अच् + हलौ, स्याट् + ह्रस्वः, विद्युत् + शक्तिः, दूरात् + हूते, तद् + शक्यम्, अप् + हारकः, वणिक् + हसति

३. **उत्तरं लिखत**

(क) 'वाग्घरिः' इत्यत्र केन सूत्रेण पूर्वसवर्णः ?

(ख) 'तस्मादित्युत्तरस्य' इति सूत्रं किं करोति ?

(ग) 'आदेः परस्य' इति सूत्रस्य कोऽर्थः ?

(घ) 'अन्यतरस्याम्' शब्दस्यार्थः कः ?

(ङ) छत्वविधायकं सूत्रं किम् ?

### ४. परस्परं मेलयत

| | |
|---|---|
| छत्वममीति वाच्यम् | तकारो भवति |
| सकारस्य बाह्यप्रयत्नाः | झयो होऽन्यतरस्याम् |
| हकारस्य बाह्यप्रयत्नाः | वर्गद्वितीयेन तुल्याः |
| दस्य चर्त्वे कृते | तच्छ्लोकेन |
| वाग्घरिः | संवारः, नादः, घोषः, महाप्राणः |

### ५. अर्थं विलिख्य प्रतिपदम् एकं वाक्यं रचयत

उत्थानम्, उत्तम्भनम्, वाग्हरिः, तच्छिवः

### ६. अधो निर्दिष्टप्रयोगाणां पदविच्छेदं कुरुत

तच्छीलः, उत्साहः, दिक्पालः, एतद्धेतोः, तद्धितः

### ७. अधो लिखितानां प्रयोगाणां ससूत्रं सिद्धिप्रक्रियां प्रदर्श्य सिद्धप्रयोगान् वाक्येषु योजयत

(क) उत्तम्भनम् (ख) वाग्घरिः (ग) तच्छिवः

### हल्सन्धिप्रकरणे

# अनुस्वारपरसवर्णादिसन्धिः

**मोऽनुस्वारः ८ । ३ । २३ ॥**

**मान्तस्य पदस्यानुस्वारो हलि । हरिं वन्दे ॥**

व्यञ्जनवर्णे परे पदान्ते स्थितस्य मकारस्य स्थाने अनुस्वारादेशो भवति ।

**'हरिम् वन्दे'** इति स्थिते वकारे परे पदान्तस्य मकारस्य अनुस्वारे **'हरिं वन्दे'** इति रूपं सिद्धम् ।

**नश्चापदान्तस्य झलि ८ । ३ । २४ ॥**

**नस्य मस्य चापदान्तस्य झल्यनुस्वारः । यशांसि । आक्रंस्यते । झलि किम् ? मन्यते ॥**

झलि परे अपदान्तस्य नकारस्य मकारस्य च स्थाने अनुस्वारो भवति ।

यशस्शब्दस्य प्रथमायाः बहुवचने **'यशान् सि'** इति स्थिते अनेन सूत्रेण नकारस्य अनुस्वारे **'यशांसि'** इति रूपं सिद्धम् । एवम् **'आक्रम् स्यते'** - आक्रंस्यते ।

**अनुस्वारस्य ययि परसवर्णः ८ । ४ । ५८ ॥**

**स्पष्टम् । शान्तः ॥**

ययि प्रत्याहारे परे अनुस्वारस्य स्थाने परसवर्णः आदेशो भवति ।

**'शाम् तः'** इति स्थिते मकारस्य स्थाने **'नश्चापदान्तस्य झलि'** इति सूत्रेण अनुस्वारादेशे **'शां तः'** इति जाते **'अनुस्वारस्य ययि परसवर्णः'** इति सूत्रेण अनुस्वारस्य स्थाने परस्य तकारस्य सवर्णे नकारादेशे **'शान्तः'** इति रूपं सिद्ध्यति । अत्र अनुस्वारस्य स्थाने नासिकास्थानसाम्याद् वर्गपञ्चमो आदिश्यते ।

**वा पदान्तस्य ८ । ४ । ५९ ॥**

**त्वङ्करोषि, त्वं करोषि ॥**

पदान्तस्य अनुस्वारस्य स्थाने विभाषया परसवर्णः आदेशो भवति ।

**'त्वम् करोषि'** इति स्थिते मकारस्य स्थाने **'मोऽनुस्वारः'** इति सूत्रेण अनुस्वारादेशे, तस्य अनेन सूत्रेण विभाषया परसवर्णे ङकारादेशे **'त्वङ्करोषि'** इति, परसवर्णाभावे **'त्वं करोषि'** इति च रूपे सिद्ध्यतः ।

**मो राजि समः क्वौ ८ । ३ । २५ ॥**

**क्विबन्ते राजतौ परे समो मस्य म एव स्यात् । सम्राट् ॥**

क्विप्प्रत्ययान्ते राज्धातौ परे 'सम्'शब्दस्य मकारस्य स्थाने मकारः एव आदेशो भवति ।

**'सम् राट्'** इति स्थिते मकारस्य स्थाने **'मोऽनुस्वारः'** इति सूत्रेण अनुस्वारे प्राप्ते तं बाधित्वा अनेन सूत्रेण मकारस्य मकारादेशे **'सम्राट्'** इति रूपं सिद्ध्यति ।

**हे मपरे वा ८ । ३ । २६ ॥**

**मपरे हकारे परे मस्य मो वा । किम् ह्मलयति, किं ह्मलयति ।**

मकारपरके हकारे परे सति मकारस्य स्थाने विभाषया मकारः एव आदेशो भवति, न तु अनुस्वारः ।

**'किम् ह्मलयति'** इति स्थिते **'मोऽनुस्वारः'** इति सूत्रेण मस्य अनुस्वारे प्राप्ते अनेन सूत्रेण विभाषया अनुस्वारस्य निषेधे, मकार एवादेशे **'किम् ह्मलयति'** इति, मकारादेशाभावे अनुस्वारे **'किं ह्मलयति'** इति च रूपे सिद्ध्यतः ।

यवलपरे यवला वेति वक्तव्यम् (वा.) **'कियँ ह्यः, किं ह्यः'** । किवँ ह्वलयति, किं ह्वलयति । किलँ ह्लादयति, किं ह्लादयति ॥

यकार-वकार-लकारपरके हकारे परे सति मकारस्य स्थाने विभाषया क्रमेण यकार-वकार-लकारा एव आदेशाः भवन्ति न तु अनुस्वारः ।

**'किम् ह्यः'** इति स्थिते **'मोऽनुस्वारः'** इति सूत्रेण मस्य अनुस्वारे प्राप्ते अनेन वार्तिकेन विभाषया अनुस्वारस्य निषेधे, मकारस्य स्थानतः आन्तर्याद् यँकारादेशे **'कियँ ह्यः'** इति, मकारादेशाभावे अनुस्वारे **'किं ह्यः'** इति च रूपे सिद्ध्यतः ।

एवंरीत्या - **'किम् ह्वलयति'** = किवँ ह्वलयति/किं ह्वलयति । **'किम् ह्लादयति'** = किलँ ह्लादयति/किं ह्लादयति ।

**नपरे नः ८ । ३ । २७ ॥**

**नपरे हकारे मस्य नो वा । किन् ह्नुते, किं ह्नुते ॥**

नकारपरके हकारे परे सति मकारस्य स्थाने विभाषया नकारः एव भवति न तु अनुस्वारः ।

**'किम् ह्नुते'** इति स्थिते **'मोऽनुस्वारः'** इति सूत्रेण मस्य अनुस्वारे प्राप्ते अनेन सूत्रेण विभाषया अनुस्वारस्य निषेधे, नकारादेशे एव **'किन् ह्नुते'** इति, नकारादेशाभावे अनुस्वारे **'किं ह्नुते'** इति च रूपे सिद्ध्यतः ।

**डः सि धुट् ८ । ३ । २९ ॥**

**डात्परस्य सस्य धुड्वा ।**

'**उभयनिर्देशे पञ्चमी निर्देशो बलीयान् परत्वात्**' इत्यनया परिभाषया '**डकारात् परस्य सकारस्य विभाषया धुट् आगमो भवति**' इति सूत्रार्थः । अनुबन्धलोपे 'ध्' इति अवशिष्यते ।

**आद्यन्तौ टकितौ १।१।४६ ॥**

**टित्कितौ यस्योक्तौ तस्य क्रमादाद्यन्तावयवौ स्तः । षट्त्सन्तः, षट् सन्तः ।**

टित् कित् च आगमौ यस्य विधीयेते, तस्य तौ क्रमेण आदेः अन्तस्य च अवयवौ भवतः । अतः टिदागमः आद्यावयवो भवति, किदागमश्च अन्तावयवः ।

'**षड् सन्तः**' इति स्थिते अनेन सूत्रेण डकारात्परस्य सकारस्य धुट्-आगमे अनुबन्धलोपे, टित्वाद् आद्यवयवत्वे '**षड् ध् सन्तः**' इति जाते धकारस्य '**खरि च**' इति सूत्रेण चर्त्वे '**षड् त् सन्तः**' इति जाते डकारस्यापि '**खरि च**' इति चर्त्वेन टकारे '**षट्त्सन्तः**' इति, धुडागमाभावे '**षड् सन्तः**' इत्यवस्थायां डकारस्य चर्त्वेन टकारादेशे '**षट् सन्तः**' इति च ।

**ङ्णोः कुक्टुक् शरि ८।३।२८ ॥**

**वा स्तः ।**

ङकार-णकारयोः क्रमेण कुक्टुकौ आगमौ विभाषया भवतः, शरि परे । कुक्, टुक् इत्यनयोः अनुबन्धलोपानन्तरं क्रमेण ककार-टकारौ अवशिष्येते ।

**चयो द्वितीयाः शरि पौष्करसादेरिति वाच्यम् (वा.) प्राङ्ख् षष्ठः, प्राङ्क्षष्ठः, प्राङ् षष्ठः । सुगण्ठ् षष्ठः, सुगण्ट् षष्ठः, सुगण् षष्ठः ।**

शर्-प्रत्याहारे परे सति वर्गीयप्रथमवर्णानां स्थाने वर्गीयद्वितीयवर्णाः आदेशाः विकल्पेन भवन्ति ।

'**प्राङ् षष्ठः**' इति स्थिते '**आद्यन्तौ टकितौ**' इति सूत्रसहकारेण '**ङ्णोः कुक्टुक् शरि**' इति सूत्रेण ङकारस्य कुगागमेऽनुबन्धलोपे, कित्वाद् अन्तावयवत्वे '**प्राङ् क् षष्ठः**' इति स्थिते '**चयो द्वितीया शरि पौष्करसादेरिति वाच्यम्**' इति वार्तिकेन ककारस्य द्वितीयादेशे '**प्राङ्ख् षष्ठः**' इति रूपम्, द्वितीयाभावे '**प्राङ्क् षष्ठः**' इत्यवस्थायां कषसंयोगे क्षकारे '**प्राङ्क्षष्ठः**' इति, कुगागमाभावपक्षे '**प्राङ्षष्ठः**' इति रूपत्रयं सिद्धम् । '**सुगण् षष्ठः**' इत्यत्र तु णकारस्य टुगागमेऽनुबन्धलोपे, कित्वादन्तावयवत्वे, टकारस्य द्वितीयादेशे ठकारे '**सुगण्ठ् षष्ठः**' इति, पक्षे पूर्ववत् '**सुगण्ट् षष्ठः**', '**सुगण् षष्ठः**' इति च ।

**नश्च ८।३।३० ॥**

**नान्तात्परस्य सस्य धुड्वा । सन्त्सः, सन्सः ॥**

नकारान्तात् पदाद् उत्तरस्य सकारस्य विकल्पेन 'धुट्' इति आगमो भवति ।

'**सन् सः**' इति स्थिते अनेन सूत्रेण नकारान्तात्परस्य सकारस्य विभाषया धुट्-आगमे अनुबन्धलोपे '**सन् ध् सः**'

इति जाते धकारस्य **'खरि च'** इति सूत्रेण चर्त्वे **'सन्त्सः'** इति, धुडागमाभावे **'सन्सः'** इति च रूपे सिद्ध्यतः ।

**शि तुक् ८ । ३ । ३१ ॥**

**पदान्तस्य नस्य शे परे तुग्वा । सञ्छम्भुः, सञ्च्छम्भुः, सञ्चशम्भुः, सञ्शम्भुः ॥**

शकारे परे सति पदान्तस्य नकारस्य विकल्पेन **'तुक्'** आगमो भवति ।

**'सन् शम्भुः'** इति स्थिते अनेन सूत्रेण नकारस्य तुगागमे अनुबन्धलोपे **'सन् त् शम्भुः'** इति जाते **'शश्छोऽटि'** इति सूत्रेण शकारस्य छकारे **'सन् त् छम्भुः'** इति जाते, तकारस्य **'स्तोः श्चुना श्चुः'** इति सूत्रेण श्चुत्वेन चकारे, चकारेण योगे नकारस्य पुनः श्चुत्वेन ञकारे कृते **'सञ्च् छम्भुः'** इति जाते **'झरो झरि सवर्णे'** इति सूत्रेण चकारस्य विभाषया लोपे **'शञ्छम्भुः'** इति, **'झरो झरि ...'** इति लोपाऽभावे **'सञ्च्छम्भुः'** इति, **'शश्छोऽटि'** इति छत्वाऽभावे **'सञ्चशम्भुः'** इति, तुगागमाऽभावे च **'सञ्शम्भुः'** इति च चत्वारि रूपाणि सिद्ध्यन्ति ।

**ङमो ह्रस्वादचि ङमुण्नित्यम् ८ । ३ । ३२ ॥**

**ह्रस्वात्परो यो ङम् तदन्तं यत्पदं तस्मात्परस्याचो ङमुट् । प्रत्यङ्ङात्मा । सुगण्णीशः । सन्नच्युतः ॥**

ह्रस्वात्परो विद्यमानो यो ङम्, तदन्तं यत्पदम्, तस्माद् ङमः परस्य अचो ङमुडागमो भवति । ङम् इति प्रत्याहारः, अत्र कृतं टित्वं प्रत्येकं संज्ञिना सह सम्बद्ध्यते, अतो ङमुट् नाम ङुट्, णुट्, नुट् इत्यर्थः । उक्तञ्च- **संज्ञायाञ्च कृतं टित्त्वं सामर्थ्यात् संज्ञिभिः सह सम्बाध्यते** । अतो ङकारस्य ङुट्, णकारस्य णुट्, नकारस्य च नुट् एते आगमाः बोध्याः ।

**'प्रत्यङ् आत्मा'** इति स्थिते अनेन सूत्रेण ङकारात् परस्य आकारस्य ङुडागमेऽनुबन्धलोपे, टित्वाद् आद्यवयवत्वे **'प्रत्यङ् ङात्मा'** इति जाते, वर्णसम्मेलने **'प्रत्यङ्ङात्मा'** इति रूपं सिद्धम् । एवंरीत्या 'सुगण् ईशः' इत्यत्र णकारात् परस्य ईकारस्य अनेन णुडागमे- सुगण्णीशः । 'सन् अच्युतः' इत्यत्र नकारात् परस्य अकारस्य अनेन नुडागमे- सन्नच्युतः ।

### सिद्धपदप्रयोगप्रकारः

१. तत्र षट् सन्तः निवसन्ति ।

२. सम्राट् सर्वान् राज्ञः विजयते ।

३. भोजननियमान् लङ्घिष्यसि चेत् रोगाः शरीरम् आक्रंस्यन्ते ।

४. अहं नित्यं हरिं वन्दे ।

५. अद्य पर्यावरणं शान्तं वर्तते ।

## अभ्यासः

### १. अधो निर्दिष्टानि कथनानि समीचीनानि कुरुत

(क) ङमुडागमे द्वौ आगमौ भवतः ।

(ख) पदान्तस्य नस्य शे परे धुड् भवति ।

(ग) ङ्णोः अचि परे कुक्-टुकौ आगमौ भवतः ।

(घ) कित्-आगमः आद्यावयवः स्यात् ।

(ङ) अचि परे पदान्तस्य मस्य अनुस्वारो भवति ।

### २. कोष्ठकात् समुचितं पदं चित्वा रिक्तस्थानं पूरयत

(क) अपदान्तस्य नस्य मस्य च अनुस्वारः .......................... । (हलि, झलि)

(ख) पदान्तस्य अनुस्वारस्य ययि .......................... । (वा परसवर्णः, परसवर्णः)

(ग) यवलपरे मस्य ......................... वा । (अनुस्वारः, यवलाः)

(घ) टित् आगमः यस्य क्रियते तस्य ......... भूत्वा प्रवर्तते । (आद्यवयवः, अन्तावयवः)

(ङ) ............... धुड् वा । (सात्परस्य डस्य, डात्परस्य सस्य)

### ३. अधो निर्दिष्टप्रश्नानामुत्तराणि लिखत

(क) हलि परे पदान्तस्य मस्य किं भवति ?

(ख) झल्-यय्प्रत्याहारयोः के के वर्णाः समायान्ति ?

(ग) पदान्तस्य अनुस्वारस्य स्थाने ययि परे किं कर्तव्यम् ?

(घ) 'सम् राट्' इत्यत्र मकारस्य अनुस्वारः कथं न भवति ।

(ङ) 'डः सि धुट्' इत्यनेन कस्य धुडागमः ?

(च) 'ङमुट्-आगमः' इत्यनेन के आगमाः गृह्यन्ते ?

### ४. सन्धिं विच्छेदयत

सत्यं वद, कार्यं कुरु, तस्मिन्निति, सन्त्सः

### ५. अधो निर्दिष्टप्रयोगान् ससूत्रं संसाध्य वाक्येषु संयोजयत

आक्रंस्यते, शान्तः, सम्राट्, सुगण्ठ् षष्ठः, सन्नच्युतः

### हल्सन्धिप्रकरणे

# रुत्वानुनासिकानुस्वारादिसन्धिः

**समः सुटि ८ । ३ । ५ ॥**

**समो रुः सुटि ॥**

सम्शब्दस्य स्थाने 'रु' आदेशो भवति सुटि परे । 'सम् स्कर्ता' इति स्थिते मकारस्य स्थाने अनेन रु-आदेशे अनुबन्धलोपे 'सर् स्कर्ता' इति जाते-

**अत्रानुनासिकः पूर्वस्य तु वा ८ । ३ । २ ॥**

**अत्र रुप्रकरणे रोः पूर्वस्यानुनासिको वा ॥**

अत्र = 'मतुवसोः रु सम्बुद्धौ छन्दसि' इति सूत्रस्य रुप्रकरणे उकारानुबन्धिनो रेफात् पूर्वस्य वर्णस्य विभाषया अनुनासिकादेशो भवति ।

'सर् स्कर्ता' इत्यवस्थायाम् अनेन रेफात्पूर्वस्य अकारस्य स्थाने अनुनासिके अँकारादेशे कृते 'सँर् स्कर्ता' इति जाते-

**अनुनासिकात् परोऽनुस्वारः ८ । ३ ।४ ॥**

**अनुनासिकं विहाय रोः पूर्वस्मात्परोऽनुस्वारागमः ॥**

अनुनासिकपक्षं विहाय = अनुनासिकाभावपक्षे, उकारानुबन्धिनो रेफात्पूर्वो यो वर्णः तस्मात् परः अनुस्वारागमो भवति ।

अनुनासिकाभावपक्षे 'सर् स्कर्ता' इति स्थिते उकारानुबन्धिनो रेफात्पूर्वो वर्णः अकारः, तस्मात् परो अकाररेफयोर्मध्ये अनुस्वारागमे 'संर् स्कर्ता' इति जाते-

**खरवसानयोर्विसर्जनीयः ८ । ३ । १५ ॥**

**खरि अवसाने च पदान्तस्य रेफस्य विसर्गः ।**

पदान्तेस्थितस्य रेफस्य स्थाने खरि परे अवसाने च विसर्गः आदेशो भवति । अनेन सूत्रेण पक्षद्वयेऽपि रेफस्य स्थाने विसर्गादेशे 'सँः स्कर्ता', 'संः स्कर्ता' इति च जाते-

**संपुंकानां सो वक्तव्यः (वा.) । सँस्स्कर्ता, संस्स्कर्ता ॥**

सम्-पुम्-कान्शब्दानाम् अवयवस्य विसर्गस्य स्थाने सकारः आदेशो भवति ।

अनेन वार्तिकेन पक्षद्वयेऽपि विसर्गस्य स्थाने सकारादेशे **'सँस्कर्ता'**, **'संस्स्कर्ता'** चेति रूपद्वयं सिद्धयति ।

**पुमः खय्यम्परे ८ । ३ । ६ ॥**

**अम्परे खयि पुमो रुः । पुँस्कोकिलः, पुंस्कोकिलः ॥**

अम्परके खयि परे पुम्शब्दस्य स्थाने रु-आदेशो भवति ।

**'पुम् कोकिलः'** इति स्थिते अनेन सूत्रेण रुत्वे, **'अत्रानुनासिकः पूर्वस्य तु वा'**, **'अनुनासिकात्प- रोऽनुस्वारः'** इति सूत्रद्वयेन पक्षद्वये क्रमेण अनुनासिकादेशे, अनुस्वारागमे च कृते, **'सम्पुंकानां सो वक्तव्यः'** इति वार्तिकेन पक्षद्वयेऽपि सकारादेशे **'पुँस्कोकिलः'**, **'पुंस्कोकिलः'** इति रूपे सिद्धयतः ।

**नश्छव्यप्रशान् ८ । ३ । ७ ॥**

**अम्परे छवि नान्तस्य पदस्य रुः न तु प्रशान्शब्दस्य ॥**

प्रशान्शब्दं विहाय अम्परके छव्प्रत्याहारे परे नकारान्तस्य पदस्य **'रु'** इत्ययमादेशो भवति ।

**'चक्रिन् त्रायस्व'** इति स्थिते रेफपरके तकारे परे अनेन सूत्रेण नकारस्य रुत्वेऽनुबन्धलोपे **'चक्रिर् त्रायस्व'** इति जाते अनुनासिकादेशे, अनुस्वारागमे च कृते **'चक्रिँर् त्रायस्व'**, **'चक्रिंर् त्रायस्व'** इति चावस्थायां **'खरवसानयोर्विसर्जनीयः'** इति सूत्रेण रेफस्य विसर्गादेशे **'चक्रिँः स्त्रायस्व'**, **'चक्रिंः त्रायस्व'** इति चावस्थायाम्-

**विसर्जनीयस्य सः ८ । ३ । ३४ ॥**

**खरि । चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व । अप्रशान् किम् ? प्रशान् तनोति । पदस्येति किम् ? हन्ति ॥**

खरि परे विसर्गस्य स्थाने सकारादेशो भवति ।

अनेन पक्षद्वयेऽपि विसर्गस्य स्थाने सकारादेशे चक्रिँस्त्रायस्व, चक्रिंस्त्रायस्व चेति रूपद्वयं सिद्धयति ।

**नॄन्पे ८ । ३ । १० ॥**

**नॄन्नित्यस्य रुर्वा पे ॥**

नॄन्शब्दस्य स्थाने विभाषया **'रु'** इत्ययमादेशो भवति, पकारे परे ।

**'नॄन् पाहि'** इति स्थिते अनेन सूत्रेण नकारस्य **'रु'** इत्ययमादेशेऽनुबन्धलोपे **'नॄर् पाहि'** इति जाते अनुनासिकादेशे, अनुस्वारागमे च कृते, रेफस्य **'खरवसानयोर्विसर्जनीयः'** इति सूत्रेण विसर्गादेशे 'नॄँः **पाहि'**, **'नॄंः पाहि'** इति जाते-

**कुप्वोः कपौ च ८ । ३ । ३७ ॥**

**कवर्गे पवर्गे च विसर्गस्य कपौ स्तः, चाद्विसर्गः । नॄँपाहि, नॄँः पाहि, नॄंपाहि, नॄंः पाहि । नॄन्पाहि ॥**

कवर्गे पवर्गे च परे विसर्गस्य स्थाने क्रमेण जिह्वामूलीयः उपध्मानीयश्च विसर्गौ स्तः, चकाराद् एकस्मिन् पक्षे विसर्गश्च भवति ।

**'नॄँः पाहि', 'नॄंः पाहि'** इत्यवस्थायाम्, विसर्गस्य स्थाने अनेन पक्षद्वयेऽपि उपध्मानीयविसर्गादेशे **'नॄँपाहि', 'नॄंपाहि'** इति, चकाराद् उपध्मानीयविसर्गाभावे अनेनैवा सूत्रेण साधारणे विसर्गे कृते **'नॄँःपाहि', 'नॄंःपाहि'** इति, नकारस्य रुत्वाभावे **'नॄन्पाहि'** इति च पञ्च रूपाणि सिद्ध्यन्ति ।

**सोऽपदादौ**

**विसर्गस्य सः स्यादपदाद्योः कुप्वोः ।**

**पाश-कल्प-क-काम्येष्विति वाच्यम्** (वा.) **पयस्पाशम् । पयस्कल्पम् । यशस्काम्यति ।**

**अनव्ययस्येति वाच्यम्** (वा.)

अवयवभिन्नस्यैव विसर्गस्य सत्वं वक्तव्यमित्यर्थः । अत एव- प्रातः + कल्पमित्यत्राव्यस्यैव सत्वेव सत्वविधायके चानव्ययस्यैव विवक्षणात् सत्वं न भवतीति बोध्यम् ।

**काम्ये रोरेवेति वाच्यम्** (वा.)

काम्यशब्दे परे रोः स्थानिकस्यैव विसर्गस्य सत्वं भवतीति वक्तव्यमित्यर्थः । तेन 'गीः + काम्यति' इत्यत्र रेफस्थानिकविसर्गसत्वेन रुस्थानिकविसर्गाभावात् सत्वं न भवतीति ज्ञेयम् ।

**इणः षः ८ । ३ । ३९ ॥**

**इणः परस्य विसर्गस्य षः स्यात् पूर्वविषये । सर्पिष्पाशम् । सर्पिष्कम् । सर्पिष्काम्यति ।**

**कस्कादिषु च ८ । ३ । ४८ ॥**

**एष्विण उत्तरस्य विसर्गस्य षः स्यादन्यस्य तु सः । कस्कः । कौतस्कुतः । सर्पिष्कुण्डिका । धनुष्कपालमित्यादि । आकृतिगणोऽयम् ।**

**तस्य परमाम्रेडितम् ८ । १ । २ ॥**

**द्विरुक्तस्य परमाम्रेडितं स्यात् ॥**

वारद्वयम् उक्तयोः पदयोः परं पदम् **'आम्रेडितम्'** भवति ।

**'कान् कान्'** इति स्थिते अनेन सूत्रेण परस्य **'कान्'**शब्दस्य आम्रेडितसंज्ञायाम्-

**कानाम्रेडिते ८ । ३ । १२ ॥**

**कान्नकारस्य रुः स्यादाम्रेडिते । काँस्कान्, कांस्कान् ॥**

कान् इत्यस्य अन्त्यस्य नकारस्य आम्रेडिते रुत्वादेशो भवति ।

**'कान् कान्'** इत्यवस्थायाम् अनेन सूत्रेण पूर्वस्य **'कान्'**शब्दावयवस्य नकारस्य रुत्वादेशेऽनुबन्धलोपे **'कार् कान्'** इति जाते अनुनासिकादेशे, अनुस्वारागमे च कृते, रेफस्य **'खरवसानयोर्विसर्जनीयः'** इति सूत्रेण विसर्गादेशे, विसर्गस्य स्थाने **'सम्पुंकानां सो वक्तव्यः'** इति वार्तिकेन सकारादेशे **'काँस्कान्, कांस्कान्'** इति च रूपे सिद्ध्यतः ।

**छे च ६ । १ । ७३ ॥**

**ह्रस्वस्य छे तुक् । शिवच्छाया ॥**

छकारे परे सति ह्रस्वस्य वर्णस्य 'तुक्' आगमो भवति, संहितायां विषये ।

**'शिव छाया'** इत्यत्र अनेन सूत्रेण अकारस्य तुगागमेऽनुबन्धलोपे, कित्वाद् अन्तावयवत्वे **'शिवत् छाया'** इति जाते, तकारस्य **'स्तोः श्चुना श्चुः'** इति सूत्रेण श्चुत्वे **'शिवच्छाया'** इति रूपं सिद्धम् ।

**आङ्माङोश्च ६ । १ । ७४ ॥**

**तुक् छे । आच्छादयति । माच्छिदत् ।**

**दीर्घात् ६ । १ । ७५ ॥**

**तुक् छे । म्लेच्छति ।**

**पदान्ताद्वा ६ । १ । ७६ ॥**

**दीर्घात्पदान्ताच्छे तुग् वा । लक्ष्मीच्छाया, लक्ष्मीछाया ॥**

छकारे परे पदान्तस्य दीर्घस्य विभाषया तुगागमो भवति, संहितायां विषये ।

**'लक्ष्मी छाया'** इति स्थिते **'आद्यन्तौ टकितौ'** इति सूत्रसहकारेण अनेन सूत्रेण ईकारस्य तुगागमेऽनुबन्धलोपे **'लक्ष्मीत् छाया'** इति जाते **'स्तोः श्चुना श्चुः'** इति सूत्रेण श्चुत्वे **'लक्ष्मीच्छाया'** इति, तुगागमाभावे **'लक्ष्मीछाया'** इति च रूपे सिद्ध्यतः ।

## अभ्यासः

### १. अधो लिखितानां प्रश्नानामुत्तरं लिखत

(क) 'अत्रानुनासिकः पूर्वस्य तु वा' इति सूत्रं किं करोति ?

(ख) 'अनुनासिकात्परोऽनुस्वारः' इति सूत्रेण विहितः अनुस्वारः आगमः आदेशो वा ?

(ग) 'तस्य परमाम्रेडितम्' इत्यस्य कोऽर्थः ?

(घ) 'छे च' इति सूत्रं किं करोति ?

(ङ) जिह्वामूलीयोपध्मानीयविसर्गौ कस्मात् पूर्वौ ? तयोः स्वरूपञ्च कीदृशम् ?

### २. परस्परं मेलयत

| | |
|---|---|
| अनुनासिकः | चक्रिँस्त्रायस्व |
| छे च | समः सुटि |
| नश्छव्यप्रशान् | आगमः |
| संस्कर्ता | शिवच्छाया |
| अनुस्वारः | आदेशः |

### ४ कथनं समीचीनं कुरुत

(क) दीर्घात्पदान्तात् छे नित्यं तुक् भवति ।

(ख) द्विरुक्तस्य पूर्वम् आम्रेडितं भवति ।

(ग) सम्पुम्कानां सस्य विसर्गो भवति ।

(घ) प्रशान्शब्दस्य 'नश्छव्यप्रशान्' इति सूत्रेण रुत्वं भवति ।

(ङ) पुँस्कोकिलः पुमः खय्यम्परे इति सूत्रस्य उदाहरणं नास्ति ।

### ५. सिद्धिप्रक्रियां प्रदर्श्य निर्दिष्टपदानि वाक्येषु योजयत

संस्स्कर्ता, चक्रिँस्त्रायस्व, काँस्कान्, शिवच्छाया, आच्छादयति ।

### विसर्गसन्धिप्रकरणे

# सत्व-रुत्वोत्वादिसन्धिः

**विसर्जनीयस्य सः ८ । ३ । ३४ ॥**

**खरि । विष्णुस्त्राता ॥**

खरि परे विसर्गस्य स्थाने सकारादेशो भवति ।

**'विष्णुः त्राता'** इति स्थिते अनेन सूत्रेण विसर्गस्य स्थाने सकारादेशे **'विष्णुस्त्राता'** इति रूपं सिद्धम् ।

**शर्परे विसर्जनीयः ८ । ३ । ३४ ॥**

**शर्परे खरि विसर्गस्य विसर्गो न त्वन्यत् । कः त्सरुः । घनाघनः क्षोभणः ।**

शर्परके खरि परे विसर्गस्य विसर्ग एवादेशो भवति, अन्यत् = सत्वजिह्वामूलीयत्वादि न भवतीत्यर्थः । तथा च 'कः + त्सरुः' इत्यत्र "विसर्जनीयस्य सः" इति सत्त्वे प्राप्तेऽनेन विसर्ग एव भवतीति बोधिते सति 'कः त्सरुः' इति सिद्ध्यति । एवमेव 'घनाघनः + क्षोभणः' इत्यत्र "कुप्वो ꣵक ꣶपौ च" इति जिह्वामूलीये प्राप्तेऽनेन विसर्ग एव भवतीति बोध्यम् ।

**वा शरि ८ । ३ । ३६ ॥**

**शरि विसर्गस्य विसर्गो वा । हरिः शेते, हरिश्शेते ॥**

शर्प्रत्याहारे परे विसर्गस्य स्थाने विभाषया विसर्गः एव आदेशो भवति, न तु सकारः इत्यर्थः ।

**'हरिः शेते'** इत्यवस्थायाम् **'विसर्जनीयस्य सः'** इति विसर्गस्य सत्वे प्राप्ते, तत् प्रबाध्य अनेन सूत्रेण विकल्पेन विसर्गस्य विसर्गे एवादेशे **'हरिः शेते'** इति, अन्ये पक्षे विसर्गस्य सत्वे, तस्य श्चुत्वेन शकारे **'हरिश्शेते'** इति च ।

**खर्परे शरि वा विसर्गलोपो वक्तव्यः (वा.) हरिस्फुरति, हरिः स्फुरति ।**

**ससजुषो रुः ८ । २ । ६६ ॥**

**पदान्तस्य सस्य सजुषश्च रुः स्यात् ॥**

पदान्तस्य सकारस्य स्थाने, सजुष्-शब्दस्य षकारस्य स्थाने च 'रु' इत्यादेशो भवति ।

**'शिवस् अर्च्यः'** इति स्थिते अनेन सूत्रेण सकारस्य स्थाने रुत्वादेशेऽनुबन्धलोपे **'शिवर् अर्च्यः'** इति जाते-

**अतो रोरप्लुतादप्लुते ६ । १ । ११३ ॥**

**अप्लुतादतः परस्य रोरुः स्यादप्लुतेऽति । शिवोऽर्च्यः । अतः किम् ? देवा अत्र । अतीति किम् ? श्व आगन्ता । अप्लुतात् किम् ? एहि सुश्रोत३ अत्र स्नाहि । प्लुतस्यासिद्धत्वादतः परोऽयम् । अप्लुतादिति विशेषणे तु तत्सामर्थ्यान्नासिद्धत्वम् । तपरकरणस्य तु न सामर्थ्यम्, दीर्घनिवृत्त्या चरितार्थत्वात् । अप्लुत इति किम् ? तिष्ठतु पय अ३ग्निदत्त ।**

प्लुतभिन्नाद् ह्रस्वाकारात् परस्य उकारानुबन्धिनः रेफस्य स्थाने 'उ' इति आदेशो भवति, प्लुतभिन्ने ह्रस्वाकारे परे ।

**'शिवर् अर्च्यः'** इत्यवस्थायाम् अनेन सूत्रेण रेफस्य स्थाने उकारादेशे **'शिव उ अर्च्यः'** इति जाते **'शिव उ'** इत्यत्र **'आद् गुणः'** इति सूत्रेण गुणे **'शिवो अर्च्यः'** इति जाते, **'एङः पदान्तादति'** इति सूत्रेण पूर्वपरयोः स्थाने पूर्वरूपैकादेशे, चम्पकपुष्पकन्यायेन खण्डाकारे च कृते **'शिवोऽर्च्यः'** इति रूपं सिद्ध्यति ।

**हशि च ६ । १ । ११४ ॥**

**तथा । शिवो वन्द्यः ॥**

प्लुतभिन्नाद् ह्रस्वाकारात् परस्य उकारानुबन्धिनः रेफस्य स्थाने 'उ' इति आदेशो भवति, हशि परे च ।

**'शिवस् वन्द्यः'** इति स्थिते **'ससजुषो रुः'** इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे **'शिवर् वन्द्यः'** इति जाते रेफस्य अनेन सूत्रेण उत्वे, **'आद् गुणः'** इति सूत्रेण गुणे च कृते **'शिवो वन्द्यः'** इति रूपं सिद्ध्यति ।

**भो-भगो-अघो-अपूर्वस्य योऽशि ८ । ३ । १७ ॥**

**एतत्पूर्वस्य रोर्यादेशोऽशि । देवा इह, देवायिह । भोस् भगोस् अघोस् इति सान्ता निपाताः । तेषां रोर्यत्वे कृते ॥**

भो-भगो-अघो-शब्दपूर्वस्य अवर्णपूर्वस्य च उकारानुबन्धिनः रेफस्य स्थाने यकारादेशो भवति, अशि परे । अवर्णपूर्वस्य उदाहरणमाह- देवा इह, देवायिह इति ।

**'देवास् इह'** - देवार् इह (ससजुषो रुः) - देवाय् इह - देवा इह (लोपः शाकल्यस्य) । अत्र यलोपस्य असिद्धत्वाद् न स्वरसन्धिः । यलोपाभावे- देवायिह ।

**व्योर्लघुप्रयत्नतरः शाकटायनस्य ८ । ३ । १८ ॥**

**पदान्तयोर्वकारयकारयोर्लघूच्चारणौ वयौ वा स्तो ऽशि परे ।**

यस्योच्चारणे जिह्वाग्रोपाग्रमध्यमूलानां शैथिल्यं जायते स लघूच्चारणः, लघुः प्रयत्नो यस्योच्चारणे स लघुप्रयत्नः, अतिशयितो लघुप्रयत्नो लघुप्रयत्नतरः ।

**ओतो गार्ग्यस्य ८ । ३ । २० ॥**

**ओकारात् परस्य पदान्तस्यालघुप्रयन्तस्य यस्य नित्यं लोपः । भो अच्युत । लघुप्रयत्नपक्षे भोयच्युत । पदान्तस्य किम् ? तोयम् ।**

'भोस् अच्युत' इत्यत्र सस्य रुत्वे 'भोर् अच्युत' इति जाते "भो-भगो-अघो-अपूर्वस्य योऽशि" इति सूत्रेण यादेशे 'भोय् अच्युत' इति जाते "व्योर्लघुप्रयत्नतरः शाकटायनस्य" इति सूत्रेण लघुप्रयत्नतरयकारपक्षे 'भोयच्युत' इति, लघुप्रयत्नतरयकाराभावपक्षे "ओतो गार्ग्यस्य" इति यलोपे 'भो अच्युत' इति सिद्ध्यति ।

**हलि सर्वेषाम् ८ । ३ । २२ ॥**

**भोभगोअघोअपूर्वस्य यस्य लोपः स्याद्धलि । भो देवाः । भगो नमस्ते । अघो याहि ॥**

हलि परे भोभगोअघोपूर्वस्य अवर्णपूर्वस्य च यकारस्य नित्यं लोपः भवति ।

**'भोस् देवाः'** इति स्थिते **'ससजुषो रुः'** इति सकारस्य रुत्वेऽनुबन्धलोपे **'भोर् देवाः'**, **'भोभगो...'** इत्यादिना रेफस्य यत्वे **'भोय् देवा'** इत्यत्र अनेन सूत्रेण यकारस्य लोपे **'भो देवाः'** इति रूपं सिद्धम् । एवंरीत्या **'भगोस् नमस्ते'** - भगोर् नमस्ते - भगोय् नमस्ते - भगो नमस्ते । एवम् अघोस् याहि = अघो याहि ।

**रोऽसुपि ८ । २ । ६९ ॥**

**अह्नो रेफादेशो न तु सुपि । अहरहः । अहर्गणः ॥**

अहन्-शब्दस्य स्थाने रेफादेशो भवति, सुप्-भिन्ने परे ।

**'अहन् अहः'** इति स्थिते अनेन सूत्रेण अहन्शब्दस्य नकारस्य रेफादेशे **'अहरहः'** इति रुपं सिद्ध्यति । रेफादेशविधानेन रुत्वस्य अभावाद् अत्र **'अतो रोरप्लुतादप्लुते'** इति उत्वं न । **'अहन् गणः'** - अहर् गणः - अहर्गणः इत्यत्र च **'हशि च'** इति उत्वं न ।

**रूपरात्रिरथन्तरेषु रुत्वं वाच्यम् (वा.) अहोरूपम् । गतमहो रात्रिरेषा । एकदेशविकृतन्यायेन अहोरात्रः । अहोरथन्तरम् ।**

**अहरादीनां पत्यादिषु वा रेफः (वा.) विसर्गापवादः । अहर्पतिः । धूर्पतिः । पक्षे विसर्गोपध्मानीयौ ॥**

## अभ्यासः

### १. प्रश्नानामुत्तरं लिखत

(क) 'वा शरि' इति सूत्रं किं करोति ?

(ख) पदान्तस्य सस्य रुः आदेशः केन सूत्रेण क्रियते ?

(ग) अप्लुते अति परे उकारविधायकं सूत्रं किम् ?

(घ) 'हलि सर्वेषाम्' इति सूत्रं किं करोति ?

(ङ) 'अहरहः' इत्यत्र 'अतो रोरप्लुतादप्लुते' इति कथं न प्रवर्तते ?

### २ सिद्धरूपाणि लिखत

कृष्णः + तत्र = ..........

देवः + अयम् = ..........

कः + अपि = ..........

बालः + हसति = ..........

देवाः + नम्याः = ..........

छात्रः + शेते = ..........

रामः + अस्ति = ..........

रमेशः + गच्छति = ..........

पुत्रः + आगच्छति = ..........

### ३. सन्धिविच्छेदं कुरुत

सोऽयम्, वचनोऽनुनासिकः, हरिरवदत्, पितुरिच्छा, बालस्स्वपिति, भूपालोऽवदत्, पुत्रो भाषते, अहरहः

### ४. रेखाङ्कनेन सम्बद्धशब्दं योजयत

| | |
|---|---|
| (क) हृषीकेशो गदति | रोऽसुपि |
| (ख) हरिःशेते | अतो रोरप्लुतादप्लुते |
| (ग) शिवोऽवदत् | रुः |
| (घ) अहर्गणः | हशि च |
| (ङ) ससजुषो रुः | वा शरि |

### ५. निर्दिष्टप्रयोगान् संसाध्य वाक्येषु योजयत

(क) हरिश्शेते (ख) शिवोऽर्च्यः (ग) भो देवाः

(घ) शिवो वन्द्यः (ङ) विष्णुस्त्राता

### विसर्गसन्धिप्रकरणे

# रेफलोप-सुलोपादिसन्धिः

**रो रि ८ । ३ । १४ ॥**

**रेफस्य रेफे परे लोपः ॥**

रेफे परे रेफस्य लोपो भवति ।

**ढ्रलोपे पूर्वस्य दीर्घोऽणः ६ । ३ । १११ ॥**

**ढरेफयोर्लोपनिमित्तयोः पूर्वस्याणो दीर्घः । पुना रमते । हरी रम्यः । शम्भू राजते । अणः किम् ? तृढः । वृढः ।**

ढकारस्य रेफस्य च लोपनिमित्तके क्रमेण ढकारे रेफे च परे पूर्वस्य अणः स्थाने दीर्घो भवति ।

**'पुनर् रमते'** इति स्थिते **'रो रि'** इति सूत्रेण रेफे परे रेफस्य लोपे **'पुन रमते'** इति जाते, रेफलोपनिमित्तके रमतेशब्दावयवे रेफे परे अनेन सूत्रेण नकाराद् अकारस्य दीर्घादेशे **'पुना रमते'** इति रूपं सिद्धम् । एवंरीत्या **'हरिर् रम्यः'** - हरि रम्यः - हरी रम्यः । **'शम्भुर् राजते'** - शम्भु राजते - शम्भू राजते ।

**'तृढ् ढ'**, **'वृढ् ढ'** इति स्थिते पूर्वढकारस्य **'ढो ढे लोपः'** इति सूत्रेण लोपे, ढकारलोपनिमित्तके ढकारे परे पूर्वस्य अणः एव दीर्घविधानाद् अत्र ऋकारस्य दीर्घो न ।

**'मनस् रथः'** इति स्थिते सकारस्य **'ससजुषो रुः'** इति सूत्रेण रुत्वेऽनुबन्धलोपे **'मनर् रथः'** इत्यवस्थायां **'हशि च'** इति सूत्रेण रेफस्य उत्वे प्राप्ते, **'रो रि'** इति सूत्रेण रेफस्य लोपे च प्राप्ते बलाबलत्वनियामकं सूत्रम् आह-

**विप्रतिषेधे परं कार्यम् १ । ४ । २ ॥**

**तुल्यबलविरोधे परं कार्यं स्यात् । इति लोपे प्राप्ते । पूर्वत्रासिद्धमिति रोरीत्यस्यासिद्धत्वा-दुत्वमेव । मनोरथः ॥**

तुल्यबलविरोधे सति परकार्यस्य बलवत्त्वं बोध्यम् । तुल्यबलविरोधो नाम अन्यत्रान्यत्रलब्धावकाशयोः उभयोः शास्त्रयोः युगपत्प्राप्तिः । अत्र च **'हशि च'** इति शास्त्रं **'शिवो वन्द्यः'** इत्यत्र चरितार्थम्, **'रो रि'** इति शास्त्रं **'पुना रमते'** इत्यत्र चरितार्थम्, उभयोः एकत्र **'मनर् रथः'** इत्यत्र प्राप्तिरस्ति, अतः अत्र विप्रतिषेधो वर्तते । विप्रतिषेधे सति परकार्यस्य अनेन सूत्रेण बलवत्वबोधनाद् **'रो रि'** इति रेफस्य लोपे प्राप्ते **'पूर्वत्रासिद्धम्'** इति **'रो रि'** इत्यस्य त्रिपादीत्वेन असिद्धत्वबोधनाद् **'मनर् रथः'** इत्यत्र **'हशि च'** इत्यनेन उत्वे कृते **'आद् गुणः'** इति गुणे, वर्णयोगे **'मनोरथः'** इति रूपं सिद्ध्यति ।

वस्तुतः **'विप्रतिषेधे परं कार्यम्'** इति सूत्रेण सपादसप्ताध्यायीस्थसूत्राणां परस्परं बलाबलत्वव्यवस्था, **'पूर्वत्रासिद्धमिति'** सूत्रेण च सपादसप्ताध्यायीस्थसूत्राणां त्रिपादीस्थसूत्रैः परस्परं विरोधे सति, त्रिपादीस्थानां सूत्राणां परस्परं विरोधे सति च व्यवस्था, अतः **'मनोरथः'** इत्यं विषयः पूर्वत्रासिद्धमित्यस्यास्ति । अत्र **'विप्रतिषेधे...'** इत्यस्य उपस्थापनन्तु बालानां कृते इति बोध्यम् ।

**एतत्तदोः सुलोपोऽकोरनञ्समासे हलि ६ । १ । १३२ ॥**

**अककारयोरेतत्तदोर्यः सुस्तस्य लोपो हलि न तु नञ्समासे । एष विष्णुः । स शम्भुः । अकोः किम् ? एषको रुद्रः । अनञ्समासे किम् ? असः शिवः । हलि किम् ? एषोऽत्र ॥**

अकच्प्रत्ययरहिताद् एतत्शब्दात् तत्शब्दाद् वा विहितः यः सु-प्रत्ययः तस्य लोपो भवति, हलि परे, नञ्समासे तु न ।

**'एषस् विष्णुः'** इति स्थिते एतद्-शब्दाद् विहितस्य सुप्रत्ययस्य सकारस्य अनेन हलि वकारे परे लोपे **'एष विष्णुः'** इति साधु । एवंरीत्या- **'स शम्भुः'** ।

अकच्प्रत्ययरहितयोः एतत्तदोः कथनेन यत्र अकच्प्रत्ययविशिष्टः एतत्तत्शब्दसम्बद्धः सुः, तत्र लोपो न, यथा- एषको रुद्रः । अत्र हि एतत्शब्दाद् अकच्प्रत्ययः विहितो वर्तते ।

अनञ्समासे इति कथनेन यत्र नञ्समासो भवति तत्र अस्य सूत्रस्य प्रवृत्तिर्न । यथा- **'असः शिवः'** । न सः इति असः ।

हलि परे सत्येव इति कथनेन अचि परे न भवति, अत एव **'एषोऽत्र'** इत्यत्र सुलोपो न ।

**सोऽचि लोपे चेत्पादपूरणम् ६ । १ । १३४ ॥**

**स इत्यस्य सोर्लोपः स्यादचि पादश्चेल्लोपे सत्येव पूर्य्येत । सैष दाशरथी रामः । सेमामविड्ढि प्रभृतिम् ॥**

तद्-शब्दसम्बद्धस्य सु-प्रत्ययस्य लोपो भवति, अचि परे, लोपे सत्येव पादस्य पूर्तिः भवति चेत् ।

**'सस् एष दाशरथी रामः'** इत्यत्र सुप्रत्ययस्य सकारस्य लोपे सत्येव पादस्य पूर्तिरस्तीत्यतः अनेन सूत्रेण सुसम्बद्धस्य सकारस्य लोपे, **'वृद्धिरेचि'** इति सूत्रेण वृद्धौ **'सैष दाशरथी रामः'** इति साधु । एवंरीत्या **'सस् इमामविड्ढि प्रभृतिम्'** इत्यत्र अनेन सलोपः, ततो गुण इति बोध्यम् ।

## अभ्यासः

१. **अधो लिखितानि सूत्राणि शुद्धतया उच्चारयत**

(क) ढ्रलोपे पूर्वस्य दीर्घोऽणः

(ख) विप्रतिषेधे परं कार्यम्

(ग) एतत्तदोः सुलोपोऽकोरनञ्समासे हलि

(घ) सोऽचि लोपे चेत्पादपूरणम्

२. **निर्दिष्टप्रश्नानामुत्तराणि प्रदत्त**

(क) 'रो रि' इति सूत्रं किं करोति ?

(ख) 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रस्य कोऽर्थः ?

(ग) तुल्यबलविरोधो नाम किम् ?

(घ) 'एतत्तदोः सुलोपो......' इति सूत्रं प्रपूर्य तस्य कार्यं लिखत ।

(ङ) 'ढ्रलोपे पूर्वस्य दीर्घोऽणः' इति सूत्रे 'अण्' इत्यनेन के वर्णा गृह्यन्ते ?

३. **रिक्तस्थानानि पूरयत**

(क) विष्णुर् + राजते =................................

(ख) सस् + पठति = ........................................

(ग) एषस् + विष्णुः =........................................

(घ) पुनर् + रमते =.......................................

(ङ) ऊढ् + ढ = ..............................................

४. **अधो निर्दिष्टशब्दानां ससूत्रं साधुत्वं प्रतिपाद्य वाक्येषु योजयत**

(क) हरी रम्यः (ख) मनोरथः (ग) स शम्भुः (घ) सेमामविड्ढि प्रभृतिम्

५. **तुल्यबलविरोधत्वं प्रतिपाद्य 'विप्रतिषेधे परं कार्यम्' इति सूत्रस्य अर्थं लिखत ।**

### अजन्तपुल्लिङ्गप्रकरणे

# सुबन्तपदपरिचयः

- पदानि द्विविधानि भवन्ति- १. सुबन्त-पदानि २. तिङन्त-पदानि ।
- सुबन्तपदानां निरूपणं सुबन्तप्रकरणे भवति ।
- प्रातिपदिकानाम् अन्ते सुप्-प्रत्ययानां योजनेन सुबन्त-पदानि निर्मीयन्ते ।
- सुप्-प्रत्ययाः सर्वेभ्यः प्रातिपदिकेभ्य उत्पद्यन्ते ।
- वाक्ये प्रयुक्ताः सर्वे शब्दाः पदसंज्ञका भवन्ति ।
- पदत्वम् अनापन्नाः शब्दा भाषायां प्रयोगाय अयोग्या भवन्ति ।

## पद-परिचयः

पदानि द्विविधानि भवन्ति- सुबन्तानि, तिङन्तानि च । द्विविधानां पदानां निर्देशनं 'सुप्तिङन्तं पदम्' इति सूत्रेण विहितमस्ति । सर्वाणि प्रातिपदिकानि धातवश्च पदत्वम् आपद्य एव वाक्ये प्रयोगाय योग्या भवन्ति, 'अपदं न प्रयुञ्जीत' इति नियमात् । अत एव भाषायां प्रयुक्तानाम्, सर्वविधानां शब्दानां पदत्वसाधनम् आवश्यकं भवति । पदत्वं च सुप्-प्रत्ययैः, तिङ्-प्रत्ययैश्च साध्यते ।

येषाम् अन्ते सुप्-प्रत्यया भवन्ति, ते सुबन्तपदानि कथ्यन्ते । सुप्-प्रत्ययाश्च प्रातिपदिकाद् विधीयन्ते । सुबन्तपदानि संज्ञा-सर्वनाम-विशेषणादीनां वाचकानि भवन्ति । तिङन्तपदानि तु धातुना सह तिङ्-प्रत्ययानां योजनेन जायन्ते, तानि च क्रियावाचीनि भवन्ति । तिङन्तपदानां निरूपणाय तिङन्तप्रकरणं निर्मितं विद्यते, तत्रैव तेषाम् अध्ययनं भविष्यति । अत्र सुबन्तप्रकरणे सुबन्तपदानां निरूपणं विहितमस्ति ।

## प्रातिपदिक-परिचयः

'प्रातिपदिकम्' इति व्याकरणशास्त्रे पठितासु विविधासु पारिभाषिकीषु संज्ञासु अन्यतमा संज्ञा वर्तते । प्रातिपदिकानाम् अन्ते सु, औ, जस् इत्यादीनाम् एकविंशतेः सुप्-प्रत्ययानां योजनेन सुबन्तपदानि निष्पद्यन्ते । तत्र ते शब्दा एव प्रातिपदिकसंज्ञां लभन्ते ये-

- अर्थवन्तः सन्ति । (अर्थयुक्तानाम् एव शब्दानां प्रातिपदिकसंज्ञा भवति ।)
- धातवो न सन्ति ।

- प्रत्यया न सन्ति ।
- कृत्-प्रत्ययान्ताः, तद्धित-प्रत्ययान्ताः, समासाश्च सन्ति । (प्रत्ययान्त-शब्देषु केवलं कृदन्त-तद्धितान्तशब्दा एव प्रातिपदिकसंज्ञका भवन्ति ।)

## सुप्-प्रत्यय-परिचयः

सुप्-प्रत्यया एकविंशतिसङ्ख्यकाः सन्ति । 'सुप्' इति प्रत्याहारो वर्तते, तेन 'सु' इत्यारभ्य सुप्पर्यन्तानाम् अधो निर्दिष्टानां प्रत्ययानां बोधो भवति । सर्वाणि प्रातिपदिकानि एतैः प्रत्ययैः पदत्वम् आपद्य एव वाक्ये प्रयोगाय योग्या भवन्ति । एते प्रत्ययाः सुप्, स्वादिः, विभक्तिः इत्येतैः शब्दैर्व्यवह्रियन्ते । सुप्-प्रत्ययाः, तेषाम् अनुबन्धविनिर्मुक्तस्वरूपाणि च यथा-

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| सु (स्) | औ | जस् (अस्) | - प्रथमा |
| अम् | औट् (औ) | शस् (अस्) | - द्वितीया |
| टा (आ) | भ्याम् | भिस् | - तृतीया |
| ङे (ए) | भ्याम् | भ्यस् | - चतुर्थी |
| ङसि (अस्) | भ्याम् | भ्यस् | - पञ्चमी |
| ङस् (अस्) | ओस् | आम् | - षष्ठी |
| ङि (इ) | ओस् | सुप् (सु) | - सप्तमी |

सुप्-प्रत्ययानां विविधसमूहान् निर्माय प्रयोगसिद्धिप्रक्रियायाम् उपयोगिन्यः काश्चन विशिष्टसंज्ञाः परिकल्पिताः सन्ति । ताश्च यथा-

**सर्वनामस्थानम्** = पुं-स्त्रीलिङ्गे- सु, औ, जस्, अम्, औट् । नपुंसकलिङ्गे- जस्, शस् ।

**औङ्** = औ, औट् । **आङ्** = टा ।

**आप्** = टा (आ), भ्याम्, भिस्, ङे (ए), भ्याम्, भ्यस्, ङसि (अस्), भ्याम्, भ्यस्, ङस् (अस्), ओस्, आम्, ङि (इ), ओस्, सुप् (सु) ।

**ङित्** = ङे (ए), ङसि (अस्), ङस् (अस्), ङि (इ) ।

**अजादिः** = औ, जस् (अस्), अम्, औट् (औ), शस् (अस्), टा (आ), ङे (ए), ङसि (अस्), ङस् (अस्), ओस्, आम्, ङि (इ), ओस् ।

**हलादिः** = सु (स्), भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस्, सुप् (सु) ।

**भादिः** = भ्याम्, भिस्, भ्याम्, भ्यस्, भ्याम्, भ्यस् ।

### शब्दरूप-परिचयः

राम-प्रातिपदिके उक्तानां सुप्-प्रत्ययानां योजनाद् अधो लिखितानि रूपाणि जायन्ते-

| एकवचनम् | द्विवचनम् | बहुवचनम् | विभक्तिः |
|---|---|---|---|
| रामः (सु) | रामौ (औ) | रामाः (जस्) | - प्रथमा |
| रामम् (अम्) | रामौ (औट्) | रामान् (शस्) | - द्वितीया |
| रामेण (टा) | रामाभ्याम् (भ्याम्) | रामैः (भिस्) | - तृतीया |
| रामाय (ङे) | रामाभ्याम् (भ्याम्) | रामेभ्यः (भ्यस्) | - चतुर्थी |
| रामात्-द् (ङसि) | रामाभ्याम् (भ्याम्) | रामेभ्यः (भ्यस्) | - पञ्चमी |
| रामस्य (ङस्) | रामयोः (ओस्) | रामाणाम् (आम्) | - षष्ठी |
| रामे (ङि) | रामयोः (ओस्) | रामेषु (सुप्) | - सप्तमी |
| हे राम ! (सु) | हे रामौ ! (औ) | हे रामाः ! (जस्) | - सम्बोधनम् |

उक्तानां सर्वेषाम् अपि रूपाणां प्रातिपदिकम् 'राम' इत्यस्ति । राम-शब्दः अकारान्तः, पुँल्लिङ्गश्च वर्तते । बालक-कृष्ण-विद्यालय-इत्यादीनाम् अकारान्त-पुँल्लिङ्गप्रातिपदिकानां रूपाणि अपि राम-शब्दवद् भवन्ति ।

एवमेव सर्वेषां प्रातिपदिकानाम् अन्ते एतेषाम् एव एकविंशतेः सुप्-प्रत्ययानां योजनेन पदानि निर्मीयन्ते । यथा- सर्व+जस् = सर्वे । हरि+सु = हरिः । पितृ+ङस् = पितुः । रमा+सु = रमा । ज्ञान+सु = ज्ञानम् । राजन्+सु = राजा । युष्मद्+सु = त्वम् । अस्मद्+ङस् = मम । इत्यादि । एतादृशानां सुबन्तपदानां ससूत्रं विस्तरेण निरूपणम् अग्रे अस्मिन् एव प्रकरणे विधीयते ।

### पदप्रयोगप्रकारः

१. रामः पठति । बालकः खादति ।

२. अहं रामं पश्यामि । अहं पाठं पठामि ।

३. केशवः रामेण सह क्रीडति । स हस्तेन लिखति ।

४. शिक्षकः रामाय पुस्तकं ददाति । देवाय नमः ।

५. रामस्य जनकस्य नाम दशरथः अस्ति । कृष्णस्य जननी देवकी वर्तते ।

## अभ्यासः

१. **पाठाधारेण परस्परं मेलयित्वा अभ्यासपुस्तिकायां वाक्यानि लिखत**

| | |
|---|---|
| सुप् | द्विविधानि । |
| सुप्तिङन्तम् | औ, औट् । |
| पदानि | न प्रयुञ्जीत । |
| अपदम् | विभक्तिः, प्रत्ययश्च । |
| औङ् | पदम् । |

२. **पाठं पठित्वा कोष्ठस्थेन समुचितपदेन रिक्तस्थानं पूरयत**

(क) सुबन्तपदानि ..................... निर्मीयन्ते । (सुप्-प्रत्ययैः, तिङ्-प्रत्ययैः)

(ख) 'राम+टा' इत्यस्मात् ..................... इति रूपं भवति । (रामम्, रामेण)

(ग) ..................... आदाय प्रत्ययानाम् अजादित्व-हलादित्वविवेकः कर्तव्यः । (औपदेशिक-स्वरूपम्, अनुबन्धविनिर्मुक्त-स्वरूपम्)

(घ) वचनानि ..................... भवन्ति । (त्रीणि, चत्वारि)

(ङ) सुप्-प्रत्याहारे ..................... स्वादि-प्रत्ययाः समायान्ति । (एकादश, एकविंशतिः)

३. **अधस्तनानां प्रत्ययानाम् अनुबन्धविनिर्मुक्तानि स्वरूपाणि लिखत**

जस् - ............ औट् - ............ शस् - ............ टा - ............

ङे - .............. ङसि - ............ ङस् - ............ सुप् - ............

४. **प्रदत्तासु अवस्थासु जायमानं रूपं लिखत**

राम+औ = ................ राम+अम् = ................ राम+भिस् = ................

राम+आम् = ............... राम+भ्याम् = ............. राम+ङसि = ................

## ५. एकवाक्येन उत्तरं लिखत

(क) पदानि कतिविधानि भवन्ति ?

(ख) सुप्-प्रत्ययाः कस्य अन्ते संयोज्यन्ते ?

(ग) प्रातिपदिकानि केषां योजनेन पदानि भवन्ति ?

(घ) सुप्-प्रत्ययेषु ङित्-प्रत्ययाः के ?

(ङ) 'सर्वनामस्थानम्' इति पदेन केषां बोधो भवति ?

## ६. अधस्तनप्रश्नानामुत्तरं लिखत

(क) कीदृशाः शब्दाः प्रातिपदिकसंज्ञां लभन्ते ?

(ख) राम-शब्दस्य सर्वाणि रूपाणि लिखत ।

(ग) सुप्-प्रत्ययाः के सन्ति ? विभक्तिवचनानि निर्दिश्य लिखत ।

(घ) हलादि-सुब्विभक्तयः काः ?

(ङ) बहुवचन-सुप्प्रत्ययेषु अजादि-हलादिप्रत्ययान् पृथक्कुरुत ।

### अजन्त-पुल्लिङ्गप्रकरणे

# अकारान्त-शब्दाः- १

**अर्थवदधातुरप्रत्ययः प्रातिपदिकम्** १। २। ४५ ॥

**धातुं प्रत्ययं प्रत्ययान्तं च वर्जयित्वा अर्थवच्छब्दस्वरूपं प्रातिपदिकसंज्ञं स्यात्** ॥

योऽर्थवान् शब्दो धातुसंज्ञकः, प्रत्ययसंज्ञकः, प्रत्ययान्तश्च नास्ति, तस्य 'प्रातिपदिकम्' इति संज्ञा भवति। यस्मिन् शब्दे अर्थानुरूपं प्रकृतिप्रत्यययोरन्वेषणं न क्रियते, तादृशः शब्दोऽव्युत्पन्नः कथ्यते। यत्र च प्रकृति-प्रत्यययोः, तयोः अर्थस्य च स्पष्टतया प्रतिपत्तिर्भवति, स शब्दो व्युत्पन्नो भवति। अनेन सूत्रेण अव्युत्पन्नानाम् एव शब्दानां प्रातिपदिकसंज्ञा भवति।

यदा राम-शब्दः कस्यचिद् व्यक्तेः संज्ञारूपेण प्रयुज्यते तदा तस्य अव्युत्पन्नतया अनेन सूत्रेण प्रातिपदिकसंज्ञा भवति।

**कृत्तद्धितसमासाश्च** १। २। ४६ ॥

**कृत्तद्धितान्तौ समासाश्च तथा स्युः** ॥

कृत्-प्रत्ययान्तानां शब्दानाम्, तद्धित-प्रत्ययान्तानां शब्दानाम्, समासप्रक्रियया निष्पन्नानां शब्दानां च 'प्रातिपदिकम्' इति संज्ञा भवति।

पूर्वसूत्रेण अव्युत्पन्नशब्दानाम्, अनेन सूत्रेण च व्युत्पन्नशब्दानां प्रातिपदिकसंज्ञा विधीयते।

**'रमन्ते योगिनः अस्मिन्'** इत्यर्थे रम्-धातोः घञ्प्रत्ययेन निष्पन्नस्य राम-शब्दस्य कृदन्ततया (व्युत्पन्नतया) अनेन सूत्रेण प्रातिपदिकसंज्ञायाम्-

**प्रत्ययः** ३। १। १॥

अस्य अधिकारसूत्रस्य व्याप्तिः तृतीय-चतुर्थ-पञ्चमेषु अध्यायेषु वर्तते। प्रत्ययशब्दश्च अत्र संज्ञारूपेण अधिक्रियते। अतः एतेषु त्रिषु अध्यायेषु विधीयमानाः शब्दाः प्रत्ययसंज्ञका भवन्ति। अस्य अधिकारे विहितत्वात् एव सु, औ, जस् इत्यादयः प्रत्ययाः कथ्यन्ते।

**परश्च** ३। १। २॥

**इत्यधिकृत्य। ङ्यन्तादाबन्तात्प्रातिपदिकाच्च परे स्वादयः प्रत्ययाः स्युः** ॥

अस्मात् सूत्रात् पञ्चमाध्यायस्य समाप्तिपर्यन्तम् (तृतीय-चतुर्थ-पञ्चमेषु अध्यायेषु) ये प्रत्यया वक्ष्यन्ते, ते प्रकृतेः परे भवन्ति । अनेन सर्वे प्रत्ययाः प्रकृतेः अनन्तरम् आगच्छन्ति इति बोध्यते । प्रकृतिश्च धातुरूपा, प्रातिपदिकरूपा च भवितुम् अर्हति ।

**ङ्याप्प्रातिपदिकात् ४ । १ । १ ॥**

अस्मात् सूत्रात् (४ । १ । १) आरभ्य पञ्चमाध्यायस्य समाप्तिपर्यन्तम् अस्य व्याप्तिर्वर्तते । अत्र 'ङी' इत्यनेन ङीप्, ङीष्, ङीन् इति त्रयाणां ग्रहणम् । 'आप्' इत्यनेन च टाप्, चाप्, डाप् इति त्रयाणां स्त्रीप्रत्ययानां ग्रहणम् । यस्य अन्ते 'ङी' भवति स 'ङ्यन्तः', ङीप्-ङीष्-ङीन्प्रत्ययान्तः इत्यर्थः । एवमेव 'आप् अन्ते येषां ते' इति कृत्वा टाप्-चाप्-डाप्प्रत्ययान्ताः शब्दा आबन्ताः कथ्यन्ते ।

अस्य सूत्रस्य अधिकारे (चतुर्थ-पञ्चमयोरध्याययोः) ये केऽपि प्रत्यया वक्ष्यन्ते, ते सर्वे ङ्यन्तात्, आबन्तात्, प्रातिपदिकात् च परे भवन्ति ।

**स्वौजसमौट्छष्टाभ्याम्भिस्ङेभ्याम्भ्यस्ङसिभ्याम्भ्यस्ङसोसाम्ङ्योस्सुप् ४ । १ । २ । ।**

**सु औ जस् इति प्रथमा । अम् औट् शस् इति द्वितीया । टा भ्याम् भिस् इति तृतीया । ङे भ्याम् भ्यस् इति चतुर्थी । ङसि भ्याम् भ्यस् इति पञ्चमी । ङस् ओस् आम् इति षष्ठी । ङि ओस् सुप् इति सप्तमी ॥**

सूत्रेऽस्मिन् एकविंशतेः सुप्-प्रत्ययानां सङ्ग्रहो वर्तते । एते प्रत्ययाः सुबन्तपदसम्पादकाः सन्ति । प्रातिपदिकानाम् अन्ते एतेषां प्रत्ययानां संयोजनेन सुबन्तपदानि निष्पद्यन्ते । सु, औ, जस् इत्यादीन् सुप्प्रत्ययान् यथाक्रमं प्रतिसमूहं त्रीन् त्रीन् कृत्वा सप्तसु समूहेषु विभज्यन्ते । प्रतिसमूहं त्रयाणां प्रत्ययानां सङ्घत्वाद् एते समूहाः त्रिकाः कथ्यन्ते । एतेषां त्रिकाणां नामकरणं पाणिनिपूर्वैः आचार्यैः प्रथमादि सप्तम्यन्तं विहितं वर्तते । तदेव अनुसृत्य पाणिनिना सूत्रेषु प्रथमा-द्वितीयादिशब्दैः एतेषां निर्देशः कृतोऽस्ति ।

'स्वौजसमौट्....' इत्यादीनि चत्वारि सूत्राणि एकीकृत्य फलितोऽर्थः भवति - ङ्यन्तात्, आबन्तात्, प्रातिपदिकात् च परे सु, औ, जस् इत्यादयः प्रत्ययाः (एकविंशतिः सुप्-प्रत्ययाः) स्युः ।

राम-प्रातिपदिकात् 'ङ्याप्प्रातिपदिकात्' इत्यादीनां त्रयाणाम् अधिकारसूत्राणां सहकारेण 'स्वौजसमौट्....' इत्यादिना सूत्रेण स्वादिषु सर्वेषु प्रत्ययेषु एकत्रैव प्राप्तेषु-

**सुपः १ । ४ । १०३ ॥**

**सुपस्त्रीणि त्रीणि वचनान्येकश एकवचनद्विवचनबहुवचनसंज्ञानि स्युः ॥**

सुप्-प्रत्ययानां त्रीणि त्रीणि वचनानि क्रमेण एकवचन-द्विवचन-बहुवचनसंज्ञकानि भवन्ति । अनेन सूत्रेण 'सु, औ, जस्' इत्यादीनां पूर्वोक्तानां त्रिकाणां प्रत्येकम् एकवचनादिसंज्ञाः विधीयन्ते । तेन सु, अम्, टा, ङे, ङसि, ङस्, ङि इति सप्तप्रत्यया एकवचनसंज्ञां लभन्ते । तथैव औ, औट्, भ्याम्, भ्याम्, भ्याम्, ओस्, ओस् इत्येते द्विवचनसंज्ञका भवन्ति । एवमेव जस्, शस्, भिस्, भ्यस्, भ्यस्, आम्, सुप् इत्येते बहुवचनसंज्ञकाः प्रत्ययाः भवन्ति ।

अनेन सुप्-प्रत्ययानाम् उक्तरीत्या प्रतिविभक्ति एकवचनादिसंज्ञायाम्, प्रातिपदिकार्थमात्रस्य विवक्षायाम् राम-प्रातिपदिकात् प्रथमायाः त्रिषु एव प्रत्ययेषु प्राप्तेषु सूत्रम् आह-

**द्व्येकयोर्द्विवचनैकवचने** १। ४। २२ ॥

**द्वित्वैकत्वयोरेते स्तः ॥**

प्रातिपदिकार्थगतायाः एकत्वसङ्ख्याया विवक्षायाम् एकवचनस्य, द्वित्वसङ्ख्याया विवक्षायां द्विवचनस्य च प्रयोगो भवति । वक्तुम् इच्छा इति विवक्षा । यत्र एकस्य विवक्षा भवति, तत्र एकवचनसंज्ञकः प्रत्ययः विधातव्यः, यत्र च द्वयोर्विवक्षा भवति, तत्र द्विवचनसंज्ञकः प्रत्ययः विधातव्यः । यथा- बालकः पठति । बालकौ पठतः ।

अनेन सूत्रेण एकत्वसङ्ख्याया विवक्षायाम् राम-इत्यस्मात् प्रातिपदिकात् प्रथमाया एकवचने सु-प्रत्यये 'राम सु' इति जाते, 'सु' इत्यस्य उकारस्य 'उपदेशेऽजनुनासिक इत्' इति सूत्रेण इत्संज्ञायाम् 'तस्य लोपः' इत्यनेन लोपे 'रामस्' इत्यवस्थायां सुबन्तत्वात् 'सुप्तिङन्तं पदम्' इति सूत्रेण पदसंज्ञायाम् 'ससजुषो रुः' इति सूत्रेण पदान्तस्य सकारस्य स्थाने रुत्वेऽनुबन्धलोपे 'रामर्' इति जाते-

**विरामोऽवसानम्** । १। ४। ११० ॥

**वर्णानामभावोऽवसानसंज्ञः स्यात् । रुत्वविसर्गौ । रामः ॥**

कस्यचिद् वर्णस्य उच्चारणाद् उत्तरं वर्णान्तरस्य उच्चारणस्य अभावः 'अवसानम्' इति संज्ञया व्यवहर्तव्यः ।

अनेन सूत्रेण 'रामर्' इत्यत्र रेफाद् अनन्तरं वर्णान्तरस्य उच्चारणाभावे तस्य अवसानसंज्ञायाम् 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गादेशे 'रामः' इति रूपं सिद्ध्यति । राम-शब्दस्य पदत्वम् आपन्नम् 'रामः' इति रूपं वाक्ये प्रयोगार्हो भवति, यथा- रामः पठति ।

**सरूपाणामेकशेष एकविभक्तौ** १। २। ६४ ॥

**एकविभक्तौ यानि सरूपाण्येव दृष्टानि तेषामेक एव शिष्यते ॥**

समानानि रूपाणि येषां ते 'सरूपाः', सर्वासु विभक्तिषु येषां शब्दानां रूपाणि समानानि सन्ति ते इत्यर्थः । सरूपाणां शब्दानाम् समानविभक्तौ परत एकशेषो भवति इति सूत्रार्थः । 'एकशेषः' इति पदेन अनेकेषु एक एव अवशिष्यते, अन्ये लुप्यन्ते इति बोध्यते । तत्र यः शिष्यते स लुप्तस्य अपि बोधको भवति ।

द्वयोः रामयोः विषये वक्तव्ये 'द्व्येकयोर्द्विवचनैकवचने' इत्यनेन द्विवचनत्वे, अनेन सूत्रेण एकस्य एव राम-शब्दस्य शेषे प्रथमाया द्विवचने औ-प्रत्यये 'राम औ' इति जाते-

**प्रथमयोः पूर्वसवर्णः** ६। १। १०२ ॥

**अकः प्रथमाद्वितीययोरचि पूर्वसवर्णदीर्घ एकादेशः स्यात् । इति प्राप्ते ॥**

अक्-प्रत्याहारस्थवर्णात् प्रथमा-द्वितीया-विभक्तिसम्बन्धिनि अचि परे सति पूर्वपरयोः स्थाने पूर्वस्य सवर्णेषु

दीर्घरूप एकादेशो भवति। पूर्वसवर्णदीर्घविधौ पूर्वस्य अन्त्यवर्णम्, परस्य आद्यवर्णं च विस्थाप्य तयोः स्थाने पूर्ववर्णस्य सवर्णेषु दीर्घरूपवर्ण एकादेशरूपेण स्थाप्यते।

'राम औ' इत्यवस्थायाम् एकादेशवृद्धिं बाधित्वा अनेन सूत्रेण पूर्वपरयोः स्थाने पूर्वसवर्णदीर्घे (अकार-औकारयोः स्थाने आकारादेशे) प्राप्ते-

**नादिचि ६।१।१०४॥**

**आदिचि न पूर्वसवर्णदीर्घः। वृद्धिरेचि। रामौ॥**

अवर्णाद् इच्-प्रत्याहारस्थे वर्णे परे 'प्रथमयोः पूर्वसवर्णः' इत्यनेन प्राप्तः पूर्वसवर्णदीर्घो न भवति।

अनेन सूत्रेण पूर्वसवर्णदीर्घस्य निषेधे 'राम औ' इत्येव अवस्थायाम् 'बाधकाभावे पुनरुत्सर्गशास्त्रस्य प्रवृत्तिः' इति परिभाषया पुनः 'वृद्धिरेचि' इति वृद्धौ, पूर्वपरयोः स्थाने औकार एकादेशे, वर्णयोगे 'रामौ' इति रूपम्।

**बहुषु बहुवचनम् १।४।२१॥**

**बहुत्वविवक्षायां बहुवचनं स्यात्॥**

द्वाभ्याम् अधिकं बहुत्वम्। बहुत्वसङ्ख्याया विवक्षायां बहुवचनसंज्ञक-प्रत्यया भवन्ति। यत्र त्रयाणां तदधिकानां वा विवक्षा वर्तते, तत्र बहुवचनस्य प्रयोगः कर्तव्यः।

'रामश्च रामश्च रामश्च' इत्यर्थे एकशेषाद् राम-प्रातिपदिकाद् बहुत्वविवक्षायाम् अनेन सूत्रेण बहुवचनत्वे, प्रथमाया जस्-प्रत्यये 'राम जस्' इति स्थिते-

**चुटू १।३।७॥**

**प्रत्ययाद्यौ चुटू इतौ स्तः॥**

'चुटू' इत्यनेन 'चवर्ग-टवर्गौ' इत्यर्थः। प्रत्ययस्य आदौ स्थिताः चवर्गीयाः, टवर्गीयाश्च वर्णा इत्-संज्ञका भवन्तीति सूत्रार्थः। अनेन सुप्-प्रत्ययेषु 'जस्' इत्यस्य जकारस्य, 'टा' इत्यस्य टकारस्य च इत्-संज्ञा भवति।

अनेन सूत्रेण जकारस्य इत्संज्ञायाम् 'तस्य लोपः' इत्यनेन लोपे 'राम अस्' इति जाते, प्रत्ययस्य अन्त्यहल्वर्णत्वात् 'हलन्त्यम्' इत्यनेन सकारस्य इत्संज्ञायां प्राप्तायाम्-

**विभक्तिश्च १।४।१०४॥**

**सुप्तिङौ विभक्तिसंज्ञौ स्तः॥**

सुप्-प्रत्ययाः, तिङ्-प्रत्ययाश्च विभक्तिसंज्ञका भवन्ति। सुप्-प्रत्ययाः पूर्वमेव उक्ताः। 'तिङ्' इति तिबादीनां महिङन्तानाम् अष्टादश-प्रत्ययानां संज्ञा, एतेषां निरूपणं तिङन्तप्रकरणे विधास्यते।

अनेन सूत्रेण जस्-प्रत्ययस्य सुप्त्वाद् विभक्तिसंज्ञायाम्-

**न विभक्तौ तुस्माः १ । ३ । ४ ॥**

**विभक्तिस्थास्तवर्गसमा नेताः । इति सस्य नेत्वम् । रामाः ॥**

विभक्तौ विद्यमानाः तवर्गीयवर्णाः, सकारः, मकारश्च इत्-संज्ञका न भवन्ति । सुब्विभक्तीनाम्, तिङ्विभक्तीनाम्, तेषां स्थाने आदिश्यमानानां प्रत्ययानां च अन्ते स्थितानां त्, थ्, द्, ध्, न्, स्, म् इत्येतेषां वर्णानाम् 'हलन्त्यम्' इत्यनेन प्राप्ता इत्संज्ञा अनेन सूत्रेण निषिध्यते । तेन सुब्विभक्तिषु जसादिषु सकारस्य, अमादिषु मकारस्य, भिस्, ङसि, ङि इत्यादीनां स्थाने आदिश्यमानेषु ऐस्, आत्, स्मिन् इत्यादिषु सकार-तकार-नकारादीनां च वर्णानाम् इत्संज्ञाया अभावाद् लोपो न भवति ।

अनेन सूत्रेण सकारस्य इत्संज्ञाया निषेधे 'राम अस्' इत्येव अवस्थायाम्, सवर्णदीर्घं पररूपं च बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे, पूर्वपरयोः अकारयोः स्थाने आकार एकादेशे 'राम् आ स्' इत्यवस्थायाम् वर्णयोगे, सकारस्य रुत्वे, विसर्गे च 'रामाः' इति रूपं सिद्ध्यति । प्रथमाविभक्तेः रूपाणां निष्पादनानन्तरं सम्बोधनस्य रूपाणां सिद्धिप्रक्रियामाह-

**एकवचनं सम्बुद्धिः २ । ३ । ४९ ॥**

**सम्बोधने प्रथमाया एकवचनं सम्बुद्धिसंज्ञं स्यात् ॥**

पराभिमुखस्य स्वाभिमुखीकरणं सम्बोधनम् । सम्बोधनेऽपि प्रथमाविभक्तेरेव प्रयोगो भवतीति कारकप्रकरणस्थेन 'सम्बोधने च' इति सूत्रेण उच्यते । सम्बोधनेऽर्थे विहितस्य प्रथमाया एकवचनस्य 'सु' इति प्रत्ययस्य 'सम्बुद्धिः' इति संज्ञा भवतीति सूत्रार्थः ।

राम-प्रातिपदिकात् सम्बोधनेऽर्थे प्रथमाया एकवचने सु-प्रत्ययेऽनुबन्धलोपे 'रामस्' इत्यवस्थायाम् अनेन सूत्रेण सु-प्रत्ययस्य सम्बुद्धिसंज्ञायाम्-

**यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् १ । ४ । १३ ॥**

**यः प्रत्ययो यस्मात् क्रियते तदादिशब्दस्वरूपं तस्मिन्नङ्गं स्यात् ॥**

यस्मात् शब्दस्वरूपात् (प्रातिपदिकाद् धातोर्वा) यः प्रत्ययो विधीयते, तस्मिन् प्रत्यये परे प्रकृतेः, प्रकृतिः आदौ यस्य तादृशस्य शब्दस्वरूपस्य च 'अङ्गम्' इति संज्ञा भवति ।

'राम स्' इत्यत्र अनेन सूत्रेण 'राम' इत्यस्य अङ्गसंज्ञायाम्-

**एङ्ह्रस्वात् सम्बुद्धेः ६ । १ । ६९ ॥**

**एङन्ताद्ध्रस्वान्ताच्चाङ्गाद्धल्लुप्यते सम्बुद्धेश्चेत् । हे राम ! हे रामौ ! हे रामाः !**

यस्य अङ्गस्य अन्ते एङ्-प्रत्याहारस्थौ (ए, ओ) वर्णौ, ह्रस्वाः (अ, इ, उ, ऋ, ऌ) वर्णाश्च भवन्ति, तादृशाद् अङ्गात् परस्य सम्बुद्धेः अवयवस्य हल्-वर्णस्य लोपो भवति ।

'राम स्' इत्यत्र 'राम' इति ह्रस्वान्ताद् अङ्गात् परस्य सम्बुद्धिसंज्ञकस्य सकाररूप-हल्वर्णस्य अनेन सूत्रेण लोपे 'राम' इति जाते सम्बोधनसूचकस्य 'हे' शब्दस्य पूर्वप्रयोगे 'हे राम' इति रूपं साधु । अत्र हे-शब्दस्य स्थाने अन्यान् सम्बोधनसूचकान् शब्दान् प्रयुज्य ए राम, अयि राम, भो राम इत्यादीनि अपि रूपाणि प्रयोक्तुं शक्यन्ते, अथवा 'राम' इत्येव रूपमपि प्रयोक्तुं शक्यते इति स्मर्तव्यम् ।

### प्रयोगसिद्धिप्रकारः

**रामः**

राम-शब्दस्य व्युत्पन्नपक्षे 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया एकवचने सु-प्रत्ययेऽनुबन्धलोपे 'रामस्' इति जाते, सुबन्तत्वात् 'सुप्तिङन्तं पदम्' इति सूत्रेण पदसंज्ञायाम् 'ससजुषो रुः' इति सूत्रेण सकारस्य रुत्वेऽनुबन्धलोपे 'रामर्' इति जाते 'विरामोऽवसानम्' इति सूत्रेण अवसानसंज्ञायाम् 'खरवसानयोर्विसर्जनीयः' इति सूत्रेण रेफस्य विसर्गे 'रामः' इति रूपं सिद्धम् ।

**पदप्रयोगप्रकारः**

१. रामः लिखति । एकः बालकः लिखति ।

२. रामौ खादतः । द्वौ बालकौ खादतः ।

३. रामाः वदन्ति । त्रयः बालकाः वदन्ति ।

४. छात्राः विद्यालयं गच्छन्ति । चत्वारः बालकाः विद्यालयं गच्छन्ति ।

५. हे राम ! (त्वम्) अत्र आगच्छ । देव ! मां रक्ष ।

# अभ्यासः

१. **सूत्राणि पठित्वा अभ्यासपुस्तिकायाम् अनुलिखत**

(क) अर्थवदधातुरप्रत्ययः प्रातिपदिकम्
(ख) एङ्ह्रस्वात् सम्बुद्धेः
(ग) ङ्याप्प्रातिपदिकात्
(घ) द्व्येकयोर्द्विवचनैकवचने
(ङ) सरूपाणामेकशेष एकविभक्तौ

२. **परस्परं मेलयत**

| | |
|---|---|
| सुपः | प्रातिपदिकसंज्ञा |
| विभक्तिश्च | अङ्गसंज्ञा |
| कृत्तद्धितसमासाश्च | विभक्तिसंज्ञा |
| एकवचनं सम्बुद्धिः | अवसानसंज्ञा |
| यस्मात् प्रत्ययविधिस्तदादि प्रत्ययेऽङ्गम् | एकद्विबहुवचनसंज्ञाः |
| विरामोऽवसानम् | सम्बुद्धिसंज्ञा |

३. **कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) कस्यचित् पुरुषस्य संज्ञारूपेण प्रयुक्तः शब्दः .................... भवति । (व्युत्पन्नः, अव्युत्पन्नः)

(ख) व्युत्पन्नानां शब्दानाम् .................... इति सूत्रेण प्रातिपदिकसंज्ञा भवति । (अर्थवदधातुरप्रत्ययः प्रातिपदिकम्, कृत्तद्धितसमासाश्च)

(ग) जस्-प्रत्ययस्य सकारस्य इत्संज्ञा .................... इति सूत्रेण प्राप्ता । (हलन्त्यम्, चुटू)

(घ) अकः ............ अचि परे पूर्वसवर्णदीर्घः भवति । (प्रथमायाः, प्रथमाद्वितीययोः)

(ङ) सम्बोधनस्य ............... सम्बुद्धिः कथ्यते । (एकवचनम्, बहुवचनम्)

(च) 'परश्च' इति ............... वर्तते । (विधिसूत्रम्, अधिकारसूत्रम्)

४. **अधस्तन-प्रयोगेषु कः प्रत्ययो वर्तते ?**

**यथा–** रामः - सु

रामाः - ...........
बालकौ - ...........

हे देवाः - ............ हे बाल ! - ............

कृष्णः - ............ विद्यालयाः - ............

## ५. अधस्तनकार्याणां विधायकानि सूत्राणि लिखत

(क) पूर्वसवर्णदीर्घः (ख) अव्युत्पन्नशब्दानां प्रातिपदिकसंज्ञा

(ग) प्रत्ययाद्योः चवर्ग-टवर्गयोः इत्संज्ञा (घ) एकशेषः

## ६. एकवाक्येन उत्तरं लिखत

(क) सम्बोधने का विभक्तिर्विधीयते ?

(ख) 'चुटू' इत्यनेन केषां वर्णानाम् इत्संज्ञा भवति ?

(ग) 'हे राम' इत्यत्र सकारस्य लोपः केन सूत्रेण भवति ?

(घ) 'रामौ' इत्यत्र कथं पूर्वसवर्णदीर्घो न भवति ?

(ङ) 'न विभक्तौ तुस्माः' इति सूत्रं किं करोति ?

(च) विभक्तिस्थाः के वर्णा इत्संज्ञका न भवन्ति ?

(छ) 'रामौ' इति प्रयोगे प्रातिपदिक-विभक्ती निर्दिशत ।

(ज) राम-शब्दस्य सम्बोधनस्य एकवचने किं रूपम् ?

## ७. अधस्तनप्रश्नानामुत्तरं लिखत

(क) कीदृशाः शब्दा व्युत्पन्नाः कथ्यन्ते ?

(ख) 'स्वौजसमौट्....' इति सूत्रं पूरयित्वा सुप्प्रत्ययान् दर्शयत ।

(ग) स्वादयः प्रत्ययाः केभ्यः परे भवन्ति ?

(घ) 'विभक्तिश्च' इति सूत्रस्यार्थं लिखत ।

(ङ) 'रामाः' इति प्रयोगस्य ससूत्रं सिद्धिप्रक्रियां दर्शयत ।

(च) 'रामौ, हे राम' इत्यनयोः प्रयोगयोः सिद्धिप्रकारं विलिखत ।

(छ) 'कृत्तद्धितसमासाश्च' इति सूत्रे समासग्रहणस्य प्रयोजनं किम् ?

### अजन्त-पुल्लिङ्गप्रकरणे

# अकारान्त-शब्दाः- २

**अमि पूर्वः** ६ । १ । १०७ ॥

**अकोऽम्यचि पूर्वरूपमेकादेशः । रामम् । रामौ ॥**

अक्-प्रत्याहारस्थाद् वर्णाद् 'अम्' इत्यस्मिन् विद्यमाने अज्वर्णे परे पूर्वपरयोः स्थाने एकं पूर्वरूपं भवति । अनेन सूत्रेण पूर्वसवर्णदीर्घो बाध्यते ।

राम-प्रातिपदिकाद् द्वितीयाया एकवचने अम्-प्रत्यये 'राम अम्' इत्यवस्थायाम्, प्रत्ययान्तस्य मकारस्य 'हलन्त्यम्' इत्यनेन इत्संज्ञायां प्राप्तायाम्, विभक्तिसंज्ञायाम् 'न विभक्तौ तुस्माः' इत्यनेन तन्निषेधे 'राम अम्' इत्येव स्थिते पूर्वसवर्णदीर्घं बाधित्वा अनेन सूत्रेण पूर्वरूप एकादेशे, वर्णयोगे 'रामम्' इति रूपं निष्पद्यते । औट्-प्रत्यये तु टकारस्य अनुबन्धलोपे 'राम औ' इति स्थिते प्रथमाया द्विवचनवत् 'रामौ' इति रूपं सिद्ध्यति ।

**लशक्वतद्धिते** १ । ३ । ८ ॥

**तद्धितवर्जप्रत्ययाद्या लशकवर्गा इतः स्युः ॥**

तद्धितभिन्नानां प्रत्ययानाम् आदौ स्थितानाम् लकार-शकार-कवर्गाणाम् इत्-संज्ञा भवति । तद्धितप्रत्ययं वर्जयित्वा अन्येषां सर्वविधानां प्रत्ययानाम् आदौ स्थितानां ल्, श्, क्, ख्, ग्, घ्, ङ् इति सप्तानां वर्णानाम् अनेन इत्संज्ञायाम् 'तस्य लोपः' इति सूत्रेण लोपो भवति । यथा, सुप्प्रत्यये- शस् (अस्), ङे (ए), ङसि (अस्), ङस् (अस्), ङि (इ) ।

राम-प्रातिपदिकाद् द्वितीयाया बहुवचने शस्-प्रत्यये 'राम शस्' इति जाते, विभक्तिसंज्ञायाम् अनेन सूत्रेण शकारस्य इत्संज्ञायाम्, तस्य लोपे 'राम अस्' इति जाते, सकारस्य प्राप्ताया इत्संज्ञाया निषेधे, सवर्णदीर्घम्, पररूपं च बाधित्वा पूर्वसवर्णदीर्घे 'रामास्' इति जाते-

**तस्माच्छसो नः पुंसि** ६ । १ । १०३ ॥

**पूर्वसवर्णदीर्घात्परो यः शसः सस्तस्य नः स्यात्पुंसि ॥**

'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण कृतात् पूर्वसवर्णदीर्घाद् उत्तरस्य शस्-प्रत्ययावयवस्य सकारस्य स्थाने नकार आदेशो भवति, पुँल्लिङ्गे एव । सूत्रे 'पुंसि' इति निर्देशात् स्त्री-नपुंसकलिङ्गयोः अस्य प्रवृत्तिर्न भवति ।

अनेन सूत्रेण पूर्वसवर्णदीर्घात् (आकारात्) परस्य शस्-प्रत्ययस्य सकारस्य स्थाने नकारादेशे 'रामान्' इत्यवस्थायाम्-

**अट्कुप्वाङ्नुम्व्यवायेऽपि ८ । ४ । २ ॥**

**अट् कवर्गः पवर्ग आङ् नुम् एतैर्व्यस्तैर्यथासम्भवं मिलितैश्च व्यवधानेऽपि रषाभ्यां परस्य नस्य णः समानपदे । इति प्राप्ते ॥**

(रषाभ्याम् = रेफ-षकाराभ्याम् । नः = नकारस्य । णः = णकारः । समानपदे = एकस्मिन् पदे । अट् = प्रत्याहारः, कु = कवर्गः, पु = पवर्गः, आङ् = उपसर्गः, नुम् = अनुस्वारः ।)

यस्मिन् पदे रेफः, षकारो वा वर्तते, तस्मिन् एव पदे रेफ-षकाराभ्यां परे नकारो वर्तते चेत् तयोर्मध्ये अट्, कवर्गः, पवर्गः, आङ्, नुम् इत्येतेषां पृथक् पृथक्, यथासम्भवं मिलितैः वा व्यवधाने सति अपि नकारस्य स्थाने णकारादेशो भवति ।

अनेन सूत्रेण 'रामान्' इत्यत्र रेफात् परस्य आकार-मकार-आकाररूपैः सहयव्यवधानैर्व्यवहितस्य नकारस्य णत्वे प्राप्ते, सुबन्तत्वात् पदसंज्ञायाम्-

**पदान्तस्य ८ । ४ । ३७ ॥**

**नस्य णो न । रामान् ॥**

पदस्य अन्ते स्थितस्य नकारस्य स्थाने णकारादेशो न भवति ।

अनेन सूत्रेण 'रामान्' इत्यत्र पदान्ते स्थितस्य नकारस्य णत्वनिषेधे 'रामान्' इत्येव रूपं सिद्ध्यति ।

**टाङसिङसामिनात्स्याः ७ । १ । १२ ॥**

**अदन्ताट्टादीनामिनादयः स्युः । णत्वम् । रामेण ॥**

ह्रस्वाकारान्ताद् अङ्गाद् उत्तरेषां टा, ङसि, ङस् इत्येतेषां प्रत्ययानां स्थाने क्रमेण इन, आत्, स्य इत्येते आदेशा भवन्ति । 'टा' इत्यस्य स्थाने 'इन', 'ङसि' इत्यस्य स्थाने 'आत्', 'ङस्' इत्यस्य स्थाने 'स्य' इति आदेशाः भवन्ति । एतेषाञ्च अनेकाल्त्वात्सर्वादेशो भवति । एतेषु आदेशेषु स्थानिवद्भावेन प्रत्ययत्वम्, विभक्तित्वं च आयाति, तेन 'आत्' इत्यस्य तकारस्य प्राप्ता इत्संज्ञा 'न विभक्तौ तुस्माः' इत्यनेन निषिध्यते ।

राम-प्रातिपदिकात् तृतीयाया एकवचने टा-प्रत्यये 'राम टा' इति जाते 'चुटू' इत्यनेन टकारस्य इत्संज्ञायाम्, तस्य लोपे 'राम आ' इत्यवस्थायाम्, अङ्गसंज्ञायाम् अनेन सूत्रेण 'टा' इत्यस्य (आकारस्य) स्थाने 'इन' इत्यादेशे 'राम इन' इति जाते 'आद् गुणः' इत्यनेन गुणे 'रामेन' इत्यत्र 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे 'रामेण' इति ।

**सुपि च ७ । ३ । १०२ ॥**

**यञादौ सुपि अतोऽङ्गस्य दीर्घः । रामाभ्याम् ॥**

सुप्-प्रत्ययेषु (अनुबन्धविनिर्मुक्तस्वरूपेषु) येषाम् आदौ यञ्-प्रत्याहारस्थो वर्णो विद्यते, तस्मिन् परे ह्रस्वाकारान्तस्य अङ्गस्य (अन्त्यस्य अकारस्य) दीर्घो भवति । भ्याम्, भिस्, भ्यस् इत्येते यञादि-सुप्प्रत्ययाः सन्ति । 'ङे' इत्यस्य स्थाने 'ङेर्यः' इत्यनेन विधीयमानो 'य' इत्यपि स्थानिवद्भावेन यञादि-सुप्प्रत्ययोऽस्ति ।

तृतीया-द्विवचने भ्याम्-प्रत्यये 'राम भ्याम्' इत्यवस्थायाम्, अङ्गसंज्ञायाम् 'अलोऽन्त्यस्य' इत्यस्य सहकारेण अनेन सूत्रेण अङ्गस्य अन्ते स्थितस्य अकारस्य स्थाने दीर्घादेशे- रामाभ्याम् ।

**अतो भिस ऐस् ७ । १ । ९ ॥**

**अनेकाल्शित्सर्वस्य । रामैः ॥**

ह्रस्वाकारान्ताद् अङ्गाद् उत्तरस्य भिस्-प्रत्ययस्य स्थाने 'ऐस्' इत्यादेशो भवति । स्थानिवद्भावेन विभक्तित्वाद् अन्त्यसकारस्य इत्संज्ञानिषेधे 'ऐस्' इति अनेकाल् आदेशः, तेन सर्वादेशरूपेण स्थानी (भिस्) विस्थाप्यते ।

तृतीया-बहुवचने भिस्-प्रत्यये 'राम भिस्' इति स्थिते, अङ्गसंज्ञायाम् 'सुपि च' इत्यनेन प्राप्तं दीर्घं बाधित्वा अनेन सूत्रेण अकारान्ताद् अङ्गादुत्तरस्य 'भिस्' इत्यस्य स्थाने 'ऐस्' इत्यादेशे, अनेकाल्त्वात् सर्वादेशे 'राम ऐस्' इति जाते, एकादेशवृद्धौ 'रामैस्' इत्यस्य पदसंज्ञायां सकारस्य रुत्वविसर्गे- रामैः ।

**ङेर्यः ७ । १ । १३ ॥**

**अतोऽङ्गात्परस्य ङेर्यादेशः ॥**

ह्रस्वाकारान्ताद् अङ्गाद् उत्तरस्य 'ङे' इत्यस्य स्थाने 'य' इत्यादेशो भवति ।

राम-प्रातिपदिकात् चतुर्थ्या एकवचने ङे-प्रत्यये, तस्य च 'लशक्वतद्धिते' इत्यनेन ङकारस्य इत्संज्ञायां लोपे 'राम ए' इति स्थिते, अङ्गसंज्ञायाम् अनेन सूत्रेण 'ङे' इत्यस्य यादेशे 'राम य' इति जाते आह-

**स्थानिवदादेशोऽनल्विधौ १ । १ । ५६ ॥**

**आदेशः स्थानिवत्स्यान्न तु स्थान्यलाश्रयविधौ । इति स्थानिवत्वात् सुपि चेति दीर्घः । रामाय । रामाभ्याम् ॥**

स्थानिवत् = स्थानम् अस्य अस्ति इति स्थानी, स्थानिना तुल्यं स्थानिवत्, स्थानिधर्मक इत्यर्थः । अनल्विधौ = विधीयते इति विधिः (कार्यम्), अलाश्रयो विधिः अल्विधिः, न अल्विधिः अनल्विधिः तस्मिन् अनल्विधौ, अलाश्रयभिन्ने कार्ये कर्तव्ये इत्यर्थः ।

स्थानिना तुल्यमिति स्थानिवत् । अल्-प्रत्याहारे सर्वेषां वर्णानां अन्तर्भूतत्वाद् 'अल्' इति वर्णस्य संज्ञा । ये धर्मा एकं वर्णम् आश्रयन्ति, ते अलाश्रिताः (वर्णाश्रिताः) धर्माः । अलाश्रितेन धर्मेण जायमानो विधिः- अलाश्रयविधिः, तद्भिन्नविधिः- अनलाश्रयविधिः । एकवर्णमाश्रित्य जायमानानि कार्याणि विहाय अन्येषु स्थान्याश्रयेषु कार्येषु आदेशः स्थानिवद् भवतीति सूत्रार्थः । यत्र कस्यचन स्थानिनः स्थाने कश्चन आदेशो विधीयते, तत्र स्थानिनो वर्णाश्रितान् धर्मान् विहाय अन्ये धर्मा आदेशे अपि आगच्छन्ति । सूत्रे 'अनल्विधौ' इति निर्देशाद् अलाश्रितेन धर्मेण यो विधिः भवति, तस्मिन् विधौ कर्तव्ये आदेशस्य स्थानिवद्भावो न भवतीति ज्ञेयम् ।

अनेन सूत्रेण 'ङे' इति सुप्-प्रत्ययस्य स्थाने आदिष्टस्य 'य' इत्यस्य स्थानिवद्भावेन सुप्त्वे सिद्धे, यञादित्वात् च 'सुपि च' इत्यनेन अदन्तस्य अङ्गस्य दीर्घे 'रामाय' इति साधु । चतुर्थ्याम्, पञ्चम्यामपि द्विवचने भ्याम्-प्रत्यये पूर्ववत् प्रक्रियया- रामाभ्याम् ।

**बहुवचने झल्येत् ७ । ३ । १०३ ॥**

**झलादौ बहुवचने सुप्यतोऽङ्गस्यैकारः । रामेभ्यः । सुपि किम् ? पचध्वम् ॥**

बहुवचनसंज्ञकेषु सुप्-प्रत्ययेषु येषाम् आदौ झल्-प्रत्याहारस्थवर्णो विद्यते, तस्मिन् परे अकारान्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने एकारादेशो भवति । सुप्-प्रत्ययेषु झलादि-बहुवचनप्रत्ययाश्चत्वारः सन्ति- भिस्, भ्यस्, भ्यस्, सुप् । एतेषु परेषु अदन्ताङ्गस्य अन्त्यस्य अकारस्य अनेन सूत्रेण एत्वं भवति ।

चतुर्थी-बहुवचने भ्यस्-प्रत्यये 'राम भ्यस्' इत्यवस्थायाम्, अङ्गसंज्ञायाम् 'सुपि च' इत्यनेन प्राप्तं दीर्घं बाधित्वा 'अलोऽन्त्यस्य' इति सहकारेण अनेन सूत्रेण अङ्गान्तस्य अकारस्य एत्वे 'रामेभ्यस्', पदत्वे, सकारस्य रुत्वविसर्गे- रामेभ्यः । एवं पञ्चम्या बहुवचनेऽपि ज्ञेयम् ।

**वाऽवसाने ८ । ४ । ५६ ॥**

**अवसाने झलां चरो वा । रामात्, रामाद् । रामाभ्याम् । रामेभ्यः । रामस्य ॥**

अवसाने परे झल्-प्रत्याहारस्थवर्णानां स्थाने चर्-प्रत्याहारस्थवर्णा विकल्पेन भवन्ति । चर्त्वविधौ स्थानकृतेन आन्तर्येण यस्य वर्गस्य झल्-वर्णः स्थानी भवति, तस्यैव वर्गस्य प्रथमवर्ण आदिश्यते । प्रायेण वर्गतृतीयस्य स्थाने वर्गप्रथमविधायको विधिरयम् ।

राम-प्रातिपदिकात् पञ्चम्येकवचने ङसि-प्रत्यये, इकार-सकारयोरित्संज्ञायां लोपे 'राम अस्' इति स्थिते, अङ्गसंज्ञायाम् 'टाङसिङसामिनात्स्याः' इत्यनेन 'ङसि' इत्यस्य स्थाने सर्वादेशत्वेन 'आत्' इत्यादेशे, स्थानिवद्भावेन विभक्तित्वात् तकारस्य इत्संज्ञानिषेधे 'राम आत्' इत्यवस्थायाम्, सवर्णदीर्घे 'रामात्' इत्यस्य पदसंज्ञायाम् 'झलां जशोऽन्ते' इत्यनेन जश्त्वेन तकारस्य दकारे 'रामाद्' इत्यवस्थायाम् अवसानसंज्ञायाम् अनेन सूत्रेण वैकल्पिके चर्त्वे, दकारस्य स्थाने तकारादेशे 'रामात्' इति रूपम् । अनेन चर्त्वाभावपक्षे 'रामाद्' इत्यपि रूपं सिद्ध्यति ।

षष्ठ्येकवचने ङस्-प्रत्ययेऽनुबन्धलोपे 'राम अस्' इत्यवस्थायाम् 'टाङसिङसामिनात्स्याः' इति 'ङस्' इत्यस्य स्थाने 'स्य' इत्यादेशे, अनेकाल्त्वात् सर्वादेशे- रामस्य ।

**ओसि च ७ । ३ । १०४ ॥**

**अतोऽङ्गस्यैकारः । रामयोः ॥**

'ओस्' इति सुप्-प्रत्यये परे ह्रस्वाकारान्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने एकारादेशो भवति ।

राम-प्रातिपदिकात् षष्ठ्याः, सप्तम्याश्च द्विवचने ओस्-प्रत्यये 'राम ओस्' इत्यवस्थायाम् एकादेशवृद्धिं बाधित्वा अनेन सूत्रेण अलोऽन्त्यपरिभाषया अङ्गस्य अन्त्यवर्णस्य अकारस्य स्थाने एकारादेशे 'रामे ओस्' इति जाते 'एचोऽयवायावः' इत्यनेन अयादेशे, वर्णसम्मेलने, सकारस्य रुत्वे, विसर्गे च 'रामयोः' इति रूपम् ।

**ह्रस्वनद्यापो नुट् ७ । १ । ५४ ॥**

**ह्रस्वान्तान्नद्यन्तादाबन्ताच्चाङ्गात्परस्यामो नुडागमः ॥**

ह्रस्वान्तात्, नदीसंज्ञकात्, आबन्तात् च अङ्गात् परस्य षष्ठीबहुवचनस्य आम्-प्रत्ययस्य 'नुट् (न्)' इति आगमो भवति । नुट् इत्यस्य टकार इत्संज्ञकः, उकारश्च उच्चारणार्थः, न् इत्येव अवशिष्यते । टित्वाद् 'आद्यन्तौ टकितौ' इत्यनेन आम्-प्रत्ययस्य आद्यवयवत्वे 'नाम्' इति जायते ।

षष्ठ्या बहुवचने आम्-प्रत्यये 'राम आम्' इति स्थिते, सवर्णदीर्घं प्रबाध्य अनेन सूत्रेण ह्रस्वान्ताद् अङ्गाद् उत्तरस्य 'आम्' इत्यस्य नुडागमेऽनुबन्धलोपे, टित्वाद् आद्यवयवत्वे 'राम नाम्' इत्यवस्थायाम् 'सुपि च' इत्यनेन अङ्गान्त्यस्य दीर्घे प्राप्ते-

**नामि ६ । ४ । ३ ॥**

**अजन्ताङ्गस्य दीर्घः । रामाणाम् । रामे । रामयोः । सुपि- एत्वे कृते ॥**

'नाम्' इति नुडागमेन सहितः षष्ठी-बहुवचन-प्रत्ययः, तस्मिन् परे अजन्तस्य अङ्गस्य अन्त्यवर्णस्य दीर्घो भवति । अकारान्त-प्रातिपदिकानां विषये 'सुपि च' इत्यनेन प्राप्तं दीर्घं बाधित्वा अनेन दीर्घो विधीयते ।

अनेन सूत्रेण अङ्गान्त्यस्य अकारस्य दीर्घे 'रामानाम्' इत्यवस्थायाम् 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इत्यनेन नकारस्य णत्वे 'रामाणाम्' इति ।

सप्तम्येकवचने तु ङि-प्रत्ययेऽनुबन्धलोपे 'राम इ' इत्यवस्थायां 'आद् गुणः' इत्यनेन पूर्वपरयोः स्थाने एकारगुणे, वर्णयोगे- रामे ।

**आदेशप्रत्यययोः ८ । ३ । ५९ ॥**

**इणकुभ्यां परस्यापदान्तस्यादेशः प्रत्ययावयवश्च यः सस्तस्य मूर्धन्यादेशः । ईषद्विवृतस्य सस्य तादृश एव षः । रामेषु । एवं कृष्णादयोऽप्यदन्ताः ॥**

इण्-कवर्गाभ्याम् उत्तरस्य अपदान्तस्य आदेशरूपस्य, प्रत्ययस्य अवयवरूपस्य च सकारस्य स्थाने मूर्धन्यः (षकारः) आदेशो भवति । अनेन सकारस्य स्थाने मूर्धस्थानिषु सर्वेषु (ऋटुरषेषु) वर्णेषु प्राप्तेषु गुणकृतेन आन्तर्येण ईषद्विवृतप्रयत्नकस्य सकारस्य स्थाने समानप्रयत्नवान् षकार आदेशो भवति ।

राम-प्रातिपदिकात् सप्तम्या बहुवचने सुप्-प्रत्ययेऽनुबन्धलोपे 'राम सु' इति स्थिते, अङ्गसंज्ञायाम् 'बहुवचने झल्येत्' इत्यनेन अङ्गान्त्यस्य अकारस्य एत्वे कृते 'रामे सु' इत्यवस्थायाम्, एकाररूपाद् इण्-प्रत्याहाराद् उत्तरस्य प्रत्ययावयवस्य सकारस्य स्थाने अनेन सूत्रेण षत्वे 'रामेषु' इति रूपं सिद्धम् ।

कृष्ण, बाल, बालक, विद्यालय इत्यादीनामपि सर्वेषाम् अकारान्त-पुँल्लिङ्ग-प्रातिपदिकानां रूपसिद्धिप्रक्रिया राम-शब्दवदेव भवतीति बोध्यम् । टा-आम्-प्रत्यययोः णत्वविषये विशेषतः ध्यानं देयम् ।

## प्रयोगसिद्धिप्रकारः

### रामान्

प्रातिपदिकसंज्ञकाद् राम-शब्दाद् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण द्वितीयाया बहुवचने शस्-प्रत्यये 'राम शस्' इति जाते, प्रत्ययस्थस्य शकारस्य 'लशक्वतद्धिते' इति सूत्रेण इत्संज्ञायाम् 'तस्य लोपः' इत्यनेन इत्संज्ञकस्य लोपे 'राम अस्' इति जाते, पररूपं बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण पूर्वसवर्णदीर्घे, द्वयोरकारयोः स्थाने आकार एकादेशे 'रामास्' इति जाते, 'तस्माच्छसो नः पुंसि' इति सूत्रेण सकारस्य नत्वे 'रामान्' इति जाते 'अट्कुप्वाङ्नुम्व्यवायेऽपि' इति सूत्रेण नकारस्य णत्वे प्राप्ते, पदसंज्ञायाम् 'पदान्तस्य' इति सूत्रेण णत्वनिषेधे 'रामान्' इति रूपं सिद्धम् ।

### पदप्रयोगप्रकारः

१. भक्तः रामं भजति । अहं देवं नमामि ।

२. सः पुत्रौ रक्षति । छात्रः पाठान् पठति ।

३. रामेण रावणः हतः । एषः कर्णाभ्यां शृणोति ।

४. रामाय नमः । सा बालाय दुग्धं यच्छति ।

५. नदी हिमालयात् प्रभवति । वृक्षेभ्यः पत्राणि पतन्ति ।

६. लक्ष्मणः रामस्य अनुजः अस्ति । दर्शकः बालकानां क्रीडां पश्यति ।

७. छात्राः विद्यालये पठन्ति । ते आसन्दे तिष्ठन्ति ।

## अभ्यासः

१. **सूत्राणि पठित्वा अभ्यासपुस्तिकायाम् अनुलिखत**

(क) अट्कुप्वाङ्नुम्व्यवायेऽपि (ख) अतो भिस ऐस्

(ग) टाङसिङसामिनात्स्याः (घ) आदेशप्रत्यययोः

(ङ) बहुवचने झल्येत्

२. **परस्परं मेलयत**

| | |
|---|---|
| वाऽवसाने | षत्वम् |
| सुपि च | पूर्वरूपम् |
| ओसि च | स्थानिवद्भावः |
| आदेशप्रत्यययोः | चर्त्वम् |
| स्थानिवदादेशोऽनल्विधौ | एत्वम् |
| अमि पूर्वः | दीर्घः |

३. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) रेफ-षकाराभ्यां परस्य ..................... नकारस्य णत्वं भवति । (पदान्तस्य, अपदान्तस्य)

(ख) .............. अङ्गात् परस्य 'ङे' इत्यस्य यादेशो भवति । (अदन्तात्, अजन्तात्)

(ग) 'तस्माच्छसो नः पुंसि' इति सूत्रम् ..................... प्रवर्तते । (पुँल्लिङ्गे, स्त्रीलिङ्गे)

(घ) 'ह्रस्वनद्यापो नुट्' इत्यनेन ..................... नुड् विधीयते । (अङ्गस्य, प्रत्ययस्य)

(ङ) 'रामाणाम्' इत्यत्र ............... इति सूत्रेण दीर्घो भवति । (नामि, सुपि च)

(च) अकारान्ताद् अङ्गात् परस्य ङसि-प्रत्ययस्य स्थाने ............... आदिश्यते । (आत्, स्य)

(छ) 'लशक्वतद्धिते' इति ..................... वर्तते । (विधिसूत्रम्, संज्ञासूत्रम्)

४. **एकवाक्येन उत्तरं लिखत**

(क) केभ्यः परस्य आम्-प्रत्ययस्य नुडागमो भवति ?

(ख) 'लशक्वतद्धिते' इत्यनेन केषाम् इत्संज्ञा भवति ?

(ग) 'रामान्' इत्यत्र केन सूत्रेण दीर्घो भवति ?

(घ) 'रामम्' इत्यत्र पूर्वरूपविधायकं सूत्रं किम् ?

(ङ) कस्मात् परस्य शस्-प्रत्ययस्य सकारस्य नत्वं भवति ?

(च) 'अतो भिस ऐस्' इति सूत्रं किं करोति ?

(छ) 'रामेण' इत्यत्र केन सूत्रेण इनादेशः क्रियते ।

(ज) राम-शब्दात् सुप्-प्रत्यये किं रूपं जायते ?

## ५. अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत

| प्रयोगः | प्रातिपदिकम् | विभक्तिः | वचनम् | प्रत्ययः |
|---|---|---|---|---|
| रामम् | राम | द्वितीया | एकवचनम् | अम् |
| रामेण | ............ | ............ | ............ | ............ |
| बालकैः | ............ | ............ | ............ | ............ |
| पुत्राणाम् | ............ | ............ | ............ | ............ |
| कृष्णे | ............ | ............ | ............ | ............ |
| विप्राय | ............ | ............ | ............ | ............ |
| व्याघ्रात् | ............ | ............ | ............ | ............ |

## ६. प्रश्नानामुत्तरं लिखत

(क) नकारस्य णत्वं कस्याम् अवस्थायां भवति ?

(ख) अकारान्त-पुँल्लिङ्ग-प्रातिपदिकेषु अङ्गसंज्ञाप्रयुक्त-कार्याणि कानि ?

(ग) राम-बालशब्दयोः रूपेषु कुत्र कुत्र का भिन्नता विलोक्यते ? सकारणं लिखत ।

(घ) 'ङेर्यः' इति सूत्रस्य अर्थं लिखत ।

(ङ) अनल्विधौ स्थानिवद्भावविधायकं सूत्रं विलिख्य तस्य अर्थमपि निर्दिशत ।

## ७. अधस्तन-प्रयोगाणां ससूत्रं सिद्धिपथं दर्शयत

(क) रामम् (ख) रामेण (ग) रामैः

(घ) रामात् (ङ) रामाय (च) रामाणाम्

## ८. विद्यालय-शब्दस्य सर्वासु विभक्तिषु रूपाणि लिखत ।

### अजन्त-पुल्लिङ्गप्रकरणे

# अदन्त-सर्वनामशब्दाः

**सर्वनामशब्दाः**

सर्व, विश्व, उभ, उभय, कतर, ततर, यतर, एकतर, कतम, ततम, यतम, एकतम, अन्य, अन्यतर, इतर, त्वत्, त्व, नेम, सम, सिम, पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर, स्व, अन्तर, त्यद्, तद्, यद्, एतद्, इदम्, अदस्, एक, द्वि, युष्मद्, अस्मद्, भवतु (भवत्), किम् ।

**सर्वादीनि सर्वनामानि १ । १ । २७ ॥**

**सर्व विश्व उभ उभय डतर डतम अन्य अन्यतर इतर त्वत् त्व नेम सम सिम । ग.सू. (पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्) ग.सू. (स्वमज्ञातिधनाख्यायाम्) ग.सू. (अन्तरं बहिर्योगोपसंव्यानयोः) त्यद् तद् यद् एतद् इदम् अदस् एक द्वि युष्मद् अस्मद् भवतु किम् ॥**

सर्व-शब्द आदिर्येषां तानि सर्वादीनि, सर्वादिगणे पठिताः शब्दा इत्यर्थः । सर्वादिगणे पठितानां शब्दानाम्, तदन्तशब्दानां च सर्वनामसंज्ञा भवतीति सूत्रार्थः । तत्र सर्वेषां यानि नामानि तानि सर्वनामानि इति अन्वर्थसंज्ञाविज्ञानात् सर्वादीनां सर्वार्थवाचकत्वे एव सर्वनामसंज्ञा भवति ।

सर्वादिगणे आहत्य एकचत्वारिंशत् शब्दा निर्दिष्टाः सन्ति । गणेऽस्मिन् चतुर्विंशतिः शब्दाः, द्वौ प्रत्ययौ, त्रीणि गणसूत्राणि च विद्यन्ते । एतेषु सर्वनामशब्देषु अजन्तानाम् अजन्तप्रकरणे, हलन्तानां च हलन्तप्रकरणे निरूपणं क्रियते ।

**सुप्-प्रत्ययैः अदन्त-सर्वनामप्रातिपदिकानां रूपसाधनप्रक्रियायां पुँल्लिङ्गे सर्वनामसंज्ञाप्रयुक्तकार्याणि–**

- जस्-प्रत्ययस्य स्थाने 'शी (ई)' आदेशः । (जसः शी)
- ङे-प्रत्ययस्य स्थाने 'स्मै' आदेशः । (सर्वनाम्नः स्मै)
- ङसि-प्रत्ययस्य स्थाने 'स्मात्' आदेशः । (ङसिङ्योः स्मात्स्मिनौ)
- आम्-प्रत्ययस्य 'सुट् (स्)' आगमः । (आमि सर्वनाम्नः सुट्)
- ङि-प्रत्ययस्य स्थाने 'स्मिन्' आदेशः । (ङसिङ्योः स्मात्स्मिनौ)

अदन्तसर्वनामशब्दानां पुँल्लिङ्गे रूपसिद्धिप्रक्रिया जस्, ङे, ङसि, आम्, ङि इत्येतेषु प्रत्ययेषु एव विभिद्यते। शेषविभक्तिषु राम-शब्दवदेव रूपाणि भवन्ति।

सर्व-शब्दस्य अव्युत्पन्नपक्षे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इत्यनेन प्रातिपदिकसंज्ञा विधीयते। तस्मात् सु-प्रत्यये रामवत् प्रक्रियया 'सर्वः' इति रूपं सिद्ध्यति। औ-प्रत्ययेऽपि रामवत्- सर्वौ। जस्-प्रत्यये तु विशेषो वर्तते-

**जसः शी ७।१।१७॥**

**अदन्तात्सर्वनाम्नो जसः शी स्यात्। अनेकाल्त्वात्सर्वादेशः। सर्वे॥**

ह्रस्वाकारान्तात् सर्वनामसंज्ञकाद् अङ्गात् परस्य जस्-प्रत्ययस्य स्थाने 'शी' इत्यादेशो भवति। 'शी' इति आदेशस्य अनेकाल्त्वात् 'जस्' इति सम्पूर्णस्य स्थानिनः स्थाने अयम् आदेशो भवति, न तु शित्वात्, आदेशात्प्राक् 'शी' इत्यस्य प्रत्ययत्वाऽभावात्।

सर्व-प्रातिपदिकाद् जस्-प्रत्ययेऽनुबन्धलोपे 'सर्व अस्' इत्यवस्थायाम् 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्व-शब्दस्य सर्वनामसंज्ञायाम् अनेन सूत्रेण 'जस्' इत्यस्य सर्वादेशत्वेन 'शी' इत्यादेशे 'सर्व शी' इति जाते, स्थानिवद्भावेन विभक्तित्वात् शकारस्य इत्संज्ञायां लोपे 'सर्व ई', पूर्वपरयोः एकारगुणे 'सर्वे' इति। एवमेव विश्वादिशब्दानामपि जस्-प्रत्यये सर्ववदेव 'विश्वे' इत्यादीनि रूपाणि भवन्ति। अमादिप्रत्ययेषु रामवत् सर्वम् इत्यादीनि रूपाणि ज्ञेयानि।

**सर्वनाम्नः स्मै ७।१।१४॥**

**अतः सर्वनाम्नो ङेः स्मै। सर्वस्मै॥**

ह्रस्वाकारान्तात् सर्वनामसंज्ञकाद् अङ्गात् परस्य ङे-प्रत्ययस्य स्थाने 'स्मै' इत्यादेशो भवति।

चतुर्थ्येकवचने ङे-प्रत्ययेऽनुबन्धलोपे 'सर्व ए', सर्वनामसंज्ञायाम् 'ङेर्यः' इत्यनेन प्राप्तं यादेशं बाधित्वा अनेन सूत्रेण 'स्मै' आदेशे 'सर्वस्मै' इति रूपम्। एवं विश्वस्मै, उभयस्मै, कतरस्मै, अन्यस्मै इत्यादि।

**ङसिङ्योः स्मात्स्मिनौ ७।१।१५॥**

**अतः सर्वनाम्न एतयोरेतौ स्तः। सर्वस्मात्॥**

अकारान्तात् सर्वनामसंज्ञकाद् अङ्गात् परस्य ङसि-प्रत्ययस्य स्थाने 'स्मात्' इति, ङि-प्रत्ययस्य स्थाने च 'स्मिन्' इत्येतौ आदेशौ भवतः। 'ङसि' इत्यस्य विषये 'टाङसिङसामिनात्स्याः' इत्यनेन प्राप्तं आदादेशं बाधित्वा अनेन स्मादादेशो विधीयते।

सर्व ङसि - सर्व अस् इत्यवस्थायां सर्वनामसंज्ञायाम्, आदादेशं बाधित्वा अनेन सूत्रेण 'स्मात्' इत्यादेशे 'सर्वस्मात्' इति जाते, पदान्तस्य तकारस्य जश्त्वेन दकारे, अवसानसंज्ञायाम् 'वाऽवसाने' इत्यनेन दकारस्य वैकल्पिके चर्त्वे 'सर्वस्मात्' इति। चर्त्वाभावे 'सर्वस्माद्' इत्यपि सिद्ध्यति। एवं विश्वस्मात्, इतरस्मात्, त्वस्मात् इत्यादि।

**आमि सर्वनाम्नः सुट् ७ । १ । ५२ ॥**

**अवर्णान्तात्परस्य सर्वनाम्नो विहितस्यामः सुडागमः । एत्वषत्वे । सर्वेषाम् । सर्वस्मिन् । शेषं रामवत् । एवं विश्वादयोऽप्यदन्ताः ॥ उभशब्दो नित्यं द्विवचनान्तः । उभौ २ । उभाभ्याम् ३ । उभयोः २ । तस्येह पाठोऽकजर्थः । उभयशब्दस्य द्विवचनं नास्ति । उभयः । उभये । उभयम् । उभयान् । उभयेन । उभयैः । उभयस्मै । उभयेभ्यः । उभयस्मात् । उभयेभ्यः । उभयस्य । उभयेषाम् । उभयस्मिन् । उभयेषु । डतरडतमौ प्रत्ययौ, प्रत्ययग्रहणे तदन्तग्रहणमिति तदन्ता ग्राह्याः ॥ नेम इत्यर्धे । समः सर्वपर्यायस्तुल्यपर्यायस्तु न, यथासंख्यमनुदेशः समानामिति ज्ञापकात् ॥**

अवर्णान्ताद् अङ्गात् परस्य सर्वनामसंज्ञकात् शब्दाद् विहितस्य षष्ठी-बहुवचनस्य आम्-प्रत्ययस्य 'सुट्' इति आगमो भवति । विधिरयं नुडागमस्य अपवादो वर्तते । सुट् इत्यस्य टकार इत्संज्ञकः, उकारश्च उच्चारणार्थः, स् इत्येव अवशिष्यते । टित्वात् स्थानिनः आद्यवयवत्वे आम्-प्रत्ययः 'साम्' इति भवति, तस्मिन् च झलादि-बहुवचनवद् व्यवहारो भवति, अर्थात् कृते सुडागमे यदि अङ्गम् अकारान्तम् अस्ति चेत् तस्य अन्त्यवर्णस्य 'बहुवचने झल्येत्' इत्यनेन एत्वं भवति । एत्वे कृते च तस्य इण्-प्रत्याहारस्थत्वात् तस्मादव्यवहितोत्तरस्य प्रत्ययावयवभूतस्य सकारस्य 'आदेशप्रत्यययोः' इत्यनेन षत्वं भवति ।

षष्ठीबहुवचने 'सर्व आम्' इत्यत्र नुडागमं बाधित्वा अनेन सूत्रेण आम्-प्रत्ययस्य सुडागमेऽनुबन्धलोपे, टित्वाद् आद्यवयवत्वे 'सर्व साम्' इति जाते, 'बहुवचने झल्येत्' इत्यनेन अङ्गान्त्यस्य ह्रस्वाकारस्य एत्वे 'सर्वे साम्' इति जाते, 'आदेशप्रत्यययोः' इत्यनेन सकारस्य षत्वे 'सर्वेषाम्' इति सिद्ध्यति । एवं विश्वेषाम्, अन्येषाम्, समेषाम् इत्यादि ।

सप्तम्येकवचने ङे-प्रत्ययेऽनुबन्धलोपे 'सर्व इ', सर्वनामसंज्ञायाम् 'ङसिङ्योः स्मात्स्मिनौ' इत्यनेन 'स्मिन्' इत्यादेशे 'सर्वस्मिन्' इति रूपं निष्पद्यते । एवं विश्वेस्मिन्, कतमस्मिन्, अन्यतरस्मिन् इत्यादि ।

उभ-शब्दो नित्यं द्विवचनान्तः, द्विवचनप्रत्ययेषु च सर्वनामसंज्ञाप्रयुक्तकार्यस्य अभावात् तस्य अत्र पाठः किमर्थ इति जिज्ञासायाम् आह- तस्य इह पाठोऽकजर्थः । तस्य = उभ-शब्दस्य, इह = सर्वादिगणे, पाठः = प्रविष्टिः, अकजर्थः = अकच्-प्रत्ययविधानाय । 'अव्ययसर्वनाम्नामकच् प्राक्टेः' इति सूत्रेण अकच्-प्रत्ययं विधाय 'उभक' शब्दनिर्माणाय उभ-शब्दस्य सर्वादिगणे पाठ आवश्यक इत्यर्थः ।

उभ-शब्दात् तयप्-प्रत्यये तस्य च अयजादेशे निष्पन्नः, उभय-शब्दो द्विवचने न प्रयुज्यते, एक-बहुवचने एव तस्य रूपाणि जायन्ते । 'उभयः' इत्यस्य 'द्वौ अवयवौ यस्य' इत्यर्थः ।

सर्वादिगणे पठितौ डतर, डतम इत्येतौ प्रत्ययौ वर्तेते, एतयोश्च 'प्रत्ययग्रहणे तदन्तग्रहणम्' इति परिभाषया डतरच्-डतमच्प्रत्ययान्ताः कतरादिशब्दा गृह्यन्ते । अत्र पठितो नेम-शब्दः अर्धेऽर्थे वर्तते ।

सम-शब्दः 'सर्वम्' इत्यर्थे, 'तुल्यम्' इत्यर्थे च प्रयुज्यते । सर्वादिगणे पठितः सम-शब्दः सर्वार्थको वर्तते, न तु तुल्यार्थक इति स्मर्तव्यम् । यदि तुल्यार्थकोऽपि सम-शब्दस्य सर्वनामसंज्ञा स्यात् तर्हि 'यथासङ्ख्यमनुदेशः

समानाम्' इति सूत्रे 'समानाम्' इति निर्देशः असङ्गतः स्यात्। अत अत्र पठितः समशब्दः सर्वार्थको ज्ञेयः। उक्तानां शब्दानां रूपसिद्धिप्रक्रिया सर्वशब्दवदेव ज्ञातव्या।

**पूर्वपरावरदक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम् १।१।३४॥**

**एतेषां व्यवस्थायामसंज्ञायां च सर्वनामसंज्ञा गणसूत्रात्सर्वत्र या प्राप्ता सा जसि वा स्यात्। पूर्वे, पूर्वाः। असंज्ञायां किम्? उत्तराः कुरवः। स्वाभिधेयापेक्षावधिनियमो व्यवस्था। व्यवस्थायां किम्? दक्षिणा गाथकाः, कुशला इत्यर्थः॥**

पूर्व, पर, अवर, दक्षिण, उत्तर, अपर, अधर इत्येतेषां सप्तानां शब्दानां सर्वादिगणे पाठात् सर्वत्र नित्यं सर्वनामसंज्ञा प्राप्ता वर्तते, सा संज्ञा जस्-प्रत्यये परे विकल्पेन भवति, संज्ञाभिन्ने व्यवस्थायाम् अर्थे द्योत्ये च। व्यवस्था = मर्यादा। पूर्वादयः शब्दा यदा स्थलमर्यादाम्, (उपरि, अधः, वामतः, दक्षिणतः इत्यादि), कालमर्यादाम् (प्राक्तनः, पश्चात् इत्यादि), दिङ्मर्यादाम् (पूर्वः, पश्चिमः, उत्तरः, दक्षिणः इत्यादि) च दर्शयन्ति, तदा एव सर्वनामसंज्ञका भवन्ति। यदि एते शब्दा मर्यादाभिन्नेषु अर्थेषु प्रयुज्यन्ते, तदा सर्वनामसंज्ञां न लभन्ते। 'दक्षिणा गाथकाः' इत्यत्र प्रयुक्तः 'दक्षिणाः' इति पदस्य 'कुशलाः' इत्यर्थः। कुशल-पर्यायस्य दक्षिण-शब्दस्य व्यवस्थाभिन्नेऽर्थे प्रयुक्तत्वात् अत्र तस्य सर्वनामसंज्ञा न भवति। अतः रामशब्दवत् तस्य 'दक्षिणाः' इति रूपं भवति। पूर्वादिशब्दा यदि कस्यचित् संज्ञारूपेण प्रयुज्यन्ते, तदा अपि तेषां सर्वनामसंज्ञा न भवतीति ज्ञेयम्। 'उत्तराः कुरवः' इत्यत्र उत्तर-शब्दः सुमेरूपर्वतस्य उत्तरदिशि विद्यमानानां कुरूणां कश्चन प्रदेशस्य संज्ञारूपेण प्रयुक्तोऽस्ति। संज्ञारूपेण प्रयुक्तत्वात् सर्वनामसंज्ञाया अभावे 'उत्तराः' इति रूपम्, न तु 'उत्तरे' इति।

उत्तर जस् - उत्तर अस्, अनेन सर्वनामसंज्ञापक्षे- उत्तर ई (जसः शी) - उत्तरे। सर्वनामसंज्ञाभावे- उत्तर अस् - उत्तरास् - उत्तरार् - उत्तराः।

**स्वमज्ञातिधनाख्यायाम् १।१।३५॥**

**ज्ञातिधनान्यवाचिनः स्वशब्दस्य प्राप्ता संज्ञा जसि वा। स्वे, स्वाः, आत्मीयाः, आत्मान इति वा। ज्ञातिधनवाचिनस्तु स्वाः, ज्ञातयोऽर्था वा॥**

ज्ञातिभिन्ने, धनभिन्ने च अर्थे वर्तमानस्य स्व-शब्दस्य सर्वादिगणे पाठात् सर्वत्र नित्यं सर्वनामसंज्ञा प्राप्ता वर्तते, सा संज्ञा जस्-प्रत्यये परे विकल्पेन भवति। स्व-शब्दः आत्मा, आत्मीयः, ज्ञातिः (बान्धवः), धनम् इत्यादिषु अर्थेषु प्रयुज्यते। 'ज्ञातिः', 'धनम्' इत्येतौ द्वौ अर्थौ विहाय अन्येषु अर्थेषु स्व-शब्दस्य जस्-विभक्तौ विकल्पेन, अन्यासु विभक्तिषु च नित्यं सर्वनामसंज्ञा भवति।

स्व जस् - स्व अस् - स्व शी - स्व ई - स्वे। सर्वनामसंज्ञाभावे- स्व जस् - स्व - अस् - स्वास् - स्वार् - स्वाः। 'ज्ञातयः' इत्यर्थे 'अर्थाः' इत्यर्थे च प्रयुक्तस्य स्व-शब्दस्य सर्वनामसंज्ञाभावेन प्रथमाबहुवचने 'स्वाः' इत्येव रूपं भवति।

**अन्तरं बहिर्योगोपसंव्यानयोः १ । १ । ३६ ॥**

**बाह्ये परिधानीये चार्थेऽन्तरशब्दस्य प्राप्ता संज्ञा जसि वा । अन्तरे, अन्तरा वा गृहाः, बाह्या इत्यर्थः । अन्तरे, अन्तरा वा शाटकाः, परिधानीया इत्यर्थः ॥**

अन्तर-शब्दोऽनेकार्थको वर्तते । बाह्यः (बहिः स्थितः), अन्तर्वस्त्रम् (परिधानीयम्), मध्यः इत्यादिषु अर्थेषु अन्तर-शब्दः प्रयुज्यते । एतेषु बाह्ये, परिधानीये च अर्थे प्रयुक्तस्य अन्तर-शब्दस्य गणसूत्रे पाठात् सर्वनामसंज्ञा भवति । सा च संज्ञा जस्-प्रत्यये परे विकल्पेन भवतीति सूत्रार्थः ।

अन्तर जस् - अन्तर अस् - अन्तर शी - अन्तर ई - अन्तरे । पक्षान्तरे- अन्तर जस् - अन्तर - अस् - अन्तरास् - अन्तरार् - अन्तराः । अन्येषु अर्थेषु वर्तमानस्य अन्तर-शब्दस्य तु सर्वनामसंज्ञा न भवति ।

**पूर्वादिभ्यो नवभ्यो वा ७ । १ । १६ ॥**

**एभ्यो ङसिङ्योः स्मात्स्मिनौ वा स्तः । पूर्वस्मात्, पूर्वात् । पूर्वस्मिन्, पूर्वे । एवं परादीनाम् । शेषं सर्ववत् ॥**

पूर्वादिभ्यो नवभ्यः (अन्तरान्तेभ्यः) सर्वनामशब्देभ्य उत्तरयोः 'ङसि', 'ङि' इत्येतयोः प्रत्यययोः स्थाने क्रमेण 'स्मात्', 'स्मिन्' इत्येतौ आदेशौ विकल्पेन भवतः । लब्धसर्वनामसंज्ञकेषु पूर्वादिशब्देषु एव अस्य सूत्रस्य प्रवृत्तिर्भवति । 'ङसिङ्योः स्मात्स्मिनौ' इत्यनेन नित्यं प्राप्ते अनेन सूत्रेण विकल्प्यते ।

पूर्व ङसि - पूर्व अस् - पूर्व स्मात् - पूर्वस्मात् - पूर्वस्माद् - पूर्वस्मात्/पूर्वस्माद् । अन्ये पक्षे- पूर्व ङसि - पूर्व अस् - पूर्व आत् (टाङसिङसामिनात्स्याः) - पूर्वात्/पूर्वाद् ।

पूर्व ङि - पूर्व इ - पूर्व स्मिन् - पूर्वस्मिन् । अन्ये पक्षे- पूर्व ङि - पूर्व इ - पूर्वे । एवमेव प्रक्रियया अपरादीनां शब्दानाम् अपि रूपाणि सिद्धचन्ति ।

**पूर्वादि-नवशब्दानां ङसि-प्रत्यये, ङि-प्रत्यये च रूपाणि**

| **प्रातिपदिकम्** | **ङसि-प्रत्यये** | **ङि-प्रत्यये** |
|---|---|---|
| पूर्व | पूर्वस्मात्-द्/पूर्वात्-द् | पूर्वस्मिन्/पूर्वे |
| पर | परस्मात्-द्/परात्-द् | परस्मिन्/परे |
| अवर | अवरस्मात्-द्/अवरात्-द् | अवरस्मिन्/अवरे |
| दक्षिण | दक्षिणस्मात्-द्/दक्षिणात्-द् | दक्षिणस्मिन्/दक्षिणे |
| उत्तर | उत्तरस्मात्-द्/उत्तरात्-द् | उत्तरस्मिन्/उत्तरे |
| अपर | अपरस्मात्-द्/अपरात्-द् | अपरस्मिन्/अपरे |
| अधर | अधरस्मात्-द्/अधरात्-द् | अधरस्मिन्/अधरे |
| स्व | स्वस्मात्-द्/स्वात्-द् | स्वस्मिन्/स्वे |
| अन्तर | अन्तरस्मात्-द्/अन्तरात्-द् | अन्तरस्मिन्/अन्तरे |

**तृतीया समासे १।१।३०॥**

**अत्र सर्वनामता न स्यात्। मासपूर्वाय। तृतीयासमासार्थवाक्येऽपि न। मासेन पूर्वाय।**

**द्वन्द्वे च १।१।३१**

**द्वन्द्वे उक्तसंज्ञा न। वर्णाश्रमेतराणाम्।**

**विभाषा जसि १।१।३२॥**

**जसाधारं यत्कार्यं शीभावाख्यं तत्र कर्तव्ये द्वन्द्वे उक्तसंज्ञा वा स्यात्। वर्णाश्रमेतरे, वर्णाश्रमेतराः।**

**प्रथमचरमतयाल्पार्द्धकतिपयनेमाश्च।१।१।३३।**

**एते जसि उक्तसंज्ञा वा स्युः। प्रथमे, प्रथमाः॥ तयः प्रत्ययः। द्वितये, द्वितयाः। शेषं रामवत्॥ नेमे, नेमाः। शेषं सर्ववत्॥**

**तीयस्य ङित्सु वा (१७)। द्वितीयस्मै, द्वितीयायेत्यादि। एवं तृतीयः॥ निर्जरः॥**

प्रथम, चरम, अल्प, अर्ध, कतिपय, नेम इत्येते शब्दाः, तयप्-प्रत्ययान्तशब्दाश्च जस्-प्रत्यये परे विकल्पेन सर्वनामसंज्ञका भवन्ति। 'अर्धम्' इत्यर्थको नेम-शब्दः सर्वादिगणे पठितोऽस्ति, अतः तस्य सर्वत्र नित्यं सर्वनामसंज्ञायां सिद्धायां जस्विभक्तौ अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञा विधीयते। तदन्ये प्रथम, चरम, अल्प, अर्ध, कतिपय इत्येते शब्दाः, तयप्-प्रत्ययान्तशब्दाश्च सर्वादिगणे न विद्यन्ते, अतः जस्-विभक्तौ परतः एव एते शब्दा अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञां लभन्ते। जस्विभक्तौ सर्वनामसंज्ञापक्षे सर्वशब्दवत्, पक्षान्तरे, अन्यासु विभक्तिषु च रामशब्दवद् एतेषां शब्दानां रूपाणि जायन्ते। प्रथमः = आदिमः, चरमः = अन्तिमः, अल्पः = किञ्चित्, अर्धः = अंशसामान्यः (अर्धम् = समांशः)।

'तयप्' इति तद्धितप्रत्ययः 'सङ्ख्याया अवयवे तयप्' इति सूत्रेण सङ्ख्यावाचकेभ्यः शब्देभ्यः 'अवयवाः अस्य' इत्यर्थे विधीयते। द्वितयः/द्वय, तृतय/त्रय, पञ्चतय इत्यादयः शब्दाः तयप्-प्रत्ययान्ताः सन्ति। एतेषामपि अनेन सूत्रेण जस्-विभक्तौ विकल्पेन सर्वनामसंज्ञा भवति।

अनेन सर्वनामसंज्ञापक्षे- प्रथम जस् - प्रथम अस् - प्रथम शी - प्रथम ई - प्रथमे।

पक्षान्तरे- प्रथम जस् - प्रथम अस् - प्रथमास् - प्रथमार् - प्रथमाः।

एवं चरमादि-शब्दानामपि जस्-प्रत्यये प्रथम-शब्दवद् रूपाणि भवन्ति। यथा-

चरम- चरमे/चरमाः। अल्प- अल्पे/अल्पाः। अर्ध- अर्धे/अर्धाः। कतिपय- कतिपये/कतिपयाः। नेम- नेमे/नेमाः। द्वितय- द्वितये/द्वितयाः। तृतय- तृतये/तृतयाः।

शेषविभक्तिषु नेम-शब्दस्य सर्ववत् रूपाणि भवन्ति।

तीय-प्रत्ययान्तानां शब्दानां ङित्-विभक्तीनां विषये विकल्पेन सर्वनामसंज्ञा भवतीति वार्तिकार्थः । 'तीय' इति तद्धितप्रत्ययो द्वि-शब्दात्, त्रि-शब्दात् च पूरणार्थे विधीयते, तेन 'द्वितीय', 'तृतीय' इत्येतौ शब्दौ निष्पद्येते । एतौ शब्दौ ङे-ङसि-ङि-विभक्तिषु परेषु विकल्पेन सर्वनामसंज्ञकौ भवतः ।

द्वितीय ङे - द्वितीय ए - द्वितीय स्मै - द्वितीयस्मै । सर्वनामसंज्ञाभावे- द्वितीयाय । द्वितीय ङसि - द्वितीय अस् - द्वितीय स्मात् - द्वितीयस्मात्-द् । सर्वनामसंज्ञाभावे- द्वितीयात्-द् । द्वितीय ङि - द्वितीय इ - द्वितीय स्मिन् - द्वितीयस्मिन् । सर्वनामसंज्ञाभावे- द्वितीये ।

एवं तृतीय-शब्दस्यापि उक्तासु विभक्तिषु क्रमेण तृतीयस्मै/तृतीयाय, तृतीयस्मात्-द्/तृतीयात्-द्, तृतीयस्मिन्/तृतीये इति रूपाणि जायन्ते । शेषविभक्तिषु रामशब्दवद् अनयो रूपाणि निष्पद्यन्ते ।

## प्रयोगसिद्धिप्रकारः

### सर्वे

सर्व-शब्दस्य अव्युत्पन्नपक्षे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया

बहुवचने जस्-प्रत्ययेऽनुबन्धलोपे 'सर्व अस्' इति जाते 'सर्वादीनि सर्वनामानि' इति सूत्रेण सर्वशब्दस्य सर्वनामसंज्ञायाम् 'प्रथमयोः पूर्वसवर्णः' इति सूत्रेण प्राप्तं पूर्वसवर्णदीर्घं बाधित्वा 'जसः शी' इत्यनेन 'जस्' इत्यस्य स्थाने 'शी' इत्यादेशेऽनुबन्धलोपे 'सर्व ई' इति जाते 'आद् गुणः' इत्यनेन गुणे, वर्णयोगे 'सर्वे' इति रूपं सिद्धम् ।

**शब्द-रूपावलिः**

| सर्व-शब्दस्य पुँल्लिङ्गे रूपाणि | | |
|---|---|---|
| सर्वः | सर्वौ | सर्वे |
| सर्वम् | सर्वौ | सर्वान् |
| सर्वेण | सर्वाभ्याम् | सर्वैः |
| सर्वस्मै | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्मात्-द् | सर्वाभ्याम् | सर्वेभ्यः |
| सर्वस्य | सर्वयोः | सर्वेषाम् |
| सर्वस्मिन् | सर्वयोः | सर्वेषु |
| हे सर्व ! | हे सर्वौ ! | हे सर्वे ! |

| पूर्व-शब्दस्य पुँल्लिङ्गे रूपाणि | | |
|---|---|---|
| पूर्वः | पूर्वौ | पूर्वे/पूर्वाः |
| पूर्वम् | पूर्वौ | पूर्वान् |
| पूर्वेण | पूर्वाभ्याम् | पूर्वैः |
| पूर्वस्मै | पूर्वाभ्याम् | पूर्वेभ्यः |
| पूर्वस्मात्-द्/पूर्वात्-द् | पूर्वाभ्याम् | पूर्वेभ्यः |
| पूर्वस्य | पूर्वयोः | पूर्वेषाम् |
| पूर्वस्मिन्/पूर्वे | पूर्वयोः | पूर्वेषु |
| हे पूर्व ! | हे पूर्वौ ! | हे पूर्वे/पूर्वाः ! |

| उभ-शब्दस्य पुँल्लिङ्गे रूपाणि | कतिपय-शब्दस्य रूपाणि |
|---|---|
| उभौ | कतिपयः कतिपयौ कतिपये/कतिपयाः |
| उभौ | शेषं रामवत् । |
| उभाभ्याम् | |
| उभाभ्याम् | |
| उभाभ्याम् | |
| उभयोः | |
| उभयोः | |
| हे उभौ ! | |

**उभय-शब्दस्य पुँल्लिङ्गे रूपाणि**

| | |
|---|---|
| उभयः | उभये |
| उभयम् | उभयान् |
| उभयेन | उभयैः |
| उभयस्मै | उभयेभ्यः |
| उभयस्मात्-द् | उभयेभ्यः |
| उभयस्य | उभयेषाम् |
| उभयस्मिन् | उभयेषु |
| हे उभय ! | हे उभये ! |

**पदप्रयोगप्रकारः**

१. सर्वे छात्राः अत्र आगच्छन्तु ।

२. अद्य मासस्य कतमः दिवसः वर्तते ?

३. परेषाम् उपकारः अस्माकं संस्कारः विद्यते ।

४. विश्वेस्मिन् विश्वे ईश्वरस्य व्याप्तिः वर्तते ।

५. अद्य कतिपये छात्राः कक्षायाम् अनुपस्थिताः सन्ति ।

## अभ्यासः

### १. सूत्राणि पठित्वा तेषां कार्यं लिखत

(क) सर्वादीनि सर्वनामानि (ख) ङसिङ्योः स्मात्स्मिनौ

(ग) स्वमज्ञातिधनाख्यानम् (घ) आमि सर्वनाम्नः सुट्

### २. कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत

(क) त्यदादिगणे .................... शब्दाः सङ्गृहीताः सन्ति । (दश, द्वादश)

(ख) त्यदादिगणः ................ अन्तर्गणो विद्यते । (सर्वादिगणस्य, शकन्ध्वादिगणस्य)

(ग) अन्तर-शब्दस्य .................... अर्थे सर्वनामसंज्ञा भवति । (मध्ये, परिधानीये)

(घ) नेम-शब्दस्य जस्-विभक्तौ .................... सर्वनामसंज्ञा भवति । (नित्यम्, विकल्पेन)

(ङ) चरम-शब्दस्य .................... सर्वनामसंज्ञा भवति । (जस्-विभक्तौ, ङे-विभक्तौ)

(च) द्वितय-शब्दः .................... वर्तते । (तीय-प्रत्ययान्तः, तयप्-प्रत्ययान्तः)

### ३. समानार्थकौ सर्वनामशब्दौ परस्परं मेलयत

| | |
|---|---|
| सर्व | इतर |
| सम | तद् |
| अन्य | विश्व |
| त्वत् | अदस् |
| त्यद् | सिम |
| इदम् | त्व |

### ४. अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचनानि निर्दिशत

| प्रयोगः | प्रातिपदिकम् | विभक्तिः | वचनम् |
|---|---|---|---|
| सर्वेषाम् | सर्व | षष्ठी | बहुवचनम् |
| तृतीयस्मात् | ............ | ............ | ............ |
| पूर्वे | ............ | ............ | ............ |
| अन्तरस्मिन् | ............ | ............ | ............ |

| | | | |
|---|---|---|---|
| उभयोः | ............ | ............ | ............ |
| उभयेषाम् | ............ | ............ | ............ |

**५. एकवाक्येन उत्तरं लिखत**

(क) केषां शब्दानां सर्वनामसंज्ञा भवति ?

(ख) 'सर्वस्मिन्' इत्यत्र स्मिन्विधायकं सूत्रं किम् ?

(ग) धनवाचकस्य स्व-शब्दस्य प्रथमाबहुवचने किं रूपम् ?

(घ) उभय-शब्दः कस्मिन् वचने न प्रयुज्यते ?

(ङ) 'नेम' इति सर्वनामशब्दस्य कोऽर्थः ?

(च) सिम-शब्दाद् आम्-प्रत्यये किं रूपं भवति ?

**६. प्रश्नानामुत्तरं लिखत**

(क) 'सर्वादीनि सर्वनामानि' इति सूत्रस्यार्थं लिखत ।

(ख) सर्वनाम-शब्दान् सूचीकृत्य सारिण्यां दर्शयत ।

(ग) राम-सर्वशब्दयोः रूपसिद्धिप्रक्रिया कासु विभक्तिषु विभिद्यते ?

(घ) पूर्वादि-नवशब्दाः के ?

(ङ) त्यदादयः शब्दाः के ? गणपाठक्रमेण लिखत ।

**७. विश्व-इतर-अपर-स्व-यतमशब्दानां प्रथमाबहुवचने रूपाणि विलिख्य प्रतिपदं वाक्येषु प्रयोगं दर्शयत ।**

**८. अधस्तन-प्रयोगाणां ससूत्रं सिद्धिप्रकारं प्रदर्शयत**

(क) सर्वस्मै (ख) समेषाम् (ग) परस्मिन्

(घ) दक्षिणात् (ङ) अल्पाः (ङ) स्वे

**९. अन्य-शब्दस्य पुँल्लिङ्गे सर्वासु विभक्तिषु रूपाणि लिखत ।**

## अजन्तपुल्लिङ्गप्रकरणे

# निर्जर-विश्वपाशब्दौ

**जराया जरसन्यतरस्याम् ७ । २ । १०१ ॥**

**अजादौ विभक्तौ । (प.) पदाङ्गाधिकारे तस्य च तदन्तस्य च । (प.) निर्दिश्यमानस्यादेशा भवन्ति । (प.) एकदेशविकृतमनन्यवत्, इति जरशब्दस्य जरस् । निर्जरसौ । निर्जरस इत्यादि । पक्षे हलादौ च रामवत् ॥ विश्वपाः ॥**

अजादिषु विभक्तिषु परतः जरा-शब्दस्य स्थाने विकल्पेन 'जरस्' इत्यादेशो भवति ।

वार्द्धक्यवाचको जरा-शब्दः स्त्रीलिङ्गे वर्तते । 'निर्गता जरा यस्मात्' इति विग्रहे समासेन निष्पन्नो निर्जर-शब्दस्तु पुँल्लिङ्गे प्रयुज्यते ।

**'पदाङ्गाधिकारे तस्य च तदन्तस्य च'**

'पदस्य' 'अङ्गस्य' इत्यनयोः सूत्रयोः अधिकारे यत् कार्यं विधीयते तत् कार्यं निर्दिष्टस्य स्थाने, निर्दिष्टः शब्दः यस्य अन्ते भवति तस्य स्थानेऽपि भवतीति परिभाषार्थः ।

**जरायाः जरसन्यतरायाम्** इति सूत्रम् 'अङ्गस्य' इति सूत्रस्य अधिकारे अस्ति । अतः जरा-शब्दस्य कृते निर्दिष्ट जरस्-आदेशः जरा-शब्दान्तस्य निर्जरा-शब्दस्य स्थानेऽपि भवतीति अनया परिभाषया सिद्ध्यति ।

**'निर्दिश्यमानस्य आदेशा भवन्ति'**

सूत्रेण साक्षाद् निर्दिश्यमानस्य स्थानिनः स्थाने एव आदेशो भवतीति परिभाषार्थः ।

प्रकृते च 'जरा'शब्दस्य स्थाने निर्दिष्ट आदेशः तदन्तपरिभाषया 'निर्जरा' शब्दस्य स्थाने प्राप्तः अनया परिभाषया 'जरा' इति भागस्य एव जरसादेशो विधीयते, न तु 'निर्जरा'शब्दस्य स्थाने । अनेन सूत्रेण जरा-शब्दस्य निर्देशः कृतो वर्तते, परन्तु अत्र 'निर्जर' इति ह्रस्वान्तः शब्दो विद्यते । अत आह-

**'एकदेशविकृतमनन्यवत्' ।**

'कश्चन शब्द एकस्मिन् भागे नियमपूर्वको विकृतः (परिवर्तितः) अस्ति, स अन्यवद् न भवति, अपि तु मूलशब्दवदेव भवति । 'निर्गता जरा यस्मात्' इति विग्रहे 'निर्' इति उपसर्गेण सह जरा-शब्दस्य समासे, उपसर्जनस्य

ह्रस्वादेशप्रक्रियया निर्मिते निर्जर-शब्दे यो जर-शब्दो विद्यते, तत्र जरा-शब्दस्य आकारस्य नियमपूर्वकं परिवर्तनं विधाय अत्र 'जर' सम्भूतोऽस्ति । अतः एकदेशविकृतस्य अनन्यवत्वात् सूत्रेण जरा-शब्दस्य विहितो जरसादेशः उक्तस्य जर-शब्दस्य स्थाने अपि भवतीति ज्ञातव्यः ।

निर्जर-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इत्यनेन प्रातिपदिकसंज्ञा भवति । जरस्-आदेशाऽभावपक्षे हलादौ च निर्जरशब्दस्य रूपाणि रामवत् भवन्ति । निर्जरः । औ-विभक्तौ, अन्यासु च अजादिविभक्तिषु तु उक्तस्य परिभाषात्रयस्य सहकारेण अनेन सूत्रेण 'जर' इत्यस्य वैकल्पिको जरसादेशो विधीयते । यथा-

निर्जर औ - निर्जरस् औ - निर्जरसौ । पक्षान्तरे रामवत्- निर्जरौ । निर्जर जस् - निर्जर अस् - निर्जरस् अस् - निर्जरसस् - निर्जरसर् - निर्जरसः । पक्षान्तरे- निर्जराः ।

एवं प्रकारेण अमादिषु अपि अजादिषु विभक्तिषु जरसादेशानन्तरं वर्णसम्मेलनम् एव कार्यम्, जरसादेशाभावे, हलादिविभक्तौ च रामवत्प्रक्रिया अवलम्बनीया ।

**पद्दन्नोमास्हृन्निशसन्यूषन्दोषन्यकञ्छकन्नुदन्नासञ्छस्प्रभृतिषु ६ । १ । ६३ ॥**

**पाद, दन्त, नासिका, मास, हृदय, निशा, असृज्, यूष्, दोष्, यकृत्, शकृत्, उदक, आस्य एषां पदादय आदेशाः स्युः शसादौ वा । यत्तु आसनशब्दस्य आसन्नादेश इति काशिकायामुक्तं तत्प्रामादिकम् । पादः । पादौ । पादाः । पादम् । पादौ । पदः । पादान् । पदा । पादेन इत्यादि ।**

**अथ आकारान्त-शब्दनिरूपणम्-**

'विश्वं पाति' इति विग्रहे विच्-प्रत्यये, सर्वापहारिलोपे निष्पन्नस्य विश्वपा-शब्दस्य कृदन्ततया प्रातिपदिकसंज्ञायां सु-प्रत्ययेऽनुबन्धलोपे, सकारस्य रुत्वे विसर्गे च 'विश्वपाः' इति रूपं भवति । औ-प्रत्यये पूर्वसवर्णदीर्घे प्राप्ते-

**दीर्घाज्जसि च ६ । १ । १०५ ॥**

**दीर्घाज्जसि इचि च परे पूर्वसवर्णदीर्घो न स्यात् । विश्वपौ । विश्वपाः । हे विश्वपाः । विश्वपाम् । विश्वपौ ॥**

दीर्घवर्णात् प्रथमा-द्वितीयाविभक्त्योः इच्-प्रत्याहारस्थे वर्णे परे, जस्-प्रत्यये परे च पूर्वसवर्णदीर्घो न भवति ।

'विश्वपा औ' इत्यवस्थायाम् प्रकृतसूत्रेण पूर्वसवर्णदीर्घस्य निषेधे पूर्वपरयोः स्थाने वृद्धौ आकार-औकारयोः स्थाने औकारे 'विश्वपौ' इति सिद्ध्यति । जस्-प्रत्यये च अनेन पूर्वसवर्णदीर्घ-निषेधे सवर्णदीर्घो भवति । सम्बोधनेऽपि प्रथमावत् प्रक्रिया ज्ञेया । अम्-प्रत्यये 'अमि पूर्वः' इति पूर्वरूपे- विश्वपाम् ।

**सुडनपुंसकस्य १ । १ । ४३ ॥**

**स्वादिपञ्चवचनानि सर्वनामस्थानसंज्ञानि स्युरक्लीबस्य ॥**

नपुंसकलिङ्गभिन्नात् प्रातिपदिकाद् विहितानाम् सु, औ, जस्, अम्, औट् इत्येतेषां प्रत्ययानां 'सर्वनामस्थानम्' इति संज्ञा भवति । 'अनपुंसकस्य' इति निर्देशाद् नपुंसकलिङ्गे सूत्रमिदं न प्रवर्तते ।

**स्वादिष्वसर्वनामस्थाने १ । ४ । १७ ॥**

**कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं पदं स्यात् ॥**

सुप्-प्रत्ययानां सङ्ग्रहकात् 'स्वौजसमौट्... ४ । १ । २ ॥' इति सूत्राद् आरभ्य 'शेषाद्विभाषा ५ । ४ । १५४ ॥' इति कप्-प्रत्ययविधायक-सूत्रपर्यन्तं ये केऽपि प्रत्यया विधीयन्ते, तेषां सर्वेषां ग्रहणम् अस्मिन् सूत्रे 'स्वादि' इति शब्देन क्रियते । एतेषु स्वादि-प्रत्ययेषु सर्वनामस्थानसंज्ञकान् प्रत्ययान् विहाय अन्येषु प्रत्ययेषु परेषु प्रकृतेः पद-संज्ञा भवति इति सूत्रार्थः ।

**यचि भम् १ । ४ । १८ ॥**

**यादिष्वजादिषु च कप्प्रत्ययावधिषु स्वादिष्वसर्वनामस्थानेषु पूर्वं भसंज्ञं स्यात् ॥**

पूर्वसूत्रवत् कप्-प्रत्ययावधिभूतेषु स्वादि-प्रत्ययेषु सर्वनामस्थानसंज्ञकान् प्रत्ययान् विहाय अन्येषु यकारादिषु, अजादिषु च प्रत्ययेषु परेषु प्रकृतेः भ-संज्ञा भवति । पूर्वसूत्रेण प्रकृतेः पदसंज्ञायां प्राप्तायाम् अनेन सूत्रेण यकारादिप्रत्ययानाम्, अजादिप्रत्ययानां च विषये पदसंज्ञां निषिध्य भसंज्ञा विधीयते । पदसंज्ञानिमित्तप्रत्ययेषु यस्य आदौ यकारः, अच्-वर्णो वा विद्यते, तादृशेषु प्रत्ययेषु परेषु पदसंज्ञां बाधित्वा अनेन भ-संज्ञा भवति ।

विश्वपा-प्रातिपदिकाद् द्वितीयाबहुवचने शस्-प्रत्ययेऽनुबन्धलोपे 'विश्वपा अस्' इत्यवस्थायां प्रकृतेरङ्गसंज्ञायाम्, पूर्वसूत्रेण पदसंज्ञायाम् अनेन सूत्रेण भसंज्ञायां च प्राप्तायां का संज्ञा विधातव्या इति निर्णयार्थं सूत्रम् आह-

**आ कडारादेका संज्ञा १ । ४ । १ ॥**

**इत ऊर्ध्वं 'कडाराः कर्मधारये' इत्यतः प्रागेकस्यैकैव संज्ञा ज्ञेया । या पराऽनवकाशा च ॥**

सूत्रमिदं प्रथमाध्यायस्य चतुर्थपादस्य प्रथमं सूत्रं वर्तते । अस्मात् परं 'कडाराः कर्मधारये २ । २ । ३८ ॥' इति सूत्रात् पूर्वम् (त्रिषु पादेषु) उक्तासु संज्ञासु एकस्य शब्दस्य यदि अनेकाः संज्ञाः प्राप्ताश्चेत् तासु एका एव संज्ञा विधातव्या इति सूत्रार्थः ।

अधिकारेऽस्मिन् यदि द्वाभ्यां सूत्राभ्याम् एकस्य एव शब्दस्य द्वे संज्ञे उच्येते, तदा या संज्ञा सूत्रसङ्ख्यया परा भवति, या च अवकाशरहिता भवति, सा एव संज्ञा विधातव्या इत्यर्थः । यथा- भ-पदयोः संज्ञयोः एकत्र प्रप्तौ भ-संज्ञा एव विधेया, यतः पदसंज्ञां प्रति भसंज्ञा अनवकाशा वर्तते । अनवकाशो नाम प्रवृत्तिस्थलाभावः एतद्विपरीतावस्था सावकाश-पदेन व्यवह्रियते । कप्-प्रत्ययावधिषु सर्वनामस्थानभिन्नेषु सर्वेषु अपि स्वादिप्रत्ययेषु परेषु 'स्वादिष्वसर्वनामस्थाने' इत्यनेन प्रकृतेः पदसंज्ञां प्राप्नोति । तत्रैव यकारादिषु, अजादिषु च प्रत्ययेषु परेषु 'यचि भम्' इत्यनेन भ-संज्ञां प्राप्नोति । यदि यकारादिषु, अजादिषु च प्रत्ययेषु परेषु अपि पदसंज्ञा विधीयते तदा भ-संज्ञायाः प्राप्तिस्थलम् (अवकाशः) कुत्रापि न भवति । अनेन ज्ञायते यत्- भ-पदयोः भ-संज्ञा अनवकाशा वर्तते । अतः अनयोरेकत्र प्राप्तौ अनवकाशत्वात्, एकसंज्ञाधिकारात् च भ-संज्ञा एव विधेया । कृतायां भ-संज्ञायामपि असर्वनामस्थानेषु यकारभिन्नेषु हलादिषु स्वादिप्रत्ययेषु परेषु पद-संज्ञाया अवकाशो विद्यते एव, अतः अत्र पद-संज्ञा सावकाशो वर्तते । यत्र च द्वयोः सावकाशयोः संज्ञयोर्मध्ये विरोधो भवति, तत्र सूत्रसङ्ख्यया

परा संज्ञा वलबती भवतीति ज्ञातव्यम् ।

'विश्वपा अस्' इत्यत्र परत्वात्, अनवकाशाच्च पदसंज्ञां बाधित्वा भ-संज्ञायां कृतायाम्-

**आतो धातोः ६ । ४ । १४० ॥**

**आकारान्तो यो धातुस्तदन्तस्य भस्याङ्गस्य लोपः । 'अलोऽन्त्यस्य' । विश्वपः । विश्वपा । एवं शङ्खध्मादयः । धातोः किम् ? हाहान् ॥**

यत् प्रातिपदिकम् आकारान्तधातुनिर्मितं भवति, आकारान्तं च भवति, भसंज्ञकं च भवति, अङ्गसंज्ञकं च भवति, तस्य अन्तिमवर्णस्य (आकारस्य) लोपो भवति ।

अनेन सूत्रेण अलोऽन्त्यपरिभाषया भ-संज्ञकस्य अङ्गस्य 'विश्वपा' इत्यस्य अन्त्यस्य आकारस्य लोपे 'विश्वप् अस्' इति जाते, वर्णयोगे, सकारस्य रुत्वे विसर्गे च 'विश्वपः' इति सिद्धचति । एवमेव टादिषु अपि अजादिविभक्तिषु भत्वेन आकारलोप एव विशेषं कार्यम्, तेन सिद्धस्य 'विश्वप्' इति स्वरूपस्य प्रत्ययेन सह मेलनम्, सान्तप्रत्ययेषु रुत्वविसर्गौ च इत्येव सिद्धिप्रक्रिया ज्ञेया । हलादिविभक्तिषु विभक्तियोजनेनैव रूपाणि सिद्धचन्ति । यथा- विश्वपा भ्याम् - विश्वपाभ्याम् । विश्वपा भिस् - विश्वपाभिः । विश्वपा भ्यस् - विश्वपाभ्यः । विश्वपा सुप् - विश्वपासु ।

## प्रयोगसिद्धिप्रकारः

### निर्जरसौ

निर्जर-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया द्विवचने औ-प्रत्यये 'निर्जर औ' इति जाते 'जराया जरसन्यतरस्याम्' इति सूत्रेण निर्जर-शब्दस्य 'जर'भागस्य स्थाने विकल्पेन जरसादेशे 'निर्जरस् औ' इति जाते, वर्णसम्मेलने 'निर्जरसौ' इति रूपं सिद्धम् । जरसादेशाभावपक्षे, 'निर्जर औ' इत्यवस्थायां वृद्धिं बाधित्वा पूर्वसवर्णदीर्घे प्राप्ते, तस्य च 'नादिचि' इत्यनेन निषेधे, बाधकाभावे पुनः वृद्धौ, वर्णयोगे 'निर्जरौ' इत्यपि सिद्धचति ।

**शब्द-रूपावलिः**

| **निर्जर-शब्दस्य रूपाणि** | | |
|---|---|---|
| निर्जरः | निर्जरसौ/निर्जरौ | निर्जरसः/निर्जराः |
| निर्जरसम्/निर्जरम् | निर्जरसौ/निर्जरौ | निर्जरसः/निर्जरान् |
| निर्जरसा/निर्जरेण | निर्जराभ्याम् | निर्जरैः |

| | | |
|---|---|---|
| निर्जरसे/निर्जराय | निर्जराभ्याम् | निर्जरेभ्यः |
| निर्जरसः/निर्जरात्-द् | निर्जराभ्याम् | निर्जरेभ्यः |
| निर्जरसः/निर्जरस्य | निर्जरसोः/निर्जरयोः | निर्जरसाम्/निर्जराणाम् |
| निर्जरसि/निर्जरे | निर्जरसोः/निर्जरयोः | निर्जरेषु |
| हे निर्जर ! | निर्जरसौ/निर्जरौ ! | निर्जरसः/निर्जराः ! |

| **विश्वपा-शब्दस्य रूपाणि** | | |
|---|---|---|
| विश्वपाः | विश्वपौ | विश्वपाः |
| विश्वपाम् | विश्वपौ | विश्वपः |
| विश्वपा | विश्वपाभ्याम् | विश्वपाभिः |
| विश्वपे | विश्वपाभ्याम् | विश्वपाभ्यः |
| विश्वपः | विश्वपाभ्याम् | विश्वपाभ्यः |
| विश्वपः | विश्वपोः | विश्वपाम् |
| विश्वपि | विश्वपोः | विश्वपासु |
| हे विश्वपाः ! | हे विश्वपौ ! | हे विश्वपाः ! |

**पदप्रयोगप्रकारः**

१. विश्वपा जगत् रक्षति ।

२. निर्जरसः स्वर्गे निवसन्ति ।

३. देवताः निर्जराः भवन्ति ।

४. पूजकः निर्जरसः पश्यति ।

५. विश्वपि मम महान् विश्वासो विद्यते ।

६. बृहस्पतिः निर्जरसां गुरुः अस्ति ।

## अभ्यासः

१. **सूत्राणि पठित्वा तेषां अर्थं लिखत**

(क) जराया जरसन्यतरस्याम्

(ख) आतो धातोः

(ग) स्वादिष्वसर्वनामस्थाने

(घ) यचि भम्

(ङ) आ कडारादेशका संज्ञा

२. **कोष्ठकात् समुचितपदं चित्वा रिक्तस्थानं पूरयत**

(क) 'सुट्' इत्यस्मिन् ..................... प्रत्ययाः समायान्ति । (त्रयः, पञ्च)

(ख) भ-पदसंज्ञयोरेकत्रप्राप्तौ ..................... विधीयते । (भसंज्ञा, पदसंज्ञा)

(ग) नपुंसकलिङ्गे स्वादि-पञ्च प्रत्ययाः सर्वनामस्थानसंज्ञकाः ..................... । (भवन्ति, न भवन्ति)

(घ) एकसंज्ञाधिकारे ....................., अनवकाशा च संज्ञा विधीयते । (पूर्वा, परा)

(ङ) जरा-शब्दस्य जरसादेशो ..................... विभक्तौ भवति । (अजादौ, हलादौ)

३. **परस्परं मेलयत**

| | |
|---|---|
| सुडनपुंसकस्य | आलोपः |
| स्वादिष्वसर्वनामस्थाने | भसंज्ञा |
| यचि भम् | पदसंज्ञा |
| जराया जरसन्यतरस्याम् | सर्वनामस्थानसंज्ञा |
| आतो धातोः | जरसादेशः |

४. **अर्थं लिखत**

(क) पदाङ्गाधिकारे तस्य च तदन्तस्य च ।

(ख) निर्दिश्यमानस्यादेशा भवन्ति ।

(ग) एकदेशविकृतमनन्यवत् ।

(घ) या पराऽनवकाशा च ।

## ४. एकवाक्येन उत्तरं लिखत

(क) भ-संज्ञा केन सूत्रेण विधीयते ?

(ख) विश्वपा-शब्दस्य चतुर्थ्येकवचने किं रूपम् ?

(ग) 'विश्वपाम्' इत्यत्र आलोपविधायकं सूत्रं किम् ?

(घ) 'आ कडारादेका संज्ञा' इति सूत्रं किं करोति ?

(ङ) 'निर्जरसि' इत्यत्र का विभक्तिरस्ति ?

## ६. प्रश्नानामुत्तरं लिखत

(क) 'सर्वनामस्थानम्' इति पदेन कुत्र कुत्र केषां बोधो भवति ?

(ख) स्वादिविभक्तिषु पुँल्लिङ्गे भसंज्ञायाः निमित्तविभक्तयः काः ?

(ग) कासु विभक्तिषु परतः प्रकृतेः पदसंज्ञा भवति ?

(घ) भ-पदयोः संज्ञयोरेकत्र प्राप्तौ का संज्ञा विधीयते ?

(ङ) निर्जर-शब्दस्य कासु विभक्तिषु वैकल्पिकरूपाणि जायन्ते ?

(च) 'स्वादिष्वसर्वनामस्थाने' इति सूत्रस्य अर्थं लिखत ।

## ७. अधस्तन-प्रयोगाणां ससूत्रं सिद्धिं कुरुत

(क) निर्जरसः (ख) विश्वपः

(ग) विश्वपे (घ) हे विश्वपाः

(ङ) पादः (च) पद्भ्याम्

### अजन्तपुल्लिङ्गप्रकरणे

# इकारान्तशब्दाः

**हरिः । हरी ॥**

इकारान्त-पुँल्लिङ्गस्य हरि-शब्दस्य 'हरति इति हरिः' इत्यर्थे स्वीकरणे व्युत्पत्तिपक्षे, कस्यचित् पुरुषस्य संज्ञारूपेण प्रयुक्ते च अव्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा भवति । हरि-प्रातिपदिकात् सु-प्रत्ययेऽनुबन्धलोपे, सकारस्य रुत्वविसर्गे 'हरिः' इति रूपं जायते । औ-प्रत्यये 'हरि औ' इत्यवस्थायां यणं बाधित्वा 'प्रथमयोः पूर्वसवर्णः' इत्यनेन पूर्वसवर्णदीर्घे, इकार-औकारयोः स्थाने ईकार एकादेशे 'हर् ई' इति जाते, वर्णयोगे 'हरी' इति रूपं सिद्ध्यति । विष्णु, भानु इत्यादिभ्य उकारान्त-प्रातिपदिकेभ्य औ-प्रत्यये पूर्वसवर्णदीर्घेन पूर्वपरयोः स्थाने एक ऊकारो आदिश्यते, तेन विष्णू, भानू इत्यादीनि च रूपाणि जायन्ते । जस्-प्रत्यये-

**जसि च ७ । ३ । १०९ ॥**

**ह्रस्वान्तस्याङ्गस्य गुणः । हरयः ॥**

जस्-प्रत्यये परे सति ह्रस्व-वर्णान्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने गुणसंज्ञको वर्ण आदेशो भवति । पूर्वसवर्णदीर्घं बाधित्वा अनेन सूत्रेण गुणादेशो विधीयते । 'आद् गुणः' इत्यनेन विहितो गुणः पूर्वपरयोः स्थाने एकादेशगुणः, परन्तु अनेन सूत्रेण विहितः केवलं गुणादेशः, अतः अस्य एक एव स्थानी भवतीति ज्ञेयम् । गुणादेशे स्थानत आन्तरतम्याद् इकारस्य एकारः, उकारस्य च ओकारः आदेशो भवति ।

हरि जस् - हरि अस्, इत्यवस्थायां पूर्वसवर्णदीर्घं बाधित्वा अनेन सूत्रेण अङ्गान्त्यस्य इकारस्य गुणे, आन्तरतम्याद् एकारे 'हरे अस्' इति जाते, एकारस्य अयादेशे 'हर् अय् अस्' इति जाते, वर्णयोगे, सकारस्य रुत्वे विसर्गे- हरयः । उकारान्तशब्देषु अनेन ओकारगुणः तस्य अवादेशश्च विधीयेते । यथा-

विष्णु जस् - विष्णु अस् - विष्णो अस् (जसि च) - विष्ण् अव् अस् - विष्णवस् - विष्णवर् - विष्णवः ।

**ह्रस्वस्य गुणः ७ । ३ । १०८ ॥**

**सम्बुद्धौ । हे हरे । हरिम् । हरी । हरीन् ॥**

सम्बुद्धिसंज्ञके प्रत्यये परे सति ह्रस्ववर्णान्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने गुणादेशो भवति । सम्बोधनस्य एकवचने अनेन गुणे कृते इकारान्ता अङ्गा एकारान्तत्वं प्राप्नुवन्ति, उकारान्ताश्च ओकारान्तत्वम् । ततः 'एङ्ह्रस्वात् सम्बुद्धेः' इत्यनेन सम्बुद्धिसंज्ञकस्य सकारस्य लुक् भवति ।

सम्बोधनस्य एकवचने सु-प्रत्यये, प्रत्ययस्य सम्बुद्धिसंज्ञायाम्, प्रकृतेश्च अङ्गसंज्ञायाम्-

हरि सु - हरि स् - हरे स् (ह्रस्वस्य गुणः) - हरे (एङ्ह्रस्वात् सम्बुद्धेः) - हे हरे ।

विष्णु सु - विष्णु स् - विष्णो स् (ह्रस्वस्य गुणः) - विष्णो (एङ्ह्रस्वात् सम्बुद्धेः) - हे विष्णो ।

हरि शस् - हरि अस् - हरीस् (पूर्वसवर्णदीर्घः) - हरीन् (तस्माच्छसो नः पुंसि) ।

विष्णु शस् - विष्णु अस् - विष्णूस् - विष्णून् ।

**शेषो घ्यसखि १ । ४ । ७ ॥**

**शेष इति स्पष्टार्थम् । अनदीसंज्ञौ ह्रस्वौ याविदुतौ तदन्तं सखिवर्जं घिसंज्ञम् ॥**

शेषः = उक्ताद् अन्यः, नदीसंज्ञा पूर्वमेव उक्ता, अतः शेषपदेन अत्र नदीसंज्ञकाद् अन्य इति बोध्यते । यू = इश्च उश्च = इवर्ण-उवर्णौ । असखि = सखि-शब्दभिन्नः)

सखि-शब्दं विहाय नदीसंज्ञकभिन्नानाम् इकारान्तानाम्, उकारान्तानां च शब्दानां 'घि' इति संज्ञा भवति । तत्र केवलं 'सखि'शब्दस्य एव घिसंज्ञायाः निषेधः, सुसखि, राजसखि, प्रियसखि इत्यादीनां सखि-शब्दान्तशब्दानां तु अनेन सूत्रेण घिसंज्ञा भवत्येव इति ज्ञेयम् ।

**घिसंज्ञाप्रयुक्त-कार्याणि-**

- 'टा' इत्यस्य स्थाने 'ना' आदेशः । स्त्रीलिङ्गे अयं न भवति । (आङो नाऽस्त्रियाम्)
- ङे-ङसि-ङस्-विभक्तिषु अङ्गस्य अन्त्यवर्णस्य गुणः । (घेर्ङिति)
- ङि-प्रत्यये अङ्गस्य अकारान्तादेशः, प्रत्ययस्य च औकारादेशः । (अच्च घेः)

तृतीयैकवचने टा-प्रत्यये अनेन सूत्रेण अङ्गस्य घिसंज्ञायाम्-

**आङो नाऽस्त्रियाम् ७ । ३ । १२० ॥**

**घेः परस्याङो ना स्यादस्त्रियाम् । आङिति टासंज्ञा प्राचाम् । हरिणा । हरिभ्याम् । हरिभिः ॥**

स्त्रीलिङ्गभिन्नाद् घिसंज्ञकाद् अङ्गात् परस्य टा-प्रत्ययस्य स्थाने 'ना' इति आदेशो भवति । सूत्रेऽस्मिन् आगतः 'आङ्' इति शब्दः तृतीयैकवचनस्य 'टा' इत्यस्य एव अपरं नाम वर्तते । 'अस्त्रियाम्' इति निर्देशात् स्त्री-लिङ्गे अस्य विधेः प्रसक्तिः न भवति ।

हरि टा - हरि आ - हरि ना - हरिना - हरिणा (अट्कुप्वाङ्नुम्व्यवायेऽपि) । विधि-शब्दस्य तु णत्वाभावे- विधिना ।

विष्णु टा - विष्णु आ - विष्णु ना - विष्णुना । गुरु-शब्दस्य तु रेफात् परस्य नकारस्य णत्वे- गुरुणा ।

भ्यामादिषु हलादिप्रत्ययेषु विभक्तियोजनादिसामान्यप्रक्रिया स्मर्तव्या । हरि भ्याम् - हरिभ्याम् । हरि भिस् - हरिभिस् - हरिभिर् - हरिभिः । विष्णु भ्याम् - विष्णुभ्याम् । विष्णु भिस् - विष्णुभिः ।

**घेर्ङिति ७ । ३ । १११ ॥**

**घिसंज्ञकस्य ङिति सुपि गुणः । हरये । हरिभ्याम् । हरिभ्यः ॥**

ङित्-प्रत्यये सुपि परे घि-संज्ञकस्य अङ्गस्य अन्त्यवर्णस्य स्थाने गुणसंज्ञक आदेशो भवति । सुप्-प्रत्ययेषु चत्वारः प्रत्यया ङितः सन्ति । तेषु ङे, ङसि, ङस् इत्येतेषु परेषु अनेन घिसंज्ञकस्य अङ्गस्य गुणो विधीयते, ङि-प्रत्यये तु अत्वौत्वविधायकेन 'अच्च घेः' इति सूत्रेण सूत्रमिदं बाध्यते ।

चतुर्थ्येकवचने अङ्गस्य घिसंज्ञायाम्, अनेन सूत्रेण इकारस्य गुणे 'हरे ए' इति जाते, 'एचोऽयवायावः' इति सूत्रेण एकारस्य अयादेशे 'हरये' इति ।

विष्णु ङे - विष्णु ए - विष्णो ए - विष्ण् अव् ए - विष्णवे ।

**ङसिङसोश्च ६ । १ । ११० ॥**

**एङो ङसिङसोरति पूर्वरूपमेकादेशः । हरेः २ । हर्योः २ । हरीणाम् ॥**

एकार-ओकारयोः ङसि-प्रत्ययस्य, ङस्-प्रत्ययस्य च अकारे परे पूर्वपरयोः स्थाने पूर्वरूपम् एकादेशो भवति ।

ङसि-ङस्प्रत्यययोः प्रकृतेर्घिसंज्ञायाम्, पूर्वसूत्रेण अङ्गस्य गुणे कृते प्रातिपदिका एङन्तत्वं प्राप्नुवन्ति, ततः उक्तयोः प्रत्यययोः ह्रस्वाकारे परे अनेन सूत्रेण पूर्वरूप एकादेशो विधीयते । यथा-

हरि ङसि/ङस् - हरि अस् - हरे अस् (घेर्ङिति) - हरेस् (ङसिङसोश्च) - हरेर् - हरेः ।

विष्णु ङसि/ङस् - विष्णु अस् - विष्णो अस् (घेर्ङिति) - विष्णोस् (ङसिङसोश्च) - विष्णोर् - विष्णोः ।

षष्ठी-सप्तम्योर्द्विवचने ओस्-प्रत्यये तु सन्धिकार्यमेव विशेषः-

हरि ओस् - हर् य् ओस् (इको यणचि) - हर्योस् - हर्योर् - हर्योः ।

विष्णु ओस् - विष्ण् व् ओस् (इको यणचि) - विष्ण्वोस् - विष्ण्वोर् - विष्ण्वोः ।

षष्ठीबहुवचने रामवदेव प्रक्रिया-

हरि आम् - हरि नाम् (ह्रस्वनद्यापो नुट्) - हरीनाम् (नामि) - हरीणाम् । विधि- विधीनाम् ।

विष्णु आम् - विष्णु नाम् (ह्रस्वनद्यापो नुट्) - विष्णूनाम् (नामि) । गुरु- गुरूणाम् ।

**अच्च घेः ७ । ३ । ११९ ॥**

**इदुद्भ्यामुत्तरस्य ङेरौत्, घेरच्च । हरौ । हरिषु । एवं कव्यादयः ॥**

इकारान्तात्, उकारान्तात् च अङ्गात् परस्य ङि-प्रत्ययस्य स्थाने 'औत्' इत्यादेशो भवति, घि-संज्ञकस्य अङ्गस्य अन्तिमवर्णस्य स्थाने अकारादेशश्च भवति । अनेन सूत्रेण 'घेर्ङिति' इत्यनेन प्राप्तं गुणं प्रबाध्य द्वे कार्ये विधीयेते- अङ्गस्य अकारान्तादेशः, प्रत्ययस्य च औकारादेशः । अनेन अत्वौत्वे कृते 'वृद्धिरेचि' इत्यनेन वृद्धिरेकादेशो विधीयते ।

सप्तम्येकवचने- हरि ङि - हरि इ - हर औ (अच्च घेः) - हर् औ - हरौ । विष्णु ङि - विष्णु इ - विष्ण औ (अच्च घेः) - विष्ण् औ - विष्णौ ।

सप्तमीबहुवचने सुप्-प्रत्यये इकारात्, उकाराद् वा उत्तरस्य प्रत्ययस्थस्य सकारस्य षत्वे- हरिषु, विष्णुषु । एवं प्रकारेण सखि-पति-कति-त्रि-शब्दभिन्नानाम् इकारान्तानाम् उकारान्तानां च पुँल्लिङ्ग-प्रातिपदिकानां रूपाणि निष्पद्यन्ते ।

सखिशब्दः मित्रवाचकः । इकारान्त-पुँल्लिङ्गशब्देषु अयम् एव शब्दो घिसंज्ञां न लभते । सखि-प्रातिपदिकात् सु-प्रत्ययेऽनुबन्धलोपे 'सखि स्' इत्यवस्थायाम्-

**अनङ् सौ ७ । १ । ९३ ॥**

**सख्युरङ्गस्यानङादेशोऽसम्बुद्धौ सौ ॥**

सम्बुद्धिभिन्ने सु-प्रत्यये परे सखि-शब्दरूपस्य अङ्गस्य अन्त्यवर्णस्य (इकारस्य) स्थाने 'अनङ् (अन्)' इत्यादेशो भवति । अनङ् इत्यस्य ङकार इत्संज्ञकः, नकारोत्तरवर्ती अकारश्च उच्चारणार्थः, अतः 'अन्' इत्येव अवशिष्यते । ङित्वाद् 'ङिच्च' इति सूत्रेण सखि इत्यस्य अन्त्यस्य इकारस्य स्थाने अन् विधीयते । अयम् आदेशः प्रथमाया एकवचने सुप्रत्यये परे एव भवति न तु सम्बोधनस्य एकवचने, असम्बुद्धौ विधानात् ।

अनेन अङ्गस्य अनङादेशेऽनुबन्धलोपे, ङित्वाद् अन्त्यस्य इकारस्य स्थाने 'अन्' इति विधाने 'सखन् स्' इत्यवस्थायाम्-

**अलोऽन्त्यात्पूर्व उपधा १ । १ । ६५ ॥**

**अन्त्यादलः पूर्वो वर्ण उपधासंज्ञः ॥**

कस्मिँश्चिद् अपि शब्दे अन्तिमवर्णात् पूर्वं विद्यमानस्य वर्णस्य 'उपधा' इति संज्ञा भवति । व्याकरणशास्त्रे उपधा-पदेन उपान्त्यवर्णः (अन्त्यवर्णात् पूर्ववर्णः) बोध्यते ।

अनेन सूत्रेण 'सखन्' इत्यवस्थायाम् उपान्त्यस्य खकारात् परस्य अकारस्य उपधा-संज्ञायाम्, प्रत्ययस्य 'सुडनपुंसकस्य' इत्यनेन सर्वनामस्थानसंज्ञायाञ्च आह -

**सर्वनामस्थाने चासम्बुद्धौ ६ । ४ । ८ ॥**

**नान्तस्योपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने ॥**

सम्बुद्धिभिन्ने सर्वनामस्थानसंज्ञक-प्रत्यये परे सति नकारान्तस्य अङ्गस्य उपधायाः स्थाने दीर्घ आदेशो भवति ।

अनेन 'सखन्' इत्यस्य नकारान्तस्य शब्दस्य उपधाभूतस्य अकारस्य दीर्घे 'सखान् स्' इति जाते-

**अपृक्त एकाल् प्रत्ययः १ । २ । ४१ ॥**

**एकाल् प्रत्ययो यः सोऽपृक्तसंज्ञः स्यात् ॥**

यस्य प्रत्ययस्य अनुबन्धविनिर्मुक्तस्वरूपे केवलम् एक एव वर्णो भवति, तस्य 'अपृक्तः' इति संज्ञा भवति । अनुबन्धेन एकवर्णे अवशिष्टः, एकवर्णत्वेन विहितो वा प्रत्ययः अपृक्तः कथ्यते ।

अनेन सूत्रेण एकवर्णत्वेन अवशिष्टस्य 'स्' इति प्रत्ययस्य अपृक्तसंज्ञायाम्-

**हल्ङ्याब्भ्यो दीर्घात्सुतिस्यपृक्तं हल् ६ । १ । ६८ ॥**

**हलन्तात्परं दीर्घौ यौ ङ्यापौ तदन्ताच्च परं सुतिसीत्येतदपृक्तं हल् लुप्यते ॥**

हल्वर्णान्तात्, दीर्घौ यौ ङि-आपौ तदन्ताच्च उत्तरस्य सु, तिप्, सिप् इत्येतेषाम् अपृक्तसंज्ञकस्य हल्-वर्णस्य लोपो भवति । अनेन सूत्रेण व्यञ्जनवर्णात् परस्य सु-तिप्-सिप्सम्बन्धिनः अपृक्तस्य हल्वर्णस्य, अजन्तशब्दानां विषये तु टाप्, डाप्, चाप्, ङीप्, ङीष्, ङीन् इति षण्णां प्रत्ययानां दीर्घस्वरूपेभ्य उत्तरस्य अपृक्तस्य हल्वर्णस्य च लोपो भवति ।

अनेन हलन्तात् परस्य सु-सम्बन्धिनः अपृक्तस्य सकारस्य लोपे 'सखान्' इति जाते, प्रत्यलक्षणमाश्रित्य पदसंज्ञायाम्-

**न लोपः प्रातिपदिकान्तस्य ८ । २ । ७ ॥**

**प्रातिपदिकसंज्ञकं यत्पदं तदन्तस्य नस्य लोपः । सखा ॥**

यदि कस्यचित् प्रातिपदिकस्य पदसंज्ञा अपि भवति, तर्हि तस्य अन्ते स्थितस्य नकारस्य लोपो भवति ।

अनेन सूत्रेण पदसंज्ञकस्य प्रातिपदिकान्तस्य नकारस्य लोपे 'सखा' इति रूपम् ।

सखि सु - सखि स् - सखन् स् - सखान् स् - सखान् - सखा ।

**सख्युरसम्बुद्धौ ७ । १ । ९२ ॥**

**सख्युरङ्गात्परं सम्बुद्धिवर्जं सर्वनामस्थानं णिद्वत्स्यात् ॥**

सखि-शब्दरूपाद् अङ्गाद् विहिताः सम्बुद्धिसंज्ञकभिन्नाः सर्वनामस्थानसंज्ञकाः प्रत्यया णित्सदृशा भवन्ति । यद्यपि सु, औ, जस्, अम्, औट् इत्येतेषु सर्वनामस्थानसंज्ञकप्रत्ययेषु णकारो नास्ति तथापि सूत्रमिदम् एतेषु णित्वम् अतिदिशति । तदनु णित्वप्रयुक्तानि कार्याणि च जायन्ते ।

'सखि औ' इत्यवस्थायां सखि-शब्दरूपाद् अङ्गात् परस्य सर्वनामस्थानसंज्ञकस्य औ-प्रत्ययस्य अनेन सूत्रेण

णिद्वद्भावे, पूर्वसवर्णदीर्घं बाधित्वा-

**अचो ञ्णिति ७ । २ । ११५ ॥**

**अजन्ताङ्गस्य वृद्धिर्ञिति णिति च परे । सखायौ । सखायः । हे सखे । सखायम् । सखायौ । सखीन् । सख्या । सख्ये ॥**

ञ्णिति = ञिति णिति च, ञकार-णकारयोः इत्संज्ञा यस्य तस्मिन् इत्यर्थः)

ञित्-प्रत्यये, णित्-प्रत्यये च परे सति अच्-वर्णान्तस्य अङ्गस्य अन्त्य-स्वरवर्णस्य स्थाने वृद्धिसंज्ञक आदेशो भवति । पूर्वसूत्रेण णित्वधर्मस्य अतिदेशात् सम्बुद्धिभिन्न-सर्वनामस्थाने परे अनेन सखि-शब्दस्य अन्त्यस्य इकारस्य वृद्धौ, आन्तरतम्याद् ऐकारादेशो विधीयते ।

सखि औ - सखै औ - सख् आय् औ - **सखायौ** । सखि जस् - सखि अस् - सखै अस् - सख् आय् अस् - सखायस् - सखायर् - **सखायः** । सम्बुद्धौ तु णिद्वद्भावस्य अभावाद् वृद्धौ अपि अप्राप्तौ हरिशब्दवत् **'हे सखे'** इति रूपं जायते । सखि अम् - सखै अम् - सख् आय् अम् - **सखायम्** । सखि औट् - सखि औ - सखै औ - सख् आय् औ - सखायौ । शस्-प्रत्यये तस्य सर्वनामस्थानभिन्नतया णित्वस्य अप्रसङ्गे हरिवदेव **'सखीन्'** इति रूपं निष्पद्यते । तृतीयैकवचने सखि टा, सखि आ, इत्यवस्थायाम् घिसंज्ञाया अभावत्वाद् ना-भावस्यापि अभावे इकारस्य यणि- **सख्या** । भ्यामादिहलादौ विभक्तौ, ओस्विभक्तौ, आम्विभक्तौ च सखि-शब्दस्यापि हरिवदेव रूपाणि जायन्ते । ङिद्विभक्तिषु घिप्रयुक्तस्य गुणस्य, अत्वौत्वस्य च अप्राप्तिर्बोध्या । सखि ङे - सखि ए - सख् य् ए (इको यणचि) - सख्ये ।

**ख्यत्यात्परस्य ६ । १ । ११२ ॥**

**खितिशब्दाभ्यां खीतीशब्दाभ्यां कृतयणादेशाभ्यां परस्य ङसिङसोरत उः । सख्युः ॥**

ख्य = खिशब्द-खीशब्दयोः कृतयणादेशम् 'ख्य्' इति स्वरूपम् । त्य = तिशब्द-तीशब्दयोः कृतयणादेशम् 'त्य्' इति स्वरूपम् । अतः = अकारस्य । उत् = उकारः)

खि, खी, ति, ती इति शब्दस्वरूपाणां यणादेशेन निर्मिताभ्याम् 'ख्य्', 'त्य्' इति स्वरूपाभ्याम् उत्तरस्य ङसि-ङस्प्रत्यययोरवयवस्य अकारस्य स्थाने उकारादेशो भवति । सूत्रेऽस्मिन् खि-ति-खी-ती-शब्देभ्य उत्तरवर्तिनोः इकार-ईकारयोः यणादेशं विधाय निर्मितयोः 'ख्य्', 'त्य्' शब्दस्वरूपयोरेव ग्रहणं भवति, न तु अन्येषाम् । तेन, मुख्य, अपत्य इत्येतयोः शब्दयोरपि अन्ते 'ख्य', 'त्य' इत्येते शब्दस्वरूपे दृश्येते, परं ते खि-ति-खी-तीशब्दानां यणादेशेन विकृतरूपे न स्तः, अतः ताभ्यां परस्य ङसि-ङस्प्रत्यययोरकारस्य अनेन सूत्रेण उत्वं न भवतीति बोद्धव्यम् । खि-ति-खी-तीशब्दानां विषयेऽपि यत्र यणादेशोऽस्ति, तत्रैव अस्य सूत्रस्य प्रवृत्तिर्भवति, यतः पूर्वं यणादेशे कृते एव अस्य प्रसक्तिर्जायते ।

सखि ङसि/ङस् - सखि अस् - सख् य् अस् (इको यणचि) - सख् य् उस् (ख्यत्यात्परस्य) - सख्युस् - सख्युर् - सख्युः ।

**औत् ७ । ३ । ११८ ।**

**इतः परस्य ङेरौत् । सख्यौ । शेषं हरिवत् ॥**

इतः = ह्रस्व-इकारात् । ङेः = ङि इत्यस्य । औत् = औकारः ।

इकारात् परस्य सप्तम्येकवचनस्य ङि-प्रत्ययस्य स्थाने औकार आदेशो भवति । इकारान्तेषु शब्देषु यस्य नदीसंज्ञा, घिसंज्ञा च न भवति, तस्माद् ङि-प्रत्यये एव अस्य सूत्रस्य प्रसक्तिर्वर्तते, यतः नदीसंज्ञाविषये आमादेशेन (इदुद्भ्याम्), घिसंज्ञाविषये च अत्वौत्वेन (अच्च घेः) विधिरयं बाध्यते ।

सखि ङि - सखि इ - सखि औ (औत्) - सख् य् औ (इको यणचि) - सख्यौ ।

पति-शब्दस्य कृदन्ततया व्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा भवति । टा-विभक्तिम्, ङिद्विभक्तिं च विहाय अन्यासु विभक्तिषु अस्य शब्दस्य सिद्धिप्रक्रिया हरिशब्दवद् ज्ञेया । शेषविभक्तिषु (टा, ङित्) तु अस्य रूपाणि सखि-शब्दवद् जायन्ते । तद्-आह-

**पतिः समास एव १ । ४ । ८ ॥**

**घिसंज्ञः । पत्या । पत्ये । पत्युः २ । पत्यौ । शेषं हरिवत् । समासे तु भूपतये ।**

पति-शब्दः समासे एव घि-संज्ञको भवति । पति-शब्दस्य 'शेषो घ्यसखि' इत्यनेन सर्वत्र घिसंज्ञायां प्राप्तायाम् अनेन सूत्रेण समासप्रक्रियया निर्मितानां पति-शब्दान्तानां शब्दानाम् एव घि-संज्ञा विधीयते । अतः भूपति, प्रजापति, नरपति इत्यादीनां शब्दानां हरि-शब्दवदेव रूपाणि जायन्ते ।

अनेन सूत्रेण घिसंज्ञाया निषेधे टा, ङे, ङसि, ङस्, ङि इत्येतेषु विभक्तिषु सखि-शब्दसदृशप्रक्रियया पत्या, पत्ये, पत्युः, पत्युः, पत्यौ इत्येतानि रूपाणि निष्पद्यन्ते ।

**कतिशब्दो नित्यं बहुवचनान्तः ॥**

किम्-शब्दाद् डति-प्रत्यये निष्पन्नः कति-शब्दो बहुवचने एव प्रयुज्यते । तद्धितप्रत्ययान्ततया व्युत्पन्नपक्षे तस्य प्रातिपदिकसंज्ञा भवति ।

**बहुगणवतुडति सङ्ख्या १ । १ । २३ ॥**

**वतु = वतुप्प्रत्ययान्ताः शब्दाः । डति = डतिप्रत्ययान्तः शब्दः ।**

बहु-शब्दस्य, गण-शब्दस्य, वतुप्-प्रत्ययान्तस्य शब्दस्य, डति-प्रत्ययान्तस्य शब्दस्य च 'सङ्ख्या' इति संज्ञा भवति, लोके प्रसिद्धानाम् एक, द्वि, त्रि इत्यादीनां सङ्ख्यावाचकशब्दानां सङ्ख्यासंज्ञा अस्त्येव ।

अस्मिन् सूत्रे सङ्ख्यावाचिनौ एव बहु-गणशब्दौ गृह्येते, न तु वैपुल्य-सङ्घवाचिनौ इति स्मर्तव्यम् । वतुप्-प्रत्ययान्तशब्दा यावत्, तावत्, एतावत् इति त्रयः सन्ति । डति-प्रत्ययान्तस्तु 'कति' इति एक एव शब्दो वर्तते । उक्तानां षण्णां शब्दानाम्, लोकप्रसिद्धानाम् एकादिशब्दानां च सङ्ख्यासंज्ञा भवतीति ज्ञेयम् ।

**डति च १। १। २५ ॥**

**डत्यन्ता सङ्ख्या षट्संज्ञा स्यात् ॥**

सङ्ख्यासंज्ञकस्य डति-प्रत्ययान्तस्य शब्दस्य (कति-शब्दस्य) 'षट्' इति संज्ञा भवति ।

**षड्भ्यो लुक् ७। १। ६१ ॥**

**जश्शसोः ॥**

षट्-संज्ञकात् शब्दाद् उत्तरस्य जस्-प्रत्ययस्य, शस्-प्रत्ययस्य च 'लुक्' भवति। लुक्-शब्देन लुप्ते प्रत्ययलक्षणमाश्रित्य विधीयमानं तन्निमित्तम् अङ्गकार्यम् 'न लुमताङ्गस्य' इति आगामिना सूत्रेण निषिध्यते ।

**प्रत्ययस्य लुक्श्लुलुपः १। १। ६१ ॥**

**लुक्श्लुलुप्शब्दैः कृतं प्रत्ययादर्शनं क्रमात्तत्तत्संज्ञं स्यात् ॥**

लुक्-शब्दं प्रयुज्य विहितस्य प्रत्ययस्य अदर्शनस्य (लोपस्य) लुक्-संज्ञा भवति, श्लु-शब्देन विहितस्य प्रत्ययस्य अदर्शनस्य श्लु-संज्ञा भवति, लुप्-शब्देन विहितस्य प्रत्ययस्य अदर्शनस्य च लुप्-संज्ञा भवति । लुक्, श्लु, लुप् एते त्रयः 'लुमन्तः' कथ्यन्ते, यतः त्रिषु एव 'लु' इति शब्दस्वरूपं समानं वर्तते । लु यत्र अस्ति इत्यर्थे मतुप्-प्रत्यये निष्पन्नस्य लुमत्-शब्दस्य पुँल्लिङ्गे लुमान्, लुमन्तौ, लुमन्तः इत्यादीनि रूपाणि जायन्ते ।

**प्रत्ययलोपे प्रत्ययलक्षणम् १। १। ६३ ॥**

**प्रत्यये लुप्ते तदाश्रितं कार्यं स्यात् । इति जसि चेति गुणे प्राप्ते ॥**

प्रत्ययस्य लोपे कृतेऽपि प्रत्ययाश्रितम् (प्रत्ययनिमित्तकम्) कार्यं भवति । प्रत्ययस्य लोपे कृते अपि तं प्रत्ययं निमित्तं कृत्वा क्रियमाणानि कार्याणि भवन्ति एव इत्याशयः । इयं परिभाषा 'प्रत्ययलक्षणम्' इति संज्ञया प्रसिद्धा ।

**न लुमताऽङ्गस्य १। १। ६३ ॥**

**लुमता शब्देन लुप्ते तन्निमित्तमङ्गकार्यं न स्यात् । कति २। कतिभिः । कतिभ्यः २। कतीनाम् । कतिषु । युष्मदस्मत्षट्संज्ञकास्त्रिषु सरूपाः ॥ त्रिशब्दो नित्यं बहुवचनान्तः । त्रयः । त्रीन् । त्रिभिः । त्रिभ्यः २ ॥**

लुक्-श्लु-लुप्शब्दैः प्रत्ययस्य लोपे सति प्रत्ययनिमित्तम् अङ्गकार्यं न भवति । लुक्श्लुलुप्-शब्दैः प्रत्ययस्य लोपानन्तरं 'प्रत्ययलोपे प्रत्ययलक्षणम्' इति सूत्रेण प्राप्तम् अङ्ग-कार्यम् अनेन निषिध्यते । अङ्गकार्यं नाम अङ्गस्य इत्यधिकारे अङ्गमुद्दिश्य जायमानं कार्यम् ।

कति-शब्दस्य नित्यं बहुवचनान्तत्वात् प्रथमायां जस्-प्रत्यये, षट्संज्ञायाम्- कति जस् - कति अस् - कति (षड्भ्यो लुक्) । अत्र प्रत्ययलक्षणमाश्रित्य 'जसि च' इति अङ्गस्य गुणे प्राप्ते अनेन सूत्रेण गुणनिषेधः । शस्-प्रत्यये प्रत्ययस्य लुकि 'कति' इति सिद्ध्यति । भिसादिविभक्तिषु हरिशब्दवत् प्रक्रिया अत्रापि अवलम्बनीया ।

युष्मद्-शब्दस्य, अस्मद्-शब्दस्य, षट्संज्ञक-शब्दानां च रूपाणि त्रिषु लिङ्गेषु समानानि भवन्ति ।

सङ्ख्यावाचकः त्रि-शब्दो बहुवचने एव प्रयुज्यते । सङ्ख्यावाचकेषु त्रि-शब्दाद् आरभ्य नवदशन्-शब्दान्ताः शब्दा नित्यं बहुवचने एव प्रयुज्यन्ते । अतः तेभ्यो बहुवचनसंज्ञका जसादिप्रत्यया एव जायन्ते ।

त्रि जस् - त्रि अस् - त्रे अस् (जसि च) - त्र् अय् अस् - त्रयः । शस्, भिस्, भ्यस्, सुप् इत्येतासु विभक्तिषु अपि हरिवद् एव कर्तव्यम् । आम्-प्रत्यये तु-

**त्रेस्त्रयः ७ । १ । ५३ ॥**

**त्रिशब्दस्य त्रयादेशः स्यादामि । त्रयाणाम् । त्रिषु । गौणत्वेऽपि प्रियत्रयाणाम् ॥**

आम्-प्रत्यये परे सति त्रि-शब्दान्तस्य अङ्गस्य स्थाने 'त्रय' इति आदेशो भवति । अनेकाल्त्वात् सर्वस्य स्थानिनः स्थाने आदेशोऽयं विधीयते ।

त्रि आम् - त्रय आम् (त्रेस्त्रयः) - त्रय नाम् (ह्रस्वनद्यापो नुट्) - त्रयानाम् (नामि) - त्रयाणाम् ।

अयं त्रयादेशः त्रि-शब्दस्य गौणत्वेन प्रयोगेऽपि भवति । समासे उपसर्जनभूतः शब्द गौणत्वेन स्वीक्रियते (इतरविशेषणतया स्वार्थोपस्थापकं गौणत्वम्) । 'प्रियाः त्रयो यस्याः' इति विग्रहे बहुव्रीहिसमासेन निष्पन्नस्य प्रियत्रि-शब्दस्य अपि आम्-प्रत्यये परे अनेन 'त्रि' इत्यस्य त्रयादेशे 'प्रियत्रयाणाम्' इति रूपं जायते । अस्य शेषरूपाणि हरिवद् भवन्ति ।

सङ्ख्यावाचको द्वि-शब्दस्य नित्यं द्विवचनान्ततया द्विवचनविभक्तय एव तस्माद् उत्पद्यन्ते । प्रथमाया द्विवचने औ-प्रत्यये आह-

**त्यदादीनामः ७ । २ । १०२ ॥**

**एषामकारो विभक्तौ ।**

**द्विपर्यन्तानामेवेष्टिः (वा.) द्वौ २ । द्वाभ्याम् ३ । द्वयोः २ ॥**

विभक्तौ परतः त्यदादिगणे पठितानां शब्दानाम् अकारान्तादेशो भवति । अकारान्तादेशः = अन्त्यस्य वर्णस्य स्थाने अकार आदेशः, अत्व-पदेन अपि व्यवह्रियते ।

अयम् अकारान्तादेशः त्यदादिगणपठितशब्देषु द्वि-शब्दपर्यन्तानां शब्दानाम् परत एव भवतीति वार्तिकार्थः ।

सर्वादिगणे अन्तर्गणरूपेण आगते त्यदादिगणे त्यद्-तद्-यद्-एतद्-इदम्-अदस्-एक-द्वि-युष्मद्-अस्मद्-भवत्-किम् इति शब्दाः सन्ति । अनेन विधीयमानम् अत्वं द्वि-शब्दपर्यन्तानाम् अष्टानां त्यदादिशब्दनाम् परत एव इष्टं वर्तते, तेन अन्त्यानां युष्मद्, अस्मद्, भवत्, किम् इत्येतेषां चतुर्णां त्यदादिशब्दानाम् अनेन अत्वं न भवतीति बोध्यम् ।

अनेन सूत्रेण अकारान्तादेशे कृते इकारान्तो द्वि-शब्दो विभक्तौ परतः सत्याम् अकारान्तो भवति, तेन सर्व-शब्दस्य द्विवचनवत् द्वि-शब्दस्यापि रूपाणि निष्पद्यन्ते ।

द्वि औ - द्व औ (त्यदादीनामः) - द्वौ (वृद्धिरेचि) । द्वि भ्याम् - द्व भ्याम् (त्यदादीनामः) - द्वा भ्याम् (सुपि च) - द्वाभ्याम् । द्वि ओस् - द्व ओस् - द्वे ओस् (ओसि च) - द्व् अय् ओस् - द्वयोस् - द्वयोर् - द्वयोः ।

## प्रयोगसिद्धिप्रकारः

**हरौ**

हरि-शब्दस्य प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण सप्तम्या एकवचने ङि-प्रत्ययेऽनुबन्धलोपे 'हरि इ' इति जाते 'शेषो घ्यसखि' इति सूत्रेण प्रकृतेर्घिसंज्ञायाम् 'घेर्ङिति' इत्यनेन अङ्गस्य गुणे प्राप्ते, तं बाधित्वा 'अच्च घेः' इति सूत्रेण प्रत्ययस्य स्थाने औकारादेशे, घिसंज्ञकस्य अङ्गस्य च अकारान्तादेशे कृते 'हर औ' इति जाते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ, औकार एकादेशे, वर्णयोगे 'हरौ' इति रूपं साधु ।

**शब्द-रूपावलिः**

| सर्व-शब्दस्य पुँल्लिङ्गे रूपाणि | | |
|---|---|---|
| हरिः | हरी | हरयः |
| हरिम् | हरी | हरीन् |
| हरिणा | हरिभ्याम् | हरिभिः |
| हरये | हरिभ्याम् | हरिभ्यः |
| हरेः | हरिभ्याम् | हरिभ्यः |
| हरेः | हर्योः | हरीणाम् |
| हरौ | हर्योः | हरिषु |
| हे हरे ! | हे हरी ! | हे हरयः ! |

| सखि-शब्दस्य रूपाणि | | |
|---|---|---|
| सखा | सखायौ | सखायः |
| सखायम् | सखायौ | सखीन् |
| सख्या | सखिभ्याम् | सखिभिः |
| सख्ये | सखिभ्याम् | सखिभ्यः |
| सख्युः | सखिभ्याम् | सखिभ्यः |
| सख्युः | सख्योः | सखीनाम् |
| सख्यौ | सख्योः | सखिषु |
| हे सखे ! | हे सखायौ ! | हे सखायः ! |

| पति-शब्दस्य रूपाणि | | |
|---|---|---|
| पतिः | पती | पतयः |
| पतिम् | पती | पतीन् |
| पत्या | पतिभ्याम् | पतिभिः |
| पत्ये | पतिभ्याम् | पतिभ्यः |
| पत्युः | पतिभ्याम् | पतिभ्यः |
| पत्युः | पत्योः | पतीनाम् |
| पत्यौ | पत्योः | पतिषु |
| हे पते ! | हे पती ! | हे पतयः ! |

| त्रि-शब्दस्य पुँल्लिङ्गे रूपाणि |
|---|
| त्रयः |
| त्रीन् |
| त्रिभिः |
| त्रिभ्यः |
| त्रिभ्यः |
| त्रयाणाम् |
| त्रिषु |
| |

| द्वि-शब्दस्य पुँल्लिङ्गे रूपाणि |
|---|
| द्वौ |
| द्वौ |
| द्वाभ्याम् |
| द्वाभ्याम् |
| द्वाभ्याम् |
| द्वयोः |
| द्वयोः |
| |

### पदप्रयोगप्रकार:

१. मम सख्यु: नाम महेश: अस्ति ।

२. हरे: नाम एव कलौ मोक्षगत: मार्ग: वर्तते ।

३. त्वं गुरो: समीपं गच्छ ।

४. विष्णवे नम: ।

५. पिता हरिं भजति ।

६. सीता पत्या सह वनम् अगच्छत् ।

७. सखाय: उद्याने क्रीडन्त: सन्ति ।

८. त्रयाणां देवानां समूह: त्रिदेव: कथ्यते ।

९. द्वौ बालकौ संवदत: ।

१०. कक्षायां कति बालका: कति च बालिका: सन्ति ?

# अभ्यासः

१. **सूत्राणि पठित्वा तेषां कार्याणि विलिखत**

(क) जसि च (ख) ख्यत्यात्परस्य

(ग) पतिः समास एव (घ) घेर्ङिति

२. **परस्परं मेलयत**

| | |
|---|---|
| शेषो घ्यसखि | उपधासंज्ञा |
| अपृक्त एकाल् प्रत्ययः | भसंज्ञा |
| अलोऽन्त्यात् पूर्व उपधा | षट्संज्ञा |
| बहुगणवतुडति सङ्ख्या | घिसंज्ञा |
| डति च | लुक्-श्लु-लुप्संज्ञा |
| प्रत्ययस्य लुक्श्लुलुपः | अपृक्तसंज्ञा |
| | सङ्ख्यासंज्ञा |

३. **निर्दिष्टकार्याणां विधायकानि सूत्राणि लिखत**

(क) उपधादीर्घः (ख) जश्शसोर्लुक् (ग) प्रत्ययलक्षणम्

४. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) 'घेर्ङिति' इति सूत्रम् .................... गुणं करोति । (ङिद्विभक्तिषु, सर्वनामस्थानविभक्तिषु)

(ख) 'अचो ञ्णिति' इति सूत्रं .................... करोति । (गुणम्, वृद्धिम्)

(ग) 'हरयः' इत्यत्र ............... इत्यनेन गुणो भवति । (ह्रस्वस्य गुणः, जसि च)

(घ) ............. उपधा कथ्यते । (उपान्त्यवर्णः, अन्त्यवर्णः)

(ङ) सम्बुद्धौ परतः 'सर्वनामस्थाने चासम्बुद्धौ' इति .............. । (प्रवर्तते, न प्रवर्तते)

(च) टा-ङिद्विभक्तिषु पतिशब्दस्य रूपाणि ................ भवन्ति । (सखिवत्, हरिवत्)

(छ) पतिशब्दः ................ एव घिसंज्ञां लभते । (समासे, असमासे)

(ज) लोपशब्देन लुप्ते तन्निमित्तम् अङ्गकार्यम् ............. । (भवति, न भवति)

(झ) कति-शब्दस्य रूपाणि त्रिषु लिङ्गेषु ................ भवन्ति । (समानानि, भिन्नानि)

५. **अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत**

विष्णवे, भानौ, गिरयः, सखायम्, पत्या, विधीन्, कति

६. **एकवाक्येन उत्तरं लिखत**

(क) इकारान्तेषु कस्य शब्दस्य घिसंज्ञा न भवति ?

(ख) 'ख्यत्यात्परस्य' इत्यनेन कस्य उत्वं भवति ?

(ग) 'हरेः' इत्यत्र पूर्वरूपविधायकं सूत्रं किम् ?

(घ) भूपति-शब्दस्य घिसंज्ञा भवति न वा ?

(ङ) गणपति-शब्दस्य तृतीयैकवचने किं रूपम् ?

(च) कति-शब्दः कस्मिन् लिङ्गे प्रयुज्यते ?

(छ) इकारस्य गुणे, वृद्धौ च कौ वर्णौ विधीयेते ?

(ज) के लुमन्तः ?

७. **प्रश्नानामुत्तरं लिखत**

(क) 'हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्' इति सूत्रेण कस्मात् परस्य कस्य लोपो भवति ?

(ख) घि-संज्ञाप्रयुक्तकार्याणि कानि ? तानि च कासु विभक्तिषु जायन्ते ?

(ग) हरि-सखिशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) पति-शब्दस्य रूपसिद्धिप्रक्रिया कुत्र कुत्र हरिशब्दाद् भिन्ना विद्यते ?

(ङ) हरि-शब्दः कासु विभक्तिषु गुणं लभते ?

(च) सखि-शब्दस्य वृद्धिकारकाः सुप्-प्रत्ययाः के ?

८. **ओतु-कवि-सभापतिशब्दानां सर्वाणि रूपाणि लिखत ।**

९. **अधस्तन-प्रयोगाणां सिद्धिपथं दर्शयत**

| | | | |
|---|---|---|---|
| (क) हे हरे | (ख) सख्यौ | (ग) पत्युः | (घ) हरेः |
| (ङ) त्रयाणाम् | (ङ) सखा | (च) कति | (ज) त्रयाणाम् |

### अजन्तप्रकरणे

# ईकारान्तपुल्लिङ्गशब्दाः

**पाति लोकमिति पपीः सूर्यः ॥**

(१६१ '**दीर्घाज्जसि च**') **पप्यौ** २। **पप्यः**। ६। १। १०५॥ हे **पपीः**। **पपीम्**। **पपीन्**। **पप्या**। **पपीभ्याम्** ३। **पपीभिः**। **पप्ये**। **पपीभ्यः** २। **पप्यः** २। **पप्योः** २। **दीर्घत्वान्न नुट्, पप्याम्**। **ङौ तु सवर्णदीर्घः, पपी**। **पप्योः पपीषु**। **एवं वातप्रम्यादयः ॥**

पपी-शब्दः ङ्यन्तभिन्नो ईकारान्तशब्दो वर्तते, तस्य च व्युत्पत्तिपक्षे प्रातिपदिकसंज्ञा भवति।

पपी सु - पपी स् - पपीस् - पपीर् - **पपीः**। औ, जस्, औट् इत्येतेषु प्रत्ययेषु पूर्वसवर्णदीर्घे प्राप्ते 'दीर्घाज्जसि च' इत्यनेन निषिध्यते, ततो यणि **पप्यौ** इत्यादि सिद्ध्यन्ति। अम्-प्रत्यये पूर्वरूपम्, शस्-प्रत्यये सवर्णदीर्घश्च विधीयेते। तदतिरिक्तासु अजादिषु विभक्तिषु विशेषकार्याभावात् सन्धिकार्यमेव भवति। आम्-प्रत्ययेऽपि ङ्याब्भिन्नदीर्घान्तत्वाद् नुडागमस्य अप्राप्तिरिति स्मर्तव्यम्। ङि-प्रत्यये 'पपी इ' इत्यवस्थायां सवर्णदीर्घेण **'पपी'** इति रूपं जायते, अन्यत्र तु यणादेशेन **पप्या, पप्ये, पप्यः, पप्योः, पप्याम्** इत्यादीनि रूपाणि जायन्ते। हलादिविभक्तिषु विभक्तियोजनादिकमेव कार्यम्। वातप्रमी-शब्दस्य अपि पपीवद् रूपाणि निष्पद्यन्ते।

**बह्व्यः श्रेयस्यो यस्य स बहुश्रेयसी ॥**

बहुश्रेयसी-शब्दः 'बह्व्यः श्रेयस्यो यस्य' इति विग्रहे समासेन निष्पन्नो वर्तते। श्रेयसी-शब्दस्य स्त्रीलिङ्गत्वेऽपि समासेन बहुश्रेयसी-शब्दः पुँल्लिङ्गो जातोऽस्ति। प्रथमा-द्वितीया-तृतीयाविभक्तिषु बहुश्रेयसी-शब्दस्य रूपाणि पपीवद् जायन्ते। सम्बुद्धौ तु-

**यू स्त्याख्यौ नदी** १। ४। ३॥

**ईदूदन्तौ नित्यस्त्रीलिङ्गौ नदीसंज्ञौ स्तः।**

यू = ई+ऊ = ईकार-ऊकारौ, ईकारान्त-ऊकारान्तशब्दौ इत्यर्थः। स्त्याख्यौ = स्त्री यस्य आख्या (प्रकारः) स स्त्र्याख्यः, तौ = नित्य-स्त्रीलिङ्गशब्दौ इत्यर्थः।

ईकारान्तानाम्, ऊकारान्तानां च नित्य-स्त्रिलिङ्गवाचिनां शब्दानाम् 'नदी' इति संज्ञा भवति।

ये शब्दा ईकारान्ताः, ऊकारान्ता वा सन्तः केवलं स्त्रीलिङ्गे एव प्रयुज्यन्ते तेषाम् एव अनेन नदीसंज्ञा भवति। कश्चित् शब्द ईकारान्तः/ऊकारान्तः, स्त्रीलिङ्गश्च सन्नपि लिङ्गान्तरेऽपि (पुँल्लिङ्गे, नपुंसकलिङ्गे

वा) प्रयुज्यते चेत् तस्य स्त्रीलिङ्गे अपि नदीसंज्ञा न भवति, तस्य नित्यस्त्रीलिङ्गत्वाभावाद् इति स्मर्तव्यम् । यथा- 'स्वयम्भू' इति शब्द ऊकारान्तो वर्तते, स्त्रीलिङ्गोऽपि अस्ति, परन्तु तस्य पुँल्लिङ्गे अपि प्रयोगात् स्त्रीलिङ्गप्रयोगावस्थायाम् अपि नदीसंज्ञा न भवति । एवम् ईकारान्तस्य ग्रामणी-शब्दस्य अपि लिङ्गद्वये विद्यमानत्वात् (स्त्रीलिङ्गेऽनित्यत्वात्) नदीसंज्ञा न जायते ।

**प्रथमलिङ्गग्रहणं च (वा.) पूर्वं स्त्याख्यस्योपसर्जनत्वेऽपि नदीत्वं वक्तव्यमित्यर्थः ॥**

'यदि कश्चन नदीसंज्ञकशब्दः समासे उपसर्जनरूपेण आगच्छति तर्हि तस्य समस्तपदस्य अपि नदीसंज्ञा भवति' इत्यर्थकेन 'प्रथमलिङ्गग्रहणं च' इति वार्तिकेन बहुश्रेयसी-शब्दस्य नदीसंज्ञा क्रियते ।

**नदीसंज्ञाप्रयुक्तकार्याणि-**

- सम्बोधनैकवचने प्रातिपदिकस्य अन्त्यवर्णस्य ह्रस्वः । (अम्बार्थनद्योर्ह्रस्वः)
- ङिद्विभक्तीनाम् 'आट्' आगमः । (आण्नद्याः)
- आम्-विभक्तेः 'नुट्' आगमः । (ह्रस्वनद्यापो नुट्)
- ङि-विभक्तेः स्थाने 'आम्' आदेशः । (ङेराम्नद्याम्नीभ्यः, इदुद्भ्याम्)

**अम्बार्थनद्योर्ह्रस्वः** ७ । ३ । १०७ ॥

**सम्बुद्धौ । हे बहुश्रेयसि ॥**

सम्बुद्धिसंज्ञके प्रत्यये परे अम्बा-शब्दस्य पर्यायरूपेण प्रयुज्यमानानां शब्दानाम्, नदीसंज्ञकानां शब्दानां च अङ्गस्य अन्त्यवर्णस्य ह्रस्व आदेशो भवति । 'अम्बा' इति शब्दः 'माता' इत्यर्थे प्रयुज्यते । अम्बा, अक्का, अल्ला इत्यादयः अम्बार्थक-शब्दाः सन्ति, यतः एतेषां सर्वेषाम् अर्थो माता अस्ति । एतेषां शब्दानाम्, नदीसंज्ञकानां शब्दानाम्, तदन्तशब्दानां च अनेन सूत्रेण सम्बोधनस्य एकवचने ह्रस्वान्तत्वं विधीयते ।

बहुश्रेयसी सु (सम्बोधनम्) - बहुश्रेयसी स् - नदीसंज्ञायाम्, अनेन अङ्गस्य ह्रस्वे- बहुश्रेयसि स् - बहुश्रेयसि (एङ्ह्रस्वात् सम्बुद्धेः) - हे बहुश्रेयसि ।

**आण्नद्याः** ७ । ३ । ११२ ॥

**नद्यन्तात्परेषां ङितामाडागमः ॥**

नदीसंज्ञकाद् अङ्गात् परस्य ङित्-प्रत्ययस्य 'आट्' इत्यागमो भवति । आट् इत्यस्य टकार इत्, टित्वाद् 'आद्यन्तौ टकितौ' इत्यनेन आद्यवयवत्वे प्रत्ययस्य आदौ 'आ' इति संयोज्यते ।

**आटश्च** ६ । १ । ९० ॥

**आटोऽचि परे वृद्धिरेकादेशः । बहुश्रेयस्यै । बहुश्रेयस्याः । बहुश्रेयसीनाम् ॥**

'आट्' इति आगमाद् अच्-वर्णे परे सति पूर्वपरयोः (आडचोः) स्थाने वृद्धिसंज्ञक एकादेशो भवति ।

बहुश्रेयसी ङे - बहुश्रेयसी ए - बहुश्रेयसी आ ए (आण्नद्याः) - बहुश्रेयसी ऐ (आटश्च) - बहुश्रेयस् य् ऐ (इको यणचि) - **बहुश्रेयस्यै** । बहुश्रेयसी ङसि/ङस् - बहुश्रेयसी अस् - बहुश्रेयसी आ अस् (आण्नद्याः) - बहुश्रेयसी आस् (आटश्च) - बहुश्रेयस् य् आस् (इको यणचि) - बहुश्रेयस्यास् - बहुश्रेयस्यार् - **बहुश्रेयस्याः** । आम्-प्रत्यये ङ्यन्तत्वाद् नुडागमे- **बहुश्रेयसीनाम्** इति ।

**ङेराम्नद्याम्नीभ्यः ७ । ३ । ११६ ॥**

**नद्यन्तादाबन्तान्नीशब्दाच्च परस्य ङेराम् । बहुश्रेयस्याम् । शेषं पपीवत् ॥ अङ्यन्तत्वान्न सुलोपः अतिलक्ष्मीः । शेषं बहुश्रेयसीवत् ॥ प्रधीः ॥**

नदीसंज्ञकाद् अङ्गात् परस्य, आबन्ताद् अङ्गात् परस्य, 'नी' इति शब्दस्वरूपान्तात् च अङ्गात् परस्य सप्तम्येकवचनस्य ङि-प्रत्ययस्य स्थाने 'आम्' इत्यादेशो भवति । आमादेशस्य स्थानिवत्वाद् ङित्वे तत्प्रयुक्तकार्याणि अपि जायन्ते इति बोध्यम् । सेनानी, राजनी, ग्रामणी इत्यादयो नी-शब्दान्तशब्दाः सन्ति । अनेन सूत्रेण नी-शब्दात्, नीशब्दान्तशब्दात् च विहितस्य 'ङि' इत्यस्य आमादेशो विधीयते ।

बहुश्रेयसी ङि - बहुश्रेयसी इ - बहुश्रेयसी आम् (ङेराम्नद्याम्नीभ्यः) - बहुश्रेयसी आ आम् (आण्नद्याः) - बहुश्रेयसी आम् (आटश्च) - बहुश्रेयस् य् आम् (इको यणचि) - **बहुश्रेयस्याम्** ।

'लक्ष्मीम् अतिक्रान्तः' इति विग्रहे समासेन निष्पन्न अतिलक्ष्मी-शब्दो ङ्यन्तो नास्ति, अतः तस्मात् परस्य सोः हल्ङ्यादिलोपो न भवति । अतिलक्ष्मी सु - अतिलक्ष्मी स् - अतिलक्ष्मीस् - अतिलक्ष्मीर् - अतिलक्ष्मीः । शेषरूपाणि बहुश्रेयसीवत् ज्ञेयानि ।

'प्रकर्षेण ध्यायति' इत्यर्थे क्विप्-प्रत्यये निष्पन्नस्य प्रधी-शब्दस्य अपि अङ्यन्तत्वात् सुलोपाभावे 'प्रधीः' इति रूपम् । औ-प्रत्यये तु-

**अचिश्नुधातुभ्रुवां य्वोरियङुवङौ ६ । ४ । ७७ ॥**

**श्नुप्रत्ययान्तस्येवर्णोवर्णान्तस्य धातोर्भ्रू इत्यस्य चाङ्गस्येयङुवङौ स्तोऽजादौ प्रत्यये परे । इति प्राप्ते ॥**

य्वोः = इवर्ण-उवर्णयोः । अजादिप्रत्यये परे सति श्नु-प्रत्ययान्तस्य अङ्गस्य, इवर्णान्तस्य उवर्णान्तस्य च धातोः (धातुसंज्ञकस्य) अङ्गस्य, 'भ्रू' इति शब्दरूपस्य अङ्गस्य च स्थाने 'इयङ्', 'उवङ्' इत्येतौ आदेशौ भवतः । उभयोरेव आदेशयोः ङकार इत्संज्ञकः, अकारश्च उच्चारणार्थः, अतः 'इय्', 'उव्' इत्येतौ अवशिष्येते । ङित्वात् 'ङिच्च' इत्यनेन स्थानिनः अन्त्यस्य वर्णस्य (इवर्ण-उवर्णयोः) स्थाने एतौ आदेशौ विधीयेते । आन्तरतम्यात् तालुस्थानकस्य इवर्णस्य स्थाने तादृश एव 'इय्' आदेशो भवति, ओष्ठस्थानकस्य उवर्णस्य च स्थाने तादृश एव 'उव्' आदेशो भवति । श्नुप्रत्ययान्तस्य, भ्रूशब्दस्य च विषये उवर्णान्तत्वाद् उवङादेशः, तथैव उवर्णान्तधातूनां स्थानेऽपि उवङादेश एव । इयङादेशस्तु इवर्णान्तधातूनाम् एव इति बोध्यम् । विधिरयं यण्-गुण-वृद्धिविधिभिर्बाध्यते, अतः तेषां निषेधानन्तरमेव अस्य प्रसक्तिर्भवतीति बोध्यम् ।

'प्रधी औ' इत्यवस्थायाम् पूर्वसवर्णदीर्घस्य निषेधेन यणि प्राप्ते तं बाधित्वा अनेन सूत्रेण इयङादेशे प्राप्ते-

**एरनेकाचोऽसंयोगपूर्वस्य ६ । ४ । ८२ ॥**

**धात्ववयवसंयोगपूर्वो न भवति य इवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यणजादौ प्रत्यये । प्रध्यौ । प्रध्यः । प्रध्यम् । प्रध्यौ । प्रध्यः । प्रध्यि । शेषं पपीवत् । एवं ग्रामणीः । ङौ तु ग्रामण्याम् ॥ अनेकाचः किम् ? नीः । नियौ । नियः । अमि शसि च परत्वादियङ्, नियम् । ङेराम्, नियाम् ॥ असंयोगपूर्वस्य किम् ? सुश्रियौ । यवक्रियौ ॥**

एः = 'इ' इत्यस्य षष्ठ्येकवचनम् । यदि अङ्गम् अनेकाच् वर्तते, तस्य अङ्गस्य अन्ते धातुः अस्ति, तस्य च धातोः अन्ते धातोरवयव इवर्णो विद्यते, तस्य च इवर्णस्य पूर्वस्मिन् भागे संयोगो न भवति चेत् तादृशस्य अङ्गस्य अन्त्यवर्णस्य (इवर्णस्य) स्थाने 'यण्' आदेशो भवति, अजादि-प्रत्यये परे सति ।

अनेन सूत्रेण अलोऽन्त्यपरिभाषया अन्त्यस्य ईकारस्य यणि कृते 'प्रध् य् औ', 'प्रध्यौ' इति । एवमेव अम्, औट्, शस्, ङि चेति विभक्तिषु अनेन सूत्रेण यणादेशो विधीयते । शेषविभक्तिषु पपीवत् प्रक्रिया भवति ।

ग्रामणी-शब्दस्य ङि-विभक्तौ प्रधी-शब्दाद् भिन्नप्रक्रियया रूपाणि निष्पद्यन्ते, ङि-प्रत्यये तु 'ङेराम्नद्याम्नीभ्यः' इत्यनेन आमादेशे, यणि- ग्रामण्याम् ।

अनेन सूत्रेण अनेकाच एव अङ्गस्य अण्विधानाद् नी-शब्दस्य विषये अस्य प्रसक्तिर्न, अतस्तत्र इयङादेशो विधीयते । नी औ - न् इय् औ (अचि श्नुधातुभ्रुवां य्वोरियङुवङौ) - **नियौ** । **नियः** । अम्-प्रत्यये पूर्वरूपं बाधित्वा इयङादेशे- नियम् । शस्-प्रत्यये पूर्वसवर्णदीर्घं बाधित्वा इयङादेशे- **नियः** । टादिषु अजादिषु प्रत्ययेषु अपि इयङादेशे **'निया'** इत्यादि रूपाणि जायन्ते । ङिविभक्तौ 'ङेराम्नद्याम्नीभ्यः' इत्यनेन प्रत्ययस्य आमादेशे, अङ्गस्य इयङादेशे- **नियाम्** ।

संयोगपूर्व-इवर्णान्तस्य अङ्गस्य अपि अनेन यण् न भवतीति कारणेन 'सुष्ठु श्रयति' इत्यर्थकस्य 'सुश्री' शब्दस्य अपि इयङादेशो भवति । यथा- सुश्री औ- सुश्र् इय् औ- सुश्रियौ । शब्देऽस्मिन् ईकारात्पूर्वम् 'श्र्' इति शकार-रेफयोः संयोगो विद्यते । तेनैव कारणेन यवक्री-शब्दस्य अपि यणादेशाभावे इयङादेशे **'यवक्रियौ'** इत्यादि रूपाणि ज्ञेयानि ।

**गतिश्च १ । ४ । ६० ॥**

**प्रादयः क्रियायोगे गतिसंज्ञाः स्युः ।**

क्रियया सह प्रयुज्यमानाः प्रादि-गणपठिताः शब्दाः (प्रादयः) क्रियायाम् अन्विताः सन्ति चेत् निपातसंज्ञकाः सन्तो गतिसंज्ञकाश्च भवन्ति । सूत्रेऽस्मिन् चकारनिर्देशात् प्रादय एकसंज्ञाधिकारे पठिताः सन्तोऽपि अनेकसंज्ञाम् (निपातसंज्ञया सहैव गतिसंज्ञाम्) लभन्ते इति स्मर्तव्यम् ।

**गतिकारकेतरपूर्वपदस्य यण् नेष्यते (वा.) शुद्धधियौ ॥**

'यदि अङ्गे विद्यमानं पूर्वपदं गतिसंज्ञकम्, कारकसंज्ञकं वा नास्ति तर्हि 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन विहितं यण् भवति इति वार्तिकार्थः ।

शुद्धधी औ, इति स्थिते, इयङादेशं बाधित्वा पूर्वसूत्रेण यणादेशे प्राप्ते 'गतिकारकेतरपूर्वपदस्य यण् नेष्यते' इत्यनेन गतिकारकभिन्नोत्तरपदकत्वाद् यण्निषेधे, बाधकाभावे इयङादेशे- **शुद्धधियौ** । **शुद्धधियः** इत्यादि ।

**न भूसुधियोः ६ । ४ । ८५ ॥**

**एतयोरचि सुपि यणन । सुधियौ । सुधिय इत्यादि ॥ सुखमिच्छतीति सुखीः । सुतीः । सुख्यौ । सुत्यौ । सुख्युः । सुत्युः । शेषं प्रधीवत् ।**

अजादि-सुप्प्रत्यये परे सति भू-शब्दस्य, सुधी-शब्दस्य च अङ्गस्य 'यण्' आदेशो न भवति । भू-सुधीशब्दयोः अजादि-सुप्प्रत्ययेषु 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इत्यनेन प्राप्तौ उवङ्-इयङादेशौ बाधित्वा 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणादेशे प्राप्ते अनेन सूत्रेण तस्य निधेषः क्रियते, ततः 'बाधकाभावे पुनरुत्सर्गशास्त्रस्य प्रवृत्तिः' इति न्यायेन पुनः उवङ्-इयङौ आदिश्येते ।

सुधी-शब्दः 'सुष्ठु ध्यायति' इत्यर्थे सु इत्युपसर्गपूर्वकाद् ध्याधातोः क्विप्प्रत्ययेन निष्पद्यते । सुप्रत्यये- **सुधीः** । सुधी औ, इत्यवस्थायाम् इयङादेशं बाधित्वा यणि प्राप्ते अनेन सूत्रेण तस्य निषेधे च पुनः इयङादेशे- सुध् इय् औ, सुधियौ । जसादौ अपि अजादिविभक्तिषु इयङादेशो बोध्यः ।

सुखम् इच्छति, इत्यर्थे क्यच्प्रत्यये सुखी-शब्दो निष्पद्यते, तथैव सुतम् इच्छतीति सुती । एतयोः सिद्धिप्रक्रियायाम् इयङादेशं बाधित्वा यणादेशो विधीयते, परन्तु खी-तीशब्दान्तत्वात् ङसि-ङस्विभक्त्योः यणादेशात् पश्चात् 'ख्यत्यात्परस्य' इत्यनेन उत्वमपि भवतीति विशेषप्रक्रिया स्मर्तव्या । शेषविभक्तिषु एतयो रूपाणि प्रधीवद् निष्पद्यन्ते ।

### प्रयोगसिद्धिप्रकारः

**सुधियौ**

सुधी-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया द्विवचने औ-प्रत्यये 'सुधी औ' इति जाते, यणं बाधित्वा पूर्वसवर्णदीर्घे प्राप्ते, तस्य च 'दीर्घाज्जसि च' इत्यनेन निषेधे, पुनः 'इको यणचि' इत्यनेन यणि प्राप्ते तं प्रबाध्य 'अचि श्नुधातुभ्रुवां य्वोरियङुवङौ' इति सूत्रेण ईकारस्य इयङादेशे प्राप्ते तं बाधित्वा 'एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन यणि प्राप्ते, 'न भूसुधियोः' इति सूत्रेण तन्निषेधे, बाधकाभावे पुनः इयङादेशे, ङित्वाद् अन्त्यवर्णस्य स्थाने कृते 'सुध् इय् औ' इति जाते, वर्णसम्मेलने 'सुधियौ' इति रूपं सिद्धम् ।

**शब्द–रूपावलिः**

| बहुश्रेयसी–शब्दस्य रूपाणि | | |
|---|---|---|
| बहुश्रेयसी | बहुश्रेयस्यौ | बहुश्रेयस्यः |
| बहुश्रेयसीम् | बहुश्रेयस्यौ | बहुश्रेयसीन् |
| बहुश्रेयस्या | बहुश्रेयसीभ्याम् | बहुश्रेयसीभिः |
| बहुश्रेयस्यै | बहुश्रेयसीभ्याम् | बहुश्रेयसीभ्यः |
| बहुश्रेयस्याः | बहुश्रेयसीभ्याम् | बहुश्रेयसीभ्यः |
| बहुश्रेयस्याः | बहुश्रेयस्योः | बहुश्रेयसीनाम् |
| बहुश्रेयस्याम् | बहुश्रेयस्योः | बहुश्रेयसीषु |
| हे बहुश्रेयसि ! | हे बहुश्रेयस्यौ ! | हे बहुश्रेयस्यः ! |

| प्रधी–शब्दस्य रूपाणि | | |
|---|---|---|
| प्रधीः | प्रध्यौ | प्रध्यः |
| प्रध्यम् | प्रध्यौ | प्रध्यः |
| प्रध्या | प्रधीभ्याम् | प्रधीभिः |
| प्रध्ये | प्रधीभ्याम् | प्रधीभ्यः |
| प्रध्यः | प्रधीभ्याम् | प्रधीभ्यः |
| प्रध्यः | प्रध्योः | प्रध्याम् |
| प्रध्यि | प्रध्योः | प्रधीषु |
| हे प्रधीः ! | हे प्रध्यौ ! | हे प्रध्यः ! |

**पदप्रयोगप्रकारः**

१. बहुश्रेयस्यः पुरुषाः सुखिनः भवन्ति ।

२. माता पप्ये अर्घ्यम् अर्पयति ।

३. प्रध्या जनेन आविष्कारः कृतः ।

४. ग्रामणीः दरिद्रान् भरति ।

५. सुश्रियाम् कृते चिन्ता नैव भवति ।

६. सुखीः जनः यथासमयं परिश्रमं कुर्यात् ।

## अभ्यासः

१. **सूत्राणि पठित्वा तेषां कार्याणि विलिखत**

(क) गतिश्च | (ख) न भूसुधियोः
(ग) एरनेकाचोऽसंयोगपूर्वस्य | (घ) अचि श्नुधातुभ्रुवां य्वोरियङुवङौ

२. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) 'आण्नद्याः' इति सूत्रेण ..................... विधीयते । (आण्, आट्)

(ख) प्रधी-शब्दस्य सम्बुद्धौ ..................... इति रूपं भवति । (प्रधीः, प्रधि)

(ग) 'ग्रामण्यौ' इत्यत्र ..................... इत्यनेन यण् भवति । (इको यणचि, एरनेकाचोऽसंयोगपूर्वस्य)

(घ) 'नियाम्' इत्यत्र ..................... भवति । (आडागमः, नुडागमः)

(ङ) 'सुश्रियौ' इत्यत्र ..................... यण् न भवति । (संयोगपूर्वत्वात्, एकाच्त्वात्)

३. **परस्परं मेलयत**

| 'अ' खण्डः | 'आ' खण्डः |
|---|---|
| प्रध्यः | आम् |
| सुधिया | सवर्णदीर्घः |
| बहुश्रेयस्यै | आट् |
| पपी | ह्रस्वः |
| नियाम् | इयङ् |
| बहुश्रेयसि | यण् |

४. **अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत**

पप्याम्, सुखीः, सुत्युः, निया, बहुश्रेयस्याम्, अतिलक्ष्मीः

५. **रिक्तस्थानं पूरयित्वा रूपावलिं लिखत**

| | | |
|---|---|---|
| सुखीः | ........... | सुख्यः |
| ........... | सुख्यौ | ........... |
| सुख्या | ........... | ........... |

| | | |
|---|---|---|
| ........... | सुखीभ्याम् | ........... |
| ........... | ........... | सुखीभ्यः |
| सुख्युः | सुख्योः | ........... |
| ........... | ........... | सुखीषु |
| ........... | हे सुख्यौ ! | ........... |

## ६. एकवाक्येन उत्तरं लिखत

(क) 'शुद्धधियौ' इत्यत्र केन यण् निषिध्यते ?

(ख) 'न भूसुधियोः' इत्यनेन कयोः किं वार्यते ?

(ग) आडागमाद् अचि केन सूत्रेण वृद्धिर्भवति ?

(घ) प्रधी-शब्दस्य नदीसंज्ञा भवति न वा ?

(ङ) नित्यं नदीसंज्ञाविधायकं सूत्रं किम् ?

## ७. प्रश्नानामुत्तरं लिखत

(क) 'यूस्त्र्याख्यौ नदी' इति सूत्रस्य अर्थं सोदाहरणं लिखत ।

(ख) नदी-संज्ञाप्रयुक्तकार्याणि कानि ? तानि च कासु विभक्तिषु जायन्ते ?

(ग) पपी-बहुश्रेयसीशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) सखि-सुखीशब्दयो रूपाणि कासु विभक्तिषु समानप्रक्रियया निष्पद्यन्ते ?

(ङ) 'पप्याम्' इत्यत्र नुडागमाभावे कारणं किम् ?

(च) अम्बार्थ-शब्दाः के ?

(छ) एरनेकाचोऽसंयोगपूर्वस्य' इत्यनेन कस्याम् अवस्थायां कस्य यण् विधीयते ?

(ज) ग्रामणी-शब्दस्य नदीसंज्ञाभावेऽपि 'ङि' इत्यस्य आमादेशः कथं भवति ?

## ८. प्रयोगसिद्धिप्रक्रियां दर्शयत

| | | |
|---|---|---|
| (क) हे बहुश्रेयसि | (ख) सुत्युः | (ग) प्रध्यौ |
| (घ) नियाम् | (ङ) बहुश्रेयस्याः | (ङ) अतिलक्ष्मै |

### अजन्तप्रकरणे

# उकारान्त-ऋकारान्तादिपुल्लिङ्गशब्दानां रूपसाधनम्

**शम्भुर्हरिवत् । एवं भान्वादयः ॥**

शम्भु, भानु इत्यादीनाम् उकारान्तपुँल्लिङ्गशब्दानां घिसंज्ञा भवतीति कारणेन तेषां रूपाणि हरिशब्दवदेव प्रक्रियया निष्पद्यन्ते । अतः हरिशब्दस्य सिद्धिप्रक्रियायां विष्णु-शब्दस्य अपि उदाहरणं प्रस्तुतं वर्तते । शम्भु, भानु इत्यादि शब्दानां रूपाणि विष्णुवद् एव साधनीयानि इति बोध्यम् । उकारान्तशब्देषु क्रोष्टु-शब्दस्तु विशेषो वर्तते, अतः तस्य सिद्धिप्रक्रिया अधः प्रदीयते-

**तृज्वत्क्रोष्टुः ७ । १ । ९५ ॥**

**असम्बुद्धौ सर्वनामस्थाने परे । क्रोष्टुशब्दस्य स्थाने क्रोष्टृशब्दः प्रयोक्तव्य इत्यर्थः ॥**

सम्बुद्धिभिन्ने सर्वनामस्थाने परे सति 'क्रोष्टु' इति शब्दस्य तृज्वद्भावो भवति । सम्बोधनैकवचनं विहाय अन्यासु सर्वनामस्थानविभक्तिषु परतः शृगालवाच-कस्य क्रोष्टु-शब्दस्य स्थाने अर्थकृतेन आन्तर्येण समानार्थकः क्रोष्टृ-शब्दः प्रयोगे आनेतव्यः ।

**ऋतो ङिसर्वनामस्थानयोः ७ । ३ । ११० ॥**

**ऋतोऽङ्गस्य गुणो ङौ सर्वनामस्थाने च । इति प्राप्ते-**

ङि-प्रत्यये, सर्वनामस्थानसंज्ञकप्रत्यये च परे सति ऋकारान्तस्य अङ्गस्य अन्त्यवर्णस्य गुणो भवति । ऋकारस्य गुणे कृते अकारे 'उरण् रपरः' इत्यनेन रपरत्वे 'अर्' इति गुणादेशो विधीयते ।

शृगालवाचकात् पुँल्लिङ्गात् कोष्टु-शब्दात् सुप्रत्यये 'तृज्वत्क्रोष्टुः' इति तृज्वद्भावे 'कोष्टृ स्' इत्यवस्थायाम् अनेन सूत्रेण गुणे प्राप्ते-

**ऋदुशनस्पुरुदंसोऽनेहसां च ७ । १ । ९४ ॥**

**ऋदन्तानामुशनसादीनां चानङ् स्यादसम्बुद्धौ सौ ॥**

सम्बुद्धिभिन्ने सर्वनामस्थाने परे ऋकारान्तानां शब्दानाम्, उशनस्-शब्दस्य, पुरुदंसस्-शब्दस्य, अनेहस्-शब्दस्य च अन्त्यवर्णस्य स्थाने 'अनङ् (अन्)' इत्यादेशो भवति । ङित्वाद् अन्त्यवर्णस्य स्थाने विधीयते । उशनस् =

दैत्यगुरोः शुक्राचार्यस्य वाचकः शब्दः । पुरुदंसस् = मार्जारस्य वाचकः शब्दः । अनेहस् = समयस्य वाचकः शब्दः ।

**अप्तृन्तृच्स्वसृनप्तृनेष्टृत्वष्टृक्षत्तृहोतृपोतृप्रशास्तृणाम् ६ । ४ । ११ ॥**

**अबादीनामुपधाया दीर्घोऽसम्बुद्धौ सर्वनामस्थाने । क्रोष्टा । क्रोष्टारौ । क्रोष्टारः । क्रोष्टारम् । क्रोष्टारम् । क्रोष्टून् ॥**

सम्बुद्धिभिन्ने सर्वनामस्थाने परे सति तृन्-तृच्प्रत्ययान्तशब्दानाम्, अप्, स्वसृ, नत्तृ, नेष्टृ, त्वष्टृ, क्षत्तृ, होतृ, पोतृ, प्रशास्तृ इत्येतेषां शब्दानां च अङ्गस्य उपधाया दीर्घो भवति । अप् = जलवाचकः शब्दः । स्वसृ = भगिनीवाचकः शब्दः । नप्तृ = पौत्रवाचकः, दौहित्रवाचकश्च शब्दः । नेष्टृ = ऋत्विग्विशेषवाचकः शब्दः । त्वष्टृ = प्रजापतिवाचकः शब्दः । क्षत्तृ = सारथिवाचकः शब्दः । होतृ = ऋत्विग्वाचकः शब्दः । पोतृ = ऋत्विग्विशेषवाचकः शब्दः । प्रशास्तृ = राजवाचकः शब्दः ।

क्रोष्टु सु - क्रोष्टु स् - क्रोष्टृ स् (तृज्वत्क्रोष्टुः) - क्रोष्टन् स् (ऋदुशनस्पुरुदंसोऽनेहसां च) - क्रोष्टान् स् (अप्तृन्तृच्.........) - क्रोष्टान् (हल्ङ्याब्भ्यो दीर्घात्......) - क्रोष्टा (न लोपः प्रातिपदिकान्तस्य) ।

क्रोष्टु औ - क्रोष्टृ औ (तृज्वत्क्रोष्टुः) - क्रोष्टर् औ (ऋतो ङिसर्वनामस्थानयोः) - क्रोष्टार् औ (अप्तृन् तृच्.........) - क्रोष्टारौ । एवमेव, जस्-प्रत्यये- **क्रोष्टारः**, अम्-प्रत्यये- **क्रोष्टारम्**, औट्-प्रत्यये- **क्रोष्टारौ** । सम्बोधनैकवचने तु सर्वनामस्थाने सत्यपि तृज्वद्भावस्य अविधानाद् विष्णुवदेव 'हे **क्रोष्टो**' इति । शस्विभक्तौ तृज्वद्भावाभावे विष्णुवत्- **क्रोष्टून्** ।

**विभाषा तृतीयादिष्वचि ७ । १ । ९७ ॥**

**अजादिषु तृतीयादिषु क्रोष्टुर्वा तृज्वत् । क्रोष्ट्रा । क्रोष्ट्रे ॥**

तृतीयातः सप्तमीपर्यन्तेषु आजादि-प्रत्ययेषु परेषु क्रोष्टु-शब्दस्य विकल्पेन तृज्वद्भावो भवति ।

अनेन सूत्रेण तृज्वद्भावपक्षे क्रोष्टु-शब्दस्य स्थाने क्रोष्टृ-शब्दादेशे विशेषप्रक्रिया वर्तते, पक्षान्तरे तु विष्णुशब्दवद् रूपाणि ज्ञेयानि ।

क्रोष्टु टा - क्रोष्टु आ - क्रोष्टृ आ (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् आ (इको यणचि) - क्रोष्ट्रा । पक्षे- **क्रोष्टुना** । क्रोष्टु ङे - क्रोष्टु ए - क्रोष्टृ ए (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् ए (इको यणचि) - **क्रोष्ट्रे** । पक्षे- क्रोष्टवे ।

**ऋत उत् ६ । १ । १११ ॥**

**ऋतो ङसिङसोरति उदेकादेशः । रपरः ॥**

ऋकारात्, लृकारात् च ङसि-प्रत्ययस्य, ङस्-प्रत्ययस्य च अकारे परे सति पूर्वपरयोः स्थाने उकार एकादेशो भवति । 'उरण् रपरः' इत्यनेन रपरत्वेन ऋकार-अकारयोः स्थाने 'उर्' इति, लृकार-अकारयोः स्थाने च 'उल्'

इत्येतौ आदिश्येते । क्रोष्टृ ङसि इत्यत्र अनुबन्धलोपे क्रोष्टृ अस् इत्यवस्थायाम् अनेन इति सूत्रेण पूर्वपरयोः स्थाने उत्वे, उपरत्वे 'उर्' इति एकादेशे क्रोष्टुरस् इति जाते

**रात्सस्य ८ । २ । २४ ॥**

**रेफात्संयोगान्तस्य सस्यैव लोपो नान्यस्य । रस्य विसर्गः । क्रोष्टुः २ । क्रोष्टोः २ ।**

पदान्ते विद्यमानस्य संयोगस्य उपान्त्यवर्णो यदि रेफः अस्ति चेत् तस्मात् परस्य केवलं सकारस्य एव लोपो भवति, नान्येषां संयोगान्तवर्णानाम् । पदान्तस्य संयोगान्तस्य वर्णस्य 'संयोगान्तस्य लोपः' इत्यनेनैव लोपे सिद्धे अस्य सूत्रस्य पाठो नियमार्थः 'सिद्धे सत्यारभ्यमाणो विधिर्नियमाय कामयते' इति परिभाषया । नियमास्तु संयोगान्तलोपे रेफात् परस्य यदि लोपः तर्हि सस्य एव न अन्यस्य इति ।

क्रोष्टु ङसि/ङस् - क्रोष्टु अस् - क्रोष्टृ अस् (विभाषा तृतीयादिष्वचि) - क्रोष्ट् उर् स् (ऋत उत्) - क्रोष्टुर् (रात्सस्य) - **क्रोष्टुः** । पक्षे- **क्रोष्टोः** । क्रोष्टु ओस् - क्रोष्टृ ओस् (विभाषा तृतीयादिष्वचि) - क्रोष्ट् र् ओस् (इको यणचि) - क्रोष्ट्रोस् - क्रोष्ट्रोर् - **क्रोष्ट्रोः** । पक्षे- क्रोष्ट्वोः ।

**वा. नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन । क्रोष्टूनाम् । क्रोष्टरि । पक्षे हलादौ च शम्भुवत् ॥ हूहूः । हूह्वौ । हूह्वः । हूहूम् । हूहून् इत्यादि ॥ अतिचमूशब्दे तु नदीकार्यं विशेषः । हे अतिचमु । अतिचम्वै । अतिचम्वाः । अतिचमूनाम् ॥ अलपूः ॥**

क्रोष्टु आम्, इत्यवस्थायाम्, नुडागमस्य अपेक्षया परत्वाद् अनेन सूत्रेण विकल्पेन तृज्वद्भावे प्राप्ते, 'नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन' इति वार्तिकेन पूर्वं नुडागमे 'क्रोष्टु नाम्' इत्यवस्थायाम् 'नामि' इति दीर्घे 'क्रोष्टूनाम्' इति एकमेव रूपं सिद्ध्यति । ङि-विभक्तौ तु-

क्रोष्टु ङि - क्रोष्टु इ - क्रोष्टृ इ (विभाषा तृतीयादिष्वचि) - क्रोष्टर् इ (ऋतो ङिसर्वनामस्थानयोः) - क्रोष्टरि । पक्षे- क्रोष्टौ ।

हूहू-शब्दो गन्धर्वविशेषवाचकः, ऊकारान्तः, पुँल्लिङ्गश्च वर्तते ।

हूहू सु - हूहू स् - हूहूस् - हूहूर् - हूहूः । हूहू औ - हूहू औ - हूह् व् औ - हूह्वौ । ('दीर्घाज्जसि च' इति पूर्वसवर्णदीर्घनिषेधः) । अन्यत्रापि विशेषकार्यं नास्ति ।

अतिचमू-शब्दस्य तु चमू-शब्दान्तत्वात् तस्य च नित्यं स्त्रीलिङ्गे वर्तमानत्वात् नदीसंज्ञा भवति । तेन नदीसंज्ञाप्रयुक्तकार्याणि तस्य सिद्धिप्रक्रियायां जायन्ते इति बोध्यम् । अन्यत्र तु हूहूवदेव ।

अतिचमू ङे - अतिचमू ए - अतिचमू आट् (आ) ए (आण्नद्याः) - अतिचमू ऐ (आटश्च) - अतिचम् व् ऐ - अतिचम्वै ।

खलपू-प्रातिपदिकात् सुप्रत्यये- खलपूः । औ-प्रत्यये पूर्वसवर्णदीर्घस्य निषेधानन्तरं यणं बाधित्वा ऊकारस्य उवङादेशे प्राप्ते-

**ओः सुपि ६ । ४ । ८३ ॥**

**धात्ववयवसंयोगपूर्वो न भवति य उवर्णस्तदन्तो यो धातुस्तदन्तस्यानेकाचोऽङ्गस्य यण् स्यादचि सुपि । खलप्वौ । खलप्वः । एवं सुल्वादयः ॥ स्वभूः । स्वभुवौ । स्वभुवः । वर्षाभूः ॥**

यदि अङ्गम् अनेकाच् वर्तते, तस्य अङ्गस्य अन्ते धातुः अस्ति, तस्य च धातोः अन्ते धातोरवयव उवर्णो विद्यते, तस्य च उवर्णस्य पूर्वस्मिन् भागे संयोगो न भवति चेत् तादृशस्य अङ्गस्य अन्त्यवर्णस्य (उवर्णस्य) स्थाने 'यण्' आदेशो भवति, अजादि-प्रत्यये परे सति ।

अनेन सूत्रेण उवङादेशं बाधित्वा ऊकारस्य यणि- खलप् व् औ, **खलप्वौ** । एवमेव अन्यासु अजादिषु विभक्तिषु अपि बोध्यम् । सुलू-शब्दस्य अपि खलपूवद् रूपाणि जायन्ते । स्वभू-शब्दस्य तु अनेन सूत्रेण यणि प्राप्ते 'न भूसुधियोः' इत्यनेन निषेधाद् बाधकाभावे ऊकारस्य स्थाने ऊवङादेशो विधीयते, तेन अजादौ विभक्तौ स्वभुवौ, स्वभुवः इत्यादीनि रूपाणि निष्पद्यन्ते । वर्षाभू-शब्दस्य तु-

**वर्षाभ्वश्च । ६ । ४ । ८४ ।**

**अस्य यण् स्यादचि सुपि । वर्षाभ्वावित्यादि ॥ दृन्भूः ।**

अजादि-सुप्-प्रत्यये परे सति 'वर्षाभू' इति शब्दस्य अन्त्यवर्णस्य स्थाने यण् आदेशो भवति । विधिरयम् उवङादेशस्य अपवादः ।

मण्डुक-पर्यायाद् वर्षाभू-प्रातिपदिकाद् औ-प्रत्यये, उवङादेशं बाधित्वा अनेन यणि- वर्षाभ्वौ । एवम् अन्यत्रापि अजादौ विभक्तौ ।

**दृन्करपुनः पूर्वस्य भूवो यण् वक्तव्यः (वा.) दृन्भ्वौ । एवं करभूः ॥ धाता । हे धातः ! । धातारौ । धातारः ।**

दृम्भू-करभू-पुनर्भू-शब्दानाम् अजादि-सुप्-प्रत्यये परे अन्त्यवर्णस्य यणादेशो भवतीति वार्तिकार्थः । औ-प्रत्ययादिषु अनेन उवङादेशं बाधित्वा यणि कृते- दृम्भ्वौ, करभ्वौ, पुनर्भ्वौ इत्यादि रूपाणि जायन्ते ।

अथ ऋकारान्त-पुँल्लिङ्गशब्दानां रूपाणि निष्पाद्यन्ते । अस्मिन् क्रमे प्रायशः कृततृज्वद्भावस्य क्रोष्टृ-शब्दस्य रूपसिद्धिप्रक्रियायां प्रयुक्तानि सूत्राणि उपयुज्यन्ते ।

'दधाति' इत्यर्थे तृच्-प्रत्ययेन निष्पन्नो धातृ-शब्दो ब्रह्मवाची वर्तते । तस्मात् सु-प्रत्यये-

धातृ सु - धातृ स् - धातन् स् (गुणं बाधित्वा अनङ्) - धातान् स् - (अप्तृन्......) - धातान् (हल्ङ्यादिलोपः) - **धाता** (न लोपः प्रातिपदिकान्तस्य) । धातृ औ - धातर् औ (ऋतो ङिसर्वनामस्थानयोः) - धातार् औ (अप् तृन्.......) - **धातारौ** । एवं **धातारः, धातारम्, धातारौ** । सम्बुद्धौ तु 'ऋदुशनस्...' इति अनङादेशस्य अप्राप्तौ, 'अप्तृन्...' इति उपधादीर्घस्य च अप्रसङ्गात्- धातृ सु - धातृ स् - धातर् स् (ऋतो ङिसर्वनामस्थानयोः) - धातर् (रात्सस्य) - धातः । अन्यासु आम्भिन्नेषु अजादिप्रत्ययेषु क्रोष्टृशब्दवत् प्रक्रिया अवलम्बनीया । आम्-प्रत्यये- धातृ आम्, धातृ नाम् (ह्रस्वनद्यापो नुट्), धातृ नाम् (नामि), इत्यवस्थायाम्-

**ऋवर्णान्नस्य णत्वं वाच्यम् (वा.) धातॄणाम् । एवं नप्त्रादयः ॥ पिता । अप्तृन्निति सूत्रे नप्त्रादिग्रहणं व्युत्पत्तिपक्षे नियमार्थम् । तेनेह न । पितरौ । पितरः । पितरम् । शेषं धातृवत् । एवं जामात्रादयः ॥ ना । नरौ ॥**

समानपदे ऋवर्णात् परस्य नकारस्य अपि णत्वं भवति, अव्यवधाने सति, सहय्व्यवधाने सत्यपि अनेन णत्वं वाच्यम्' इति वार्तिकेन नकारस्य णत्वे- धातॄणाम् । हलादौ विभक्तौ तु विभक्तियोजनादिकमेव कार्यम्- **धातृभ्याम्, धातृभिः, धातृभ्यः, धातृषु** ।

अप्तृन्तृच् इत्यादिसूत्रे तृन्तृच्-प्रत्ययाभ्यां सह उणादिनिष्पन्नानां पाठो नियमार्थः - उणादि- प्रकरणे निष्पन्नानां शब्दानां 'अप्तृन्तृच् ... इत्यादिना यदि दीर्घादेशः तर्हि नप्त्रा-दीनामेव, तेन प्रकरणे पितृमातृ मातृपित्रादीनां शब्दानां न दीर्घः । अतः औ, जस्, अम्, औट् इत्येतेषु प्रत्ययेषु पितरौ, पितरः, पितरम्, पितरौ इति धातृशब्दाद् भिन्नप्रक्रियया रूपाणि जायन्ते । पितृ औ - पितर् औ (गुणः) - पितरौ । इत्यादि । शेषविभक्तिषु धातृवत् । जामातृ-भ्रातृ-शब्दौ पितृवत् ।

मनुष्यवाचकस्य नृ-शब्दस्य आम्-प्रत्ययं विहाय सर्वत्रैव पितृवद् रूपाणि निष्पद्यन्ते । यथा- ना, नरौ, नरः, हे नः, नरम्, नरौ नॄन्, न्रा इत्यादि । आम्-प्रत्यये तु-

**नृ च ६ । ४ । ६ ॥**

**अस्य नामि वा दीर्घः । नृणाम्, नॄणाम् ॥**

षष्ठीबहुवचनस्य नाम्-प्रत्यये परे सति नृ-शब्दस्य अङ्गस्य अन्त्यवर्णस्य दीर्घो विभाषया भवति । नामि = नुडागमसहिते आमि । अनेन 'नामि' इत्यनेन प्राप्तं नित्यं दीर्घं बाधित्वा विकल्पेन दीर्घो विधीयते । 'सकृद्गतौ विप्रतिषेधेन यद् बाधितं तद् बाधितमेव' इति परिभाषया 'नामि' इत्यस्य पुनःप्रवृत्तिर्न भवतीति स्मर्तव्यम् ।

नृ आम् - नृ नाम् - नॄ नाम् (नृ च) - नॄनाम् - नॄणाम् (ऋवर्णान्नस्य णत्वं वाच्यम्) । पक्षे- नृणाम् ।

अथ ओकारान्तस्य गो-शब्दस्य साधनं क्रियते । धेनुवाचकाद् गो-शब्दात् सु-प्रत्यये-

**गोतो णित् ७ । १ । ९० ॥**

**ओकाराद्विहितं सर्वनामस्थानं णिद्वत् । गौः । गावौ । गावः ॥**

गो-शब्दस्य ओकाराद् विहितस्य सर्वनामस्थान-प्रत्ययस्य णिद्वद्भावो भवति । 'अचो ञ्णिति' इत्यनेन वृद्धिविधानार्थोऽयं णिद्वद्भावः ।

गो सु - गो स् - अनेन णित्वे- गौ स् (अचो ञ्णिति) - गौस् - गौर् - **गौः** । गो औ - अनेन णित्वे- गौ औ (अचो ञ्णिति) - ग् आव् औ - **गावौ** । गो जस् - गो अस् - अनेन णित्वे- गौ अस् (अचो ञ्णिति) - ग् आव् अस् - गावस्- गावर् - **गावः** ।

**औतोऽम्शसोः ६ । १ । ९३ ॥**

**ओतोऽम्शसोरचि आकार एकादेशः । गाम् । गावौ । गाः । गवा । गवे । गोः । इत्यादि ।**

ओकारान्त-शब्दात् परस्य द्वितीयाविभक्तेः अम्-प्रत्ययस्य, शस्-प्रत्ययस्य च अच्-वर्णे परे पूर्वपरयोः स्थाने आकार एकादेशो भवति ।

गो-शब्दाद् अम्-प्रत्यये णित्वात् प्राप्तां वृद्धिं बाधित्वा अनेन आकार एकादेशो विधीयते । यथा-

गो अम् - ग् आ म् (औतोऽम्शसोः) - **गाम्** । गो शस् - गो अस् - ग् आ स् (औतोऽम्शसोः) - गास् - गार् - **गाः** । गो टा - गो आ - ग् अव् आ (एचोऽयवायावः) - **गवा** । गो ङे - गो ए- ग् अव् ए (एचोऽयवायावः) - **गवे** । गो ङसि/ङस् - गो अस् - गोस् (ङसिङसोश्च) - गोर् - **गोः** । (अवादेशं बाधित्वा पूर्वरूपम्) । शेषेषु अजादिषु प्रत्ययेषु अवादेशेन **गवोः**, **गवाम्**, **गवि** इति सिद्ध्यन्ति । हलादिषु तु विभक्तियोजनेन गोभ्याम्, गोभिः, गोभ्यः, गोषु इति ।

अथ ऐकारान्त-शब्दः- रै । रै-शब्दो धनवाचको वर्तते । अजादौ विभक्तौ आयादेशेन रायौ, रायः, रायम् इत्यादीनि रूपाणि निष्पद्यन्ते । हलादिषु तु-

**रायो हलि ७ । २ । ८५ ॥**

**अस्याकारादेशो हलि विभक्तौ । राः । रायौ । रायः । राभ्यामित्यादि ॥ ग्लौः । ग्लावौ । ग्लावः । ग्लौभ्यामित्यादि ॥**

हलादिविभक्तिषु पराषु रै-शब्दस्य अन्त्यवर्णस्य (ऐकारस्य) स्थाने आकार आदेशो भवति । अनेन आकारान्तादेशे कृते हलादौ विभक्तौ रै-शब्दो रा-शब्दे परिवर्तते ।

रै सु - रै स् - रा स् (रायो हलि) - रास् - रार् - राः । एवं हे राः, राभ्याम्, राभिः, राभ्यः, रासु ।

अथ औकारान्तः, चन्द्रवाचको ग्लौ-शब्दः । ग्लौ-शब्दे विशेषकार्याभावात् विभक्तियोजनानन्तरं सन्धिकार्यम्, रुत्वसत्वादिकार्यमेव विधातव्यं भवति । यथा-

ग्लौ सु - ग्लौ स् - ग्लौस् - ग्लौर् - ग्लौः । एवं हे ग्लौः, ग्लौभ्याम्, ग्लौभिः, ग्लौभ्यः, ग्लौषु ।

ग्लौ औ - ग्ल् आव् औ - ग्लावौ । एवं ग्लावः, ग्लावम्, ग्लावौ, ग्लावः, ग्लावा इत्यादि ।

## प्रयोगसिद्धिप्रकारः

**गाम्**

गौ-शब्दस्य अव्युत्पन्नपक्षे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण द्वितीयाया एकवचने अम्-प्रत्यये 'गौ अम्' इति जाते 'गोतो णित्' इति सूत्रेण प्रत्ययस्य णिद्वद्भावे 'अचो ञ्णिति' इत्यनेन अङ्गस्य वृद्धौ प्राप्तायाम्, तां बाधित्वा 'औतोऽम्शसोः' इति सूत्रेण पूर्वपरयोः स्थाने आकार एकादेशे 'ग् आ म्' इति जाते, वर्णयोगे 'गाम्' इति रूपं साधु ।

**शब्द–रूपावलिः**

| धातृ-शब्दस्य पुँल्लिङ्गे रूपाणि | | |
|---|---|---|
| धाता | धातारौ | धातारः |
| धातारम् | धातारौ | धातृन् |
| धात्रा | धातृभ्याम् | धातृभिः |
| धात्रे | धातृभ्याम् | धातृभ्यः |
| धातुः | धातृभ्याम् | धातृभ्यः |
| धातुः | धात्रोः | धातृणाम् |
| धातरि | धात्रोः | धातृषु |
| हे धातः ! | हे धातारौ ! | हे धातारः ! |

| गो-शब्दस्य रूपाणि | | |
|---|---|---|
| गौः | गावौ | गावः |
| गाम् | गावौ | गाः |
| गवा | गोभ्याम् | गोभिः |
| गवे | गोभ्याम् | गोभ्यः |
| गोः | गोभ्याम् | गोभ्यः |
| गोः | गवोः | गवाम् |
| गवि | गवोः | गोषु |
| हे गौः ! | हे गावौ ! | हे गावः ! |

**पितृ-शब्दस्य रूपाणि**

| | | |
|---|---|---|
| पिता | पितरौ | पितरः |
| पितरम् | पितरौ | पितृन् |

शेषं धातृवत् ।

**पदप्रयोगप्रकारः**

१. यजमानः विप्राय गां ददाति ।

२. गवां शाला गोशाला कथ्यते ।

३. परेषां रायि लोभो नैव कर्तव्यः ।

४. धात्रे नमः ।

५. पुत्रः पित्रे पत्रं लिखति ।

६. भवतः भ्रातुः नाम किम् अस्ति ?

७. परिश्रमिणां नृणां कृते किमपि असम्भवं नास्ति ।

८. भगिनी क्रोष्टुः बिभेति ।

## अभ्यासः

१. **सूत्राणि पठित्वा तेषां कार्याणि विलिखत**

(क) तृज्वत्क्रोष्टुः (ख) ऋत उत्

(ग) औतोऽश्शसोः (घ) रायो हलि

(ङ) ओः सुपि (च) रात्सस्य

२. **परस्परं मेलयत**

| | |
|---|---|
| धाता | आवादेशः |
| राभ्याम् | गुणः |
| क्रोष्टारौ | अनङादेशः |
| जामातुः | यण् |
| गौः | आकारान्तादेशः |
| ग्लावः | वृद्धिः |
| उत्वम् | |

३. **सूत्राणि पूरयत**

(क) ऋदुशन.................... ।

(ख) ऋतो..................... ।

(ग) अप्तृन्..................... ।

(घ) विभाषा..................... ।

(ङ) नुमचिर..................... ।

(च) ऋवर्णान्नस्य..................... ।

४. **अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत**

क्रोष्ट्रा, पितरि, नुः, रासु, गोः, धात्रोः

## ५. एकवाक्येन उत्तरं लिखत

(क) 'पितरि' इत्यत्र केन सूत्रेण गुणो भवति ?

(ख) कस्य प्रातिपदिकस्य आम्-प्रत्यये विकल्पेन दीर्घो भवति ?

(ग) 'क्रोष्टुः' इत्यत्र तृज्वद्भावविधायकं सूत्रं किम् ?

(घ) 'धातॄणाम्' इत्यत्र केन णत्वं विधीयते ?

(ङ) क्रोष्टु-शब्दस्य द्वितीयैकवचने किं रूपम् ?

(च) गो-शब्दस्य कासु विभक्तिषु वृद्धिर्भवति ?

(छ) 'वर्षाभ्वश्च' इति सूत्रं किं करोति ?

## ६. प्रश्नानामुत्तरं लिखत

(क) 'दृन्करपुनः पूर्वस्य भूवो यण वक्तव्यः' इति वार्तिके के शब्दा निर्दिष्टाः सन्ति ?

(ख) 'अप्तृन्.....' इति सूत्रेण केषाम् उपधादीर्घो विधीयते ?

(ग) धातृ-पितृशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) क्रोष्टु-शब्दस्य रूपसिद्धिप्रक्रिया कुत्र कुत्र शम्भुशब्दाद् भिन्ना विद्यते ?

(ङ) पितृ-शब्दः कासु विभक्तिषु गुणं लभते ?

(च) रै-शब्दस्य कुत्र कुत्र आत्वं भवति ?

## ७. नृ-रै-स्वयम्भू-शब्दानां सर्वाणि रूपाणि लिखत ।

## ८. अधस्तन-प्रयोगाणां सिद्धिपथं दर्शयत

(क) क्रोष्टा (ख) वर्षाभ्वौ (ग) पितरः

(घ) हे धातः (ङ) गाः (ङ) नृणाम्

## अजन्तस्त्रीलिङ्गप्रकरणे

# आबन्तशब्दाः

**आबन्तशब्देषु सामान्यकार्याणि–**

- सु-प्रत्ययस्य- हल्ङ्यादिलोपः । (हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्)
- औ/औट्-प्रत्यययोः- 'शी' आदेशः । (औङ आपः)
- जस्-प्रत्यये- पूर्वसवर्णदीर्घनिषेधः, सवर्णदीर्घश्च । (दीर्घाज्जसि च)
- शस्-प्रत्यये- पूर्वसवर्णदीर्घः, नत्वाभावश्च । (प्रथमयोः पूर्वसवर्णः)
- टा/ओस्-प्रत्यययोः- अङ्गान्तस्य आकारस्य एत्वम् । (आङि चापः)
- ङे/ङसि/ङस्/ङि-प्रत्ययेषु- याट् (या) आगमः । (याडापः)
- ङि-प्रत्ययस्य- 'आम्' आदेशः । (ङेराम्नद्याम्नीभ्यः)
- आम्-प्रत्ययस्य- नुट् (न्) आगमः । (ह्रस्वनद्यापो नुट्)

**रमा ।**

स्त्री-प्रत्ययान्तशब्दानां प्रातिपदिकसंज्ञा 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया भवति । प्रायशः अजन्तस्त्रीलिङ्गशब्दाः आबन्ताः, ङ्यन्ता वा भवन्ति, अतः तेभ्यो विहितस्य सु-प्रत्ययस्य सकारस्य हल्ङ्यादिलोपो भवति । 'रमते' इत्यर्थे रम्-धातोः अच्-प्रत्ययेन निष्पन्नाद् रम-शब्दात् स्त्रीत्वविवक्षायां टाप्-प्रत्यये 'रमा' इति शब्दो निष्पद्यते । तस्य च उक्तया परिभाषया प्रातिपदिकसंज्ञायां सिद्धायां तस्मात् सुप्-प्रत्यया भवन्ति ।

रमा-प्रातिपदिकात् सुप्रत्यये-

रमा सु - रमा स् - **रमा** (हल्ङ्याब्भ्यो दीर्घात् सुतिस्यपृक्तं हल्) ।

**औङः आपः ७ । १ । १८ ॥**

**आबन्तादङ्गात्परस्यौङः शी स्यात् । औङित्यौकारविभक्तेः संज्ञा । रमे । रमाः ॥**

आप्-प्रत्ययान्ताद् अङ्गात् परयोः औ-औट्प्रत्यययोः स्थाने सर्वादेशरूपेण 'शी' आदेशो भवति । शकारस्य 'लशक्वतद्धिते' इत्यनेन इत्संज्ञायां लोपे 'ई' इत्येव अवशिष्यते ।

रमा औ - रमा शी - रमा ई - रमे । जस्-प्रत्यये तु सवर्णदीर्घं बाधित्वा प्राप्तस्य पूर्वसवर्णदीर्घस्य 'दीर्घाज्जसि च' इत्यनेन निषेधे पुनः सवर्णदीर्घो विधीयते । रमा जस् - रमा अस् - रमास् (अकः सवर्णे दीर्घः) - रमार् - रमाः ।

**सम्बुद्धौ च ७ । ३ । १०६ ॥**

**आप एकारः स्यात्सम्बुद्धौ । एङ्ह्रस्वादिति सम्बुद्धिलोपः । हे रमे । हे रमे । हे रमाः । रमाम् । रमे । रमाः ॥**

सम्बोधनेऽर्थे प्रथमाया एकवचन-प्रत्यये परे आबन्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने एकार आदेशो भवति । अनेन एत्वे कृते 'एङ्ह्रस्वात् सम्बुद्धेः' इत्यनेन सम्बुद्धिसंज्ञकस्य हल्वर्णस्य (स् इत्यस्य) लोपो विधीयते ।

रमा सु - रमा स् - रमे स् - रमे । द्विवचन-बहुवचनयोस्तु प्रथमावद् बोध्यम् । रमा अम् - रमाम् (अमि पूर्वः) । शस्-प्रत्यये पूर्वसवर्णदीर्घे स्त्रीलिङ्गत्वात् सकारस्य नत्वं न प्रवर्तते । रमा शस् - रमा अस् - रमास् (प्रथमयोः पूर्वसवर्णः) - रमार् - रमाः ।

**आङि चापः । ७ । ३ । १०५ ।**

**आङि ओसि चाप एकारः । रमया । रमाभ्याम् । रमाभिः ॥**

टा-प्रत्यये, ओस्-प्रत्यये च परे सति आबन्तस्य अङ्गस्य अन्त्यवर्णस्य स्थाने एकार आदिश्यते । अनेन एत्वे कृते 'एचोऽयवायावः' इति अयादेशो भवति ।

रमा टा - रमा आ - रमे आ - रम् अय् आ - **रमया** । रमा ओस् - रमे ओस् - रम् अय् ओस् - रमयोस् - रमयोर् - **रमयोः** । भ्यामादिहलादिषु विभक्तिषु तु विभक्तियोजनेनैव रूपाणि सिद्धचन्ति ।

**याडापः ७ । ३ । ११३ ॥**

**आपो ङितो याट् । वृद्धिः । रमायै । रमाभ्याम् २ । रमाभ्यः २ । रमायाः २ । रमयोः २ । रमाणाम् । रमायाम् । रमासु ॥ एवं दुर्गाम्बिकादयः ॥**

आबन्ताद् अङ्गाद् उत्तरस्य सुप्सम्बन्धिनो ङित्-प्रत्ययस्य 'याट्' इति आगमो भवति । टकारस्य इत्संज्ञायां लोपे 'या' इत्येव अवशिष्यते, टित्वात् प्रत्ययस्य आद्यवयवश्च भवति ।

रमा + ङे - रमा ए - रमा याट् (या) ए - रमा या ए - रमा यै (वृद्धिरेचि) - **रमायै** । रमा + ङसि/ङस् - रमा अस् - रमा या अस् - रमा या अस् - रमा यास् - रमायास् - रमायार् - **रमायाः** । रमा आम् - रमा नाम् (ह्रस्वनद्यापो नुट्) - रमाणाम् - **रमाणाम्** (अट्कुप्वाङ्नुम्व्यवायेऽपि) । रमा ङि - रमा इ - रमा आम् (ङेराम्नद्याम्नीभ्यः) - रमा याट् (या) आम् (याडापः) - रमा या आम् - रमा याम् - **रमायाम्** ।

अनया एव प्रक्रियया दुर्गा, अम्बिका इत्यादीनामपि आबन्तप्रातिपदिकानां सिद्धिप्रक्रिया ज्ञेया ।

अथ अजन्तसर्वनामशब्दानां स्त्रीलिङ्गे रूपसाधनम्-

**सर्वनाम्नः स्याड्ढ्रस्वश्च ७ । ३ । ११४ ॥**

**आबन्तात्सर्वनाम्नो ङितः स्याट् स्यादापश्च ह्रस्वः । सर्वस्यै । सर्वस्याः । सर्वासाम् । सर्वस्याम् । शेषं रमावत् ॥ एवं विश्वादय आबन्ताः ॥**

सर्वनामसंज्ञकाद् आबन्ताद् अङ्गात् परस्य ङित्-सुप्प्रत्ययस्य 'स्याट्' इति आगमो भवति, तथा च अङ्गस्य अन्त्यवर्णस्य (आपः) ह्रस्वः अपि भवति । टकारस्य अनुबन्धलोपे 'स्या' इत्येव अवशिष्यते, स च टित्वात् प्रत्ययस्य आद्यवयवत्वेन तिष्ठति । 'याडापः' इत्यनेन याडागमे प्राप्ते सर्वनामशब्दानां विषये अनेन स्याडागमः, ह्रस्वश्च विधीयेते ।

सर्व-शब्दस्य स्त्रीलिङ्गे प्रयोगे टाप्-प्रत्ययेन 'सर्वा' इति आबन्तशब्दो निष्पद्यते, तस्य च लिङ्गविशिष्टपरिभाषया प्रातिपदिकसंज्ञायाम् आम्-ङिद्भिन्नविभक्तिषु रमावद् एव प्रक्रियया रूपाणि निष्पद्यन्ते । यथा- सर्वा, सर्वे, सर्वाः इत्यादि । ङिद्विभक्तिषु तु- सर्वा ङे - सर्वा ए - सर्व स्या ए (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्यै (वृद्धिरेचि) - सर्वस्यै । सर्वा ङसि/ङस् - सर्वा अस् - सर्व स्या अस् (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्यास् (अकः सवर्णे दीर्घः) - सर्वस्यार् - सर्वस्याः ।

आम्-प्रत्यये सर्वनामसंज्ञायाम्, नुडागमं बाधित्वा 'आमि सर्वनाम्नः सुट्' इति सुडागमो भवति । यथा-

सर्वा आम् - सर्वा साम् (नुटं बाधित्वा सुट्) - सर्वासाम् । सर्वा ङि - सर्वा इ - सर्वा आम् (ङेराम्नद्याम्नीभ्यः) - सर्व स्या आम् (प्रत्ययस्य स्याट्, अङ्गस्य ह्रस्वश्च) - सर्व स्याम् (अकः सवर्णे दीर्घः) - सर्वस्याम् । शेषविभक्तिषु रमावत् ।

**स्त्रीलिङ्गे आबन्तशब्देषु सर्वनामसंज्ञाप्रयुक्तकार्याणि–**

ङे/ङसि/ङस्/ङि-प्रत्ययेषु- प्रत्ययस्य 'स्याट्' आगमः, अङ्गस्य ह्रस्वश्च ।

आम्-प्रत्यये- प्रत्ययस्य 'सुट्' आगमः ।

एवं प्रकारेण विश्वादीनां सर्वनामशब्दानामपि स्त्रीलिङ्गे टापि कृते 'विश्वा' इत्यादिप्रातिपदिकानां रूपाणि सर्वावत् एव साधनीयानि । यथा- विश्वा, विश्वस्यै, विश्वस्याः, विश्वासाम्, विश्वस्याम् इत्यादि ।

**विभाषा दिक्समासे बहुव्रीहौ १ । १ । २८ ॥**

**सर्वनामता वा । उत्तरपूर्वस्यै, उत्तरपूर्वायै । तीयस्येति वा सर्वनामसंज्ञा । द्वितीयस्यै, द्वितीयायै ॥ एवं तृतीया ॥ अम्बार्थेति ह्रस्वः । हे अम्ब । हे अक्क । अल्ल ॥ जरा । जरसौ इत्यादि । पक्षे रमावत् ॥ गोपा विश्वपावत् ॥**

दिग्वाचकशब्दैः निर्मितस्य बहुव्रीहि-समासस्य विकल्पेन सर्वनामसंज्ञा भवति । 'दिङ्नामान्यन्तराले' इत्यनेन विहिताः समासा दिक्समासा उच्यन्ते ।

'उत्तरस्याः पूर्वस्याश्च दिशोः यद् अन्तरालं सा दिक्' इति विग्रहे वहुव्रीहिसमासेन निष्पन्नस्य उत्तरपूर्वशब्दस्य स्त्रीत्वे टापि उत्तरपूर्वा-प्रातिपदिकस्य अनेन सूत्रेण विकल्पेन सर्वनामसंज्ञा विधीयते । तेन ङिद्विभक्तिषु,

आम्विभक्तौ च अस्य शब्दस्य सर्वनामसंज्ञापक्षे सर्वावत्, तदभावे रमावत् रूपाणि जायन्ते । यथा- उत्तरपूर्वस्यै, उत्तरपूर्वायै इत्यादि ।

द्वितीया-तृतीया-प्रातिपदिकयोस्तु 'तीयस्य ङित्सु वा' इति वार्तिकेन विकल्पेन सर्वनामसंज्ञायाम् उत्तरपूर्वावत् तयोरपि रूपाणि जायन्ते ।

मातृवाचकस्य अम्बा-शब्दस्य रूपाणि सम्बुद्धौ एव रमाशब्दाद् भिन्नप्रक्रियया निष्पद्यते, कारणं च अत्र 'अम्बार्थनद्योर्ह्रस्वः' इत्यनेन ह्रस्वविधानं वर्तते । अम्बा सु (सम्बोधनैकवचनम्) - अम्बा स् - अम्ब स् (अम्बार्थनद्योर्ह्रस्वः) - अम्ब (एङ्ह्रस्वात् सम्बुद्धेः) - हे अम्ब । एवमेव, मातृवाचकयोः अक्का-अल्लाशब्दयोश्च हे अक्क, हे अल्ल इत्येते रूपे ज्ञेये । शेषविभक्तिषु एतेषां रूपाणि रमावत् ।

जरा-शब्दस्य अजादौ विभक्तौ 'जराया जरसन्यतरस्याम्' इत्यनेन विकल्पेन जरसादेशो विधीयते । अतः अजादिषु विभक्तिषु जरसादेशपक्षे अस्य रूपाणि पुँल्लिङ्गे पठितेन निर्जर-शब्देन सदृशानि ज्ञेयानि । यथा- औप्रत्यये- जरसौ, जस्-प्रत्यये- जरसः इत्यादि । जरसादेशाभावे, हलादिविभक्तिषु च अस्य रूपाणि रमावत् निष्पद्यन्ते । यथा- जरा, जरे जराः इत्यादि ।

'गाः पाति' इत्यर्थे स्त्रीलिङ्गे निष्पन्नस्य गोपा-शब्दस्य आबन्तत्वाभावात्, आकारान्तधातुरूपप्रातिपदिकत्वात् च विश्वपा-शब्दवत् सिद्धिर्भवति । यथा- गोपाः, गोपौ, गोपाः, हे गोपाः, गोपाम्, गोपः इत्यादि ।

## प्रयोगसिद्धिप्रकारः

**हे रमे**

रमा-शब्दस्य आबन्ततया 'प्रातिपदिकग्रहणे लिङ्गविशिष्टस्यापि ग्रहणम्' इति परिभाषया प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण सम्बोधनस्य एकवचने सु-प्रत्ययेऽनुबन्धलोपे 'रमा स्' इति जाते 'सम्बुद्धौ च' इति सूत्रेण अङ्गस्य अन्त्यस्य आकारस्य एत्वे 'रमे स्' इति जाते 'एङ्ह्रस्वात् सम्बुद्धेः' इति सूत्रेण सम्बुद्धिसंज्ञकस्य सकारस्य लोपे 'रमे' इति जाते 'हे'शब्दस्य पूर्वप्रयोगे 'हे रमे' इति रूपं साधु । सम्बोधनस्य द्विवचनेऽपि 'हे रमे' इत्येव रूपं सिद्ध्यति ।

**शब्द-रूपावलिः**

| रमा-शब्दस्य रूपाणि | | |
|---|---|---|
| रमा | रमे | रमाः |
| रमाम् | रमे | रमाः |
| रमया | रमाभ्याम् | रमाभिः |
| रमायै | रमाभ्याम् | रमाभ्यः |
| रमायाः | रमाभ्याम् | रमाभ्यः |

| सर्व-शब्दस्य स्त्रीलिङ्गे (सर्वा-शब्दस्य) रूपाणि | | |
|---|---|---|
| सर्वा | सर्वे | सर्वाः |
| सर्वाम् | सर्वे | सर्वाः |
| सर्वया | सर्वाभ्याम् | सर्वाभिः |
| सर्वस्यै | सर्वाभ्याम् | सर्वाभ्यः |
| सर्वस्याः | सर्वाभ्याम् | सर्वाभ्यः |

| | | |
|---|---|---|
| रमायाः | रमयोः | रमाणाम् |
| रमायाम् | रमयोः | रमासु |
| हे रमे ! | हे रमे ! | हे रमाः ! |

| | | |
|---|---|---|
| सर्वस्याः | सर्वयोः | सर्वासाम् |
| सर्वस्याम् | सर्वयोः | सर्वासु |
| हे सर्वे ! | हे सर्वे ! | हे सर्वाः ! |

**पदप्रयोगप्रकारः**

१. रमा विद्यालये पठति ।

२. सर्वाः महिलाः तत्र गच्छन्तु ।

३. सर्वासां नारीणां सम्मानो भवेत् ।

४. रमायै नमः ।

५. हे अम्ब ! मह्यं भोजनं देहि ।

## अभ्यासः

### १. सूत्राणामर्थं लिखत

(क) आङि चापः

(ख) सर्वनाम्नः स्याड्ढ्रस्वश्च

(ग) तृतीया दिक्समासे बहुव्रीहौ

(घ) औङ आपः

### २. कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत

(क) आबन्तसर्वनामशब्दाद् ङिद्विभक्तेः .................... विधीयते । (याडागमः, स्याडागमः)

(ख) अदन्तप्रातिपदिकात् स्त्रीलिङ्गे .................... भवति । (टाप्, ङीप्)

(ग) 'रमायै' इत्यत्र .................... भवति । (दीर्घः, वृद्धिः)

(घ) 'आङ्' इत्यनेन .................... बोधो भवति । (टा-विभक्तेः, औट्-विभक्तेः)

(ङ) अल्ला-शब्दः .................... वर्तते । (नदीसंज्ञकः, अम्बार्थकः)

### ३. परस्परं मेलयत

| | |
|---|---|
| रमयोः | याट् |
| सर्वासाम् | ह्रस्वः |
| अम्बिकायाम् | याडामौ |
| अक्क | स्याड्ढ्रस्वौ |
| बालायै | एत्वम् |
| विश्वस्यै | सुट् |

## ४. अधस्तन-प्रयोगाणां प्रातिपदिक-विभक्ति-वचन-प्रत्ययान् निर्दिशत

लतया, कवितयोः, गीते, कथायाम्, उमायाः, उभयस्यै, कतमासाम्, परस्याम्, शिक्षिकाभिः ।

## ५. एकवाक्येन उत्तरं लिखत

(क) अम्बार्थशब्दाः के ?

(ख) 'रमायाम्' इत्यत्र आमादेशविधायकं सूत्रं किम् ?

(ग) गोपा-शब्दस्य तृतीयैकवचने किं रूपम् ?

(घ) याडागमः केन सूत्रेण विधीयते ?

(ङ) अन्य-शब्दस्य स्त्रीलिङ्गे किं प्रातिपदिकम् ?

## ६. प्रश्नानामुत्तरं लिखत

(क) याडागमः कुत्र कुत्र भवति ?

(ख) स्त्रीलिङ्गे सर्वनामसंज्ञाप्रयुक्तानि कार्याणि कानि ? तानि च कासु विभक्तिषु जायन्ते ?

(ग) रमा-सर्वाशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) रमा-अम्बाशब्दयोः रूपसिद्धिप्रक्रियायां का भिन्नता ?

(ङ) गोपा-शब्दस्य विश्वपाशब्दवत्वे कारणं किम् ?

(च) आबन्तस्य एकारः कुत्र कुत्र भवति ?

## ७. विश्व-अन्य-दक्षिणशब्दानां स्त्रीलिङ्गे रूपाणि लिखत ।

## ८. अधस्तन-प्रयोगाणां ससूत्रं सिद्धिपथं प्रदर्श्य वाक्ये प्रयोगं च दर्शयत

| | | |
|---|---|---|
| (क) रमायै | (ख) रमयोः | (ग) रमायाम् |
| (घ) सर्वस्याः | (ङ) हे अम्ब | (च) सर्वासाम् |

### अजन्तस्त्रीलिङ्गप्रकरणे

# मति-त्रि-गौर्यादिशब्दाः

**इकारान्त-स्त्रीलिङ्गशब्दाः**

**मतीः । मत्या ॥**

मति-शब्दः क्तिन्-प्रत्ययान्तो वर्तते, अतः 'स्त्रियां क्तिन्' इति सूत्रेण अस्य प्रयोगः स्त्रीलिङ्गे भवति । अस्य प्रायेण रूपाणि हरिशब्दवद् भवन्ति । स्त्रीलिङ्गे नत्व-नाभावयोः अप्राप्तेः कारणेन, विकल्पेन नदीसंज्ञायाः कारणेन च मति-शब्दस्य कतिपयरूपाणि हरिशब्दाद् भिन्नानि भवन्ति । सु-औ-जस्-अम्-औट्-प्रत्ययेषु, सम्बुद्धौ च हरिवद् **मतिः, मती, मतयः, मतिम्, मती, हे मते** इत्येतानि रूपाणि मतिशब्दस्य भवन्ति । शस्-प्रत्यये तु पूर्वसवर्णदीर्घानन्तरं सकारस्य नत्वं स्त्रीलिङ्गे न भवति, 'तस्माच्छसो नः पुंसि' इत्यनेन 'पुंसि' इति निर्देशेन पुँल्लिङ्गशब्दानां विषये एव नत्वस्य विधानात् सकारस्य रुत्वविसर्गे 'मतीः' इति रूपं जायते ।

मति शस् - मति अस् - मतीस् - मतीर् - मतीः । टा-प्रत्यये सत्यामपि घिसंज्ञायाम् 'टा' इत्यस्य नाभावो न भवति, 'आङो नाऽस्त्रियाम्' इत्यनेन 'अस्त्रियाम्' इति निर्देशेन स्त्रीलिङ्गे नाभावस्य निषेधात् । अतो यणादेशे कृते 'मत्या' इत्येवं रूपं भवति ।

मति टा - मति आ - मत् य् आ - मत्या । ङिद्विभक्तिषु तु मतिशब्दो विकल्पेन नदीसंज्ञां लभते-

**ङिति ह्रस्वश्च १ । ४ । ६ ॥**

**इयङुवङ्स्थानौ स्त्रीशब्दभिन्नौ नित्यस्त्रीलिङ्गावीदूतौ, ह्रस्वौ चेवर्णोवर्णौ, स्त्रियां वा नदीसंज्ञौ स्तो ङिति । मत्यै, मतये । मत्याः २ । मतेः २ ॥**

स्त्री-शब्दं विहाय अन्ये इयङ्-उवङादेशयोः स्थानिरूपेण विद्यमाना ईकारान्ताः, ऊकारान्ताश्च नित्यस्त्रीलिङ्गशब्दाः, तथा नित्यं स्त्रीलिङ्गे प्रयुज्यमाना इकारान्ताः, उकारान्ताश्च शब्दा अपि ङिद्विभक्तिषु परतः विकल्पेन नदीसंज्ञका भवन्ति ।

अनेन सूत्रेण नदीसंज्ञापक्षे आडागमादि-नदीसंज्ञाप्रयुक्तकार्याणि जायन्ते । नदीसंज्ञाभावे च घिसंज्ञायां गुणादि-घिप्रयुक्तकार्याणि जायन्ते । यथा-

नदीसंज्ञापक्षे- मति ङे - मति ए - मति आट् ए (आण्नद्याः) - मति आ ए - मति ऐ (आटश्च) - मत् य् ऐ (इको यणचि) - मत्यै । घिसंज्ञापक्षे हरिवत्- मति ङे - मति ए - मते ए - मत् अय् ए - मतये ।

मति ङसि/ङस् - मति अस् - मति आ अस् (आण्नद्याः) - मति आस् (आटश्च) - मत् य् आस् (इको यणचि) - मत्यास् - मत्यार् - मत्याः । पक्षे- मतेः ।

**इदुद्भ्याम् ७ । ३ । ११७ ॥**

**इदुद्भ्यां नदीसंज्ञकाभ्यां परस्य ङेराम् । मत्याम्, मतौ । शेषं हरिवत् ॥ एवं बुद्ध्यादयः ॥**

इकारान्तात्, उकारान्तात् च नदीसंज्ञकात् शब्दात् परस्य सप्तम्येकवचनस्य ङि-प्रत्ययस्य स्थाने 'आम्' आदेशो भवति ।

मति ङि - मति इ - मति आम् (इदुद्भ्याम्) - मति आ आम् (आण्नद्याः) - मति आम् (आटश्च) - मत् य् आम् (इको यणचि) - मत्याम् । पक्षे- मतौ । शेषविभक्तिषु हरिवदेव मतिशब्दस्यापि रूपाणि जायन्ते । एवं प्रकारेण बुद्धि, स्तुति, श्रुति, कृति, गति, वृद्धि, विभक्ति इत्यादीनां इकारान्त-स्त्रीलिङ्गप्रातिपदिकानामपि रूपाणि मतिवत् प्रक्रियया निष्पद्यन्ते ।

**त्रिचतुरोः स्त्रियां तिसृचतसृ ७ । २ । ९९ ॥**

**स्त्रीलिङ्गयोरेतौ स्तो विभक्तौ ॥**

विभक्तौ परस्यां सत्याम्, स्त्रीत्वविवक्षायां सङ्ख्यावाचिनोः त्रि-चतुर्-शब्दयोः स्थाने क्रमेण 'तिसृ', 'चतसृ' इत्येतौ आदेशौ भवतः । स्त्रीलिङ्गे रूपसाधनक्रमे त्रि-शब्दस्य 'तिसृ', चतुर्-शब्दस्य च 'चतसृ' इत्येतौ आदिश्येते इत्यर्थः । अनेन ऋदन्तशब्दविधानानन्तरम् 'ऋन्नेभ्यो ङीप्' इति स्त्रीप्रत्ययविधायकसूत्रेण ङीपि प्राप्ते 'न षट्स्वस्रादिभ्यः' इत्यनेन निषिध्यते इति बोध्यम् ।

**अचि र ऋतः ७ । २ । १०० ॥**

**तिसृचतसृ एतयोर्ऋकारस्य रेफादेशः स्यादचि । गुणदीर्घोत्वानामपवादः । तिस्रः । तिस्रः । तिसृभिः । तिसृभ्यः । तिसृभ्यः । आमि नुट् ॥**

अजादि-विभक्तिषु परतः ऋकारान्तयोः तिसृ-चतसृशब्दयोः अन्त्यस्य ऋकारस्य स्थाने रेफादेशो भवति । विधिरयम् (रेफादेशः) गुणस्य, दीर्घस्य, उत्वस्य च अपवादो वर्तते, इत्युक्ते अनेन तानि बाध्यन्ते ।

त्रि जस्/शस् (नित्यं बहुवचनान्तः) - त्रि अस् - तिसृ अस् (त्रिचतुरोः स्त्रियां तिसृचतसृ) - तिस् र् अस् - तिस्रस् - तिस्रर् - तिस्रः । भिसादौ तु 'तिसृ' इत्यादेशे, हलादित्वाद् अनेन रेफादेशस्य अप्राप्तौ- तिसृभिः । आम्-प्रत्यये- तिसृविधानानन्तरं नुडागमे 'तिसृ नाम्' इत्यवस्थायाम् 'नामि' इत्यनेन दीर्घे प्राप्ते-

**न तिसृचतसृ ६ । ४ । ४ ॥**

**एतयोर्नामि दीर्घो न । तिसृणाम् । तिसृषु ॥ द्वे । द्वे । द्वाभ्याम् । द्वाभ्याम् । द्वाभ्याम् । द्वयोः । द्वयोः ॥ गौरी । गौर्यौ । गौर्यः । हे गौरि । गौर्यौ । इत्यादि ॥ एवं नद्यादयः ॥ लक्ष्मीः । शेषं गौरीवत् ॥ एवं तरीतन्त्र्यादयः ॥ स्त्री । हे स्त्री ॥**

नाम्-प्रत्यये परे तिसृशब्दस्य, चतसृ-शब्दस्य च दीर्घो न भवति ।

अनेन दीर्घनिषेधे 'तिसृनाम्' इत्यवस्थायाम्, नकारस्य णत्वे- तिसृणाम् । सुप्-प्रत्यये- तिसृषु । द्वि-शब्दस्य त्यदादिगणे पाठात् 'त्यदादीनामः' इति अत्वे, द्व-शब्दस्य स्त्रीत्वविवक्षायां टापि 'द्वा' इति प्रातिपदिकम्, ततः सर्वाशब्दस्य द्विवचनवत् सिद्धिप्रक्रिया भवति ।

गौरी-नदीशब्दादीनां ङ्यन्तशब्दानाम् 'यूस्त्र्याख्यौ नदी' इत्यनेन नित्यं नदीसंज्ञा भवति, अतः सम्बुद्धौ, ङिद्विभक्तिषु च बहुश्रेयसीशब्दवत् तेषां रूपाणि निष्पद्यन्ते । लक्ष्मी-शब्दस्य तु अङ्यन्ततया प्रथमैकवचने हल्ङ्यादिलोपाभावे, सम्बुद्धौ च ह्रस्वाभावेन हल्लोपाभावे उभयत्र विसर्गयुतं रूपं भवतीति विशेषः ।

**स्त्रियाः ६ । ४ । ७९ ॥**

**अस्येयङ् स्यादजादौ प्रत्यये परे । स्त्रियौ । स्त्रियः ॥**

अजादौ प्रत्यये परे स्त्री-शब्दस्य 'इयङ्' आदेशो भवति । अनुबन्धेन 'इय्' इति अन्त्यादेशो विधीयते ।

स्त्री औ - स्त्र् इय् औ - स्त्रियौ । एवं जस्-प्रत्यये- स्त्रियः ।

**वाम्शसोः ६ । ४ । ८० ॥**

**अमि शसि च स्त्रिया इयङ् वा स्यात् । स्त्रियम्, स्त्रीम् । स्त्रियः, स्त्रीः । स्त्रिया । स्त्रियै । स्त्रियाः । परत्वान्नुट् । स्त्रीणाम् । स्त्रीषु ॥ श्रीः । श्रियौ । श्रियः ॥**

अम्-शस्-प्रत्यायोः परयोः सत्योः स्त्री-शब्दस्य अन्त्यवर्णस्य स्थाने विकल्पेन 'इयङ्' आदेशो भवति । पूर्वसूत्रेण नित्यं प्राप्ते अनेन विकल्प्यते ।

स्त्री अम् - स्त्र् इय् अम् - स्त्रियम् । पक्षान्तरे पूर्वरूपे- स्त्रीम् । स्त्री शस् - स्त्री अस् - स्त्र् इय् अस् - स्त्रियस् - स्त्रियर् - स्त्रियः । पक्षान्तरे पूर्वसवर्णदीर्घे, रुत्वविसर्गौ- स्त्रीः । टादौ अजादिप्रत्यये तु पूर्वसूत्रेण नित्यं इयङादेशो भवति । नित्यं नदीसंज्ञकत्वात् ङिद्विभक्तिषु नदीसंज्ञाप्रयुक्तकार्याणि अपि जायन्ते । स्त्री ङे - स्त्री ए - स्त्री आ ए (आण्नद्याः) - स्त्री ऐ (आटश्च) - स्त्र् इय् ऐ (त्रियाः) - त्रियै ।

**नेयङुवङ्स्थानावस्त्री १ । ४ । ४ ॥**

**इयङुवङोः स्थितिर्ययोस्तावीदूतौ नदीसंज्ञौ न स्तो न तु स्त्री । हे श्रीः । श्रियै, श्रिये । श्रियाः, श्रियः ॥**

स्त्री-शब्दं विहाय अन्ये इयङ्-उवङादेशयोः स्थानिरूपेण अवस्थिता ईकारान्ताः, ऊकारान्ताश्च शब्दाः नदीसंज्ञका न भवन्ति । अनेन नित्यनदीसंज्ञाया निषेधे 'ङिति ह्रस्वश्च' इत्यनेन विकल्पेन नदीसंज्ञा विधीयते ।

लक्ष्मीवाचकस्य श्री-शब्दस्य अङ्यन्ततया प्रथमायाम्, सम्बोधने च सुप्रत्यये- श्रीः । अजादौ विभक्तौ 'अचि श्नुधातु...' इति इयङादेशो विधीयते । ङिद्विभक्तिषु वैकल्पिकनदीसंज्ञायाम् आडादिकमपि प्रवर्तन्ते । इयङ् तु उभयोः पक्षयोर्भवत्येव । आम्-प्रत्यये तु विशेष उच्यते-

**वामि १। ४। ५ ॥**

**इयङुवङ्स्थानौ स्त्र्याख्यौ यू आमि वा नदीसंज्ञौ स्तो न तु स्त्री । श्रीणाम्, श्रियाम् । श्रियाम्, श्रियि ॥ धेनुर्मतिवत् ॥**

स्त्री-शब्दं विहाय अन्ये इयङ्-उवङादेशयोः स्थानिरूपेण अवस्थिता ईकारान्ताः, ऊकारान्ताश्च शब्दाः आम्-प्रत्यये परे विकल्पेन नदीसंज्ञका भवन्ति । अनेन नदीसंज्ञापक्षे परत्वाद् नुडागमो जायते, पक्षान्तरे तु नदीसंज्ञाभावे नुडागमस्य अप्राप्तौ इयङादेशो विधीयते ।

श्री आम् - श्री नाम् - श्रीनाम् - श्रीणाम् । नदीसंज्ञाभावे- श्री आम् - श्र् इय् आम् - श्रियाम् ।

गोर्वाचकस्य धेनुशब्दस्य सिद्धिः मतिवत्प्रक्रियया भवति । उकारान्तस्त्रीलिङ्गत्वात् 'ङिति ह्रस्वश्च' इत्यनेन विकल्पेन नदीसंज्ञायां मतिवत् कार्याणि प्रवर्तन्ते इत्यर्थः । नदीसंज्ञाभावपक्षे तु शस्-टाप्रत्ययौ विहाय अन्यत्र धेनुशब्दस्य रूपाणि शम्भुशब्दवद् जायन्ते ।

**स्त्रियां च ७। १। ९६ ॥**

**स्त्रीवाची क्रोष्टुशब्दस्तृजन्तवद्रूपं लभते ॥**

स्त्रीलिङ्गे क्रोष्टुशब्दस्य तृज्वद्भावो भवति । पुँल्लिङ्गे कासुचन विभक्तिषु एव लब्धतृज्वद्भावः शब्दोऽयं स्त्रीलिङ्गे सर्वासु विभक्तिषु क्रोष्टृरूपेण प्रयुज्यते ।

**ऋन्नेभ्यो ङीप् ४। १। ५ ॥**

**ऋदन्तेभ्यो नान्तेभ्यश्च स्त्रियां ङीप् स्यात् । क्रोष्ट्री गौरीवत् ॥ भूः श्रीवत् ॥ स्वयम्भूः पुंवत् ॥**

ऋकारान्तात्, नकारान्तात् च प्रातिपदिकात् स्त्रीलिङ्गे ङीप्-प्रत्ययो भवति । ङीप्-प्रत्ययस्य ङकार-पकारौ इत्संज्ञकौ वर्तेते, तयोर्लोपे 'ई' इत्येव अवशिष्यते ।

क्रोष्टु-शब्दस्य स्त्रीलिङ्गे प्रयुज्यमाने 'स्त्रियां च' इत्यनेन तृज्वद्भावेन 'क्रोष्टृ' इत्यादेशे तस्मात् प्रकृतसूत्रेण ङीप्-प्रत्ययेऽनुबन्धलोपे 'क्रोष्टृ ई' इत्यवस्थायां यणि, वर्णयोगे 'क्रोष्ट्री' इति प्रातिपदिकात् सुब्विभक्तयो जायन्ते । अस्य ङ्यन्त-प्रातिपदिकस्य गौरीशब्दवत् प्रक्रियया रूपाणि निष्पद्यन्ते ।

**न षट्स्वस्रादिभ्यः ४। १। १० ॥**

**ङीप्टापौ न स्तः ।**

**स्वसा तिस्रश्चतस्रश्च ननान्दा दुहिता तथा ।**

**याता मातेति सप्तैते स्वस्रादय उदाहृताः ॥**

**स्वसा । स्वसारौ ॥ माता पितृवत् । शसि मातॄः ॥ द्यौर्गोवत् ॥ राः पुंवत् ॥ नौर्ग्लौवत् ॥**

षट्-संज्ञकशब्देभ्यः, स्वस्रादि-शब्देभ्यश्च स्त्रीलिङ्गे ङीप्-टाप्-प्रत्ययौ न भवतः ।

प्रदत्तायां कारिकायां सप्त स्वस्रादिशब्दाः सङ्गृहीताः सन्ति । ते च स्वसृ, त्रि, चतुर्, ननान्दृ, दुहितृ, यातृ, मातृ । एतेषु त्रि-चतुर्शब्दौ विहाय सर्वे ऋकारान्ताः सन्ति । त्रि-चतुर्शब्दौ अपि स्त्रीलिङ्गे तिसृ, चतसृ इत्यादेशानान्तरम् ऋकारान्ता जायन्ते, परन्तु विशेषसिद्धिप्रक्रियायाः कारणेन तयोर्निरूपणं पूर्वमेव विहितम् । अनेन ङीप्-प्रत्ययस्य निषेधे कृते शस्-प्रत्ययं विहाय अन्यासु विभक्तिषु एतेषां रूपाणि ऋकारान्त-पुँल्लिङ्गवद् निष्पद्यन्ते । शस्-प्रत्यये तु नत्वाभावे विसर्गसहितं रूपं भवति ।

मातृ शस् - मातृ अस् - मातॄस् (प्रथमयोः पूर्वसवर्णः) - मातॄर् - मातॄः ।

## प्रयोगसिद्धिप्रकारः

### मत्याम्/मतौ

मति-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण सप्तम्या एकवचने ङि-प्रत्ययेऽनुबन्धलोपे 'मति इ' इति जाते, 'ङिति ह्रस्वश्च' इत्यनेन प्रकृतेः

विकल्पेन नदीसंज्ञायाम् 'इदुद्भ्याम्' इति सूत्रेण 'ङे' इत्यस्य आमादेशे 'मति आम्' इति जाते, स्थानिवत्वेन ङित्वाद् 'आण्नद्याः' इत्यनेन प्रत्ययस्य आडागमेऽनुबन्धलोपे 'मति आ आम्' इति जाते 'आटश्च' इत्यनेन वृद्धौ 'मति आम्' इति जाते, यणि, वर्णयोगे 'मत्याम्' इति रूपं सिद्धम् । नदीसंज्ञाभावे घिसंज्ञायम् 'घेर्ङिति' इत्यनेन अङ्गस्य गुणे प्राप्ते, तं बाधित्वा 'अच्च घेः' इति सूत्रेण प्रत्ययस्य स्थाने औकारादेशे, घिसंज्ञकस्य अङ्गस्य च अकारान्तादेशे कृते 'मत औ' इति जाते 'वृद्धिरेचि' इति सूत्रेण वृद्धौ, औकार एकादेशे, वर्णयोगे 'मतौ' इति रूपं च साधु ।

**शब्द-रूपावलिः**

| मति-शब्दस्य रूपाणि | | |
|---|---|---|
| मति | मती | मतयः |
| मतिम् | मती | मतीः |
| मत्या | मतिभ्याम् | मतिभिः |
| मत्यै/मतये | मतिभ्याम् | मतिभ्यः |
| मत्याः/मतेः | मतिभ्याम् | मतिभ्यः |
| मत्याः/मतेः | मत्योः | मतीनाम् |
| मत्याम्/मतौ | मत्योः | मतिषु |
| हे मते ! | हे मती ! | हे मतयः ! |

| गौरी-शब्दस्य रूपाणि | | |
|---|---|---|
| गौरि | गौर्यौ | गौर्यः |
| गौरीम् | गौर्यौ | गौरीः |
| गौर्या | गौरीभ्याम् | गौरीभिः |
| गौर्यै | गौरीभ्याम् | गौरीभ्यः |
| गौर्याः | गौरीभ्याम् | गौरीभ्यः |
| गौर्याः | गौर्योः | गौरीणाम् |
| गौर्याम् | गौर्योः | गौरीषु |
| हे गौरि ! | हे गौर्यौ ! | हे गौर्यः ! |

| मातृ-शब्दस्य रूपाणि | | | त्रि-शब्दस्य त्रिलिङ्गे रूपाणि |
|---|---|---|---|
| माता | मातरौ | मातरः | तिस्रः |
| मातरम् | मातरौ | मातॄः | तिस्रः |
| शेषं पितृवत् । | | | तिसृभिः |
| | | | तिसृभ्यः |
| | | | तिसृभ्यः |
| | | | तिसृणाम् |
| | | | तिसृषु |

**पदप्रयोगप्रकारः**

१. अहं मात्रा सह वन्दनां करोमि ।

२. विनाशकाले मनुष्यस्य मतिः भ्रष्टा भवति ।

३. बुद्धिः एव बलवती भवति ।

४. मम पार्श्वे तिस्रः लेखन्यः विद्यन्ते ।

५. हे लक्ष्मीः ! मम दारिद्र्यम् अपसारय ।

६. अस्माकं गृहे प्रतिदिनं धेन्वाः पूजा भवति ।

# अभ्यासः

१. **सूत्राणामर्थं विलिखत**

(क) त्रिचतुरोः स्त्रियां तिसृचतसृ    (ख) न षट्स्वस्रादिभ्यः

(ग) अचि र ऋतः    (घ) इदुद्भ्याम्

२. **परस्परं मेलयत**

| | |
|---|---|
| बुद्ध्यै | ङि |
| स्तुत्याम् | जस् |
| तिस्रः | ङे |
| स्वसुः | आम् |
| जरसा | सु |
| स्त्रीणाम् | टा |
| ङस् | |

३. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) 'मत्याम्' इत्यत्र ..................... इति सूत्रेण आमादेशः । (ङेराम्नद्याम्नीभ्यः, इदुद्भ्याम्)

(ख) स्त्री-शब्दस्य नदीसंज्ञा ..................... भवति । (नित्यम्, विकल्पेन)

(ग) आडागमः ..................... प्रवर्तते । (नदीसंज्ञायाम्, घिसंज्ञायाम्)

(घ) मति-शब्दस्य नदीसंज्ञा ..................... इत्यनेन भवति । (ङिति ह्रस्वश्च, यू स्त्र्याख्यौ नदी)

(ङ) लक्ष्मी-शब्दः ..................... विद्यते । (ङ्यन्तः, अङ्यन्तः)

(च) वृद्धि-शब्दः ..................... वर्तते । (मतिवत्, हरिवत्)

(छ) पतिशब्दः ..................... एव घिसंज्ञां लभते । (समासे, असमासे)

४. **अधस्तन-प्रयोगाणां वाक्ये प्रयोगं दर्शयत**

स्त्रियै, तिसृणाम्, ननान्दा, द्वे, जरा, मातरम्

## ५. एकवाक्येन उत्तरं लिखत

(क) श्री-शब्दस्य कोऽर्थः ?

(ख) 'वामि' इति सूत्रेण किं विधीयते ?

(ग) क्रोष्टु-शब्दस्य स्त्रीलिङ्गे केन सूत्रेण तृज्वद्भावः ?

(घ) क्रोष्ट्री-शब्दे कः स्त्रीप्रत्ययः अस्ति ?

(ङ) स्वसृ-शब्दस्य द्वितीयाबहुवचने किं रूपम् ?

## ६. प्रश्नानामुत्तरं लिखत

(क) 'ङिति ह्रस्वश्च' इत्यनेन केषां नदीसंज्ञा भवति ?

(ख) मतिशब्दस्य सत्यामपि घिसंज्ञायां नादेशाभावे कारणं किम् ?

(ग) हरि-मतिशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) द्वि-शब्दस्य स्त्रियां रमाशब्दवद् रूपाणि भवन्तीत्यत्र कारणं किम् ?

(ङ) स्वस्रादयः शब्दाः के ?

## ७. यातृ-नदी-स्त्रीशब्दानां सर्वाणि रूपाणि लिखत ।

## ८. अधस्तन-प्रयोगाणां सिद्धिपथं दर्शयत

(क) मत्याः (ख) स्त्रियम् (ग) हे मातः

(घ) धेनूः (ङ) श्रीणाम् (ङ) गौर्याम्

### अजन्तप्रकरणे

# अवर्णान्तनपुंसकलिङ्गशब्दाः

**नपुंसकलिङ्गे प्रवर्तमानानि सामान्यकार्याणि–**

- अदन्तप्रातिपदिकाद् विहितयोः सु/अम्-प्रत्यययोः स्थाने 'अम्' आदेशः। (अतोऽम्)
- अदन्तभिन्नप्रातिपदिकाद् विहितयोः सु/अम्-प्रत्यययोः लुक्। (स्वमोर्नपुंसकात्)
- औ/औट्-प्रत्यययोः स्थाने 'शी' आदेशः। (नपुंसकाच्च)
- जस्/शस्-प्रत्यययोः स्थाने 'शि' आदेशः। (जश्शसोः शिः)
- शि-प्रत्ययस्य (जस्-शस्-प्रत्यययोः) सर्वनामस्थानसंज्ञा। (शि सर्वनामस्थानम्)
- दीर्घान्तप्रातिपदिकानां ह्रस्वः। (ह्रस्वो नपुंसके प्रातिपदिकस्य)
- प्रथमा-द्वितीयाविभक्त्योः समानरूपाणि।
- तृतीयादिविभक्तिषु प्रायः शब्दानां पुँल्लिङ्गवद् रूपाणि।
- अजादौ विभक्तौ प्रायशः इकारान्तप्रातिपदिकानां 'नुम्' आगमः। (इकोऽचि विभक्तौ)

**अतोऽम् ७।१।२४॥**

**अतोऽङ्गात् क्लीबात्स्वमोरम्। अमि पूर्वः। ज्ञानम्। एङ्ह्रस्वादिति हल्लोपः। हे ज्ञान॥**

नपुंसकलिङ्गे विद्यमानाद् अकारान्ताद् अङ्गाद् विहितयोः सु-अम्-प्रत्यययोः स्थाने 'अम्' आदेशो भवति। 'स्वमोर्नपुंसकात्' इति सूत्रेण सर्वेभ्यो नपुंसकलिङ्गप्रातिपदिकेभ्यः परयोः सु-अम्-प्रत्यययोः लुकि प्राप्ते अदन्तशब्दानां विषये अनेन लुकं बाधित्वा अमादेशो विधीयते।

बोधार्थको ज्ञान-शब्दो ज्ञा-धातोर्ल्युट्प्रत्ययेन निष्पन्नत्वात् नित्यं नपुंसकलिङ्गे प्रयुज्यते, तस्य च व्युत्पन्नपक्षे प्रातिपदिकसंज्ञायाम्- ज्ञान सु/अम् - ज्ञान अम् - ज्ञानम् (अमि पूर्वः)।

**नपुंसकाच्च ७।१।१९॥**

**क्लीबादौङः शी स्यात्। भसंज्ञायाम्॥**

नपुंसकलिङ्गे विद्यमानाद् अङ्गात् परयोः औ-औट्-प्रत्यययोः स्थाने 'शी' आदेशो भवति । 'ई' इत्येव अवशिष्यते । नपुंसकलिङ्गे सर्वत्रैव अस्य प्रसक्तिर्वर्तते ।

**यस्येति च ६ । ४ । १४८ ॥**

**ईकारे तद्धिते च परे भस्येवर्णावर्णयोर्लोपः । इत्यल्लोपे प्राप्ते ।**

यस्य = इश्च अश्च यः तस्य, इवर्ण-अवर्णयोरित्यर्थः । तद्धितप्रत्यये परे, ईकारे परे च भसंज्ञकस्य अङ्गस्य अन्त्यस्य अवर्णस्य, इवर्णस्य च लोपो भवति । नपुंसकलिङ्गे औ-औट्-प्रत्यययोः सर्वनामस्थानभिन्नत्वात् तयोः प्रकृतेः 'यचि भम्' इति सूत्रेण भसंज्ञां भवति ।

**औङः श्यां प्रतिषेधो वाच्यः** (वा.) **ज्ञाने ॥**

औ-औट्-प्रत्यययोः स्थाने 'शी' इत्यादेशे कृते 'यस्येति च' इति सूत्रेण विधीयमानो लोपो न न भवतीति वार्तिकार्थः । अनेन वार्तिकेन 'नपुंसकाच्च' इत्यनेन विहिते 'शी' इत्यस्य ईकारे परे 'यस्येति च' इत्यस्य प्रसक्तिः निषिध्यते । ततः अकार-ईकारयोः स्थाने गुणो भवति ।

ज्ञान औ - ज्ञान शी (नपुंसकाच्च) - ज्ञान ई - ज्ञान् ए (आद् गुणः) - ज्ञाने ।

**जश्शसोः शिः ७ । १ । २० ॥**

**क्लीबादनयोः शिः स्यात् ॥**

नपुंसकलिङ्गाद् अङ्गाद् उत्तरयोः जस्-शस्-प्रत्यययोः स्थाने 'शि' आदेशो भवति । सर्वादेशरूपेण विहितस्य 'शि' इत्यस्य शकारस्य इत्संज्ञायां लोपे 'इ' इति अवशिष्यते । अयमपि आदेशो नपुंसकलिङ्गे सर्वत्र भवति ।

**शि सर्वनामस्थानम् १ । १ । ४२ ॥**

**शि इत्येतदुक्तसंज्ञं स्यात् ॥**

'शि' इत्यस्य सर्वनामस्थान-संज्ञा भवति । 'शि' च पूर्वसूत्रेण नपुंसकलिङ्गे जस्-शस्प्रत्यययोः स्थाने विधीयते ।

**नपुंसकस्य झलचः ७ । १ । ७२ ॥**

**झलन्तस्याजन्तस्य च क्लीबस्य नुम् स्यात् सर्वनामस्थाने ॥**

सर्वनामस्थाने परे सति झलन्तस्य, अजन्तस्य च नपुंसकलिङ्ग-प्रातिपदिकस्य 'नुम्' आगमो भवति । अनुबन्धेन 'न्' इत्येव अवशिष्यते । इकारान्तप्रातिपदिकेषु तु विधिरयं नुम्-विधायकेन एव 'इकोऽचि विभक्तौ' इति सूत्रेण बाध्यते ।

**मिदचोऽन्त्यात्परः १ । १ । ४७ ॥**

**अचां मध्ये योऽन्त्यस्तस्मात्परस्तस्यैवान्तावयवो मित्स्यात् । उपधादीर्घः । ज्ञानानि । पुनस्तद्वत् । शेषं पुंवत् ॥ एवं धनवनफलादयः ॥**

मित् (म् इत् यस्य) आगमः स्थानिनः अन्त्यात् स्वरवर्णाद् अनन्तरं समुदायस्य एव अङ्गरूपेण तिष्ठति । टित्, कित्, मित् इति आगमेषु टित्-कितोर्विषये 'आद्यन्तौ टकितौ' इत्यनेन स्पटीकृतम्, अनेन मिदागमस्य विषयो नियम्यते ।

ज्ञान जस्/शस् - ज्ञान अस् - ज्ञान शि (जश्शसोः शिः) - ज्ञान इ - ज्ञानन् इ (नपुंसकस्य झलचः) - ज्ञानान् इ (सर्वनामस्थाने चासम्बुद्धौ) - ज्ञानानि । सम्बोधने-

ज्ञान सु - ज्ञान अम् (अतोऽम्) - ज्ञानम् (अमि पूर्वः) - ज्ञान (एङ्ह्रस्वात् सम्बुद्धेः) - हे ज्ञान । तृतीयादिविभक्तौ नपुंसकलिङ्गे विशेषकार्याभावाद् एतासु विभक्तिषु नपुंसकलिङ्ग-प्रातिपदिकानां रूपाणि पुँल्लिङ्गवदेव जायन्ते । ज्ञान-शब्दस्य अपि अदन्ततया रामवत्- ज्ञानेन, ज्ञानाभ्याम्, ज्ञानैः इत्यादीनि रूपाणि जायन्ते ।

**अद्ड्डतरादिभ्यः पञ्चभ्यः ७ । १ । २५ ॥**

**एभ्यः क्लीबेभ्यः स्वमोरद्ड्डादेशः स्यात् ॥**

नपुंसकलिङ्गे डतर-प्रत्ययान्तशब्देभ्यः, डतम-प्रत्ययान्तशब्देभ्यः, अन्य-अन्यतर-इतर-शब्देभ्यश्च उत्तरस्य सु/अम्-प्रत्यययोः स्थाने 'अद्ड्' इति आदेशो भवति । डकारस्य इत्संज्ञायाम् 'अद्' इति अवशिष्यते, डित्वविधानाद् अङ्गस्य टिभागस्य लोपो भवति । सूत्रमिदम् 'अतोऽम्' इति सूत्रेण प्राप्तम् अमादेशं बाधते ।

**टेः ६ । ४ । १४३ ॥**

**डिति भस्य टेर्लोपः । कतरत्, कतरद् । कतरे । कतराणि । हे कतरत् । शेषं पुंवत् । एवं कतमत् । इतरत् । अन्यत् । अन्यतरत् । अन्यतमस्य त्वन्यतममित्येव ।**

डकार इत् यस्य स डित् । डित्-प्रत्यये परे सति भसंज्ञकस्य अङ्गस्य टिभागस्य लोपो भवति । अत्र स्मर्तव्यं यत्- यदि कस्मिँश्चित् प्रत्यये डकार इत्संज्ञकोऽस्ति, तस्य अन्यत् किमपि प्रयोजनं च नास्ति, तर्हि तस्मिन् प्रत्यये परे असत्यामपि भसंज्ञायाम् अनेन सूत्रेण अङ्गस्य टिलोपो भवति ।

कतर सु/अम् - कतर अद्ड् (अद्ड्डतरादिभ्यः पञ्चभ्यः) - कतर अद् - कतर् अद् (टेः) - कतरद् - कतरत् (वाऽवासाने) । चर्त्वाभावे- कतरद् ।

एवंरीत्या अन्य-कतम-यतम-यतरादीनामपि अन्यत्, कतमत्, यतमत्, यतरत् इत्यादीनि रूपाणि भवन्ति । एकतरशब्दस्य तु-

**एकतरात्प्रतिषेधो वक्तव्यः (वा.) एकतरम् ॥**

एकतर-शब्दात् परस्य सु-अम्प्रत्यययोः स्थाने अद्डादेशो न भवति । अनेन अद्डादेशनिषेधे ज्ञानवद् यथा-

एकतर सु/अम् - एकतर अम् (अतोऽम्) - एकतरम् (अमि पूर्वः) ।

**ह्रस्वो नपुंसके प्रातिपदिकस्य १। २। ४७॥**

**अजन्तस्येत्येव। श्रीपं ज्ञानवत्॥**

नपुंसकलिङ्गे वर्तमानस्य अजन्त-प्रातिपदिकस्य अन्त्यवर्णस्य स्थाने ह्रस्वादेशो भवति। अनेनैव सूत्रेण सर्वे अजन्तनपुंसकलिङ्गप्रातिपदिका ह्रस्वान्ता भवन्ति।

श्रियं पातीति विग्रहे निष्पन्नस्य श्रीपा-प्रातिपदिकस्य नपुंसकप्रयोगे अनेन सूत्रेण ह्रस्वान्तादेशे आकारस्य अकारे 'श्रीप' इति जाते, तस्मात् सुप्रत्यये, अम्-प्रत्यये च ज्ञानवत्- श्रीपम्।

श्रीपा सु/अम् - श्रीप सु/अम् - श्रीप अम् - श्रीपम्।

### प्रयोगसिद्धिप्रकारः

**ज्ञानानि**

ज्ञान-शब्दस्य व्युत्पन्नतया 'कृत्तद्धितसमासाश्च' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण प्रथमाया बहुवचने जस्-प्रत्ययेऽनुबन्धलोपे 'ज्ञान जस्' इति जाते 'जश्शसोः शिः' इति सूत्रेण 'जस्' इत्यस्य स्थाने 'शि' इत्यादेशेऽनुबन्धलोपे 'ज्ञान इ' इति जाते 'शि सर्वनामस्थानम्' इत्यनेन 'शि' इत्यस्य सर्वनामस्थानसंज्ञायाम् 'नपुंसकस्य झलचः' इति सूत्रेण अङ्गस्य नुमागमेऽनुबन्धलोपे, मित्वाद् अन्त्यादचोऽकारस्य परावयवत्वे 'ज्ञानन् इ' इति जाते 'सर्वनामस्थाने चासम्बुद्धौ' इति सूत्रेण उपधाया अकारस्य दीर्घे 'ज्ञानान् इ' इति जाते, वर्णसम्मेलने 'ज्ञानानि' इति रूपं सिद्धम्।

**शब्द-रूपावलिः**

**ज्ञान-शब्दस्य पुँल्लिङ्गे रूपाणि**

| | | |
|---|---|---|
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| ज्ञानम् | ज्ञाने | ज्ञानानि |
| ज्ञानेन | ज्ञानाभ्याम् | ज्ञानैः |
| ज्ञानाय | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| ज्ञानात्-द् | ज्ञानाभ्याम् | ज्ञानेभ्यः |
| ज्ञानस्य | ज्ञानयोः | ज्ञानानाम् |
| ज्ञाने | ज्ञानयोः | ज्ञानेषु |
| हे ज्ञान ! | हे ज्ञाने ! | हे ज्ञानानि ! |

**सर्व-शब्दस्य नपुंसकलिङ्गे रूपाणि**

| | | |
|---|---|---|
| सर्वम् | सर्वे | सर्वाणि |
| सर्वम् | सर्वे | सर्वाणि |

शेषरूपाणि पुँल्लिङ्गवद् भवन्ति ।

**कतर-शब्दस्य नपुंसकलिङ्गे रूपाणि**

| | | |
|---|---|---|
| कतरत्-द् | कतरे | कतराणि |
| कतरत्-द् | कतरे | कतराणि |
| (शेषं पुंवत्) | | |
| हे कतरत्-द् ! | हे कतरे ! | हे कतराणि ! |

**पदप्रयोगप्रकारः**

१. ज्ञानेन विना जीवनं अन्धकारमयं भवति ।

२. विज्ञानाद् ज्ञानं श्रेष्ठतरं वर्तते ।

३. उद्याने पुष्पाणि विकसितानि सन्ति ।

४. सर्वं जगत् ईश्वरेण व्याप्तं विद्यते ।

५. अहं प्रातः पठनाद् अन्यत् कार्यं न करोमि ।

६. तव सर्वाणि मित्राणि शिक्षितानि सन्ति ।

७. मित्र ! मह्यं त्रीणि पुस्तकानि यच्छ ।

८. अहं प्रतिदिनं द्वे फले खादामि ।

## अभ्यासः

१. **सूत्राणामर्थं लिखित्वा कक्षायां श्रावयत**

(क) अतोऽम् (ख) शि सर्वनामस्थानम्

(ग) यस्येति च (घ) नपुंसकाच्च

(ङ) जश्शसोः शिः

२. **परस्परं मेलयत**

| | |
|---|---|
| अतोऽम् | शि |
| यचि भम् | सर्वनामस्थानम् |
| अमि पूर्वः | भसंज्ञा |
| नपुंसकाश्च | शी |
| शि सर्वनामस्थानम् | अम् |
| जश्शसोः शिः | पूर्वरूपम् |

३. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) नपुंसकलिङ्गे प्रथमा-द्वितीयाविभक्त्यो रूपाणि ...... भवन्ति । (भिन्नानि, समानानि)

(ख) 'टेः' इति सूत्रेण ............ क्रियते । (टिलोपः, अन्त्यवर्णलोपः)

(ग) अदन्त-नपुंसकलिङ्गाद् विहितस्य सु-प्रत्ययस्य ....... भवति । (लुक्, अमादेशः)

(घ) .............. इत्यस्य सर्वनामस्थानसंज्ञा भवति । (शि, शी)

(ङ) नपुंसके सुप्रत्ययस्य सर्वनामस्थानसंज्ञा ............... । (भवति, न भवति)

(च) ..................... इति शब्दस्य अद्डादेशो न भवति । (कतर, एकतर)

(छ) श्रीपा-शब्दस्य नपुंसकलिङ्गे प्रथमैकवचने ..... रूपं भवति । (श्रीपम्, श्रीपाम्)

४. **वाक्येषु योजयत**

फलानि, वनम्, मित्रे, ज्ञानम्, पुस्तकम्, कलमम्

## ५. एकवाक्येन उत्तरं लिखत

(क) 'ह्रस्वो नपुंसके प्रातिपदिकस्य' इत्यनेन किं क्रियते ?

(ख) 'ज्ञानम्' इत्यत्र पूर्वरूपविधायकं सूत्रं किम् ?

(ग) नपुंसके जस्-प्रत्ययस्य स्थाने किं आदिश्यते ?

(घ) नपुंसकलिङ्गे कुत्र 'शी' आदेशो भवति ?

(ङ) कतम-शब्दस्य नपुंसकलिङ्गे प्रथमैकवचने किं रूपम् ?

(च) 'अतोऽम्' इति सूत्रं कस्य अपवादः ?

(छ) 'ज्ञान औ' इत्यत्र अकारलोपः केन निषिद्धः ?

## ७. प्रश्नानामुत्तरं लिखत

(क) नपुंसकलिङ्गे प्रवर्तमानानि सामान्यकार्याणि कानि ?

(ख) नपुंसकलिङ्गे प्रथमायां केषां सर्वनामशब्दानां रूपाणि सर्वशब्दात् पृथक् भवन्ति ?

(ग) राम-ज्ञानशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) नपुंसके दीर्घान्तशब्दा न भवन्ति इत्यत्र कारणं किम् ?

(ङ) डतरादयः पञ्च के सन्ति ? तेषु कति प्रत्ययाः कति च प्रातिपदिकानि ?

## ८. मित्र-शब्दस्य रूपाणि लिखत ।

## ९. प्रयोगाणां सिद्धिपथं दर्शयत

(क) हे ज्ञान (ख) ज्ञानम् (ग) कतरत्

(घ) एकतरम् (ङ) श्रीपम्

### अजन्तप्रकरणे

# इकारान्तादि-नपुंसकलिङ्ग-शब्दाः

**स्वमोर्नपुंसकात्** ७ । १ । २३ ॥

**लुक् स्यात् । वारि ॥**

नपुंसकलिङ्गे विद्यमानाद् अङ्गात् परयोः सु-अम्-प्रत्यययोः लुक् भवति । अकारान्तप्रातिपदिकं विहाय सर्वेषु नपुंसकलिङ्गप्रातिपदिकेषु अस्य विधेः प्रवृत्तिः भवति । अनेन लुकि कृते 'न लुमताङ्गस्य' इत्यनेन अङ्गकार्यं निषिध्यते ।

जलस्य वाचको वारि-शब्दो नित्यं नपुंसकलिङ्गे प्रयुज्यते, तस्य च अव्युत्पन्नपक्षे प्रातिपदिकसंज्ञा भवति ।

वारि सु/अम् - वारि (अनेन स्वमोर्लुकि) ।

**इकोऽचि विभक्तौ । ७ । १ । ७३ ।**

**इगन्तस्य क्लीबस्य नुमचि विभक्तौ । वारिणी । वारीणि । न लुमतेत्यस्यानित्यत्वात्पक्षे सम्बुद्धिनिमित्तो गुणः । हे वारे, हे वारि । आङो ना । वारिणा । घेर्ङितीति गुणे प्राप्ते । वा.२६ (वृद्ध्यौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन) । वारिणे । वारिणः । वारिणोः । नुमचिरेति नुट् । वारीणाम् । वारिणि । हलादौ हरिवत् ॥**

अजादौ विभक्तौ परे नपुंसकलिङ्गे वर्तमानस्य इगन्त-प्रातिपदिकस्य नुम् आगमो भवति । इक् अन्ते यस्य स इगन्तः, इ-उ-ऋ-लृवर्णान्त इत्यर्थः । जस्-शस्प्रत्यययोरपि 'नपुंसकस्य झलचः' इति सूत्रं बाधित्वा अनेनैव नुमागमो बोध्यः । तथा च औत्व-गुण-वृद्धि-तृज्वद्भावैः सह विरोधे सति अनेन नुम् भवति । नाभावेन, नुडागमेन च सह विरोधे तु विधिरयं न प्रवर्तते ।

वारि औ/औट् - वारि शी (नपुंसकाच्च) - वारि ई - वारिन् ई (अनेन नुम्) - वारिनी - वारिणी (अट्कुप्वाङ्नुम्व्यवायेऽपि) । वारि जस्/शस् - वारि अस् - वारि शि (जश्शसोः शिः) - वारि इ - वारिन् इ (इकोऽचि विभक्तौ) - वारीन् इ (सर्वनामस्थाने चासम्बुद्धौ) - वारीनि - वारीणि (अट्कुप्वाङ्नुम्व्यवायेऽपि) ।

सम्बोधनैकवचने तु 'स्वमोर्नपुंसकात्' इत्यनेन सोर्लुकि प्रत्ययलक्षणमाश्रित्य 'ह्रस्वस्य गुणः' इत्यनेन गुणे प्राप्ते 'न लुमताङ्गस्य' इत्यनेन तन्निषेधे 'हे वारि' इति रूपम् । 'इकोऽचि विभक्तौ' इति सूत्रे 'अचि' इति ग्रहणेन 'न लुमताङ्गस्य' इत्यस्य अनित्यत्वज्ञापकाद् लुमता शब्देन प्रत्यये लुप्तेऽपि एकस्मिन् पक्षे अङ्गकार्यं स्वीक्रियते, अतः अङ्गकार्यनिषेधाभावपक्षे इकारस्य सम्बुद्धिनिमित्तके गुणे 'हे वारे' इत्यपि रूपं सिद्ध्यति ।

टाविभक्तौ वारि-शब्दस्य घिसंज्ञायां नुमागमं बाधित्वा नाभावः क्रियते । यथा-

वारि टा - वारि आ - वारि ना (आङो नाऽस्त्रियाम्) - वारिना - वारिणा ।

ङिद्विभक्तिषु ‘घेर्ङिति’ इति गुणेन सह नुमागमस्य विरोधे, परत्वाद् गुणे प्राप्ते वार्तिकम् आह - ‘वृद्धौत्व.....’ इति । वृद्धिः, औत्वम्, तृज्वद्भावः, गुणः इत्येतेषु प्राप्तेषु पूर्वविप्रतिषेधेन नुमागमः कर्तव्यः इति वार्तिकार्थः ।

वारि ङे - वारि ए - वारिन् ए (वृद्धौत्व...., इकोऽचि विभक्तौ) - वारिने - वारिणे । एवमेव अन्यासु ङिद्विभक्तिषु अपि बोध्यम् । ओस्-प्रत्यये अनेन नुमि- वारिणोः ।

आम्-प्रत्यये नुडागमेन सह अस्य विप्रतिषेधे ‘नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन’ इति वार्तिकबलेन ‘ह्रस्वनद्यापो नुट्’ इति नुडागमो भवति । तत्र नुम्करणे, नुट्करणे च अङ्ग-प्रत्यययोर्मध्ये नकारस्य एव प्रवेशात् किमर्थं नुट् इति जिज्ञासायाम् अङ्गस्य नुम्करणे नाम्परत्वाभावात् ‘नामि’ इत्यनेन दीर्घस्य अप्राप्तौ ‘वारिणाम्’ इति अनिष्टरूपापत्तिरिति ज्ञेयम् ।

वारि आम् - वारि नाम् (नुमचिर......, ह्रस्वनद्यापो नुट्) - वारी नाम् (नामि) - वारीनाम् - वारीणाम् । हलादौ विभक्तौ वारिशब्दस्य रूपाणि हरिवत् सिद्धयन्ति ।

**अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः ७ । १ । ७५ ॥**

**एषामनङ् स्याट्टादावचि ॥**

तृतीयादिषु अजादौ विभक्तौ परतः अस्थि, दधि, सक्थि, अक्षि इति चतुर्णां शब्दानाम् अन्त्यवर्णस्य स्थाने ‘अनङ् (अन्) आदेशो भवति, स च अनङ् उदात्तस्वरवान् च भवति । अनुबन्धेन ‘अन्’ इति अवशेषः, ङित्वाद् अन्त्यवर्णस्य (इकारस्य) अयम् आदेशः । उदात्तानुदात्तस्वरितानाम् अभ्यासः सम्प्रति वैदिकभाषायाम् एव विद्यते, लौकिकभाषायां तु लुप्तप्रायो दृश्यते । विधिरयं नुम्-नुट्-नाभावानाम् अपवादो वर्तते । अनेन विहितस्य अन् इत्यस्य अकारस्य आगामिसूत्राभ्यां लोपो भवति ।

**अल्लोपोऽनः ६ । ४ । १३४ ॥**

**अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपः । दध्ना । दध्ने । दध्नः । दध्नोः । दध्नोः । दध्नाम् ॥**

सर्वनामस्थानभिन्ने यकारादौ, अजादौ च स्वादिप्रत्यये परे सति भसंज्ञकस्य अङ्गस्य अन्ते स्थितस्य ‘अन्’ इत्यस्य अकारस्य लोपो भवति ।

दधि-शब्दस्य प्रथमा-द्वितीययोः वारिवत् रूपाणि भवन्ति - दधि, दधिनी, दधीनि । टाप्रत्यये- दधि टा - दधि आ - दधन् आ (अस्थिदधि....) - दध् न् आ (अल्लोपोऽनः) - दध्ना । एवमेव दध्ने, दध्नः, दध्नः, दध्नोः, दध्नाम् इति रूपाणि जायन्ते । ङिप्रत्यये-

**विभाषा ङिश्योः ६ । ४ । १३६ ॥**

**अङ्गावयवोऽसर्वनामस्थानयजादिस्वादिपरो योऽन् तस्याकारस्य लोपो वा स्यात् ङिश्योः परयोः । दध्नि, दधनि । शेषं वारिवत् ॥ एवमस्थिसक्थ्यक्षीणि ॥ सुधि । सुधिनी । सुधीनि । हे सुधे, हे सुधि ॥**

सर्वनामस्थानभिन्नेषु यकारादिषु, अजादिषु च स्वादिप्रत्ययेषु ङि-शी-प्रत्यययोः परयोः सत्योः भसंज्ञकस्य अङ्गस्य अन्ते स्थितस्य 'अन्' इत्यस्य अकारस्य विकल्पेन लोपो भवति ।

दधि ङि - दधि इ - दधन् इ (अस्थिदधि....) - दध् न् इ (विभाषा ङिश्योः) - दध्नि । अलोपाभावपक्षे- दधिनि । अनया एव प्रक्रियया अस्थि-सक्थि-अक्षिशब्दानामपि अस्थ्ना, सक्थ्ना, अक्ष्णा इत्यादीनि दधिवदेव रूपाणि जायन्ते । सुधी-प्रातिपदिकस्य नपुंसके प्रयोगे प्रातिपदिकस्य ह्रस्वे कृते सुधि-शब्दस्य वारिवत् रूपाणि ज्ञेयानि ।

**तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य ७ । १ । ७४ ॥**

**प्रवृत्तिनिमित्तैक्ये भाषितपुंस्कमिगन्तं क्लीबं पुंवद्वा टादावचि । सुधिया, सुधिनेत्यादि ॥ मधु । मधुनी । मधूनि । हे मधो, हे मधु ॥ सुलु । सुलुनी । सुलूनि । सुलुनेत्यादि ॥ धातृ । धातृणी । धातॄणि । हे धातः, हे धातृ । धातॄणाम् ॥ एवं ज्ञात्रादयः ॥**

गालवस्य = गालवनामकस्य ऋषेर्मते, विकल्पेन इत्यर्थः । तृतीयादिषु अजादिषु प्रत्ययेषु परेषु नपुंसकलिङ्गे प्रयुज्यमानानाम् इगन्तानां भाषितपुंस्क-प्रातिपदिकानां विकल्पेन पुंवद्भावो भवति । भाषितपुंस्कः = ये शब्दाः पुँल्लिङ्ग-नपुंसकलिङ्गयोः समानेऽर्थे प्रयुज्यन्ते ते भाषितपुंस्क-शब्देन व्यवह्रियन्ते । यथा- कर्तृ, धातृ आदयः सर्वे तृच्-तृन्-प्रत्ययान्ताः शब्दाः पुं-नपुंसकलिङ्गयोः समानार्थे प्रयुज्यन्ते, अतः एते भाषितपुंस्काः कथ्यन्ते । एतेषां पुंवद्भावस्य चिन्तनं गालवेन कृतम्, न तु पाणिनिना इति कृत्वा विधिरयं वैकल्पिको वर्तते ।

कृतह्रस्वस्य सुधि-प्रातिपदिकस्य भाषितपुंस्कत्वात् टा-प्रत्यये अनेन विकल्पेन पुंवद्भावे पुँल्लिङ्ग-सुधीशब्दवत् 'सुधिया' इति रूपम्, पुंवद्भावाभावपक्षे तु वारिवत् 'सुधिना' इति । एवं ङे, ङसि इत्यादिषु अपि बोध्यम् ।

मधु-शब्दस्य वारिवत् प्रक्रियया सिद्धिर्जायते । सुलू-शब्दस्य नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्वे सुलु-शब्दस्य अपि मधुवत् प्रक्रिया बोद्धव्या ।

धातृ सु/अम् - धातृ (स्वमोर्नपुंसकात्) । धातृ औ/औट् - धातृ शी (नपुंसकाच्च) - धातृ ई - धातृन् ई (इकोऽचि विभक्तौ) - धातृनी - धातृणी (ऋवर्णान्नस्य णत्वं वाच्यम्) । धातृ जस्/शस् - धातृ शि (जश्शसोः शिः) - धातृ इ - धातृन् इ (इकोऽचि विभक्तौ) - धातॄन् इ (सर्वनामस्थाने चासम्बुद्धौ) - धातॄनि - धातॄणि (ऋवर्णान्नस्य णत्वं वाच्यम्) । सम्बोधने- धातृ सु - धातृ स् - धातृ (स्वमोर्नपुंसकात्) - 'न लुमताङ्गस्य' इत्यस्य अनित्यत्वपक्षे- धातर् (ह्रस्वस्य गुणः) - धातः - हे धातः । पक्षान्तरे- हे धातृ । भाषितपुंस्कत्वात् टादौ अचि पुंवद्भावपक्षे पुँल्लिङ्गधातृवत्, पक्षान्तरे च नुमागमस्य प्रक्रिया अवलम्बनीया । आम्-प्रत्यये तु उभयोरपि पक्षयोः समानप्रक्रिया भवति । एवं ज्ञातृ, कर्तृ इत्यादीनां शब्दानामपि रूपाणि निष्पद्यन्ते ।

**एच इग्घ्रस्वादेशे १। १। ४८ ॥**

**आदिश्यमानेषु ह्रस्वेषु एच इगेव स्यात्। प्रद्यु। प्रद्युनी। प्रद्यूनि। प्रद्युनेत्यादि ॥ प्ररि। प्ररिणी। प्ररीणि। प्ररिणा। एकदेशविकृतमनन्यवत्। प्रराभ्याम्। प्ररीणाम् ॥ सुनु। सुनुनी। सुनूनि। सुनुनेत्यादि ॥**

एच्-वर्णानां स्थाने ह्रस्वादेशे क्रियमाणे इक्-वर्णा एव भवन्ति। अकारो न भवति इत्यर्थः। ए, ओ, ऐ, औ इत्येतेषां वर्णानां ह्रस्वे आदिश्यमाने ह्रस्वसंज्ञकेषु अ, इ, उ, ऋ, लृ इत्येतेषु वर्णेषु अकारं विहाय अन्ये वर्णा आन्तरतम्याद् विधातव्या इति सूत्रस्य आशयः। तेन तालुस्थानसाम्यात् एकार-ऐकारयोः ह्रस्वे इकारः, ओष्ठस्थानसाम्यात् च ओकार-औकारयोः स्थाने उकारो विधीयेते।

ओकारान्तस्य प्रद्यो-शब्दस्य नपुंसकलिङ्गे प्रातिपदिकस्य ह्रस्वे उकारान्तादेशे 'प्रद्यु' इत्यस्य मधुवद् रूपाणि जायन्ते। प्रै-शब्दस्य ह्रस्वे इकारान्तादेशे 'प्ररि' इति शब्दो अजादौ विभक्तौ वारिवत् रूपाणि लभते। हलादौ तु तस्य 'एकदेशविकृतमनन्यवत्' इति न्यायेन रै-शब्दवदेव व्यवहारे 'रायो हलि' इत्यनेन आकारान्तादेशे प्रराभ्याम् इत्यादि रूपाणि भवन्ति। औकारान्तस्य सुनौ-शब्दस्य ह्रस्वे उकारान्तादेशे सुनु-शब्दो मधुवत् प्रक्रियया सिद्ध्यति।

### प्रयोगसिद्धिप्रकारः

**वारिणे**

वारि-शब्दस्य अव्युत्पन्नपक्षे 'अर्थवदधातुरप्रत्ययः प्रातिपदिकम्' इति सूत्रेण प्रातिपदिकसंज्ञायाम् 'ङ्याप्प्रातिपदिकात्' इति सूत्रसहकारेण 'स्वौजसमौट्.....' इत्यादिना सूत्रेण चतुर्थ्या एकवचने ङे-प्रत्ययेऽनुबन्धलोपे 'हरि ए' इति जाते 'शेषो घ्यसखि' इति सूत्रेण प्रकृतेर्घिसंज्ञायाम् 'घेर्ङिति' इत्यनेन अङ्गस्य गुणे प्राप्ते, 'इकोऽचि विभक्तौ' इति सूत्रेण अङ्गस्य नुमागमे च प्राप्ते, परत्वात् नुमं बाधित्वा गुणे प्राप्ते 'वृद्धौत्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधेन' इति वार्तिकेन पूर्वस्य विप्रतिषेधेन नुमागमे कृते, मित्वाद् अन्त्यादच इकारस्य परावयवत्वे 'वारिन् ए' इति जाते, वर्णयोगे, नकारस्य णत्वे 'वारिणे' इति रूपं सिद्धम्।

**शब्द-रूपावलिः**

| वारि-शब्दस्य रूपाणि | | |
|---|---|---|
| वारि | वारिणी | वारीणि |
| वारि | वारिणी | वारीणि |
| वारिणा | वारिभ्याम् | वारिभिः |
| वारिणे | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिभ्याम् | वारिभ्यः |
| वारिणः | वारिणोः | वारीणाम् |
| वारिणि | वारिणोः | वारिषु |
| हे वारे/हे वारि ! | हे वारिणी ! | हे वारीणि ! |

| दधि-शब्दस्य रूपाणि | | |
|---|---|---|
| दधि | दधिनी | दधीनि |
| दधि | दधिनी | दधीनि |
| दध्ना | दधिभ्याम् | दधिभ्यः |
| दध्ने | दधिभ्याम् | दधिभ्यः |
| दध्नः | दधिभ्याम् | दधिभ्यः |
| दध्नः | दध्नोः | दध्नाम् |
| दध्नि/दधिनि | दध्नोः | दधिषु |
| हे दधे !/हे दधि | हे दधिनी ! | हे दधीनि ! |

**धातृ-शब्दस्य नपुंसकलिङ्गे रूपाणि**

| | | |
|---|---|---|
| धातृ | धातृणी | धातृणि |
| धातृ | धातृणी | धातृणि |
| धात्रा/धातृणा | धातृभ्याम् | धातृभिः |
| धात्रे/धातृणे | धातृभ्याम् | धातृभ्यः |
| धातुः/धातृणः | धातृभ्याम् | धातृभ्यः |
| धातुः/धातृणः | धात्रोः/धातृणोः | धातृणाम् |
| धातरि/धातृणि | धात्रोः/धातृणोः | धातृषु |
| हे धातः/हे धातृ ! | हे धातृणी ! | हे धातृणि ! |

**पदप्रयोगप्रकारः**

१. अहं प्रातः मन्दोष्णं वारि पिबामि ।

२. दध्ना संस्कृतं भोजनं मह्यं रोचते ।

३. वयं अक्षिभ्यां पश्यामः ।

४. धातृणे नमः ।

५. मधुमक्षिकाभिः बहूनि मधूनि सञ्चितानि सन्ति ।

६. अहं सुधिया मित्रेण परामृष्टः ।

७. दधीचिः अस्थ्नः दानेन लोकोपकारम् अकरोत् ।

## अभ्यासः

१. **सूत्राणां कार्यं निर्दिशत**

(क) स्वमोर्नपुंसकात् (ख) इकोऽचि विभक्तौ

(ग) अल्लोपोऽनः (घ) एच इग्घ्रस्वादेशे

(ङ) तृतीयादिषु भाषितपुंस्कं पुंवद्गालवस्य

२. **परस्परं मेलयत**

| | |
|---|---|
| वारीणाम् | पुंवद्भावः |
| सुधि | नुट् |
| धात्रे | नुम् |
| मधुनः | गुणः |
| हे धातः | वृद्धिः |
| अक्षि | ह्रस्वः |
| दध्नोः | अनङ् |
| लुक् | |

३. **कोष्ठकात् समुचितपदानि चित्वा रिक्तस्थानं पूरयत**

(क) नपुंसकलिङ्गे प्रातिपदिकानाम् ..................... भवति । (ह्रस्वः, दीर्घः)

(ख) 'वारीणि' इत्यत्र ..................... इत्यनेन नुम् भवति । (नपुंसकस्य झलचः, इकोऽचि विभक्तौ)

(ग) आमि नुम्नुटोः ..................... जायते । (नुम्विधिः, नुड्विधिः)

(घ) नुम्-गुणयोरेकत्र प्राप्तौ ..................... कर्तव्यः । (नुम्, गुणः)

(ङ) 'स्वमोर्नपुंसकात्' इत्यनेन ..................... शब्दाद् विहितयोः स्वमोर्लुग्भवति । (अदन्तात्, अदन्तभिन्नात्)

(च) नुमागमः ..................... अङ्गस्य भवति । (अदन्तस्य, इगन्तस्य)

४. **अधस्तन-प्रयोगाणां प्रातिपदिक-लिङ्ग-विभक्तीर्निर्दिशत**

सरस्वत्याम्, शम्भुना, मधुनी, लताभिः, अक्ष्णा, बालाय

## ५. एकवाक्येन उत्तरं लिखत

(क) नपुंसकप्रातिपदिकानां ह्रस्वः केन भवति ?

(ख) 'अतोऽम्', 'स्वमोर्नपुंसकात्' इत्यनयोरेकत्र प्राप्तौ किं प्रवर्तते ?

(ग) 'वारिणा' इत्यत्र नकारः कुत आगतः ?

(घ) दधि-शब्दस्य घिसंज्ञा भवति न वा ?

(ङ) सक्थि-शब्दस्य तृतीयैकवचने किं रूपम् ?

(च) ऐकारस्य ह्रस्वे कृते को वर्ण आदिश्यते ?

(छ) क्लीब-शब्दस्य कोऽर्थः ?

(ज) सुनौ-शब्दस्य नपुंसकलिङ्गे पुंवद्भावो भवति न वा ?

(झ) 'हे वारे' इत्यत्र गुणविधायकं सूत्रं किम् ?

## ६. प्रश्नानामुत्तरं लिखत

(क) 'अस्थिदधिसक्थ्यक्ष्णामनङुदात्तः' इति सूत्रे कति शब्दा निर्दिष्टाः सन्ति ?

(ख) दधि-शब्दस्य अनङादेशः कासु विभक्तिषु विधीयते ?

(ग) वारि-दधिशब्दयो रूपाणि कासु विभक्तिषु भिन्नप्रक्रियया निष्पद्यन्ते ?

(घ) मधु-शब्दस्य रूपसिद्धिप्रक्रिया कुत्र कुत्र शम्भुशब्दसदृशा विद्यते ?

(ङ) एकारस्य ह्रस्वादेशे अकारः कथं न भवति ?

(च) वारि-शब्दः कुत्र कुत्र नुमागमो लभते ?

(छ) भाषितपुंस्क-पदेन किं बोध्यते ?

(ज) 'वृद्धौत्व.....' इति वार्तिकस्य अर्थं लिखत ।

## ७. सुधी-शब्दस्य नपुंसकलिङ्गे रूपाणि लिखत ।

## ८. अधस्तन-प्रयोगाणां सिद्धिपथं दर्शयत

| | | |
|---|---|---|
| (क) वारीणि | (ख) दध्ना | (ग) सुधिना |
| (घ) धातृणे | (ङ) वारीणाम् | (च) मधु |

# न्यायखण्ड:

# मङ्गलाचरणम्-द्रव्यादिपदार्थोद्देशश्च

प्रारिप्सितग्रन्थस्य निर्विघ्नपरिसमाप्तये ग्रन्थादौ त्रिविधेषु नमस्कारवस्तुनिर्देशाशीर्वादात्मकेषु मङ्गलेष्वन्यतमं नमस्कारात्मकं मङ्गलं कुर्वन् शिष्यप्रवृत्तयेऽनुबन्धचतुष्टयं प्रदर्शयति ग्रन्थकारोऽन्नम्भट्टः–

**निधाय हृदि विश्वेशं विधाय गुरुवन्दनम् ।**

**बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः ॥**

**अन्वयः**– हृदि विश्वेशं निधाय गुरुवन्दनञ्च विधाय बालानां सुखबोधाय (मयान्नम्भट्टेन) तर्कसङ्ग्रहः क्रियते ।

**व्याख्या**– हृदि = मनसि, विश्वेशम् = जगदुत्पत्तिस्थितिलयकर्तारं श्रीसाम्बमूर्तिमुमाशङ्करम्, निधाय = नितरां धारयित्वा सदा तद्ध्यानपरो भूत्वेत्यर्थः, एतेनेश्वरो जगन्निमित्तकारणमिति न्यायसिद्धान्तः सङ्केतितः, गुरोर्वन्दनं गुरुवन्दनं = गुरुनमस्कारम्, विधाय = कृत्वा, गुरौ स्वावधिकोत्कृष्टत्वप्रकारकज्ञानानुकूलव्यापारं विधाय = कृत्वेत्यर्थः, एतेन शिष्यैर्गुरुः प्रकाशनीयः, गुरुं प्रकाशयेद्धीमान् इति शास्त्रानुरोधात् । अत एव श्रुतिराहः–

**यस्य देवे परा भक्तिर्यथा देवे तथा गुरौ ।**

**तस्यैते कथिता ह्यर्थाः प्रकाशन्ते महात्मनः ॥** इति ।

बालानाम् = अधीतव्याकरणकाव्यकोशानामनधीतन्यायशास्त्राणां ग्रहणधारणपटूनां न्यायशास्त्राधिकारिणां सुखेन = अनायासेन, बोधाय = पदार्थतत्त्वज्ञानाय, स्वल्पपरिश्रमेणैव पदार्थतत्त्वज्ञानायेत्यर्थः, (मयान्नम्भट्टेन) तर्कसङ्ग्रहः = तर्क्यन्ते = प्रमितिविषयीक्रियन्त इति तर्का द्रव्यादिसप्तपदार्थास्तेषां सङ्ग्रहः = सङ्क्षेपेणोद्देशलक्षणपरीक्षाः, ता यत्र स ग्रन्थः, एतादृशस्तर्कसङ्ग्रहः क्रियते इत्यर्थः ।

तत्रोद्देशो नाम नाममात्रेण वस्तुसङ्कीर्तनम्, यथा द्रव्यं गुण इत्यादि । असाधारणधर्मो लक्षणम्, यथा गन्धवत्त्वं पृथिव्या लक्षणम् । लक्षितस्य लक्षणं संभवति न वेति परीक्षणं परीक्षा । तथा चोद्देशलक्षणपरीक्षाणाम् उल्लेखनेन पदार्थतत्त्वज्ञानमितरभेदानुमित्या जायते, सा चानुमितिः 'पक्षसाध्यहेतुज्ञानसाध्या' इत्युद्देशोल्लेखस्य पक्षज्ञानम्, लक्षणस्य हेतुज्ञानम्, परीक्षाया दोषपरिहारः फलम् । एवञ्च 'बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः' इति वाक्येन तर्कसङ्ग्रहग्रन्थस्यानुबन्धचतुष्टयं प्रदर्शितं ग्रन्थकृतान्नम्भट्टेन । तत्रानुबन्धत्वं ग्रन्थारम्भप्रवृत्तिप्रयोजकज्ञानविषयत्वम् । तत्र ग्रन्थारम्भप्रवृत्तिप्रयोजकं ज्ञानं 'तर्कसङ्ग्रहो मदिष्टसाधनमि'त्याकारकम् । तद्विषयाः सम्बन्धाधिकारिविषयप्रयोजनानि, तच्चात्र अल्पायासेन पदार्थतत्त्वज्ञानं प्रयोजनमुत तत्त्वज्ञानपुरस्सरं मोक्षः प्रयोजनं तच्च 'सुखबोधाये'ति पदेन सूचितम् । द्रव्यादिपदार्था विषयाः, ते च तर्क्यन्ते प्रमीतिविषयीकियन्त इति तर्का द्रव्यादिपदार्थास्तेषां सङ्ग्रह इति व्युत्पत्त्या 'तर्कसङ्ग्रहः' इति पदेन

सूचिताः। ग्रहणधारणपटुक्षमो बालोऽधिकारी स च ‘बालः’ इति पदेन सूचितः। ‘बालानां सुखबोधाय क्रियते तर्कसङ्ग्रहः’ इति वाक्येन प्रतिपाद्यप्रतिपादकभावः सम्बन्धो ध्वनितः॥

बालानां सुखबोधायेत्यनेन पदार्थतत्त्वबोधस्य एतद्ग्रन्थप्रयोजनत्वं प्रतिपादितमासीत्, तत्र पदार्थतत्त्वबोधस्य विषयीभूताः पदार्थाः कतिविधाः के च ते ? इत्याकाङ्क्षायां पदार्थान् विभजते–

**मूलम्– द्रव्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्थाः।**

**व्याख्या–** पदार्थत्वन्नाम पदजन्यप्रतीतिविषयत्वम्, अर्थात् पदाज्जायमानायाः प्रतीतेर्विषयीभूता विषया एव पदार्थाः। यथा घटपदजन्यप्रतीतिविषयो घटः पदार्थः, एवमन्यत्रापि बोध्यम्। ते च पदार्था दव्यम्, गुणः, कर्म, सामान्यम्, विशेषः, समवायः, अभावश्चेति सप्तैव बोध्यम्।

ननु शक्तेरतिरिक्तपदार्थस्य सत्त्वात् कथं सप्तैव पदार्थाः ? तथा हि चन्द्रकान्तमण्यादिसंयुक्तेन्धनादौ सत्त्वे वह्निसंयोगे सत्यपि दाहो न जायते तच्छून्ये, सूर्यकान्तमणिसमवहिते वा जायत इति वह्नौ दाहानुकूला शक्तिः, चन्द्रकान्तमणौ दाहप्रतिबन्धिका शक्तिः, सूर्यकान्तमणौ चोत्तेजिका शक्तिः स्वीकार्येति वह्निना दह्यते, चन्द्रकान्तमणिना दाहः प्रतिबध्यते, तत्र प्रतिबन्धकत्वन्नाम कार्यानुकूलशक्तिविघटकत्वम्, सूर्यकान्तमणिना च प्रतिबन्धी प्रतिबध्यतेऽर्थाद् वह्निमुत्तेजयति। तत्रोत्तेजकत्वन्नाम प्रतिबन्धकशक्तिविघटकत्वम्, इति वस्तुनिष्ठा शक्तिः स्वीकार्या। ननु शक्तेः पदार्थत्वेऽपि क्लृप्तपदार्थान्तर्गतत्वान्नातिरिक्तपदार्थत्वमिति चेत्, शक्तिः न क्लृप्तसप्तपदार्थान्तर्गता तथा हि– ‘शक्तिर्न द्रव्यात्मिका गुणादिवृत्तित्वात्, यथा सत्ता’। अत एव न गुणात्मिका न वा कर्मात्मिका शक्तिः। न वा सामान्यविशेषसमवायाभावान्यतमरूपा, उत्पत्तिमत्त्वे सति विनाशित्वात्। अतः क्लृप्तानन्तर्गतत्वात् शक्तेरतिरिक्तत्वमिति चेन्न, मणेः प्रतिबन्धकत्वेन मण्यभावस्य वह्निं प्रति कारणत्वं सुसिद्धम्, प्रतिबन्धकाभावमात्रस्य कार्यमात्रं प्रति कारणत्वान्मणिदशायां न दाहरूपं कार्यमिति तत्र शक्तिः न कल्पनीया, सूर्यकान्तमणिसत्त्वे तु तेनैवोत्तेजनाद् दाहो भवत्येव। तत्र प्रतिबन्धकत्वन्नाम कारणीभूताभावप्रतियोगित्वम्, न तु कार्यानुकूलशक्तिविघटकत्वम्, एवमेवोत्तेजकत्वं प्रतिबन्धकसत्त्वे कार्यजनकत्वम्। एतावतैव दाहोत्पत्त्यनुत्पत्तिव्यवस्थासम्भवेऽतिरिक्तशक्तिकल्पनं व्यर्थम्। शक्तेरतिरिक्तपदार्थस्वीकारेऽनन्तशक्तिस्तद्ध्वंसस्तत्प्रागभावादिकल्पनायामन्याय्यत्वम्। तस्मात् सप्तैव पदार्था इति सिद्धम्॥

सप्तपदार्थेषु द्रव्यस्य प्राथम्याद् द्रव्याणि विभजते–

**मूलम्– तत्र द्रव्याणि पृथिव्यप्तेजोवाय्वाकाशकालदिगात्ममनांसि नवैव।**

**व्याख्या–** द्रव्यत्वन्नाम गुणवत्त्वम्, द्रव्यत्वजातिमत्त्वम्, समवायिकारणत्वम् वा। आद्ये उत्पत्तिक्षणावच्छिन्ने द्रव्येऽव्याप्तिः, उत्पन्नं द्रव्यं क्षणं निर्गुणं निष्क्रियञ्च तिष्ठतीति नियमात्। द्वितीये लक्ष्यीभूतद्रव्यज्ञानं प्रति द्रव्यत्वज्ञानं कारणम्, द्रव्यत्वज्ञानं प्रति च तदाश्रयद्रव्यज्ञानं कारणमिति परस्परसापेक्षत्वादन्योन्याश्रयो दोषोऽतस्तृतीयं समवायिकारणत्वं द्रव्यलक्षणम्। द्रव्यगुणकर्मणां भावकार्याणां समवायिकारणं द्रव्यमेवेति समवायिकारणत्वं द्रव्यसामान्यलक्षणम्। द्रव्याणि च पृथिवी, जलम्, तेजः, वायुः, आकाशः, कालः, दिग्, आत्मा,

मनश्चेति नवैव ।

नन्वन्धकारस्य दशमद्रव्यस्य सत्त्वात् कथं नवैवेति । तथा हि– नीलं तमश्चलतीति प्रत्ययात् तमसो नीलरूपाश्रयतया चलनरूपक्रियाश्रयतया च तमसो द्रव्यत्वं सिद्धम् । न च क्लृप्तद्रव्येष्वन्तर्भावात् कुतो दशमद्रव्यत्वमिति वाच्यम् । तमसो निर्गन्धत्वात् पृथिव्या गन्धवत्त्वान्न तमसः पृथिव्यामन्तर्भावः । तमसो निःस्पर्शत्वाज्जलतेजसोः शीतोष्णस्पर्शवत्त्वान्न तयोरन्तर्भावः । तमसो रूपवत्त्वाद् आकाशादिपञ्चकस्य वायोश्च नीरूपत्वान्न तेष्वन्तर्भावः । तस्मात् तमसो दशमद्रव्यत्वमिति चेन्न, तमसस्तेजोऽभावरूपत्वेनैवोपपत्तौ अतिरिक्ततत्कल्पनायां मानाभावात् । न चैकतरपक्षपातिन्या युक्तिरूपाया विनिगमनाया अभावात् तेज एव तमोऽभावरूपः स्यादिति वाच्यम् । तेजसोऽभावरूपत्वे सर्वानुभूतोष्णस्पर्शाश्रयत्वस्य तत्र बाधाद् द्रव्यान्तरकल्पने गौरवात्, तस्मादुष्णस्पर्शगुणाश्रयतया तेजसो द्रव्यत्वं सिद्धम् । तमसस्तु तेजोऽभावरूपत्वेन न द्रव्यत्वम् । न च तमसोऽभावरूपत्वे कथं तत्र रूपवत्ताप्रतीतिरिति चेन्न, तमसि नीलरूपवत्ताप्रतीतिः भ्रान्तिरूपा । कर्मवत्ताप्रतीतिरपि दीपापसरणक्रियायास्तत्र भानात् साप्यौपाधिक्येव । तस्मान्नवैव द्रव्याणीति सिद्धम् ॥

द्रव्यविभजनानन्तरं गुणान् विभजते–

**मूलम्– रूपरसगन्धस्पर्शसंख्यापरिमाणपृथक्त्वसंयोगविभागपरत्वापरत्वगुरुत्वद्रवत्वस्नेहशब्दबुद्धिसुखदुःखेच्छाद्वेष-प्रयत्नधर्माधर्मसंस्काराश्चतुर्विंशतिः गुणाः ॥**

**व्याख्या–** गुणत्वन्नाम द्रव्यकर्मभिन्नत्वे सति सामान्यवत्त्वम् । तत्त सामान्यं नाम जातिः, सा च द्रव्यगुणकर्मसु तिष्ठतीति लक्षणसमन्वयः । गुणाश्च चतुर्विंशतिसङ्ख्यकाः, ते च रूपम्, रसः, गन्धः, स्पर्शः, सङ्ख्या, परिमाणम्, पृथक्त्वम्, संयोगः, विभागः, परत्वम्, अपरत्वम्, गुरुत्वम्, द्रवत्वम्, स्नेहः, शब्दः, बुद्धिः, सुखम्, दुःखम्, इच्छा, द्वेषः, प्रयत्नः, धर्मः, अधर्मः, संस्कारश्चेति । ननु लघुत्वकठिनत्वमृदुत्वादीनामतिरिक्तानां गुणानां सत्त्वात् कथं चतुर्विंशतिरेव गुणा इति चेन्न, लघुत्वस्य गुरुत्वाभावरूपत्वाद्, मृदुत्वकठिनत्वयोरवयवसंयोगविशेषत्वान्न तयोरतिरिक्तगुणत्वम् । अतश्चतुर्विंशतिरेव गुणाः ।

गुणविभजनानन्तरं कर्म विभजते–

**मूलम्– उत्क्षेपणापक्षेपणाकुञ्चनप्रसारणगमनानि पञ्च कर्माणि ।**

**व्याख्या–** कर्मत्वन्नाम संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वम् । तत्र संयोगस्य समवायिकारणे द्रव्ये वर्तमानं कर्म संयोगस्यासमवायिकारणं वर्तते । एवमवयविसंयोगं प्रत्यवयवसंयोगस्यासमवायिकारणत्वात् तद्वारणाय संयोगभिन्नत्वमिति । तथा च संयोगभिन्नत्वे सति संयोगासमवायिकारणत्वमिति कर्मलक्षणं सङ्गच्छते । तानि च कर्माणि उत्क्षेपणम्, अपक्षेपणम्, आकुञ्चनम्, प्रसारणम्, गमनञ्चेति पञ्च ।

कर्मविभजनानन्तरं क्रमप्राप्तं सामान्यं विभजते–

**मूलम्– परमपरं चेति द्विविधं सामान्यम् ।**

**व्याख्या–** नित्यत्वे सत्यनेकसमवेतत्वं सामान्यस्य लक्षणम् । अनेकसमवेतत्वं संयोगेऽप्यस्तीति नित्यत्वविशेषणं देयम् । नित्यत्वे सति समवेतत्वं गगनपरिमाणादावप्यस्तीति समवेतेऽनेकत्वविशेषणं देयम् । नित्यत्वे सत्यनेकवृत्तित्वमत्यन्ताभावेऽप्यस्तीति वृत्तित्वसामान्यं परित्यज्य समवेतत्वं दत्तम् । तथा च नित्यत्वे सत्यनेकसमवेतत्वं सामान्यस्य लक्षणमिति घटत्वादिजातौ सामान्यलक्षणं सङ्गच्छते ।

सामान्यं जातिश्चेति पर्यायः । तच्च सामान्यं द्विविधं परसामान्यम्, अपरसामान्यञ्चेति । तत्र परसामान्यमधिकदेशवृत्ति । अपरसामान्यञ्च न्यूनदेशवृत्ति । यथा घटत्वापेक्षया पृथिवीत्वमधिकदेशवृत्तीति पृथिवीत्वं परसामान्यम् । पृथिवीत्वापेक्षया घटत्वं न्यूनदेशवृत्तीति घटत्वमपरसामान्यम् । सर्वतः परसामान्यं सत्ता । सर्वतोऽपरसामान्यं घटत्वादिकम् । घटत्वापेक्षयाधिकदेशवृत्तित्वाद्, द्रव्यत्वापेक्षया न्यूनदेशवृत्तित्वाच्च पृथिवीत्वादिकं परापरसामान्यम् ।

सामान्यविभजनानन्तरं क्रमप्राप्तं विशेषं विभजते–

**मूलम्– नित्यद्रव्यवृत्तयो विशेषास्त्वनन्ता एव ।**

**व्याख्या–** अन्त्यत्वे (स्वतो व्यावृत्तत्वे) सति नित्यद्रव्यवृत्तित्वं विशेषस्य लक्षणम् । विशेषो हि भेदककोटिषु अन्तिमो वर्तते । तथा हि सजातीयेषु भेदसाधिका जातिः, यथा घटः पटभिन्नो घटत्वादिति । सावयवेषु सजातीयेषु भेदसाधकोऽवयवः, यथा एतद्घटः तद्घटभिन्नः एतत्कपालत्वादिति । सजातीयेषु निरवयवेषु परस्परभेदसाधको विशेष एव, यथा एतत्परमाणुः तत्परमाणुभिन्न एतदीयविशेषात् । विशेषस्तु स्वतो व्यावृत्तः । विशेषस्य परतो व्यावृत्तत्वे तस्य अन्त्यत्वलक्षणस्य हानिः स्यादत एव विशेषत्वं न जातिः । विशेषाश्च प्रतिपरमाण्वाकाशादिनित्यद्रव्यवृत्तित्वादनन्ताः ।

विशेषविभजनानन्तरं क्रमप्राप्तं समवायं विभजते–

**मूलम्– समवायस्त्वेक एव ।**

**व्याख्या–** समवायो नाम नित्यसम्बन्धः । सम्बन्धश्च विशिष्टबुद्धिनियामकोऽर्थाद् यस्माद् विशेष्यविशेषणयोर्विशिष्टा बुद्धिरुत्पद्यते स एव सम्बन्धः । यथा 'घटवद् भूतलमि'ति विशिष्टबुद्धिः । अत्र विशेषणं घटं विशेष्यञ्च भूतलं तयोर्विशिष्टा बुद्धिः 'घटवद् भूतलमि'ति घटभूतलयोः संयोगसम्बन्धावगाहिनी । एतावता प्रकृते यथा संयोगसम्बन्धं विना घटभूतलयोर्विशिष्टबुद्धिः न सम्भवति, तथैव द्रव्यगुणाद्ययुतसिद्धयोर्विशिष्टबुद्धिविषयीभूतः सम्बन्धोऽपि समवाय एव । स च समवायः अवयवावयविनोर्गुणगुणिनोः क्रियाक्रियावतोर्जातिव्यक्त्योर्नित्यद्रव्यविशेषयोश्चेति । अर्थात् कपालादाववयवे घटादीनामवयविनां यः सम्बन्धः स समवायः- अवयवेष्ववयवी येन सम्बन्धेन तिष्ठति स समवाय इत्यर्थः । नवद्रव्येषु चतुर्विंशतिर्गुणाः, उत्क्षेपणादिकर्म च येन सम्बन्धेन तिष्ठति स समवायः । द्रव्यगुणकर्मसु जातिर्येन सम्बन्धेन तिष्ठति स समवायः, एवमेव नित्यद्रव्येषु = पृथ्वीजलतेजोवायूनां परमाणुषु, आकाशकालदिगात्ममनःसु च विशेषा येन सम्बन्धेन तिष्ठन्ति स समवायः । समवायः सम्बन्धश्च नित्य एक एव ।

समवायविभजनानन्तरं क्रमप्राप्तमभावविभजनमारभते–

**मूलम्– अभावश्चतुर्विधः । प्रागभावः प्रध्वंसाभावोऽत्यन्ताभावोऽन्योन्याभावश्चेति ।**

**व्याख्या–** भावभिन्नत्वमभावस्य लक्षणम्, भावा द्रव्यगुणकर्मसामान्यविशेषसमवायाः पूर्वोक्तास्तद्भिन्नस्तु सप्तमपदार्थत्वेन स्वीकृतोऽयमभावः । अथवा प्रतियोगिज्ञानाधीनज्ञानविषयत्वमभावस्य लक्षणम् । प्रतियोगी नाम यस्याभावः सः, यथा घटो नास्तीत्यत्र नास्तिपदबोध्योऽभावः घटस्याभावोऽतस्तस्याभावस्य प्रतियोगी घटः । प्रतियोगिनो घटस्य ज्ञानमन्तरा घटाभावं ज्ञातुं न कोऽपि शक्नोतीति प्रतियोगिज्ञानाधीनज्ञानविषयत्वं घटाभावे आगतमतस्तत्र लक्षणस्य समन्वयो भवति । नहि कोऽपि जनः प्रतियोगिनमज्ञात्वाभावं परिचिनोति । यतो ह्यभाव इत्युक्तौ कस्याभाव इत्याकाङ्क्षा सर्वेषामेव जायते । न त्वभावः, नास्ति, नेत्याद्युक्तौ, घटविशेषाभावं, पटविशेषाभावं वा ज्ञातुं शक्नोतीत्यतोऽभावज्ञानार्थं प्रतियोगिनो ज्ञानं ततः पूर्वमपेक्षितं भवत्येव । इत्थञ्च सर्वत्राभावे प्रतियोगिज्ञानाधीनज्ञानविषयत्वस्य विद्यमानत्वादभावसामान्यस्य लक्षणमिदम् । स चाभावः चतुर्विधः प्रागभावः, प्रध्वंसाभावः, अत्यन्ताभावः, अन्योन्याभावश्चेति ।

तत्र प्रागभावः अनादिः सान्तः । स च कार्योत्पत्तेः पूर्वं कार्यसमवायिकारणे तिष्ठति । भविष्यतीति प्रतीतिवेद्योऽभावः प्रागभावः, यथा इह कपाले घटो भविष्यतीति प्रत्ययविषयीभूतोऽभावः प्रागभावः । सादिरनन्तोऽभावः प्रध्वंसाभावः । स च प्रध्वंसाभावः कार्यनाशानन्तरं कार्यसमवायिकारणे तिष्ठति । ध्वस्तः, नष्ट इत्यादिप्रतीतिवेद्योऽभावः प्रध्वंसाभावः, यथा 'इह कपाले घटो ध्वस्तः' इति प्रत्ययसाक्षिकोऽभावः प्रध्वंसाभावः ।

नित्यत्वे सति तादात्म्यातिरिक्तकिञ्चित्संसर्गावच्छिन्नप्रतियोगिताकाभावत्वमत्यन्ताभावस्य लक्षणम् । तत्रात्यन्ताभावो नित्यो वर्तते, एवं तदीया प्रतियोगिता तादात्म्यातिरिक्तकिञ्चित्सम्बन्धावछिन्नैव भवति ।

**तत्रेत्थं बोध्यम्–** येन सम्बन्धेन प्रतियोगिनो निषेधः क्रियते स सम्बन्धः प्रतियोगितावच्छेदकसम्बन्धः, यथा भूतले यदि संयोगेन घटो नास्तीत्युच्यते तदा भूतलनिष्ठघटाभावीया प्रतियोगिता संयोगसम्बन्धावच्छिन्नेति कथ्यते । एवाञ्चात्यन्ताभावीया प्रतियोगिता तादात्म्यातिरिक्तकिञ्चित्सम्बन्धावच्छिन्नैव । यतो हि कुत्रापि कस्यापि वस्तुनो निषेधोऽत्यन्ताभावः किञ्चित्सम्बन्धसापेक्ष एव, सम्बन्धविशेषमन्तरेण कुत्रापि देशे इदं वस्त्वत्र नास्तीति वक्तुं न शक्यते । एकसम्बन्धेन वस्तुनोऽधिकरणेऽपरसम्बन्धेन तस्यैव निषेधोऽपि कर्तुं शक्यते । यथा- समवायेन घटाधिकरणे कपाले सन्नपि घटः संयोगेन नास्तीत्यपि वक्तुं शक्यत एवातोऽत्यन्ताभावीया प्रतियोगिता किञ्चित्सम्बन्धावच्छिन्ना तादृशयत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगिताकाभाव एवात्यन्ताभावस्तादृशात्यन्ताभावेन साकमेव प्रतियोगिनो विरोधः ।

**अयमत्र विशेषः–** अत्यन्ताभावस्य प्रतियोगिना साकं विरोधोऽर्थाद् यत्र यत्सम्बन्धेन प्रतियोगिमत्ताज्ञानं भवति, तत्र तत्सम्बन्धावच्छिन्नप्रतियोगिताकतदत्यन्ताभावो न व्यवह्रियत इति नियमः । सम्बन्धविशेषमन्तरेण तु नायं नियमः सम्भवः, यतो हि तत्रैव कपाले समवायेन घटोऽपि वर्तते संयोगेन घटात्यन्ताभावोऽपीति अत्यन्ताभावीयप्रतियोगिता सम्बन्धविशेषेणावच्छेदनीया (अवच्छेद्या) भवति । अतोऽत्यन्ताभावो नाम तादात्म्यसम्बन्धातिरिक्तसम्बन्धावच्छिन्नप्रतियोगिताकाभावो यो नित्यश्च सोऽभावोऽत्यन्ताभावः । यथा संयोगेन घटो नास्तीति प्रतीतिसाक्षिको घटाभावः, पटो नास्तीति प्रतीतिसाक्षिको वा पटाभावः ।

अन्योन्याभावत्वञ्च तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वम् । तत्रान्योन्याभावीया प्रतियोगिता सर्वदैव तादात्म्येनैव सम्बन्धेनावच्छिन्ना भवति, न त्वन्येन सम्बन्धेन । एवमेव घटो नेति निषेधो घटातिरिक्तेषु सर्वेषु पदार्थेषु कर्तुं शक्यते, न घटे । तत्र घटो घटे तादात्म्येन तिष्ठति (तस्यात्मा = तदात्मा, तदात्मनो भावस्तादात्म्यम् = अभेदः) । न त्वन्यत्र घटस्तादात्म्येन स्थातुं शक्योऽतो घटातिरिक्तेषु पदार्थेषु तादात्म्येन घटस्य निषेधो भवति न तु घटे, घटे तादात्म्येन घटस्य विद्यमानत्वात् तादात्म्येन घटनिषेधाभावाद् घटो नेति भेदो घटातिरिक्तेषु पदार्थेषु भवति, स च निषेधस्तादात्म्येनेति तादात्म्यसम्बन्धो घटभेदीय-(घटान्योन्याभावीय) घटनिष्ठप्रतियोगिताया अवच्छेदकः सम्बन्धः । यः सम्बन्धो यस्यावच्छेदकः स तत्सम्बन्धावच्छिन्न इति नियमाद् भेदीया प्रतियोगिता तादात्म्यसम्बन्धावच्छिन्ना जाता तादृशप्रतियोगिताया निरूपकोऽभावः (प्रतियोगिताकाभावः) अन्योन्याभावः, स एवाभावो भेदपदेनापि बोध्यते । तथा चान्योन्याभावस्य लक्षणं भवति तादात्म्यसम्बन्धावच्छिन्नप्रतियोगिताकाभावत्वमिति ।

## पदानामर्थपरिचयः

| | |
|---|---|
| मङ्गलम् | = इष्टस्मरणम् |
| उद्देशः | = नाममात्रेण वस्तुसङ्कीर्तनम् |
| परीक्षा | = लक्षितस्य लक्षणं सम्भवति न वेति विचारः |
| लक्षणम् | = असाधारणधर्मः |
| असाधारणम् | = तन्मात्रवृत्तिधर्मः |
| अनायासः | = स्वल्पपरिश्रमः |
| तत्त्वज्ञानम् | = यथार्थज्ञानम् |
| बालः | = अधीतव्याकरणकाव्यकोशोऽनधीतन्यायशास्त्रः |
| दाहः | = रूपध्वंसः |
| इन्धनम् | = एधः (अग्निकारणम्) |
| प्रतिबन्धः | = प्रतिरोधकः |
| क्लृप्तः | = स्वीकृतः |
| अवच्छिन्नः | = विशिष्टः |
| समवायिकारणम् | = यस्मिन् समवेतं सत् कार्यमुत्पद्यते तत्समवायिकारणम् |
| तमः | = अन्धकारः |
| विनिगमना | = एकतरपक्षपातिनी युक्तिः |

| | |
|---|---|
| औपाधिकी | = उपाधिना जायमाना |
| विशिष्टबुद्धिः | = विशेष्यविशेषणयोः सम्बन्धावगाहिनी बुद्धिः |
| प्रतियोगी | = यस्याभावः स प्रतियोगी |
| अनुयोगी | = यस्याभावः स प्रतियोगी । तस्य प्रतियोगिनोऽभावोऽनुयोगी |
| नित्यत्वम् | = अविनाशित्वम्, ध्वंसभिन्नत्वे सति ध्वंसाप्रतियोगित्वम् |
| अनित्यत्वम् | = विनाशित्वम्, ध्वंसप्रतियोगित्वम्, प्रागभावप्रतियोगित्वं वा |
| तादात्म्यम् | = तस्यात्मा = तदात्मा, तदात्मनो भावस्तादात्म्यम्=अभेदः |

## अभ्यासः

### १. स्वोपज्ञतया विस्तृतमुत्तरं देयम्

(क) निधायेति मङ्गलपद्यं विलिख्य तस्यार्थलिखनपुरस्सरं तर्कसङ्ग्रहग्रन्थस्यानुबन्धचतुष्टयं निरूपयत ।

(ख) न्यायाभिमतपदार्थान्नुल्लिख्य शक्तेरतिरिक्तपदार्थत्वं निराकुरुत ।

(ग) द्रव्यलक्षणं विलिख्य तमसोऽतिरिक्तद्रव्यत्वं खण्डयत ।

### २. टिप्पण्यात्मकमुत्तरं देयम्

(क) मङ्गलन्नाम किम् ? कतिविधञ्च तदिति नामानि लिखत ।

(ख) कतिविधा गुणाः? के च ते ?

(ग) कर्मलक्षणं विलिख्य कर्मभेदान् प्रस्तुत ।

(घ) सामान्यलक्षणं विलिख्य सामान्यभेदान् प्रस्तुत ।

(ङ) विशेषलक्षणं प्रस्तुत्य विशेषभेदान् प्रकटयत ।

(च) समवायलक्षणं विलिख्य समवायसम्बन्धः कुत्र कुत्र तिष्ठतीति प्रतिपादयत ।

(छ) अभावभेदान् प्रस्तुत्य प्रत्येकाभावस्य लक्षणं प्रस्तुत ।

### ३. अतिसङ्क्षिप्तमुत्तरं देयम्

(क) किन्नाम पदार्थत्वम् ?

(ख) न्यायमते शक्तिः पदार्थो न वा ?

(ग) किन्नामोत्तेजकत्वम् ?

(घ) सूर्यकान्तमणौ सत्त्वे चन्द्रकान्तमणिदशायां दाहो जायते न वा ?

(ङ) अन्योन्याभावस्यैकमुदाहरणं दत्त ।

(च) अत्यन्ताभावो नित्यो वानित्यः ?

## ४. रिक्तस्थानं पूरयत

(क) द्रव्य ...................... पदार्थाः सप्त ।

(ख) पृथिव्यप्तेजो ......... नव ।

(ग) परमपरञ्चेति ........सामान्यम् ।

(घ) प्रागभाव...................चेति ।

## ५. कक्षाभ्यासः

(क) तर्कसङ्ग्रहस्यानुबन्धचतुष्टयविषये कक्षायां मित्रैः सह चर्चयत ।

(ख) अव्याप्त्यादिदोषाणां लक्षणोदाहरणविषयकः संवादः कक्षायां गुरुभिः, सखिभिश्च सह कार्यः ।

(ग) सामान्यमादाय कक्षायां स्वविचारं प्रकटयत ।

(घ) विशेषस्य वैशिष्ट्यविषयकमनुच्छेदद्वयं लेखनीयम् ।

(ङ) समवायमादाय अनुच्छेदद्वयं लेख्यम् ।

(च) कक्षायां भेदसहितस्याभावस्य विषये लक्षणोदाहरणपूर्वकः संवादः सखिभिः सह विधेयः ।

# पृथ्व्यादिनवद्रव्याणां लक्षणप्रकरणम्

उद्देशनिरूपणानन्तरं लक्षणप्रकरणमारभतेऽन्नम्भट्टः तत्रेत्यादिना-

**मूलम्– तत्र गन्धवती पृथिवी। सा द्विविधा नित्यानित्या च। नित्या परमाणुरूपा। अनित्या कार्यरूपा। पुनस्त्रिविधा शरीरेन्द्रियविषयभेदात्। शरीरमस्मदादीनाम्। इन्द्रियं गन्धग्राहकं घ्राणं नासाग्रवर्ति। विषयो मृत्पाषाणादिः।**

**व्याख्या–** पृथिव्यादिनवद्रव्येषु मध्ये पृथिवी गन्धवती गन्धाधिकरणमित्यर्थः। गन्धवती पृथिवीत्यत्र गन्धो लक्षणं, पृथिवी लक्ष्या, गन्धे लक्षणता चेत् पृथिव्यां लक्ष्यता तिष्ठति। समानाधिकरणधर्मयोरवच्छेद्यावच्छेदकभाव इति नियमात् समानाधिकरणयोः पृथिवीत्वलक्ष्यतयोरवच्छेद्यावच्छेदकभावः। एवम् अन्यूनानतिप्रसक्तधर्म एवावच्छेदको भवतीति नियमात् पृथिवीनिष्ठाया लक्ष्यताया अवच्छेदको धर्मः पृथिवीत्वम्, न तु घटत्वादिकं न वा द्रव्यत्वसत्तादिकम्। गौणो धर्मोऽवच्छेद्यो मुख्यो धर्मोऽवच्छेदक इति नियमात् लक्ष्यता अवच्छिन्ना, पृथिवीत्वमवच्छेदकम्। यो धर्मो यस्यावच्छेकः स तद्धर्मावच्छिन्न इति नियमात् पृथिवीत्वावच्छिन्ना लक्ष्यता। एवं गन्धनिष्ठा लक्षणता गन्धत्वावच्छिन्ना समाननियमात्, समवायसम्बन्धावच्छिन्ना च। एवं लक्ष्यतालक्षणतयोर्निरूप्यनिरूपकभावो भवति। तथा च समवायसम्बन्धावच्छिनगन्धत्वावच्छिन्न-गन्धनिष्ठलक्षणतानिरूपित-पृथिवीत्वावच्छिन्न-पृथिवीनिष्ठलक्ष्यतावती पृथिवीति शाब्दबोधः। गन्धवत्त्वलक्षणस्योत्पन्नावच्छिन्नपृथिव्यामव्याप्तत्वाद् गन्धसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं पृथिव्या लक्षणमिति लक्षणं परिष्कार्यम्।

अत्र प्रसङ्गाल्लक्षणविषयकं चिन्तनमुपक्रम्यते- तत्र लक्षणन्नाम–असाधारणो धर्मः, असाधारण्यञ्च तन्मात्रवृत्ति। अर्थाद् यदव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यं तल्लक्षणम्।

**अव्याप्तिः–** लक्ष्यैकदेशावृत्तित्वमव्याप्तिः। यो धर्मो लक्ष्यस्य कस्मिँश्चिदेकदेशे न वर्तते स धर्मो न लक्षणमव्याप्तिदोषग्रस्तत्वाद्। यथा गोः कपिलत्वम्, तद्यदि गोर्लक्षणं क्रियते तदा तस्य कपिलगव्येव वर्तमानत्वेन शुक्लकृष्णादिषु गोष्ववृत्तित्वादव्याप्तिरिति कपिलत्वं न गोर्लक्षणम्।

**अतिव्याप्तिः–** लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमतिव्याप्तिः। यथा गोर्यदि शृङ्गित्वं लक्षणं क्रियते तदा तत्रातिव्याप्त्या तल्लक्षणं भवितुं न शक्नोति। यतो हि शृङ्गित्वं लक्ष्ये गवि, अलक्ष्ये महिष्यादौ च वर्ततेऽतः शृङ्गित्वं गोर्न लक्षणमव्याप्तिदोषग्रस्तत्वाद्।

**असम्भवः–** लक्ष्यमात्रावृत्तित्वमसम्भवोऽर्थाल्लक्ष्यमात्रे कुत्रापि लक्षणासत्त्वमसम्भवः। यथा गोरेकशफवत्त्वम्, एकशफवत्त्वं हि न कास्वपि गोषु वर्तते, गोमात्रस्य द्विशफवत्त्वेन गवि एकशफवत्त्वमसम्भवम्।

प्रकृतमनुसरामः- उपरि निरूपणविषयीभूता पृथिवी द्विविधा नित्या, अनित्या च । नित्या परमाणुरूपा, अनित्या कार्यरूपा, अनित्यापि पृथिवी त्रिविधा शरीरेन्द्रियविषयभेदात् । पार्थिवं शरीरं चतुर्विधम्, योनिजमयोनिजञ्च । योनिजं द्विविधम् जरायुजम्, अण्डजञ्च । अयोनिजमपि द्विविधम् स्वेदजम्, उद्भिजञ्चाहत्य चतुर्विधम् । तत्र जरायुजमस्मदादीनाम् । अण्डजं पक्षिसर्पादीनाम् । स्वेदजं कृमिकुड्मलमशकादीनाम् । उद्भिज्जं वृक्षलतादीनाम् । स्वर्गनरकादिभोगजनकमपि शरीरमयोनिजमेव । शरीरलक्षणन्तु यद्भोगायतनं तदेव शरीरम् । यद्वा अन्त्यावयवित्वे सति चेष्टाश्रयत्वम् । पार्थिवमिन्द्रियं गन्धग्राहकं घ्राणं नाशाग्रवर्ति । पार्थिवविषयस्तु मृत्पाषाणादिः ।

**मूलम्– शीतस्पर्शवत्य आपः । ता द्विविधाः नित्या अनित्याश्च । नित्याः परमाणुरूपाः । अनित्याः कार्यरूपाः । पुनस्त्रिविधाः, शरीरेन्द्रियविषयभेदात् । शरीरं वरुणलोके । इन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । विषयः सरित्समुद्रादिः ।**

**व्याख्या–** समवायसम्बन्धेन शीतस्पर्शवत्त्वं जलस्य लक्षणम् । अत्रापि समवायसम्बन्धावच्छिन्न-शीतस्पर्शत्वावच्छिन्न-शीतस्पर्शनिष्ठलक्षणतानिरूपित-जलत्वावच्छिन्नजलनिष्ठ-लक्ष्यतावज्जलमिति शाब्दबोधः । एवमत्राप्युत्पन्नावच्छिन्ने जलेऽव्याप्तिवारणाय शीतस्पर्शसमानाधिकरण-द्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वमिति जलस्य लक्षणं कार्यम् । जलमपि द्विविधं नित्यमनित्यञ्च । नित्यं जलं परमाणुरूपम्, अनित्यन्तु कार्यरूपम् । तदपि पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् । जलीयं शरीरमयोनिजमेव, तच्च वरुणलोके वरुणादिदेवानां बोध्यम् । जलीयमिन्द्रियं रसग्राहकं रसनं जिह्वाग्रवर्ति । जलीयो विषयस्तु सरित्समुद्रसरःकासरादिः ।

**मूलम्– उष्णस्पर्शवत्तेजः । तद् द्विविधं नित्यमनित्यञ्च । नित्यं परमाणुरूपम् । अनित्यं कार्यरूपम् । पुनस्त्रिविधं शरीरेन्द्रियविषयभेदात् । शरीरमादित्यलोके । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । विषयश्चतुर्विधः । भौमदिव्यौदर्याकरजभेदात् । भौमं वह्न्यादिकम् । अबिन्धनं दिव्यं विद्युदादि । भुक्तस्य परिणामहेतुरौदर्यम् । आकरजं सुवर्णादि ।**

**व्याख्या–** समवायसम्बन्धेन उष्णस्पर्शवत्त्वं तेजसो लक्षणम् । अर्थात् समवायेन सम्बन्धेन उष्णस्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं तेजसो लक्षणमिति लक्षणं कार्यम् । अत्रापि समवायसम्बन्धावच्छिन्नोउष्णपर्शत्वावच्छिन्नोष्णस्पर्शनिष्ठ-लक्षणतानिरूपिततेजस्त्वावच्छिन्न-तेजोनिष्ठ-लक्ष्यतावत्तेज इति शाब्दबोधः कार्यः । तेजोऽपि द्विविधं नित्यमनित्यञ्च । नित्यं तेजः परमाणुरूपम्, अनित्यं तेजः कार्यरूपम् । अनित्यमपि तेजः शरीरेन्द्रियभेदात् त्रिविधम् । शरीरमादित्यलोके प्रसिद्धं भगवतां सूर्यादीनामयोनिजं शरीरं बोध्यम् । इन्द्रियं रूपग्राहकं चक्षुः कृष्णताराग्रवर्ति । तैजसविषयास्तु चतुर्विधाः । भौमदिव्यौदर्याकरजाश्चेति । तत्र भौमं वह्न्यादिकम् । दिवि भवं दिव्यमबिन्धनं विद्युदादि, सूर्यचन्द्रादिकञ्च । उदरे भवम् औदर्यं जाठराग्न्याख्यम् । आकरात्=खनेः, जायत इति आकरजं स्वर्णताम्रादिकं षड्विधं लौहं सर्वमपि तैजसमेव । यथोक्तम्-

**सुवर्णं रजतं ताम्रं रीतिः कास्यं तथा त्रपु ।**
**सीसं कालायसञ्चैवमष्टौ लौहानि चक्षते ॥**

रीतिः = पित्तलम्, त्रपु= रङ्गम्, सीसम् = त्रपुविकारः (सीसा इति भाषायाम्), कालायसं = आयासं फलाम इति भाषायाम् ।

**मूलम्– रूपरहितस्पर्शवान् वायुः । स द्विविधो नित्योऽनित्यश्च । नित्यः परमाणुरूपः । अनित्यः कार्यरूपः । पुनस्त्रिविधः शरीरेन्द्रियविषयभेदात् । शरीरं वायुलोके । इन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवर्ति । विषयो वृक्षादिकम्पनहेतुः । शरीरान्तःसञ्चारी वायुः प्राणः । स चैकोऽप्युपाधिभेदात्प्राणापानादिसंज्ञां लभते ।**

**व्याख्या–** रूपरहितत्वे सति स्पर्शवत्त्वं वायोर्लक्षणम् । स्पर्शवत्त्वमात्रं पृथिवीजलतेजःस्वप्यस्तीति रूपरहितत्वविशेषणं दत्तम् । रूपरहितत्वमात्रमाकाशादावप्यस्तीति स्पर्शवत्त्वविशेष्यदलं दत्तमिति रूपरहितत्वे सति स्पर्शवत्त्वं लक्षणं वायोर्निर्दुष्टम् । अत्राप्युत्पन्नावच्छिन्नवायावव्याप्तिदोषवारणाय रूपरहितत्वविशिष्टस्पर्शसमानाधिकरणद्रव्यत्वसाक्षाद्व्याप्यजातिमत्त्वं लक्षणं कार्यम् । तत्र रूपरहितत्वन्नाम रूपाभावविशिष्टत्वम् । अभावश्च प्रतियोगिसापेक्ष्यमिति रूपाभावस्य प्रतियोगि रूपम्, रूपनिष्ठा प्रतियोगिता रूपत्वधर्मावच्छिन्ना समवायसम्बन्धावच्छिन्ना च, येन सम्बन्धेन यन्नास्तीत्युच्यते स सम्बन्धः तन्निष्ठप्रतियोगितावच्छेदकः सम्बन्ध इति नियमात् । तादृशरूपाभावनिष्ठाधेयता स्वरूपसम्बन्धावच्छिन्नाभावत्वावच्छिन्ना च । तथा च समवायसम्बन्धावच्छिन्न-रूपत्वावच्छिन्न-रूपनिष्ठप्रतियोगिताकाभावत्वावच्छिन्न-स्वरूपसम्बन्धावच्छिन्नाधेयतानिरूपिता अथ च समवायसम्बन्धावच्छिन्न-स्पर्शत्वावच्छिन्न-स्पर्शनिष्ठाधेयतानिरूपिता या वायुत्वावच्छिन्न–वायुनिष्ठाधिकरणता तद्वान् वायुरिति शाब्दबोधः । सोऽपि वायुः द्विविधः, नित्योऽनित्यश्च । नित्यो वायुः परमाणुरूपः, अनित्यो वायुः कार्यरूपः । सोऽपि त्रिविधः शरीरेन्द्रियविषयभेदात् । वायवीयं शरीरं पिशाचादीनां, वायुलोके प्रसिद्धदेवतानाञ्च । वायवीयमिन्द्रियं स्पर्शग्राहकं त्वक्सर्वशरीरवर्त्ति । वायवीयो विषयो वृक्षादिकम्पनहेतुः । शरीरान्तःसञ्चारी वायुः प्राणोऽपि वायवीयो विषय एव । स चैकोऽपि मुखनासिकानिर्गमनादिनानाक्रियारूपोपाधिभेदात् प्राणः, अपानः, उदानः, व्यानः, समान इति नाना संज्ञाः लभते । प्राणस्योपाधयो यथा– मुखनासिकाभ्यां निर्गमनप्रवेशनात् प्राणः, अन्नादेरधोनयनादपानः, भुक्तपरिणामाय जठरानलसमुन्नयनात् समानः, अन्नादेरूर्ध्वनयनादुदानः, नाडीमुखेषु विततनाद् व्यान इति क्रियारूपोपाधयः । स्थानभेदादपि वायुः भिन्नत्वेन व्यवह्रियते, यथा–

**हृदि प्राणो गुदेऽपानः समानो नाभिमण्डले ।**
**उदानः कण्ठदेशे स्याद् व्यानः सर्वशरीरगः ॥** इति

**मूलम्– शब्दगुणकमाकाशम् । तच्चैकं विभु नित्यञ्च ।**

**व्याख्या–** शब्दो गुणो यस्य तत् शब्दगुणकमाकाशम् । आकाशे शब्दारिक्तिः कोऽपि विशेषगुणो न तिष्ठति, अतो गुणपदमुपात्तम्, तस्यार्थश्च विशेषगुण इत्यर्थः । वस्तुतः समवायेन शब्दवत्त्वमित्येव लक्षणं समुचितम् । चतुर्विंशतिगुणेषु षोडशगुणा विशेषगुणाः । ते च यथा–

**रूपं गन्धो रसस्पर्शौ स्नेहः सांसिद्धिको द्रवः ।**
**बुद्ध्यादिभावनान्ताश्च शब्दो वैशेषिका गुणाः ॥**

सामान्यगुणास्तु यथा–

**सङ्ख्यादिरपरत्वान्तो द्रवोऽसांसिद्धिकस्तथा ।**

**गुरुत्ववेगौ सामान्या गुणा एते प्रकीर्तिताः ।**

तच्चाकाशमेकं नित्यं विभु च । तत्र विभुत्वन्नाम सर्वमूर्तद्रव्यसंयोगित्वम्, विभव आकाशकालदिगात्मानश्चत्वारः । मूर्तत्वन्तु परिच्छिन्नपरिमाणवत्त्वम्, मूर्त्तानि पृथिवीजलतेजोवायुमनांसि ।

**मूलम्– अतीतादिव्यवहारहेतुः कालः । स चैको विभुर्नित्यश्च ।**

**व्याख्या–** अतीत इत्यादिर्यो व्यवहारो भवति तस्य असाधारणकारणं कालः । यथा घटोऽतीतः, भविष्यन्, वर्तमान इत्यात्मको व्यवहारः, तस्यासाधारणं कारणं काल इत्यर्थः । स च काल एक सन्नप्युपाधिभेदादतीतादिव्यवहारविषयः । वस्तुतः काल एकोऽपि कालिकवस्तुनो नानात्वादौपाधिकतया नानात्वव्यवहारविषयः । कालोपाधिस्तु जन्यमात्रं स्पन्दमात्रं वा ।

**मूलम्– प्राच्यादिव्यवहारहेतुर्दिक् । सा चैका विभ्वी नित्या च ।**

**व्याख्या–** प्राची इत्यादिर्यो व्यवहारो भवति तस्य असाधारणं कारणं दिग् । यथा इयं प्राची, इयं प्रतीची, इयमवाची, इयमुदीची इत्यात्मको यो व्यवहारस्तस्यासाधारणं कारणं दिग् = दिशेत्यर्थः । हेतुर्दिगित्युच्यमाने दण्डादावतिव्याप्तिरतः प्राच्यादिव्यवहार इत्युक्तम् । पुनर्दण्डादिवारणाय प्राच्यादीति । साधारणकारणवारणायासाधारणमित्यपि देयम् । सा च दिगेकैव, देशरूपोपाधिभेदान्नानादिग्व्यवहारः । दिगुपाधिस्तु जन्यदेश एव ।

**मूलम्– ज्ञानाधिकरणमात्मा । स च द्विविधः, जीवात्मा परमात्मा च । तत्रेश्वरः सर्वज्ञः परमात्मैक एव । जीवात्मा प्रतिशरीरं भिन्नो विभुर्नित्यश्च ।**

**व्याख्या–** समवायसम्बन्धेन ज्ञानवत्त्वमात्मनो लक्षणम् । यतो हि ज्ञानं गुणः समवायेन सम्बन्धेनात्मानं विहाय कुत्रापि स्थातुं न शक्नोति । ज्ञानस्य शरीरादिजडधर्मत्वे तत्समानाधिकरणानां कृतीच्छादीनां धर्माधर्मादीनाञ्च तद्धर्मत्वे कृतहानाकृताभ्यागमप्रसङ्गः स्यादतो ज्ञानं नित्यस्यात्मनो गुण इति स्वीकर्तव्यम् । स चात्मा द्विविधो जीवेश्वरभेदात् । तत्रेश्वरः सर्वविषयकनित्यज्ञानवान्, एकश्च । जीवस्तु यत्किञ्चिद्विषयकक्षणिकज्ञानवान् प्रतिशरीरं भिन्नः परं विभुः नित्यश्च ।

**मूलम्– सुखाद्युपलब्धिसाधनमिन्द्रियं मनः । तच्च प्रत्यात्मनियतत्वादनन्तं परमाणुरूपं नित्यञ्च ।**

**व्याख्या–** आत्मनि जायमानायाः सुखाद्युपलब्धेः साधनमिन्द्रियं मनः । तच्च मनः प्रत्येकस्मिन् जीवात्मनि भिन्नं भिन्नं वर्तमानं सत् तत्रात्मनि सुखाद्युपलब्धिं जनयति । तस्यामुपलब्धौ मनोऽसाधारणं कारणं भवति । ईश्वरज्ञानस्य नित्यत्वात् तत्र रागादिकारणाभावाच्च न तत्र सुखाद्युपब्धिरितीश्वरे सुखाद्युपब्धिसाधनं मनोऽपि नास्त्येव । जीवात्मनां

सुखदुःखाद्युपब्धिरूपभोगवैचित्र्याज्जीवात्मानो नाना । जीवात्मनां नानात्वे च तत्र प्रतिनियतं मनोऽपि नानेति स्वीकार्यम्, अर्थाज्जीवात्मनां भोगवैचित्र्यसम्पादनाय एकैकस्यात्मन एकैकं मन आवश्यकमित्यात्मनामनेकत्वेन मनसामप्यनेकत्वं स्वीकार्यम् । ज्ञानानामयौगपद्याच्च मनः परमाणुरूपं वर्तते । अर्थाद् यदि मनो विभु स्वीक्रियते तदा विभुमनसः सर्वेषामिन्द्रियाणां साकं सर्वदैव संयोगसम्भवान्नानेन्द्रियविषयसंयोगस्य च सम्भवादेकदैवैकस्मिनात्मनि नाना ज्ञानान्युत्पद्येरन्निति मनोऽणु स्वीकार्यम् । तथा सति च येनेन्द्रियेण साकं मनसः संयोगो जायते तदिन्द्रियजन्यमेव ज्ञानमुत्पद्यते नान्यमिति मनसोऽणुत्वं सिद्ध्यति ।

**पदानामर्थपरिचयः–**

| | |
|---|---|
| परमाणुः | = अन्तिमावयवः |
| शरीरम् | = भोगायतनम्, अत्यावयवी चेष्टाश्रयो वा |
| विषयः | = शरीरेन्द्रियभिन्नमुपभोगसाधनम् |
| गन्धग्राहकः | = गन्धविषयकज्ञानजनकः |
| पाषाणः | = उत्पलः |
| समानाधिकरणम् | = एकाधिकरणवृत्ति |
| अवच्छेदकः | = व्यवच्छेदको धर्मः |
| अवच्छिन्नः | = व्यवच्छिन्नः |
| रसग्राहकः | = रसविषयकज्ञानजनकः |
| भौमम् | = भूमौ जातम्, अग्न्यादिकम् |
| दिव्यम् | = दिवि जातम्, सूर्यचन्द्रादिकम् |
| अबिन्धनम् | = आप इन्धनं यस्य स जलकारणको वह्निः, विद्युदादि |
| औदर्यम् | = उदरे जातम्, जठराग्निः |
| आकरजम् | = आकरात् = खनेः जातम्, सुवर्णादिकम् |
| विशेषगुणः | = प्रतिनियतं द्रव्ये वर्तमानो गुणः, यथा रूपादिकम् |
| सामान्यगुणः | = द्वयोः त्रिषु वा द्रव्येषु वर्तमानो गुणः, यथा संयोगादिः |
| विभुः | = सर्वमूर्तद्रव्यसंयोगी |
| मूर्तः | = परिच्छिन्नपरिमाणवान् |
| प्रतिशरीरम् | = शरीरं शरीरं प्रतीति प्रतिशरीरम्, प्रत्येकस्मिन् शरीरे भिन्नं भिन्नमित्यर्थः |
| उपलब्धिः | = ज्ञानम् |
| प्रत्यात्मनियतम् | = आत्मनि आत्मनि प्रतीति प्रत्यात्मम्, प्रत्यात्मं नियतमिति प्रत्यात्मनियतं प्रत्येकस्मिन्नात्मनि भिन्नं भिन्नं वर्तमानमित्यर्थः |

## अभ्यासः

### १. स्वशब्दैः विस्तृतमुत्तरं देयम्

(क) पृथिवीलक्षणं विलिख्य सलक्षणं पार्थिवशरीरेन्द्रियविषयान् प्रदर्शयत ।

(ख) तेजो लक्षणं विलिख्य तेजसः चतुरो भेदान् प्रतिपादयत ।

(ग) सपदकृत्यं वायुलक्षणं निरूप्योपाधिभेदात् प्राणभेदान् दर्शयत ।

(घ) सलक्षणं सभेदञ्चात्मानं निरूपयत ।

### २. व्याख्यात्मकमुत्तरं देयम्

(क) गन्धवती पृथिवीति वाक्यस्य शाब्दबोधस्वरूपं प्रतिपादयत ।

(ख) जललक्षणं जलभेदाँश्च प्रदर्शयत ।

(ग) सभेदं तैजसविषयान् निरूपयत ।

(घ) रूपरहितस्पर्शवान् वायुरिति वाक्यस्य शाब्दबोधस्वरूपं लिखत ।

(ङ) काललक्षणं विलिख्य कालोपाधिः कः? इति प्रतिपादयत ।

(च) दिग्लक्षणमौपाधिकदिग्भेदाँश्च प्रतिपादयत ।

(छ) सलक्षणमीश्वरं निरूपयत ।

(ज) मनसो लक्षणं प्रदर्शयत ।

### ३. अतिसङ्क्षिप्तमुत्तरं देयम्

(क) कार्यरूपा पृथिवी नित्यानित्या वा ?

(ख) जलीयमिन्द्रियं किम् ?

(ग) अबिन्धनमित्यस्य कोऽर्थः ?

(घ) वस्तुतः प्राण एकोऽनेको वा ?

(ङ) न्यायमते आकाशो नित्यो वानित्यः ?

(च) दिगुपाधिः कः ?

(छ) न्यायमते जीवोऽणुर्वा विभुः ?

## ४. रिक्तस्थानं पूरयत

(क) इन्द्रियम् ...........नासाग्रवर्ति ।

(ख) भौम...........भेदात् ।

(ग) अतीतादि...........कालः ।

(घ) जीवात्मा...........भिन्नो विभुर्नित्यश्च ।

(ङ) सुखाद्युपलब्धि.............मनः ।

## ५. कक्षाभ्यासः

(क) शाब्दबोधस्वरूपविषये कक्षायां शिक्षकमित्रैः सह चर्चा कार्या ।

(ख) सामान्यगुणविशेषगुणविषये शिक्षकेण साकं संवादः कार्यः ।

(ग) रूपरहितस्पर्शवान् वायुरित्यस्य वाक्यस्य शाब्दबोधविषये कक्षायां चर्चयत ।

# रूपादिशब्दान्तगुणनिरूपणम्

द्रव्यनिरूपणानन्तरं गुणसामान्यं निरूपयितुमारभते । तत्रादौ रूपं निरूपयति चक्षुर्मात्रेत्यादिना–

**मूलम्– चक्षुर्मात्रग्राह्यो गुणो रूपम् । तच्च शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात्सप्तविधं पृथिवीजलतेजोवृत्ति । तत्र पृथिव्यां सप्तविधम् । अभास्वरशुक्लं जले । भास्वरशुक्लं तेजसि ।**

**व्याख्या–** चक्षुर्मात्रग्राह्यत्वे सति गुणत्वं रूपस्य लक्षणम् । विशेष्यमात्रोपादाने रसादावतिव्याप्तिः स्यादतो विशेषणपदोपादानम् । विशेषणमात्रस्य लक्षणत्वे यो गुणो येनेन्द्रियेण गृह्यते तद्गता जातिः, तदभावश्च तेनैवेन्द्रियेण गृह्यत इति नियमाद् रूपत्वादिजातीनामपि चक्षुर्मात्रग्राह्यत्वाद् रूपत्वादिजातावतिव्याप्तिरतो विशेष्यदलमुपात्तम् । मात्रपदस्येतरव्यावर्तकत्वाद् चक्षुर्भिन्नेन्द्रियाग्राह्यत्वे सति चक्षुर्ग्राह्यत्वे सति गुणत्वमिति रूपलक्षणं कार्यम् । मात्रपदानुपादाने सङ्ख्यादिसामान्यगुणेऽतिव्याप्तिः स्यादतो मात्रपदोपादानम् । तथा सति च सङ्ख्यादिसामान्यगुणस्य चक्षुर्भिन्नत्वगिन्द्रियजन्यप्रत्यक्षविषयत्वान्न तत्रातिव्याप्तिः । अतीन्द्रियगुरुत्वादिवारणाय चक्षुर्ग्राह्यत्वे सतीति । अत्र ग्राह्यत्वन्नाम प्रत्यक्षविषयत्वम् । अग्राह्यत्वं प्रत्यक्षाविषयत्वम् । तथा च चक्षुर्भिन्नेन्द्रियजन्यप्रत्यक्षाविषयत्वे सति चक्षुर्जन्यप्रत्यक्षविषयत्वे सति गुणत्वं रूपस्य लक्षणम् । ननु प्रभाघटसंयोगेऽतिव्याप्तिः, तस्य चक्षुर्मात्रग्राह्यत्वादिति चेन्न, गुणपदेन विशेषगुणस्य विवक्षणाद् । न च विशेषगुणत्वघटितलक्षणस्य सङ्ख्यादिसामान्यगुणेऽतिव्याप्त्यभावान्मात्रपदं व्यर्थमिति वाच्यम्, जलमात्रवृत्तिसांसिद्धिकद्रवत्वादावतिव्याप्तिवारणाय तदुपादानम् । वस्तुतः परमाणुरूपेऽव्याप्तिवारणाय चक्षुर्मात्रग्राह्यजातिमद्गुणत्वस्य विवक्षणान्न प्रभाघटसंयोगेऽतिव्याप्तिरिति विशेषपदं नोपादेयम् । त्रसरेणावतिव्याप्तिवारणाय गुणपदं तु देयमेव । तथा च चक्षुर्मात्रग्राह्यजातिमद्गुणत्वं रूपस्य लक्षणम् । तच्च रूपं शुक्लनीलपीतरक्तहरितकपिशचित्रभेदात् सप्तविधम् । रूपं पृथिवीजलतेजोवृत्ति । तत्र अभास्वरशुक्लं जले, भास्वरशुक्लं तेजसि, पृथिव्यान्तु सप्तविधान्येव रूपाणि वर्तन्ते ।

**मूलम्– रसनाग्राह्यो गुणो रसः । स च मधुराम्ललवणकटुकषायतिक्तभेदात्षड्विधः । पृथिवीजलवृत्तिः । तत्र पृथिव्यां षड्विधः । जले मधुर एव ।**

**व्याख्या–** रसनेन्द्रियग्राह्यत्वे सति गुणत्वं रसस्य लक्षणम् । रसनेन्द्रियग्राह्यत्वं रसत्वादिजातावप्यस्तीति गुणत्वविशेष्यदलं दत्तम्, गुणत्वमात्रोक्तौ रूपादावतिव्याप्तिः । परमाणुरसेऽव्याप्तिवारणाय रसनेन्द्रियग्राह्यजातिमद् गुणत्वं रसस्य लक्षणमिति रसलक्षणं परिष्कार्यम् । रसश्च षड्विधः मधुर–अम्ल–लवण–कटु–कषाय–तिक्तभेदात् । रसः पृथिवीजलयोर्वृत्तिः । पृथिव्यां षड्विधो रसः, जले च मधुर एव रसः । जले मधुररसश्च हरितकीभक्षणानन्तरजलपानेऽनुभूयते । प्रयोजनाभावाच्च चित्ररसो न स्वीक्रियते, अवयविनि त्ववयवगतरस

एवानुभूयते। रूपे तु चित्ररूपास्वीकारे चित्रपटाप्रत्यक्षापत्तिः स्यात्, चाक्षुषप्रत्यक्षसामान्यं प्रति रूपस्य कारणत्वादिति चित्ररूपं स्वीकार्यम्।

**मूलम्– घ्राणग्राह्यो गुणो गन्धः। स च द्विविधः सुरभिरसुरभिश्च। पृथिवीमात्रवृत्तिः।**

**व्याख्या–** घ्राणेन्द्रियग्राह्यत्वे सति गुणत्वं गन्धस्य लक्षणम्। घ्राणेन्द्रियग्राह्यत्वमात्रोक्तौ गन्धत्वादिजातावतिव्याप्तिः स्यादतो विशेष्यदलमुपात्तम्। गुणत्वमात्रोक्तौ रूपादित्रयोविंशतिगुणेष्वतिव्याप्तिः स्यादतो विशेषणदलमुपात्तम्। परमाणुगन्धेऽव्याप्तिवारणाय घ्राणेन्द्रियग्राह्यजातिमद्गुणत्वं गन्धस्य लक्षणं कार्यम्। स च गन्धो द्विविधः, सुरभिः, असुरभिश्च। द्विविधावपि गन्धौ पृथिवीमात्रवृत्ती। पृथिवीसम्बन्धादेव जलवाय्वोः गन्धः प्रतीयते, न तु शुद्धयोर्जलवाय्वोर्गन्धः, तथैवानुभवात्। अत एव पृथिवीसम्बन्धसत्त्वे जलवाय्वोः गन्धप्रतीतिः, पृथिवीसम्बन्धाभावे जलवाय्वोः गन्धप्रतीत्यभाव इत्यन्वयव्यतिरेकव्याप्ती भवतः। तादृशव्याप्त्या च गन्धः पृथिवीमात्रवृत्तिरिति सिद्ध्यति।

**मूलम्– त्वगिन्द्रियमात्रग्राह्यो गुणः स्पर्शः। स च त्रिविधः शीतोष्णानुष्णाशीतभेदात्। पृथिव्यप्तेजोवायुवृत्तिः। तत्र शीतो जले। उष्णस्तेजसि। अनुष्णाशीतः पृथिवीवाय्वोः।**

**व्याख्या–** त्वगिन्द्रियमात्रग्राह्यत्वे सति गुणत्वं स्पर्शस्य लक्षणम्। त्वगिन्द्रियग्रह्यत्वमात्रोक्तौ सङ्ख्यादावतिव्याप्तिः स्यादतो मात्रपदं देयम्। तदर्थश्च त्वग्भिन्नेन्द्रियाग्राह्यत्वे सति त्वगिन्द्रियग्राह्यत्वमिति। स्पर्शत्वादिजातावतिव्याप्तिवारणाय विशेष्यदलं देयम्। तथा च त्वग्भिन्नेन्द्रियाग्राह्यत्वे सति त्वगिन्द्रियग्राह्यत्वे सति गुणत्वं स्पर्शस्य लक्षणमिति। परमाणुस्पर्शेऽव्याप्तिवारणाय त्वगिन्द्रियमात्रग्राह्यजातिमद्गुणत्वं स्पर्शत्वमिति लक्षणं परिष्कार्यम्। स्पर्शश्च त्रिविधः शीतः, उष्णः, अनुष्णाशीतश्चेति। तत्र शीतः स्पर्शो जले वर्तते। उष्णः स्पर्शः तेजसि, अनुष्णाशीतः स्पर्शः पृथिवीवाय्वोः वर्तते।

**मूलम्– रूपादिचतुष्टयं पृथिव्यां पाकजमनित्यञ्च, अन्यत्रापाकजं नित्यमन्त्यञ्च। नित्यगतं नित्यम्। अनित्यगतमनित्यम्।**

**व्याख्या–** रूपरसगन्धस्पर्शा गुणाः पृथिव्यां पाकाज्जायन्ते। अर्थात् पार्थिवरूपरसादिकं विजातीयाग्निसंयोगेन विपरिणमते, पाकाज्जायमानत्वात् पार्थिवरूपरसादिकमनित्यमेव। न जलीयतैजसवायवीयं रूपरसादिकं पाकाद् विपरिणमत इति तज्जलीयतैजसवायवीयं रूपरसादिकं पाकजमपि त्वपाकजमेव। नहि शतधापि ध्मायमाने जले रूपरसादिकं परावर्तते। जले सौरभमौष्ण्यञ्चान्वयव्यतिरेकाभ्यामौपाधिकमेवेति निर्णीयते। अपाकजत्वाच्च जलीयादिकं रूपादिकं नित्यं, अनित्यञ्च। नित्यपरमाण्वादिगतं नित्यम्, अनित्यघटादिगतमनित्यम्। पार्थिवन्तु रूपरसादिकं पूर्वं कारणगुणपूर्वकमपि पश्चादग्निसंयोगरूपपाकवशात् परावर्तते, परिवर्तनशीलत्वाच्च पार्थिवं रूपरसादिकमनित्यमेव। पार्थिवरूपरसादिपरावृत्तिजनकपाकश्च रूपजनकाद् रसजनको विजातीयो भिन्न इत्यर्थः। रसजनकोऽपि गन्धजनकाद् विजातीयः। गन्धजनकोऽपि स्पर्शजनकाद् विजातीयः, अत एव तृणपुञ्जनिक्षिप्ताम्रादौ क्वचिद्रूपपरिवर्तनेऽपि रसादिकं न परावर्तते। क्वचिच्च रसपरिवर्तनेऽपि रूपं न परावर्तते

तथैवानुभवात् । तस्माद्रूपादिजनका विजातीया एव पाकाः कार्यवैलक्षण्यात् स्वीकार्याः । एतत्पाकमहिम्नैव एकस्मिन्नेव पार्थिवावयवे कालक्रमेण भिन्नभिन्नपदार्थानुभवो जायते । यथा गोभुक्ततृणादीनामापरमाण्वन्तभङ्गे तृणारम्भकपरमाणुषु विजातीयतेजःसंयोगात्पूर्वरूपादिचतुष्टयनाशे तदनन्तरं दुग्धे यादृशं रूपादिकं वर्तते, तादृशा रूपरसगन्धस्पर्शजनकाः तेजःसंयोगा जायन्ते, तदुत्तरं तैरेव तेजःसंयोगरूपपाकैस्तादृशरूपरसादयो जायन्ते, ततस्तादृशरूपरसादिविशिष्टपरमाणुभिर्दुग्धद्वयणुकमारभ्यते ततस्त्र्यणुकादिक्रमेण महादुग्धारम्भः, एवं दुग्धारम्भकैः परमाणुभिरेव दध्यारभ्यते, एवमेव पाकमहिम्ना दध्यारम्भकैरेव परमाणुभिर्नवनीतादिकमिति । तथा च घटादिजनकेषु केषुचन परमाणुष्वेव भिन्नभिन्नानि पत्रमृत्कपालघटादीनि द्रव्याण्यनुभूयन्ते ।

**मूलम्– एकत्वादिव्यवहारहेतुः सङ्ख्या । सा नवद्रव्यवृत्तिः, एकत्वादिपरार्धपर्यन्ता । एकत्वं नित्यमनित्यञ्च । नित्यगतं नित्यमनित्यगतमनित्यम् । द्वित्वादिकन्तु सर्वत्रानित्यमेव ।**

**व्याख्या–** अयमेकः, इमौ द्वावित्यादिव्यवहारासाधारणं कारणं सङ्ख्या । व्यवहारश्चात्र शब्दप्रयोगात्मकः । तथा च अयमेकः, इमौ द्वावित्यादिशब्दप्रयोगात्मकव्यवहारासाधारणकारणत्वं सङ्ख्याया लक्षणम् । दण्डादावतिव्याप्तिवारणाय एकत्वेति । कालादावतिव्याप्तिवारणाय असाधारणमिति । तत्रासाधारणं द्विविधम्, कारणं धर्मश्च, अतः शब्दात्मकस्यैकत्वादिव्यवहारस्यासाधारणधर्मे शब्दत्वादिजातावतिव्याप्तिवारणाय कारणमिति । व्यवहारं प्रति व्यवहर्तव्यस्य कारणत्वात् सङ्ख्यामृते तादृशव्यवहारो न सम्भवति । सङ्ख्या च पृथिव्यादिनवद्रव्यवृत्तिः, एकत्वादिपरार्धपर्यन्ता । तत्रैकत्वं सङ्ख्या नित्यमनित्यञ्च, नित्यपरमाण्वाकाशादिगतं नित्यम्, अनित्यघटादिगतञ्चानित्यम् । द्वित्वादिका तु सर्वा सङ्ख्या अनित्यैव, अपेक्षाबुद्धिजन्यत्वात् । अपेक्षाबुद्धिश्चायमेकोऽयमेक इत्यनेकेषु जायमानैकत्वबुद्धिः, तया च द्वयोर्द्वित्वं त्रिषु त्रित्वं चतुरादिषु च चतुष्ट्वादिसङ्ख्या उत्पद्यते । सङ्ख्याया अवधिश्च परार्धपर्यन्ता, तदुक्तं व्यासमहर्षिणा ब्रह्माण्डपुराणे–

**एकं दश शतञ्चैव सहस्रमयुतं तथा ।**

**लक्षञ्च नियुतञ्चैव कोटिरर्बुदमेव च ।**

**वृन्दं खर्वो निखर्वश्च शङ्खः पद्मश्च सागरः ।**

**अन्त्यं मध्यं परार्धञ्च दशवृद्ध्या यथाक्रमम् ।**

**इति महदुक्तेः परार्धपर्यन्ता सङ्ख्या ।**

**मूलम्– मानव्यवहारासाधारणं कारणं परिमाणम् । नवद्रव्यवृत्ति । तच्चतुर्विधम् । अणु महद्दीर्घं ह्रस्वञ्चेति ।**

**व्याख्या–** मानम् = परिमितिस्तस्याः यो व्यवहारः 'इदं महद् इदमणु इत्याद्यात्मकः', तस्यासाधारणं कारणं परिमाणम् । दण्डादावतिव्याप्तिवारणाय मानेति । कालादावतिव्याप्तिवारणाय असाधारणमिति । अत्रासाधारणं द्विविधं कारणं धर्मश्च । अतः शब्दात्मकस्य मानव्यवहारस्यासाधारणधर्मे शब्दत्वादिजातावतिव्याप्तिवारणाय कारणमिति । तच्च परिमाणं चतुर्विधम् अणु महद् ह्रस्वं दीर्घञ्चेति । चतुर्विधमपि परिमाणं परममध्यमभेदेन द्विविधम् । तथा च परमाणुत्वमरिमाणम्, परमह्रस्वत्वपरिमाणम्, मध्यमाणुत्वपरिमाणम्, मध्यमह्रस्वत्वपरिमाणम्,

परममहत्त्वपरिमाणम्, परमदीर्घत्वपरिमाणम्, मध्यममहत्त्वपरिमाणम्, मध्यमदीर्घत्वपरिमाणञ्चेति अष्टविधं परिमाणम् । तत्र परमाणुत्वह्रस्वत्वे परमाणुमनसोः, मध्यमाणुत्वह्रस्वत्वे द्व्यणुके, परममहत्त्वदीर्घत्वे आकाशकालदिगात्मसु, मध्यममहत्त्वदीर्घत्वे त्र्यणुकादिब्रह्माण्डान्तपृथिवीजलतेजोवायुषु तिष्ठतः । इत्थञ्च परिमाणं सर्वद्रव्यवृत्तीति सिद्धम् । एवञ्च परिमाणं नित्यगतं नित्यमनित्यगतञ्चानित्यमिति ।

**मूलम्– पृथग्व्यवहारासाधारणं कारणं पृथक्त्वम् । सर्वद्रव्यवृत्ति ।**

**व्याख्या–** अयमस्मात् पृथगिति व्यवहारासाधारणं कारणं पृथक्त्वम् । दण्डादावतिव्याप्तिवारणाय पृथग्व्यवहारेति । कालादावतिव्याप्तिवारणाय असाधारणमिति । शब्दात्मकस्य पृथग्व्यवहारस्यासाधारणधर्मे शब्दत्वादिजातावतिव्याप्तिवारणाय कारणमिति । तत्रैकपृथक्त्वं नित्यगतं नित्यमनित्यगतञ्चानित्यम् । द्विपृथक्त्वादिकञ्च सर्वमपेक्षाबुद्धिजन्यमनित्यमेव ।.पृथक्त्वञ्च सर्वद्रव्यवृत्ति ।

**मूलम्– संयुक्तव्यवहारहेतुः संयोगः । सर्वद्रव्यवृत्तिः ।**

**व्याख्या–** इमौ संयुक्ताविति व्यवहारासाधारणं कारणं संयोगः । अत्रापि दण्डादावतिव्याप्तिवारणाय संयुक्तव्यवहारेति । कालादावतिव्याप्तिवारणायासाधारणमिति । संयुक्तव्यवहारत्वे धर्मेऽतिव्याप्तिवारणाय कारणमिति । संयोगः सर्वद्रव्यवृत्तिः । स च संयोगः त्रिविधः अन्यतरकर्मजः, उभयकर्मजः, संयोगजश्चेति । तत्राद्यः श्येनशैलसंयोगः, द्वितीयः मेषद्वयसंयोगः, तृतीयस्तु अवयवसंयोगजन्योऽवयविसंयोगः, यथा हस्ततरुसंयोगात् शरीरतरुसंयोगः । संयोगः सर्वोऽप्यव्याप्यवृत्तिरेव ।

**मूलम्– संयोगनाशको गुणो विभागः । सर्वद्रव्यवृत्तिः ।**

**व्याख्या–** संयोगनाशकत्वे सति गुणत्वं विभागस्य लक्षणम् । संयोगनाशकत्वमात्रं कालादावप्यस्तीति गुणत्वविशेष्यदलं दत्तम् । ईश्वरेच्छायामतिव्याप्तिवारणायासाधारणमित्यपि देयम् । क्रियायामतिप्रसक्तिवारणाय गुणपदं दत्तम् । संयोगस्य सर्वद्रव्यवृत्तित्वात् तन्नाशकविभागोऽपि सर्वद्रव्यवृत्तिरेव । संयोगवद् विभागोऽपि त्रिविधः । अन्यतरकर्मजः, उभयकर्मजः, विभागजश्चेति । तत्राद्यो हस्तक्रियया जायमानो हस्तपुस्तकविभागः, द्वितीयो द्वयोः मेषयोः क्रियाभ्यां जायमानो मेषद्वयविभागः, तृतीयो हस्तपुस्तकविभागाज्जायमानः कायपुस्तकविभागः ।

**मूलम्– परापरव्यवहारासाधारणकारणे परत्वापरत्वे । पृथिव्यादिचतुष्टयमनोवृत्तीनि । ते द्विविधे दिक्कृते कालकृते च । दूरस्थे दिक्कृतं परत्वम् । समीपस्थे दिक्कृतमपरत्वम् । ज्येष्ठे कालकृतं परत्वम् । कनिष्ठे कालकृतमपरत्वम् ।**

**व्याख्या–** अयमस्मात् पर इति व्यवहारासाधारणं कारणं परत्वम्, अयमस्मादपर इति व्यवहारासाधारणं कारणञ्चापरत्वम् । अत्रापि दण्डादावतिव्याप्तिवारणाय परापरव्यवहारेति । कालादावतिव्याप्तिवारणाय असाधारणमिति । परापरव्यवहारत्वे धर्मेऽतिव्याप्तिवारणाय कारणमिति । परत्वापरत्वे द्विविधे दिक्कृते = दैशिके परत्वापरत्वे, कालकृते = कालिके परत्वापरत्वे च । दिक्कृते परत्वापरत्वे पृथिवीजलतेजोवायुमनोवृत्तिनी । कालकृते तु परत्वापरत्वे पृथिवीजलतेजोवायुमात्रवृत्तिनी मनसो नित्यत्वेन तत्र कालकृतपरत्वापरत्वयोरसम्भवात् ।

दिक्कृतम् = दैशिकं परत्वं दूरस्थे वस्तुनि बहुतरमूर्तसंयोगान्तरितत्वज्ञानजन्यम्, दूरस्थे वस्तुनि विद्यमानमित्यर्थः। यथा काश्यपेक्षया गया नेपालात् परा। दिक्कृतमपरत्वम् = दैशिकापरत्वञ्च समीपस्थे वस्तुनि अल्पतरमूर्तसंयोगान्तरितत्वज्ञानजन्यम्, समीपस्थे वस्तुनि विद्यमानमित्यर्थः, यथा काश्यपेक्षया देवघट्टं काष्ठमण्डपादपरं समीपम् इत्यर्थः। कालकृतं परत्वं ज्येष्ठे वस्तुनि बहुतरतपनपरिष्पन्दान्तरितत्वज्ञानजन्यम्, ज्येष्ठे वस्तुनि विद्यमानमित्यर्थः, यथा लक्ष्मणापेक्षया रामः परः ज्येष्ठ इत्यर्थः। कालकृतमपरत्वञ्च कनिष्ठे वस्तुनि अल्पतरतपनपरिष्पन्दान्तरितत्वज्ञानजन्यम्, कनिष्ठे वस्तुनि विद्यमानमित्यर्थः, यथा लक्ष्मणो रामापेक्षया अपरः कनिष्ठ इत्यर्थः।

**मूलम्– आद्यपतनासमवायिकारणं गुरुत्वम्। पृथिवीजलवृत्ति।**

**व्याख्या–** आद्यं यत्पतनं तस्यासमवायिकारणं गुरुत्वम्। तत्र पतनन्नाम वृक्षादिविभागजनकव्यापारमारभ्य भूम्यादिसंयोगजनकव्यापारपर्यन्तं सर्वाः क्रियाः। तासु क्रियासु मध्ये आद्यक्रियां प्रति चासमवायिकारणं गुरुत्वमेव। समवायिकारणन्तु फलादिकम्, नमित्तन्तु दण्डादिकम्। द्वितीयादिपतने वेगोऽसमवायिकारणमिति तद्वारणायाद्यपदं दत्तम्। दण्डादिवारणायासमवायीति। तच्च गुरुत्वं पृथिवीजलवृत्ति, अतीन्द्रियं पतनकार्यानुमेयम्। अनुमानाकारश्च आद्यं पतनं सासमवायिकारणकं क्रियात्वात्, संयोगासमवायिकारणक्रियावदिति। गुरुत्वं नित्यपृथिवीजलपरमाणुवृत्ति नित्यम्, कार्यरूपपृथिवीजलवृत्त्यनित्यम्।

**मूलम्– आद्यस्यन्दनासमवायिकारणं द्रवत्वम्, पृथिव्यप्तेजोवृत्ति। तद्द्विविधं सांसिद्धिकं नैमित्तिकञ्च। सांसिद्धिकं जले, नैमित्तिकं पृथिवीतेजसोः। पृथिव्यां घृतादावग्निसंयोगजन्यं द्रवत्वम्। तेजसि सुवर्णादौ।**

**व्याख्या–** आद्यं यत्स्यन्दनं तस्यासमवायिकारणं द्रवत्वम्। स्यन्दनन्नाम प्रस्रवणम्। आद्यप्रस्रवणरूपस्यन्दनं प्रति च द्रवत्वमसमवायिकारणम्, जलादिकं समवायिकारणम्, निमित्तन्तु दण्डादिकमेव। द्वितीयादिस्यन्दनं प्रति वेगोऽसमवायिकारणमिति तद्वारणायाद्यपदं दत्तम्। असमवायिपदानुपादाने स्यन्दनसमवायिकारणे जलादौ, निमित्तकारणीभूतदण्डादौ चातिव्याप्तिः स्यादतोऽसमवायीति। द्रवत्वं पृथिवीजलतेजोवृत्ति। तच्च द्विविधम्- सांसिद्धिकं नैमित्तिकञ्च। सांसिद्धिकं द्रवत्वं जलमात्रवृत्ति, नित्यमनित्यञ्च। परमाणुजलवृत्ति नित्यम्, कार्यजलवृत्त्यनित्यम्। पृथिवीतेजसोः वर्तमानं नैमित्तिकं द्रवत्वन्तु अग्न्यादिरूपतेजःसंयोगनिमित्तकमनित्यमेव। पृथिव्यां घृतजत्वादौ अग्निसंयोगजं नैमित्तिकं द्रवत्वम्। सुवर्णादौ तेजस्यपि अत्यन्ताग्निसंयोगनिमित्तकं नैमित्तिकं द्रवत्वमिति बोद्ध्यम्।

**मूलम्– चूर्णादिपिण्डीभावहेतुर्गुणः स्नेहः। जलमात्रवृत्तिः।**

**व्याख्या–** चूर्णादीनाम् = पिष्ठादीनाम्, आदिना सक्त्वादिपरिग्रहस्तेषां पिण्डीभावः = अवयवानां विलक्षणधारणाकर्षणरूपो देशान्तरनिर्गमनप्रतिबन्धकीभूतो यो दृढतरसंयोगस्तस्य हेतुर्निमित्तकारणं स्नेहः। जलसंयोगे चूर्णादीनां पिण्डीभावो जायते तं प्रति जलनिष्ठस्नेहो निमित्तकारणमित्यर्थः। स्नेहश्च जलमात्रवृत्तिः। घृततैलादावपि तदन्तर्वर्तिजलस्नेह एव। स्नेहप्रकर्षाच्च तन्न दहनप्रतिकूलम्।

**मूलम्– श्रोत्रग्राह्यो गुणः शब्दः । आकाशमात्रवृत्तिः । स द्विविधो ध्वन्यात्मको वर्णात्मकश्चेति । ध्वन्यात्मको भेर्यादौ । वर्णात्मकः संस्कृतभाषादिरूपः ।**

**व्याख्या–** श्रोत्रेन्द्रियग्राह्यत्वे सति गुणत्वं शब्दस्य लक्षणम् । श्रोत्रेन्द्रियग्राह्यत्वमात्रं शब्दत्वादिजातावप्यस्तीत्युक्तं गुणत्वमिति विशेष्यदलम् । गुणत्वमात्रोक्तौ रूपादावतिव्याप्तीति विशेषणदलं दत्तम् । वस्तुतः श्रोत्रभिन्नदेशोत्पन्नशब्दस्य श्रोत्रेन्द्रियाग्राह्यत्वादव्याप्तिः स्यादिति श्रोत्रेन्द्रियग्राह्यजातिमत्त्वं शब्दस्य लक्षणं कार्यम् । गुणपदन्तु जैनादिमतान्तरसिद्धशब्दस्य द्रव्यत्वनिरसनार्थम् । शब्दस्त्वाकाशमात्रवृत्तिरिति न्यायसिद्धान्तः । स च शब्दो द्विविधः, ध्वन्यात्मको वर्णात्मकश्च । ध्वन्यात्मकः शब्दो भेर्यादीनां शब्दः । वर्णात्मकस्तु शब्दः संस्कृतभाषादिरूपो व्यवहारप्रयोजकः । पुनः स शब्दस्त्रिविधः संयोगजः, विभागजः, शब्दजश्च । तत्राद्यो यथा भेरीदण्डसंयोगजन्यः ध्वन्यात्मकः, कण्ठताल्वादिसंयोगजन्यो वर्णात्मकश्च । द्वितीयस्तावद् वंशे पाट्यमाने दलद्वयविभागजन्यश्चटचटाशब्दः । तृतीयो तथा कण्ठताल्वादिसंयोगाज्जिह्वाग्रवर्त्तिदेशे प्रथमशब्दोत्पत्त्यनन्तरं कदम्बमुकुलन्यायेन वीचितरङ्गन्यायेन वा ये द्वितीयतृतीयादिशब्दास्ते सर्वेऽपि शब्दजाः शब्दाः । शब्दश्च सर्वो जन्यत्वादनित्य एव । शब्दोऽनित्यो जन्यत्वादित्यनुमानेन शब्दस्यानित्यत्वं सिद्ध्यति ।

## शब्दानामर्थपरिचयः

कपिशः = कृष्णपीतमिश्रितवर्णः (कैलो इति भाषायाम्)

भास्वरः = दीप्तियुक्तः

व्यावर्तकः = भेदजनकः, भेदकः

त्रसरेणुः = त्रिभिर्द्व्यणुकैर्जायमानद्रव्यविशेषः

कषायः = कषति कण्ठमिति कषायः रसविशेषः (टर्रो इति भाषायाम्)

कटुः = मरीचिकाया रसविशेषः (पिरो इति भाषायाम्)

हरितकी = वयःस्था, फलविशेषः (हर्रो इति भाषायाम्)

अन्वयः = सम्बन्धः, तत्कृतसहचारो यथा– तत्सत्त्वे तत्सत्त्वमिति, तत्प्रयुक्ता व्याप्तिरन्वयव्याप्तिः

व्यतिरेकः = अभावः तत्कृतसहचारो यथा– तदभावे तदभाव इति, तत्प्रयुक्ता व्याप्तिर्व्यतिरेकव्याप्तिः

पाकजम् = रूपादिपरावृत्तिजनकविजातीयतेजःसंयोगः पाकः, तस्माज्जायमानं रूपादिकम्

ध्मायमानम् = ताड्यमानम्, दह्यमानम्

परावृत्तिः = परिवर्तनम्

विजातीयः = भिन्नजातीयः, भिन्न इत्यर्थः

आपरमाण्वन्तम् = परमाणुपर्यन्तम्

| | | |
|---|---|---|
| अयुतम् | = | दशसहस्रम् |
| अव्याप्यवृत्तित्वम् | = | स्वाधिकरणवृत्त्यत्यन्ताभावप्रतियोगित्वम्, यथा संयोगः संयोगाधिकरणवृत्त्यत्यन्ताभावस्य प्रतियोगी भवतीति संयोगोऽव्याप्यवृत्तिः |
| पतनम् | = | वृक्षादिविभागजनकव्यापारमारभ्य भूम्यादिसंयोगजनकव्यापारपर्यन्तं सर्वाः क्रियाः, प्रस्रवणमित्यर्थः |
| अतीन्द्रियम् | = | इन्द्रियाग्राह्यम् |
| दैशिकम् | = | देशकृतम्, दिगुपाधिजन्यमित्यर्थः |
| कालिकम् | = | कालकृतम् कालोपाधिजन्यमित्यर्थः |
| मूर्तत्वम् | = | अपरिच्छिन्नपरिमाणवत्त्वम् |
| परिष्पन्दः | = | क्रिया |
| अन्यतरः | = | द्वयोरेकः |
| अपेक्षाबुद्धिः | = | अनेकेषु जायमानैकत्वप्रकारिका बुद्धिः |
| स्यन्दनम् | = | स्रवणरूपा क्रिया (बग्नु क्रिया) |
| सांसिद्धिकं | = | स्वाभाविकम्, जलवृत्तिद्रवत्वम् |
| समवायिकारणम् | = | यस्मिन् समवेतं सत् कार्यमुत्पद्यते तत् समवायिकारणम् यथा कपालः घटस्य समवायिकारणम् |
| असमवायिकारण | = | समवायिकारणे प्रत्यासन्नं कारणमसमवायिकारणम्, यथा कपालद्वयसंयोगः घटस्यासमवायिकारणम् |
| नैमित्तिकम् | = | निमित्ताज्जायमानम् |
| प्रस्रवणम | = | अविच्छेदेन जलादिस्रवणम् |
| वीचिः | = | तरङ्गः |
| कदम्बमुकुलम् | = | कदम्बपुष्पविशेषस्य पत्रविशेषः |

# अभ्यासः

१. **स्वोपज्ञतया विस्तृतमुत्तरं देयम्**

(क) रूपलक्षणं विलिख्य तत्रागतमात्रपदार्थं विविच्य तत्प्रवेशप्रयोजनं प्रतिपादयत ।

(ख) पार्थिवरूपमग्निसंयोगात् कथं परिवर्तते व्याख्यां कुरुत ।

(ग) द्रवत्वलक्षणं विलिख्य तद्द्रवत्वं कुत्र कुत्र वर्तत इति निरूपयत ।

(घ) परिष्कृतशब्दलक्षणं प्रदर्श्य शब्दभेदान् प्रतिपादयत ।

२. **व्याख्यात्मकमुत्तरं देयम्**

(क) गन्धः कथं जलवाय्वोः प्रतीयते ? युक्तिं प्रदर्शयत ।

(ख) स्पर्शलक्षणं सपदकृत्यं निरूपयत ।

(ग) सङ्ख्यालक्षणं प्रतिपाद्य सङ्ख्याया अवधिं प्रदर्शयत ।

(घ) परिमाणस्य परममध्यमभेदेनाष्टौ भेदान् निरूपयत ।

(ङ) संयोगलक्षणं विलिख्य तद्भेदान् प्रदर्शयत ।

(च) दैशिकपरत्वापरत्वे परिचाय्य ते कुत्र तिष्ठत इति प्रतिपादयत ।

(छ) गुरुत्वलक्षणं विलिख्य तदाश्रयः कः ? इति प्रतिपादयत ।

३. **अतिसंक्षिप्तमुत्तरं देयम्**

(क) अभास्वरशुक्लं रूपं कुत्र तिष्ठति ?

(ख) रसः कतिविधः?

(ग) गन्धः कुत्र तिष्ठति ?

(घ) वायोः स्पर्शः कीदृशः ?

(ङ) जलीयरूपादिकं पाकात् परिवर्तते न वा ?

(च) पार्थिवपरमाणुगतमेकत्वं नित्यमनित्यं वा ?

(छ) मध्यमाणुत्वपरिमाणं कुत्र वर्तते ?

(ज) विभागो नित्योऽनित्यो वा ?

(झ) स्नेहः कुत्र वर्तते ?

## ४. रिक्तस्थानं पूरयत

(क) तच्च शुक्ल............सप्तविधम् ।

(ख) त्वगिन्द्रिय..............गुणः स्पर्शः ।

(ग) रूपादिचतुष्टयं..........मनित्यञ्च, अन्यत्रा........मनित्यञ्च ।

(घ) परापरव्यवहार..........परत्वापरत्वे, ते द्विविधे.......च ।

## ५. कक्षाभ्यासः

(क) रूपादेः पाकजत्वापाकजत्वविषये कक्षायां सखिभिः साकं चर्चयत ।

(ख) सङ्ख्याया अवधिविषये शिक्षकेण सह संवादं कुरुत ।

(ग) रूपलक्षणघटकपदानां कृत्यविषयमादाय चर्चां कुरुत ।

# बुद्धिनिरूपणम्, कारणनिरूपणञ्च

**मूलम्– सर्वव्यवहारहेतुर्गुणो बुद्धिर्ज्ञानम् । सा द्विविधा स्मृतिरनुभवश्च । संस्कारमात्रजन्यं ज्ञानं स्मृतिः । तद्भिन्नं ज्ञानमनुभवः । स द्विविधो यथार्थोऽयथार्थश्च ।**

**व्याख्या–** बुद्धिर्नाम सर्वव्यवहारासाधारणकारणं गुणः । अर्थात् सर्वे ये व्यवहारा आहारविहारादयस्तेषामसाधारणं कारणं बद्धिः । बुद्धिं विना कोऽपि व्यवहार एव न चलति । व्यवहारो हि द्विविधः, शब्दप्रयोगात्मकः, स्फुरणात्मकः (क्रियात्मकः) च । शब्दप्रयोगात्मके, स्फुरणात्मके च व्यवहारे ज्ञानमावश्यकं भवति । नहि ज्ञानं विना शब्दं प्रयुङ्क्तेऽतः साधुलक्षणमिदं ज्ञानस्य । लक्षणेऽत्र सर्वपदानुपादाने व्यवहारहेतुत्वस्य दण्डादावपि सत्त्वाद् भवत्यतिव्याप्तिरिति सर्वपदोपादानम् । सर्वव्यवहारहेतुत्वस्य कालादिसाधारणकारणेऽपि सत्त्वात् तत्रातिव्याप्तिवारणायासाधारणमित्यपि देयम् । अत्र लक्षणे गुणपदं न देयं प्रयोजनाभावात् । किन्तु बुद्धेः साङ्ख्याभिमतद्रव्यत्वनिरसनार्थम् गुणपदं दत्तं मूले । सा च बुद्धिः द्विविधा- स्मृतिः, अनुभवश्च । तत्र स्मृतिः संस्कारमात्रजन्यं ज्ञानम् । अर्थाद् इन्द्रियार्थसन्निकर्षाजन्यं संस्कारजन्यं ज्ञानं स्मृतिः । अत्र मात्रपदमिन्द्रियार्थसन्निकर्षमात्रं व्यावर्तयति न तु संस्कारेतरसर्वमिति नासम्भवः । अनुभवश्च स्मृतिभिन्नं ज्ञानम् । यत्किञ्चित् स्मृतिभिन्नत्वस्यापरस्मृतावपि सत्त्वात् तत्रातिव्याप्तिवारणाय स्मृतित्वावच्छिन्नस्मृतिभिन्नत्वे सति ज्ञानत्वमित्यनुभवस्य लक्षणं कार्यम् । सोऽप्यनुभवो द्विविधः- यथार्थः, अयथार्थश्च ।

**मूलम्– तद्वति तत्प्रकारकोऽनुभवो यथार्थः । यथा रजत इदं रजतमिति ज्ञानम् । स एव प्रमेत्युच्यते ।**

**व्याख्या–** द्विविधानुभवेयोः यो यथार्थानुभवः स तद्वति तत्प्रकारकानुभवः । अथात् तद्वति तत्प्रकारकोऽनुभवो यथार्थानुभवः । तद्वति तत्प्रकारक इत्यत्रालुप्तसप्तमीतत्पुरुषसमासो वर्तते । अत्र तद्वतीत्यत्र सप्तम्यर्थो विशेष्यत्वम्, तथा च तद्वद्विशेष्यकत्वे सति तत्प्रकारकत्वे सत्यनुभवत्वं यथार्थानुभवस्य लक्षणम् । तत्पदेन प्रकारीभूतो धर्मो धर्तव्यः । प्रकारश्च भासमानो धर्मः । तथा च तद्–(भासमानधर्म)वद्विशेष्यकत्वे सति तत्–(भासमानधर्म) प्रकारकत्वे सत्यनुभवत्वं यथार्थानुभवस्य लक्षणम् । यथा रजते इदं रजतमिति ज्ञानम् । अत्र ज्ञाने तत्पदेन रजतत्वं गृह्यते, रजतत्वं ह्यत्र भासमानो धर्मो वर्तते । तद्वद् रजतं विशेष्यं वर्तत एवं रजतत्वं प्रकारो वर्तते, एतादृशोऽनुभवो यथाथानुभवः । अथवा 'घटेऽयं घटः' इति ज्ञानम् । अत्र तत्पदेन घटत्वं गृह्यते तद्वद्घटो विशेष्यं वर्तते घटत्वं प्रकार इत्येतादृशानुभवो यथार्थानुभवः । परमत्र रङ्गरजतयोरिमे रजतरङ्गे इति विपरीतज्ञानेऽतिव्याप्तिः । यतो ह्यत्र रङ्गत्ववद्रङ्गविशेष्यकत्वं रङ्गत्वप्रकारकत्वम्, रजतत्ववद्रजतविशेष्यकत्वं रजतत्वप्रकारकत्वमनुभवत्वञ्च वर्तत इति भवत्यतिव्याप्तिः, तद्वारणाय तद्वन्निष्ठविशेष्यतानिरूपितत्वे सति तन्निष्ठप्रकारताकत्वे सत्यनुभवत्वमित्यनुभवसामान्यलक्षणं करणीयम् । तथा सत्यत्र रङ्गत्ववद्रङ्गनिष्ठविशेष्यतानिरूपिता प्रकारता

रजतत्वे वर्तत एवं रजतत्ववद्रजतनिष्ठविशेष्यतानिरूपिता प्रकारता च रङ्गत्वे वर्तत इति नातिव्याप्तिरत्र समूहालम्बनभ्रमे यथार्थानुभवलक्षणस्य । यथार्थानुभव एव प्रमेत्युच्यते ।

**मूलम्– तदभाववति तत्प्रकारकोऽनुभवोऽयथार्थः । यथा शुक्ताविदं रजतमिति ज्ञानम् ।**

**व्याख्या–** अत्रापि पूर्ववत् तदभाववद्विशेष्यकत्वे सति तत्प्रकारकानुभवत्वमयथार्थानुभवस्य लक्षणम् । यथा शुक्तौ इदं रजतमिति ज्ञानमयथार्थानुभवस्तत्र तत्पदेन रजतत्वं ग्रहीतव्यम्, यतो ह्यत्र शुक्तौ भासमानो धर्मो वर्तते रजतत्वम्, तदभाववत्यां शुक्तौ रजतत्वं प्रकारीभूतं वर्तत इति रजतत्वाभाववत्शुक्तिविशेष्यकत्वे सति रजतत्वप्रकारकत्वे सत्यनुभवत्वमस्मिन् ज्ञाने आगतमित्येतादृशभ्रमे लक्षणं समन्वितम् । एवमत्रापि रङ्गरजतयोरिमे रङ्गरजते इत्याकारकसमूहालम्बनप्रमायामपि तत्पदग्राह्यरङ्गत्वाभाववद्रजतविशेष्यकत्वं रङ्गत्वप्रकारकत्वमनुभवत्वञ्च वर्तत इत्येतादृशप्रमायां भ्रमलक्षणस्यातिव्याप्तिर्भवतीति तद्वारणाय तदभाववन्निष्ठविशेष्यतानिरूपिततन्निष्ठप्रकारताकत्वे सत्यनुभवत्वमयथार्थानुभवस्य लक्षणमिति वक्तव्यम् । तथा सत्युक्तप्रमायां रङ्गत्वाभाववद्रजतनिष्ठविशेष्यतानिरूपितायाः प्रकारताया रजतत्वे सत्त्वाद् रङ्गत्वे तादृशप्रकारताया असत्त्वान्न तत्र प्रमायां भ्रमलक्षणस्यातिव्याप्तिः । अयमेवायथार्थानुभवोऽप्रमेत्युच्यते ।

**मूलम्–यथार्थानुभवश्चतुर्विधः प्रत्यक्षानुमित्युपमितिशाब्दभेदात् । तत्करणमपि चतुर्विधं प्रत्यक्षानुमानोपमानशब्दभेदात् ।**

**व्याख्या–** तद्वति तत्प्रकारकानुभवात्मकप्रमारूपो यथार्थानुभवश्चतुर्विधः प्रत्यक्षम्, अनुमितिः, उपमितिः, शाब्दश्चेति । प्रमा नाम यथार्थानुभवोऽर्थाद् यत्र यदस्ति तत्र तस्यानुभवः, यथार्थज्ञानमिति यावत् । तत्करणं प्रमाणम्, प्रमायाः करणं प्रमाणमिति व्युत्पत्तेः । प्रमायाश्चतुर्विधत्वात् तत्करणरूपं प्रमाणमपि चतुर्विधम्, प्रत्यक्षानुमानोपमानशब्दाः प्रमाणानि इति गौतमसूत्रोक्तेः ।

प्र'उपसर्गपूर्वकात् 'माङ् माने' इत्यस्माद्धातोः 'प्रमीयते यथार्थतत्त्वमनेन' इत्यर्थे करणाधिकरणयोश्चेत्यनेन सूत्रेण ल्युटा प्रमाकरणार्थे प्रमाणपदं निष्पद्यते । भावे तु प्रमीयत इति व्युत्पत्त्या **ल्युट् च** इत्यनेन सूत्रेण ल्युटि ज्ञानार्थकं प्रमाणपदं निष्पद्यते । सत्यपि नैकेष्वर्थेषु निष्पन्ने प्रमाणपदे दर्शनजगति एतत्पदमर्थद्वयमभिदधाति-करणार्थं भावार्थञ्च । तत्राापि दर्शनजगति प्रायः प्रमाकरणमिति करणार्थे प्रमाणपदं प्रयुज्यमानं वर्तते । प्रसमभिव्याहृतस्य 'मा'धातोः ज्ञानमर्थः । माधातुसमभिव्याहृतप्रशब्दस्य प्रकर्षोऽर्थः । प्रकर्षश्चात्र याथार्थ्यम् । याथार्थ्यञ्च तद्वति तत्प्रकारकत्वम् । तादृशात् 'मा'धातोः भावे ल्युटि निष्पन्नस्य प्रमाणशब्दस्य 'प्रमा' इत्यर्थः । अथ च करणे ल्युटि निष्पन्नस्य प्रमाणशब्दस्य प्रमाकरणमित्यर्थः । प्रमाणसङ्ख्याविषये विवदन्ते दार्शनिकाः । तत्र चार्वाकाः प्रत्यक्षमेकमेव प्रमाणमिति वदन्ति । बौद्धाः, वैशेषिकाश्च प्रत्यक्षानुमाने द्वे प्रमाणे स्तः इति वदन्ति । नैयायिकैकदेशिनः प्रत्यक्षानुमानोपमानानि त्रीणि प्रमाणानीति वदन्ति । प्रत्यक्षानुमानोपमानशब्दाश्चत्वारि प्रमाणानीति नैयायिका वदन्ति । प्रत्यक्षानुमानोपमानशब्दार्थापत्तयः पञ्च प्रमाणानीति प्राभाकराः । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धयः षट् प्रमाणानीति भाट्टा वेदान्तिनश्च वदन्ति । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिसम्भवैतिह्यान्यष्टौ प्रमाणानि इति पौराणिकाः । प्रत्यक्षानुमानोपमानशब्दार्थापत्त्यनुपलब्धिसम्भवैतिह्यचेष्टा नव प्रमाणानीति तान्त्रिका वदन्ति । एवं रीत्या

प्रमाणसङ्ख्याविषये दार्शनिकानां मतभेदो दृश्यते । प्रत्यक्षानुमानोपमानशब्दातिरिक्तानामर्थापत्त्यादीनां प्रमाणानां यथायथं एतेष्वेवान्तर्भावसम्भवान्नैतान्यतिरिक्तानि प्रमाणानीति नैयायिकानां निष्कृष्टिः ।

**मूलम्– असाधारणं कारणं करणम् ।**

**व्याख्या–** करणपदं हि पुंसि क्लीबे च प्रयुज्यमानं वर्तते। पुंसि प्रयुज्यमानस्य करणशब्दस्यार्थः शूद्रावैश्ययोर्जातजातिविशेष इति। यथा अमरकोशे **शूद्राविशोस्तु करणः** । क्लीबे प्रयुज्यमानं करणपदं हि प्रमुखसाधने प्रयुज्यते । परमत्र ध्ययो विषयो यत् क्लीबे प्रयुज्यमानं हि करणपदं 'क्रियतेऽनेन' इति विग्रहे डुकृञ् करणे इत्यस्माद् धातोर्ल्युटि सिद्धचति चेत् पुंसि प्रयुज्यमानं करणपदं किरति इति कीर्यते इति वा विग्रहे कृविक्षेपे धातोर्युचि निष्पद्यते ।

एतावता यथार्थज्ञानस्य प्रकृष्टं साधनमेव प्रमाणमिति फलितोऽर्थः। प्रकारान्तरेण करणनिष्पत्तिः द्विधा कर्तुं शक्यते- व्यापारवदसाधारणं कारणं करणम्, फलायोगव्यवच्छिन्नं कारणं करणम्। असाधारणं कारणमपि द्विविधम्- व्यापारसहितं, व्यापाररहितञ्च । यद्व्यापारसहितं भवति, तदेव करणमुच्यते । व्यापाररहितन्तु केवलं कारणं भवति न तु करणम्। क्रमश उदाहरणम्- घटकार्यं प्रति कपालद्वयं करणम्, तत्संयोगश्च व्यापारः। एवमेव दण्डः करणम्, दण्डभ्रमिः व्यापारः । लक्षणान्तरे तु फलायोगव्यवच्छिन्नं कारणमेव करणं भवितुमर्हति, अत्र च कपालसंयोग एव करणं न तु कपालादिकम्। 'साधकतमं करणम्' इत्यनेन सूत्रेण पूर्वोक्तलक्षणद्वयमपि निष्पद्यते । एतावता प्रमायाः करणं प्रमाणमिति निश्चितम् । करणं तावद्विकल्पेन व्यापारसहितं व्यापाररहितं वा भवेदिति । तथा चासाधारणं कारणं करणम् इति मूलोक्तं सङ्गच्छते ।

**मूलम्– कार्यनियतपूर्ववृत्ति कारणम् ।**

**व्याख्या–** अन्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वमिति कारणलक्षणम्- कार्यपूर्वक्षणे नियमेन वर्तमानं सत् कार्यजननाय (कार्योत्पत्तये) यत्किञ्चिद् व्यापारं कुर्वत् किंवा स्वयमेव व्यापाररूपं सद् अनन्यथासिद्धं वस्तु कारणं कथ्यते । यथा घटरूपकार्यं प्रति दण्डादिकम् । तथा हि घटरूपकार्यस्य पूर्वक्षणे नियमेन वर्तमानानि घटरूपकार्यजननाय भ्रमिरूपव्यापारं कुर्वन्ति दण्डचक्रचीवरकुलालकपालादीन्यनन्यथासिद्धानि सन्ति घटरूपकार्यं प्रति कारणानि भवन्ति। एवमन्यत्रापि बोध्यम्। अत्र लक्षणे यदि अन्यथासिद्धिशून्यत्वविशेषणं न दीयते तदा दण्डत्वाद्यन्यथासिद्धावतिव्याप्तिः स्यादतस्तद्विशेषणं दत्तम् । नियतपदानुपादानेऽनियतरासभादावतिव्याप्तिस्तदर्थं नियतपदं दत्तम्। कार्येऽतिव्याप्तिवारणाय पूर्ववृत्तीति । आकाङ्क्षावारणाय कार्येति । तथा चान्यथासिद्धिशून्यत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वमिति कारणलक्षणम् निर्दुष्टम् । अशंतः कारणलक्षणाक्रान्तं कार्यं प्रत्युदासीनं वस्त्वन्यथासिद्धमित्युच्यते। अर्थात् कार्यपूर्ववृत्ति सत् कार्यजननायानावश्यकं वस्त्वन्यथासिद्धम्। तथा चावश्यक्लृप्तनियतपूर्ववृत्तिभिरेव कार्यसम्भवे तत्सहभूतं सर्वमप्युदासीनं वस्त्वन्यथासिद्धम् ।

**मूलम्– कार्यं प्रागभावप्रतियोगि ।**

**व्याख्या–** प्रागभावप्रतियोगित्वं कार्यत्वम् । यद्वस्तु प्रागभावस्य प्रतियोगि भवति तद्वस्तु कार्यं कथ्यते । ननु तर्हि

प्रागभावस्य प्रतियोगि किं भवतीति चेद्, यद् उत्पद्यते तत् प्रागभावस्य प्रतियोगि भवति । यथा कपालस्य कार्यं घटः । घटोत्पत्तिपूर्वकाले कपाले घटो नासीत्, कुलालस्य कपालविषयककृत्या कपाले घट उत्पद्यतेऽत एव कुलालस्य कपालविषयककृतिकालं यावत् तत्र घटो भविष्यतीति प्रतीतिर्जायते स एव भविष्यतीति प्रतीतिविषयीभूतोऽभावो घटप्रागभावः तस्य प्रतियोगी च घटः (य उत्पद्यते स प्रागभावप्रतियोगीति नियमात्), प्रतियोगित्वं घटे तस्मात् प्रागभावप्रतियोगित्वस्य घटादौ विद्यमानत्वादुत्पद्यमानं घटादिकं कार्यम् ।

**मूलम्– कारणं त्रिविधं समवाय्यसमवायिनिमित्तभेदात् ।**

**व्याख्या–** अनन्यथासिद्धकार्यनियतपूर्ववृत्तिरूपं कारणं त्रिविधं समवायिकारणम्, असमवायिकारणम्, निमित्तकारणञ्चेति । तत्र समवायिकारणमेवोपादानकारणमित्युच्यते । समवायिकारणञ्च द्रव्यमेव भवति । असमवायिकारणञ्च गुणकर्मणी । निमित्तकारणन्तु यथायथं पारिमाण्डल्यभिन्नं सर्वं वस्तुजातं भवितुं शक्नोति । समवाय्यसमवायिनिमित्तकारणानां प्रत्येकं लक्षणमुदाहरणञ्च दर्शयति–

**मूलम्– यत्समवेतं कार्यमुत्पद्यते तत्समवायिकारणम् । यथा तन्तवः पटस्य, पटश्च स्वगतरूपादेः ।**

**व्याख्या–** यत्समवेतं सत् कार्यमुत्पद्यतेऽर्थाद्यस्मिन् समवेतं सत् कार्यमुत्पद्यते तत् समवायिकारणम् । यथा घटरूपं कार्यं समवायेन कपाले वर्तमानं सदुत्पद्यतेऽतः कपालं घटस्य समवायिकारणम् । एवमेव घटरूपात्मकं कार्यं घटे समवायेन वर्तमानं सदुत्पद्यतेऽतो घटरूपं प्रति घटः समवायिकारणम् । एतावता सिद्धं यत् कार्यं यस्मिन् समवायेन विद्यमानं सदुत्पद्यते तत्कारणं तत्कार्यस्य समवायिकारणमिति । अत्रेदं बोध्यम्- समवायिकारणे सर्वदैव कार्यं समवायेनैव तिष्ठति । तत्र कार्यं यदि द्रव्यात्मकं तदा तद्द्रव्यं स्वावयवे स्वसमवायिकारणे समवायेन तिष्ठति, अवयवावयविनो समवायात् । यदि च कार्यं गुणात्मकं कर्मात्मकं वा तदा तद्गुणात्मकं कर्मात्मकञ्च कार्यं स्वसमवायिकारणे स्वाश्रये द्रव्ये समवायेनैव तिष्ठति, गुणगुणिनोः, क्रियाक्रियावतोश्च समवायात् । अतः समवायेन कार्यं प्रति तादात्म्येन द्रव्यस्य कारणत्वात् समवायसम्बन्धावच्छिन्नकार्यतानिरूपिततादात्म्यसम्बन्धावच्छिन्ना-कारणता समवायिकारणतेति निष्कृष्टं लक्षणं वक्तुं शक्यते ।

**मूलम्– कार्येण कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायिकारणम् । यथा तन्तुसंयोगः पटस्य तन्तुरूपं पटरूपस्य ।**

**व्याख्या–** कार्येण सहैकस्मिन्नर्थे कारणेन वा सहैकस्मिन्नर्थे समवेतं सत् कारणमसमवायि कारणम् । अर्थाद् द्विविधमसमवायिकारणलक्षणम् । तत्राद्यं– कार्यस्य समवायिकारणे समवायेन सम्बन्धेन वर्तमानं सत् कार्यनियतपूर्ववृत्ति कारणमसमवायिकारणम् । यथा घटं प्रति कपालद्वयसंयोगः, कपालद्वयसंयोगो हि घटकार्यस्य समवायिकारणे कपाले समवायेन सम्बन्धेन तिष्ठतीति कपालद्वयसंयोगः घटकार्यस्यासमवायिकारणम् । द्वितीयन्तु कारणेन सहैकस्मिन्नर्थे समवेतं सत्कारणमसमवायिकारणम् । यथा घटरूपं प्रति कपालरूपमसमवायिकारणम् । अत्र कारणपदेन स्वसमवायिकारणं ग्राह्यम् । स्वम् = कार्यम्, तस्य समवायिकारणमिति यावत् । तथा च कारणेन = घटरूपस्य समवायिकारणेन घटेन सममेकस्मिन्नर्थे कपाले समवायेन सम्बन्धेन वर्तमानं कपालरूपं

घटरूपस्यासमवायिकारणम् । तथा चावयविगुणादिकं प्रत्यवयवगुणादिकमसमवायिकारणम् ।

असमवायिकारणस्यैकलक्षणन्तु समवायिकारणे प्रत्यासन्नं कारणमसमवायिकारणमिति । अर्थाद् यत्कारणं समवायिकारणे समवायसम्बन्धेन, स्वसमवायिसमवेतत्वसम्बन्धेन वा विद्यते तत्कारणमसमवायिकारणम् । कार्यस्य समवायिकारणे समवायेन वर्तमानस्य कारणस्योदाहरणम्- घटस्यासमवायिकारणं कपालद्वयसंयोगः, यतो हि कपालद्वयसंयोगं विना घटः कदापि नोत्पद्यत इति कपालद्वयसंयोगो घटस्यासमवायिकारणम्, स च कपालद्वयसंयोगः घटसमवायिकारणे कपाले समवायेन वर्तमानः सनेव घटस्य कारणं भवति । घटकपालयोरवयवावयवित्वादवयवावयविनोश्च समवायात् कपालद्वयसंयोगो घटस्यासमवायिकारणम् । एवमेव पटस्यासमवायिकारणं तन्तुद्वयसंयोगः । मठस्यासमवायिकारणमिष्टिकादिसंयोग इति । एवं कार्यस्य समवायिकारणे स्वसमवायिसमवेतत्वसम्बन्धेन वर्तमानस्य कारणस्य उदाहरणम्- घटरूपस्यासमवायिकारणं कपालरूपम्, तद्धि कार्यस्य घटरूपस्य समवायिकारणे घटे स्वसमवायिसमवेतत्वसम्बन्धेन वर्तमानत्वात् ।

**अत्रेदं बोध्यम्–** समवायिकारणे प्रत्यासन्नत्वं (वर्तमानत्वं) द्विधा = द्विप्रकारेणेत्यर्थः । अर्थात् समवायिकारणे द्विविधप्रत्यासत्त्या आसन्नं कारणमसमवायिकारणमित्यर्थः । तत्राद्यं यथा- घटं प्रत्यसमवायिकारणं कपालद्वयसंयोगः, स च कपालद्वयसंयोगो घटस्य समवायिकारणे कपाले समवायसम्बन्धेन वर्ततेऽतः समवायसम्बन्धावच्छिन्न-घटत्वावच्छिन्नघटनिष्ठ-कार्यतानिरूपित-समवायसम्बन्धावच्छिन्न-कपालद्वयसंयोगनिष्ठा कारणता असमवायिकारणतेत्यर्थः । एवमेव पटासमवायिकारणे तन्तुद्वयसंयोगेऽपि बोध्यम् । अत्र कार्यं कारणञ्चैकस्मिन्नधिकरणे कपालादौ समवायेन प्रत्यासन्नमस्ति । इदमेव कार्यैकार्थप्रत्यासत्त्या कारणत्वमित्यस्य तात्पर्यम् । कार्यस्य समवायिकारणरूपे एकस्मिन्नर्थे कार्यकारणयोः प्रत्यासन्नत्वं (वर्तमानत्वं) इत्यर्थः ।

एवमेव कपालरूपं घटरूपस्यासमवायिकारणं वर्तते, परं तत्र घटरूपस्य समवायिकारणे घटे कपालरूपं समवायेन वर्तमानं नास्तीति, अतस्तत्र कश्चन द्वितीयः सम्बन्धः कल्पनीयः । तथा च कार्यसमवायिकारणे स्वसमवायिसमवेतत्वसम्बन्धेन प्रत्यासन्नं कारणमसमवायिकारणम् । यथा घटरूपस्य समवायिकारणे घटे स्वसमवायिसमवेतत्वसम्बन्धेन प्रत्यासन्नं सत् कपालरूपं घटरूपस्यासमवायिकारणं भवति । तत्र स्वम् = कपालरूपं, तत्समवायी = कपालः, तत्र समवेतो घटः, समवेतत्वं घटे वर्ततेऽतः समवायसम्बन्धेन घटरूपात्मकं कार्यं प्रति स्वसमवायिसमवेतत्वसम्बन्धेन वर्तमानं कपालरूपात्मकं कारणमसमवायिकारणमिति । तथा च समवायसम्बन्धेन कार्यसमवायिकारणे स्वसमवायिसमवेतत्वसम्बन्धेन प्रत्त्यासन्नं कारणमसमवायिकारणमिति द्वितीयासमवायिकारणस्य स्वरूपम् । यथा कार्यैकार्थप्रत्यासत्तिरित्यनेन कार्यस्य समवायिकारणरूपे एकस्मिन्नर्थे कार्यकारणयोरुभयोः प्रत्यासत्तिरित्यर्थो बुद्ध्यते, तथा कारणैकार्थप्रत्यासत्तिरित्यनेनापि कारणस्य समवायिकारणे कार्यकारणयोरुभयोः प्रत्यासत्तिरित्यर्थः करणीयः, तथा चोभयत्र मध्यमपदलोपी समासः कर्तव्यः । तद्व्युत्पत्तिश्च- कार्यसमवायिकारणे एकस्मिन्नर्थे प्रत्यासत्तिरिति, एवमेव कारणस्य समवायिकारणे एकस्मिन्नर्थे प्रत्यासत्तिरिति । तथा सति कपालरूपं घटरूपस्यासमवायिकारणमित्यत्र कारणस्य कपालरूपस्य समवायिकारणे कपाले कार्यकारणयोः घटरूपकपालरूपयोः सामानाधिकरण्यं स्थापनीयम् । तच्च तत्र कपालरूपस्य कारणस्य समवायिकारणे कपाले घटरूपात्मकं कार्यं स्वसमवायिसमवायसम्बन्धेन स्थापनीयम् (स्वम् = घटरूपं, तत्समवायी = घटः, तस्य समवायः कपाले इति), कपालरूपात्मकं कारणञ्च समवायेनेति कार्यस्य सम्बन्धः

परम्परासम्बन्धः, कारणस्य सम्बन्धस्तु समवायः। अयमेव कारणैकार्थप्रत्यासत्त्या कारणत्वमित्यस्याभिप्रायो भवितुं शक्नोति। मुक्तावलीकृतापि कारणैकार्थप्रत्यासत्तिस्थले स्वसमवायिसमवायसम्बन्धस्यौवोल्लेखात्। परमत्रोपरि व्याख्यायां कार्यस्य सम्बन्धः समवायः, कारणस्य तु सम्बन्धः स्वसमवायिसमवेतत्वरूपः परम्परासम्बन्धः इति प्रतिपादितम्, अन्यत्राप्येतद्ग्रन्थव्याख्यादिष्वप्येतादृश एव सम्बन्ध उल्लिखितो दृश्यते। तथा च कार्यतावच्छेदककारणतावच्छेदकसम्बन्धभेदाद् विरोधः प्रतिभाति, तथाप्युभयथापि कार्यकारणयोः सामानाधिकरण्यसम्भवादुभावेव विध्यवलम्बितुं शक्याविति न काचित् क्षतिः। इत्थं रीत्या द्वितीयप्रत्यासत्तिस्थले कार्यस्य समवायिकारणे कार्यकारणयोः सामानाधिकरण्यमथवा कारणस्य समवायिकारणे कार्यकारणयोः सामानाधिकरण्यमित्युभयथापि कर्तुं शक्यते किन्तु यदि समवायेन कार्यस्याधिकरणे कारणं स्थापनीयं तदा कारणस्य सम्बन्धः स्वसमवायिसमवेतत्वं कल्पनीयं यदि च कार्यस्याधिकरणं स्वसमवायिसमवायसम्बन्धेन स्वीक्रियते तदा कारणस्य सम्बन्धः समवायमात्रमिति विवेकः कार्यः। तथा च समवायस्वसमवायिसमवा-यान्यतरसम्बन्धावच्छिन्नकार्यतानिरूपित–समवायसम्बन्धावच्छिन्नकारणता-असमवायिकारणस्य लक्षणमथवा समवायसम्बन्धावच्छिन्न–कार्यतानिरूपितसमवाय–स्वसमवायिसमवेतत्वान्यतरसम्बन्धावच्छिन्न कारणता असमवायिकारणस्य लक्षणमित्युभयथापि कर्तुं शक्यते। तथा च क्वचित् समवायसम्बन्धेन क्वचिच्च स्वसमवायिसमवेतत्वसम्बन्धेन समवायिकारणे प्रत्त्यासन्नमात्मविशेषगुणभिन्नं कारणमसमवायिकारणमिति।

अत्र यद्यसमवायिकारणस्य लक्षणं समवायिकारणे प्रत्यासन्नकारणत्वमात्रं स्वीक्रियते तदास्य लक्षणस्यातिव्याप्तिरूपदोषः स्यात् यतो हि पटात्मककार्यं प्रति यथा तन्तुद्वयसंयोगोऽसमवायिकारणं भवति, पटसमवायिकारणतन्तुवृत्तित्वात्, एवमेव तुरीतन्तुसंयोगोऽपि पटसमवायिकारणे तन्तौ वर्तत इति तुरीतन्तुसंयोगोऽपि पटस्यासमवायिकारणं स्यात्, तत्र यदि तुरीतन्तुसंयोगः पटासमवायिकारणमिति स्वीक्रियते तदा तुरीतन्तुसंयोगे नष्टे पटोऽपि नश्येत्, समवायिकारणनाशात् कार्यनाश इति नियमात। यथा तन्तुद्वयसंयोगे नष्टे पटो नश्यति। परन्तु तुरीतन्तुसंयोगे नष्टेऽपि पटस्य नाशाभावात्तुरीतन्तुसंयोगो न पटासमवायिकारणमिति पटासमवायिकारणलक्षणस्य तुरीतन्तुसंयोगेऽतिव्याप्तिर्मन्तव्या। एवमेवाभिघातसंयोगं प्रति यथा कर्मासमवायिकारणं भवति न तथा वेगोऽप्यसमवायिकारणं, यतो हि वेगे नष्टेऽप्यभिघातसंयोगस्य नाशाभावादभिघातसंयोगं प्रति वेगो नासमवायिकारणं परं तत्र वेगेऽभिघातसंयोगासमवायिकारणलक्षणस्य गमनादतिव्याप्तिः स्याद्, यतो हि वेगोऽभिघातस्य समवायिकारणे हस्तादौ दण्डादौ वा समवायेन वर्तत इत्यभिघातसंयोगस्यासमवायिकारणलक्षणस्य वेगे सत्त्वादतिव्याप्तिरिति चेद्, न, तत्रासमवायिकारणलक्षणस्य भिन्नभिन्नस्य स्वीकारात्। अर्थाद् यदि पटासमवायिकारणलक्षणं कर्तव्यं तदा तुरीतन्तुसंयोगभिन्नत्वे सति पटसमवायिकारणे प्रत्यासन्नं कारणं पटासमवायिकारणमिति पटासमवायिकारणलक्षणम्। यदि चाभिघातसंयोगासमवायिकारणलक्षणं कर्तव्यं तदा वेगभिन्नत्वे सत्यभिघातसंयोगसमवायिकारणे प्रत्यासन्नं कारणमभिघातसंयोगासमवायिकारणलक्षणमिति भिन्नं भिन्नमसमवायिकारणलक्षणं कार्यमिति। ननु जानाति, इच्छति, यतत इति क्रमसम्भवादिच्छां प्रति ज्ञानस्याप्यसमवायिकारणत्वप्रसङ्गः स्यात् परम् आत्मविशेषगुणानां कुत्राप्यसमवायिकारणत्वाभावात्तत्रातिव्याप्तिरिति चेन्न, आत्मविशेषगुणानां कुत्राप्यसमवायिकारणत्वाभावादेवात्मविशेषगुणभिन्नत्वविशेषणन्तु सर्वत्रासमवायिकारणलक्षणे देयम्। नन्वेवमेव तुरीतन्तुसंयोगभिन्नत्वमित्यपि विशेषणं सर्वत्र दीयतामिति चेन्न, तुरीतन्तुसंयोगस्तु तुरीपटसंयोगं

प्रत्यसमवायिकारणं भवत्येव। एवमेव वेगो द्वितीयादिवेगं प्रत्यसमवायिकारणमिति तद्भिन्नत्वं न सर्वत्रासमवायिकारणलक्षणे विशेषणं देयम्। आत्मविशेषगुणानान्तु कुत्राप्यसमवायिकारणत्वाभावात्तद्भिन्नत्वं सर्वत्रासमवायिकारणलक्षणे विशेषणं देयमिति।

**मूलम्– तदुभयभिन्नं कारणं निमित्तकारणम्। यथा तुरीवेमादिकं पटस्य।**

**व्याख्या–** समवाय्यसमवायिकारणभिन्नं कारणं निमित्तकारणमित्यर्थः। तच्च निमित्तकारणं द्विविधं साधारणनिमित्तमसाधारणनिमित्तञ्च, साधारणनिमित्तं कारणं कार्यमात्रं प्रति समानमेव। अर्थात् कार्यत्वावच्छिन्नकार्यतानिरूपितकारणता साधारणनिमित्तकारणता तद्वत् कारणं साधारणनिमित्तकारणम्। तद्यथा-

**ईशस्तज्ज्ञानयत्नेच्छा कालोऽदृष्टं दिगेव च।**

**प्रागभावप्रतिबन्धकाभावौ कार्ये साधारणाः स्मृताः॥** इति

एतानि कारणानि सधारणकारणानीत्यर्थः। असाधारणञ्च कार्यत्वातिरिक्तधर्मावच्छिन्नकार्यतानिरूपितकारणता असाधारणकारणता तद्वत् कारणमसाधारणकारणम्। यथा घटं प्रति दण्डादिकम्।

**मूलम्– तदेतत्त्रिविधकारणमध्ये यदसाधारणं कारणं तदेव करणम्।**

**व्याख्या–** उपर्युक्तत्रिविधानां समवाय्यसमवायिनिमित्तकारणानां मध्ये यदसाधारणं कारणं तदेव करणमिति। असाधारणत्वञ्च व्यापारवत्त्वम्। अतो व्यापारवदसाधारणं कारणं करणमिति। व्यापारत्वञ्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकत्वम्। यथा दण्डभ्रमिः घटं प्रति दण्डस्य व्यापारः। एतच्च प्राचीनमतानुरोधेन किंवा अर्वाचीनमतानुरोधेनेति। प्रायो नवीनास्तु फलायोगव्यवच्छिन्नकारणत्वं करणत्वमित्याचक्षते। तर्कसङ्ग्रहकारेण यथेच्छं प्राचीननवीनानां मतमवलम्बितम्। यथा तत्रभवता अन्नम्भट्टेन प्रत्यक्षविषये प्राचीनानां मतमवलम्बितं लभ्यतेऽत सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षं तत्करणमिन्द्रियं तस्मादिन्द्रियं प्रत्यक्षप्रमाणमित्युक्तं चेदनुमितिकरणविषये तु फलायोगव्यवच्छिन्नकारणत्वं करणत्वमिति नवीनमतमादाय लिङ्गपरामर्शस्यैव अनुमितिकरणत्वं प्रतिपादितमस्ति।

**पदानामर्थपरिचयः–**

संस्कारः = अनुभवजन्यस्मृतिहेतुगुणविशेषः

प्रकारः = भासमानो धर्मः, भासमानवैशिष्ट्यप्रतियोगी

विशेष्यम् = विशिष्यते=भेद्यते गुणादिभिरसौ व्यवच्छेद्यो धर्मिपदार्थः विशेष्यम्, भासमानवैशिष्ट्यानुयोगि

विशेषणम् = विशिष्यतेऽनेनेति भेदको धर्मः, विद्यमानत्वे सतीतरव्यावर्तको धर्मः

| | |
|---|---|
| स्मृतिः | = संस्कारमात्रजन्यं ज्ञानम् |
| अनुभवः | = स्मृतिभिन्नं ज्ञानम् |
| भासमानम् | = ज्ञायमानम् |
| रजतम् | = रूप्यम् (चाँदी इति भाषायाम्) |
| रङ्गम् | = त्रपुः, धातुविशेषः (राङ् इति भाषायाम् ) |
| शुक्तिः | = जलजन्तुविशेषः (सिपी इति भाषायाम्) |
| भ्रमः | = भ्रान्तिः, तदभाववति तत्प्रकारकंज्ञानम् |
| प्रमा | = यथार्थानुभवः, तद्वति तत्प्रकारकोऽनुभवः |
| प्रत्यक्षम् | = इद्रियार्थसन्निकर्षजन्यं ज्ञानम् |
| अनुमितिः | = परामर्शजन्यं ज्ञानम् |
| उपमितिः | = सादृश्यज्ञानजन्यं ज्ञानम् |
| शाब्दः | = पदज्ञनानजन्यं ज्ञानम् |
| अर्थापत्तिः | = यद् येन विनानुपपन्नं तत्तेनैवाक्षिप्यते इत्यनुपपन्नार्थकल्पनं ज्ञानम् |
| अनुपलब्धिः | = उपलब्ध्यभावः, तस्य ज्ञानेनाभावस्य ज्ञानं भवति । |
| समभिव्याहृतम् | = सहोच्चरितम् निकटोच्चरितम् |
| अन्यथासिद्धिः | = अशंतः कारणलक्षणाक्रान्तं कार्यं प्रत्युदासीनं वस्त्वन्यथासिद्धमित्युच्यते |
| चीवरः | = तन्तुविशेषः |
| रासभः | = गदर्दभः (खच्चर इति भाषायाम्) |
| क्लृप्तम् | = स्वीकृतम् |
| उदासीनम् | = तटस्थम् |
| पारिमाण्डल्यम् | = अणुपरिमाणम् |
| तुरी | = तन्तुवायस्य काष्ठनिर्मितोपकरणविशेषः |
| अदृष्टम् | = धर्माधर्मौ |
| अर्वाचीनम् | = माध्यमिककालिकम् |

## अभ्यासः

१. **स्वोपज्ञतया विवेचनात्मकमुत्तरं देयम्**

(क) सपदकृत्यं यथार्थानुभवलक्षणं सोदाहरणं प्रतिपादयत ।

(ख) अयथार्थानुभवलक्षणं परिष्कृत्योदाहरणं प्रस्तुत ।

(ग) कारणलक्षणं विलिख्य कारणभेदान् सोदाहरणं निरूपयत ।

(घ) असमवायिकारणलक्षणं सपदकृत्यं विवेचयत ।

२. **व्याख्यात्मकमुत्तरं देयम्**

(क) बुद्धिलक्षणं विलिख्य बुद्धिभेदान् प्रस्तुत ।

(ख) स्मृतेर्लक्षणं सपदकृत्यं निरूपयत ।

(ग) करणलक्षणं सोदाहरणं सपदकृत्यञ्च प्रतिपादयत ।

(घ) समवायिकारणलक्षणं सोदाहरणं सपदकृत्यञ्च प्रतिपादयत ।

(ङ) व्यापारलक्षणं सोदाहरणं सपदकृत्यञ्च निरूपयत ।

३. **अतिसङ्क्षिप्तमुत्तरं देयम्**

(क) बुद्धिः कस्य कारणम् ?

(ख) स्मृतेः कारणं किम् ?

(ग) अनुभवः कतिविधः ?

(घ) रङ्गरजतयोरिमे रजतरङ्गे इति ज्ञानं यथार्थमयथार्थं वा ?

(ङ) फलायोगव्यवच्छिन्नं कारणं करणमिति के स्वीकुर्वन्ति ?

(च) घटकार्यस्य करणव्यापारौ कौ ?

४. **कक्षाभ्यासः**

(क) बुद्धेर्यथार्थायथार्थविषये सखिभिः सह कक्षायां चर्चयत ।

(ख) अयथार्थानुभवविषये कक्षायां सतीर्थ्यैः सह विमर्शङ्कुरुत ।

(ग) स्मृतिविषये एकं लेखं विरचय्य गुरवे प्रदर्शयत ।

(घ) सभेदसंस्कारमादाय गुरुणा सतीर्थ्यैः सह संवादो विधेय ।

# प्रत्यक्षप्रमातत्करणनिरूपणम्

**मूलम्– तत्र प्रत्यक्षज्ञानकरणं प्रत्यक्षम् । इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षम् (ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्) । तद्द्विविधम्– निर्विकल्पकं सविकल्पकञ्चेति ।**

**व्याख्या–** चतसृषु प्रमासु मध्ये प्रत्यक्षप्रमेन्द्रियजन्या, तथा च भ्रमभिन्नमिन्द्रियजन्यं ज्ञानमेव प्रत्यक्षप्रमा । यद्यपि न्यायमते मनसोऽपीन्द्रियत्वेन मनसो ज्ञानमात्रं प्रति कारणत्वेन चेन्द्रियजन्यज्ञानत्वमिदं लक्षणं प्रत्यक्षभिन्नेऽनुमित्यादिज्ञानमात्रेऽतिव्याप्तं, तथापि तत्र मनसि द्वौ धर्मौ स्तः, एकं मनस्त्वम्, अपरञ्चेन्द्रियत्वम् । यत्र ज्ञाने मनस्त्वेन मनः करणं न तत् प्रत्यक्षम्, किन्तु इन्द्रियत्वेन यत्र ज्ञाने मनः करणं तदेव ज्ञानं प्रत्यक्षम् । अत एवेन्द्रियजन्यं ज्ञानं प्रत्यक्षमिति । इन्द्रियाणां षड्विधत्वादिन्द्रियजन्यं प्रत्यक्षमपि षड्विधम् । तत्र षड्विधानीन्द्रियाणि घ्राणरसनचक्षुस्त्वक्श्रोत्रमनांसि, तैर्जायमानानि षड्विधानि प्रत्यक्षाणि घ्राणजरासनचाक्षुषस्पार्शनश्रौत्रमानसानि सन्ति ।

नन्वीश्वरप्रत्यक्षेऽव्याप्तमीश्वरस्येन्द्रियाभावादिति चेन्न, लक्षणस्यास्य जीवप्रत्यक्षमात्रपरत्वात् । अत एव महर्षिगौतमः सूत्रयति- इन्द्रियार्थसन्निकर्षोत्पन्नं ज्ञानमव्यपदेश्यमव्यभिचारिव्यवसायात्मकं प्रत्यक्षम् इति । अत्र च सूत्रे इन्द्रियार्थसन्निकर्षोत्पन्नम्, अव्यभिचारि, ज्ञानमिति पदत्रयं प्रत्यक्षस्य लक्षणपरम्, अव्यपदेश्यं व्यवसायात्मकञ्चेति पदद्वयं प्रत्यक्षस्य विभागपरम्, प्रत्यक्षमिति पदं लक्ष्यपरं वर्तते । तत्र व्यभिचारिज्ञानं भ्रमात्मकं ज्ञानम् । तच्च विषयमन्तरा जायतेऽतस्तज्ज्ञानं भ्रमः, भ्रमभिन्नमिन्द्रियजन्यञ्च ज्ञानं प्रत्यक्षं प्रमा । तच्च प्रत्यक्षप्रमात्मकं ज्ञानं द्विविधम्- अव्यपदेश्यम् = निर्विकल्पकम्, व्यवसायात्मकम् = सविकल्पकम् । तत्र निर्विकल्पकं ज्ञानं शब्देन न भासते, यच्च ज्ञानं शब्देन प्रतिपादयितुं शक्यते, तज्ज्ञानं सविकल्पकं वर्तते । यच्च ज्ञानं शब्देनेदमित्थमित्यादिरूपेण प्रतिपादयितुं न शक्यते तदिन्द्रियसन्निपातानन्तरं प्रथमतो जायमानं सूक्ष्मं प्रत्यक्षयितुमशक्यं ज्ञानं निर्विकल्पकम् । यच्च घटोऽयं नील इत्यादिरूपेण शब्देन भासमानं वैशिष्ट्यावगाहि (विशेषणविशेष्ययोः सम्बन्धावगाहि) ज्ञानं तत् सविकल्पकम् = व्यवसायात्मकं ज्ञानम् । एवञ्च महर्षिणैवेन्द्रियजन्यस्य ज्ञानस्य प्रत्यक्षत्वप्रतिपादनादिदं लक्षणं जीवप्रत्यक्षमात्रपरम् । अर्थादस्य लक्षणस्य लक्ष्यं जीवप्रत्यक्षमात्रम् । ईश्वरप्रत्यक्षमस्य लक्षणस्य न लक्ष्यम् । यदि च प्रत्यक्षसामान्यस्य प्रकरणत्वादत्रेश्वरप्रत्यक्षसाधारणलक्षणमिष्टमित्युच्यते, तदा "ज्ञानाकरणकं ज्ञानं प्रत्यक्षम्" इति लक्षणं करणीयम् । अनुमितौ ज्ञाने व्याप्तिज्ञानं करणम्, उपमितौ ज्ञाने सादृश्यज्ञानं करणम्, शाब्दे ज्ञाने पदज्ञानं करणम्, स्मृतौ ज्ञाने अनुभवात्मकं ज्ञानं करणं भवतीति तत्तज्ज्ञानं ज्ञानकरणकं ज्ञानमित्युच्यते । जीवप्रत्यक्षस्य तु ज्ञानस्य करणानीन्द्रियाणि भवन्तीति जीवप्रत्यक्षं ज्ञानं ज्ञानाकरणकं ज्ञानमिति तत्र लक्षणसमन्वयः । ईश्वरप्रत्यक्षस्य ज्ञानस्य नित्यत्वेनाजन्यत्वात्तत्र कस्यापि करणस्यापेक्षा न भवतीति तदीश्वरप्रत्यक्षं ज्ञानाकरणकं

ज्ञानमिति तत्रापि लक्षणसमन्वयः । सा च प्रत्यक्षप्रमा द्विविधा- निर्विकल्पकात्मिका सविकल्पकात्मिका चेति । द्वयोः प्रत्यक्षप्रमयोर्निर्विकल्पकसविकल्पकयोर्लक्षणोदाहरणे प्रस्तूयेते–

**मूलम्– तत्र निष्प्रकारकं ज्ञानं निर्विकल्पकम्, यथेदं किंचिदिति ।**

**व्याख्या-** निर्विकल्पकं ज्ञानं निष्प्रकारकमर्थान्निर्गतो विकल्पो=विशेष्यविशेषणभावो यस्मात् तज्ज्ञानं निर्विकल्पकं तदेवाख्या यस्य तदेतादृशं यज्ज्ञानं तज्ज्ञानमतीन्द्रियमर्थात्तस्य ज्ञानस्य प्रत्यक्षं न भवति । विशेषणताविशेष्यतासंसर्गतारूपविषयतातिरिक्तविषयतानिरूपकं ज्ञानं निर्विकल्पकम् अर्थात् संसर्गानवगाहि ज्ञानं निर्विकल्पकम् । संसर्गानवगाहिज्ञानस्य च प्रत्यक्षं न भवति । ननु यदि निर्विकल्पकस्य ज्ञानस्य प्रत्यक्षं न भवति तदा तज्ज्ञानं भवत्येव नहीति स्वीक्रियतामिति चेन्न, यतो चक्षुःसन्निकर्षानन्तरमनुभूयमानं घटोऽयमिति सविकल्पकं ज्ञानं विशिष्टं ज्ञानम्, विशिष्टञ्च ज्ञानं विशेषणज्ञानमन्तरा न सम्भवति । विशिष्टबुद्धिं प्रति विशेषणज्ञानस्य कारणत्वादत इन्द्रियसन्निकर्षोत्तरं प्रथमतो घटघटत्वयोर्वैशिष्ट्यानवगाहि सूक्ष्ममेकं घटघटत्वमात्रावगाहि "घटघटत्वे" इत्याकारकं विशकलितं वैशिष्ट्यानवगाहि ज्ञानं जायते तदेव ज्ञानं निर्विकल्पकम्, ततो वैशिष्ट्यावगाहि अयं घट इत्याकारकं ज्ञानं जायते । तत्र द्वितीयस्यायं घट इत्याकारकज्ञानस्य प्रत्यक्षं घटमहं जानामीत्याकारकमनुव्यवसायात्मकं जायते, किन्तु प्रथमस्य निर्विकल्पज्ञानस्यानुव्यवसायात्मकं ज्ञानं न भवति । यतो हि ज्ञानस्य ज्ञानमनुव्यवसायात्मकं ज्ञातृज्ञेयज्ञानतत्संसर्गावगाहि त्रिपुट्यात्मकमेव ज्ञानं भवति न तु विषयमात्रावगाहि मितिज्ञानं सम्भवति, घटमहं जानामि पटमहं जानामीत्याद्यनुव्यवसायानुभवात् । घटमहं जानामीति ज्ञाने आत्मनि ज्ञानं प्रकारतया भासते, ज्ञाने घटः प्रकारतया भासते, घटे च घटत्वं प्रकारतया भासते । यः प्रकारः स एव विशेषणम्, विशेषणे यद्विशेषणं तद्विशेषणतावच्छेदकम्, विशिष्टवैशिष्ट्यावगाहिज्ञाने च विशेषणतावच्छेदकप्रकारकं ज्ञानं कारणमिति । अत्र च ज्ञाने घटः प्रकारः घटे च घटत्वमिति घटमहं जानामीत्यनुव्यवसायात्मकविशिष्टवैशिष्ट्यावगाहिज्ञाने घटत्वप्रकारकं अयं घट इति विशिष्टबुद्धिः कारणं भवति, निर्विकल्पकज्ञानपूर्वञ्च तादृशं घटोऽयमिति विशिष्टं ज्ञानं न भवतीति तस्य ज्ञानस्यानुव्यवसायात्मकं प्रत्यक्षमपि न सम्भवति सामग्र्यभावात् । ननु निर्विकल्पकज्ञानोत्तरं घटघटत्वयोर्वैशिष्ट्यानवगाहि शुद्धघटविषयकमनुव्यवसायात्मकं घटज्ञानवानहम्, घटमहं जानामीत्याकारकं ज्ञानं जायतामिति चेन्न, यतो हि घटत्वादिजातिगगनत्वाद्यखण्डोपाध्यतिरिक्तघटादिपदार्थानां भानं किञ्चिद्धर्मप्रकारतयैव जायतेऽर्थाद् घटादिपदार्थानां भानं घटत्वादिधर्ममतिरिच्य न सम्भवति, शब्दस्य स्वभावो हि धर्मविशिष्टधर्मिणमुपस्थापयति । तस्मादनुलिख्यमानघटत्वादिधर्मातिरिक्तपदार्थज्ञानस्य किञ्चिद्धर्मपुरस्कृतत्वमेव नियमः । स एवाशयः जात्यखण्डोपाध्यतिरिक्तपदार्थानां किञ्चिद्धर्मपुरस्कारेण भासमानत्वनियम इत्यस्य । तथा च घटघटत्वयोः संसर्गानवगाहिनिर्विकल्पकज्ञानस्यानुव्यवसायात्मकं ज्ञानं विशकलितं तथापि न सम्भवति, तस्मात्तज्ज्ञानमतीन्द्रियम् ।

**मूलम्– सप्रकारकं ज्ञानं सविकल्पकम्, यथा डित्थोऽयं, ब्रह्मणोऽयं, श्यामोऽयमिति ॥**

**व्याख्या-** सविकल्पकं ज्ञानं सप्रकारकमर्थात् किञ्चित्प्रकारतया किञ्चिद्विशेष्यतया किञ्चिच्च संसर्गतया यत्र ज्ञाने विषया अवभासन्ते तज्ज्ञानं सविकल्पकम् । सविकल्पकस्य ज्ञानस्यानन्तरमनुव्यवसायरूपेण तस्य ज्ञानस्य प्रत्यक्षमपि भवति । यथा डित्थोऽयमिति डित्थत्वप्रकारकं डित्थविशेष्यकं डित्थडित्थत्वयोः समवायसंसर्गावगाहि

अयं डित्थ इति ज्ञानम्, यथा वा ब्राह्मत्वप्रकारकब्राह्मणविशेष्यकब्राह्मणब्राहमणत्वयोः समवायसंसर्गावगाहि अयं ब्राह्मण इति ज्ञानम्, श्यामत्वप्रकारकश्यामविशेष्यकश्यामश्यामत्वयोः समवायसंसर्गावगाहि अयं श्याम इति ज्ञानं वा सविकल्पकम्, एतादृशज्ञानानन्तरं डित्थमहं जानामि, ब्राह्मणमहं जानामि, श्याममहं जानामीत्यनुव्यवसायात्मकं ज्ञातृज्ञेयज्ञप्तिविषयकं सविकल्पकं ज्ञानं जायते, तदेवानुव्यवसायज्ञानम् । सविकल्पकज्ञानस्य विषयास्त्रयः सन्ति । विशेष्यविषेषणसंसर्गाख्याः । तेषु विशेष्ये विशेष्यताख्या, विशेषणे विशेषणताख्या, संसर्गे च संसर्गताख्या विषयता तिष्ठति, तादृशविशेष्यताविशेषणतासंसर्गतावगाहि ज्ञानमेव सविकल्पकं ज्ञानम् ।

इन्द्रियजन्यं प्रत्यक्षं षड्विधम्, इन्द्रियाणां षड्विधत्वादिन्द्रियजन्यं प्रत्यक्षमपि षड्विधम् । तत्र षड्विधानीन्द्रियाणि घ्राणरसनाचक्षुःत्वक्श्रोत्रमनांसि, तैर्जायमानानि षड्विधानि प्रत्यक्षाणि घ्राणजरासनचाक्षुषस्पार्शनश्रौत्रमानसानि सन्ति ।

**मूलम्– प्रत्यक्षज्ञानहेतुरिन्द्रियार्थसन्निकर्षः षड्विधः । संयोगः संयुक्तसमवायः संयुक्तसमवेतसमवायः समवायः समवेतसमवायो विशेषणविशेष्यभावश्चेति ।**

**व्याख्या–** इन्द्रियार्थसन्निकर्षजन्यप्रत्यक्षप्रमां प्रति व्यापारवदसाधारणकारणरूपं करणमिन्द्रियमित्युक्तप्रायम् । तत्र व्यापार इन्द्रियार्थसन्निकर्षः । व्यापारो नाम द्वारम्= आन्तरालिककारणमित्यर्थः । अर्थाद् यद् वस्तु कस्माच्चित् करणादुत्पद्य करणजन्यकार्यस्य जनको भवति स एव व्यापारः । तल्लक्षणञ्च द्रव्यान्यत्वे सति तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारत्वम् । यथा घटात्मककार्ये तत्पदेन करणं दण्डादिकं ग्राह्यम्, तज्जन्यत्वं दण्डभ्रम्यां वर्तते, पुनस्तत्पदेन तदेव दण्डादिकं, तज्जन्यो घटः, तस्य जनकश्च सैव भ्रमि, सा च भ्रमि द्रव्यभिन्नापि वर्तत इति घटं प्रति दण्डादेर्व्यापारः दण्डभ्रमि, चक्रभ्रमि, कपालभ्रमि, कपालद्वयसंयोग इत्यादिकमस्ति । इदमत्र बोध्यम्, कारणं हि द्विविधं करणरूपं व्यापाररूपञ्च । घटं प्रति दण्डादिकं प्राथमिककारणं करणम्, दण्डभ्रमिकपालसंयोगादिकमान्तरालिककारणन्तु व्यापारपदवाच्यम् ।

प्रत्यक्षप्रमायाञ्चेन्द्रियाणि करणानि, विषयेन्द्रियसम्बन्धो मनइन्द्रियसंयोगो वा व्यापारः । विषयेन्द्रियसम्बन्धश्च षड्विधो वर्तते । तैः षड्विधसम्बन्धैः सहकृतैरिन्द्रियैः करणैः प्रत्यक्षं ज्ञानं जन्यते, ते च विषयेन्द्रियसम्बन्धा यथा- संयोगः, संयुक्तसमवायः, संयुक्तसमवेतसमवायः, समवायः, समवेतसमवायः, विशेषणविशेष्यभावश्चेति षड्विधाः । तेषु षड्विधेषु सन्निकर्षेषु संयोगः सन्निकर्ष इन्द्रियस्य द्रव्यैः सह भवति । अर्थात् संयोगसम्बन्धेनेन्द्रियैश्चक्षुस्त्वङ्मनोभिस्त्रिभिः द्रव्याणां प्रत्यक्षं भवति । द्रव्यग्राहकाणीन्द्रियाणि त्रिणि, चक्षुस्त्वङ्मनांसि सन्ति, तेषां त्रयाणामिन्द्रियाणां द्रव्यैः सह संयोगेन द्रव्यप्रत्यक्षं भवति । यतो हि द्रव्ययोरेव संयोग इति नियमेनेन्द्रियाणां सर्वेषामिन्द्रियत्वेन तेषां द्रव्यैः सह संयोगो भवति । तथा चेन्द्रियविषयसंयोगेन द्रव्यस्य प्रत्यक्षं भवति । द्रव्यसमवेतानां रूपरसादिगुणानां कर्मणां, द्रव्यसमवेतजातीनाञ्च प्रत्यक्षं इन्द्रियसंयुक्तसमवायेन सम्बन्धेन भवति । इन्द्रियसंयुक्तसमवायेन द्वितीयेन सम्बन्धेन चक्षुस्त्वग्रहसनाघ्राणमनोभिः पञ्चभिरिन्द्रियैः रूपादिगुणानां, उत्क्षेपणादीनां कर्मणां, घटत्वादिद्रव्यवृत्तिजातीनाञ्च प्रत्यक्षं भवति । एवमेवेन्द्रियसंयुक्तसमवेतसमवायेन तृतीयेन सन्निकर्षेण तैः पञ्चभिरेवेन्द्रियैः रूपरसादिगुणवृत्तीनाम्,

उत्क्षेपणादिकर्मवृत्तीनाञ्च जातीनां प्रत्यक्षं भवति । चतुर्थेन समवायसम्बन्धेन श्रोत्रेन्द्रियेण शब्दानां प्रत्यक्षं भवति । पञ्चमेन समवेतसमवायेन सम्बन्धेन श्रोत्रेन्द्रियेण शब्दवृत्तीनां कत्वखत्वशब्दत्वादीनां जातीनां प्रत्यक्षं भवति । षष्ठेन विशेषणविशेष्यभावसन्निकर्षेण समवायस्याभावस्य च प्रत्यक्षं भवति । तथा च द्रव्यप्रत्यक्षं प्रतीन्द्रियसंयोगः, द्रव्यसमवेतप्रत्यक्षं प्रतीन्द्रियसंयुक्तसमवायः, द्रव्यसमवेतसमवेतप्रत्यक्षं प्रतीन्द्रियसंयुक्तसमवेतसमवायः कारणमिति सामान्यकार्यकारणभावो विज्ञेयः ।

वस्तुतो द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्, द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणम्, द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः कारणम् । एवमेव द्रव्यस्य त्वाचप्रत्यक्षं प्रति त्वक्संयोगः कारणम्, द्रव्यसमवेतत्वाचं प्रति त्वक्संयुक्तसमवायः कारणम्, द्रव्यसमवेतसमवेतस्पर्शत्वादित्वाचं प्रति त्वक्संयुक्तसमवेतसमवायसन्निकर्षः कारणम् । एवमेव स्वात्मरूपद्रव्यमानसं प्रति मनःसंयोगः कारणम्, द्रव्यसमवेतसुखादिमानसं प्रत्यक्षं प्रति मनःसंयुक्तसमवायः कारणम्, द्रव्यसमवेतसमवेतसुखत्वादिमानसं प्रति मनःसंयुक्तसमवेतसमवायः कारणम् । एवं रीत्या पृथक्पृथगेव कारणं वाच्यम् । अन्यथैकेन्द्रियसंयोगादिसत्त्वेऽपरेन्द्रियजन्यप्रत्यक्षस्यासत्त्वाद् व्यभिचारापत्तिः स्यादतो विशिष्यैव कार्यकारणभावो वक्तव्यः ।

अभावप्रत्यक्षे समवायप्रत्यक्षे चेन्द्रियसम्बद्धविशेषणतासन्निकर्षो हेतुः । वैशेषिकमते तु समवायो न प्रत्यक्षः । न्यायमते तु समवायस्यापि प्रत्यक्षं स्वीक्रियते । तदत्र भावग्राहकसंयोगादिसन्निकर्ष-निरूपणपूर्वकमभावप्रत्यक्षकारणीभूतविशेष्यविशेषणभावसन्निकर्षः सोदाहरणं विशिष्य निरूप्यते

**मूलम्– चक्षुषा घटप्रत्यक्षजनने संयोगः सन्निकर्षः ।**

**व्याख्या–** संयोगसन्निकर्ष इन्द्रियस्य द्रव्यैः सह भवति । अर्थात् संयोगसम्बन्धेन चक्षुःत्वङ्मनोभिस्त्रिभिरिन्द्रियैर्द्रव्याणां प्रत्यक्षं भवति । द्रव्यग्राहकाणीन्द्रियाणि त्रिणि, चक्षुःत्वङ्मनांसि सन्ति, तेषां त्रयाणामिन्द्रियाणां द्रव्यैः सह संयोगेन द्रव्यप्रत्यक्षं भवति । यतो हि द्रव्ययोरेव संयोग इति नियमेनेन्द्रियाणां सर्वेषां द्रव्यत्वेन तेषां विषयद्रव्यैः सह संयोगो भवति । तथा चेन्द्रियविषयसंयोगेन द्रव्यस्य प्रत्यक्षं भवति । वस्तुतो द्रव्यचाक्षुषं प्रति चक्षुःसंयोगः कारणम्, द्रव्यत्वचं प्रति त्वक्संयोगः कारणमेवमेव रीत्या विशिष्यैव कार्यकारणभावः करणीयः ।

**मूलम्– घटरूपप्रत्यक्षजनने संयुक्तसमवायः सन्निकर्षः चक्षुःसंयुक्ते घटे रूपस्य समवायात् ।**

**व्याख्या–** इन्द्रियसंयुक्तसमवायेन सम्बन्धेन द्रव्यसमवेतानां रूपरसादिगुणानां, उत्क्षेपणदिकर्मणां, द्रव्यसमवेतद्रव्यत्वादिजातीनाञ्च प्रत्यक्षं भवति । इन्द्रियसंयुक्तसमवायेन द्वितीयेन सम्बन्धेन चक्षुस्त्वग्रसनाघ्राणमनोभिः पञ्चभिरिन्द्रियैः रूपादिगुणानां, उत्क्षेपणादीनां कर्मणां, द्रव्यत्वघटत्वादिद्रव्यवृत्तिजातीनाञ्च प्रत्यक्षं भवति । चक्षुरादीन्द्रियसंयुक्तेषु द्रव्येषु रूपरसादिगुणानां कर्मणां, द्रव्यसमवेतजातीनाञ्च समवायेन सम्बन्धेन वर्तमानत्वाद् इन्द्रियसंयुक्तसमवायेन सम्बन्धेन द्रव्यसमवेतानां रूपरसादिगुणानां कर्मणां, द्रव्यसमवेतजातीनाञ्च प्रत्यक्षं भवति । द्रव्यसमवेतगुणकर्मजातिग्राहकाणीन्द्रियाणि चक्षुस्त्वग्रसनाघ्राणमनांसि । वस्तुतो द्रव्यसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवायः कारणम्, एवमेव विशिष्यैव

कार्यकारणभावः सर्वत्र कार्यः ।

**मूलम्– रूपत्वसामान्यप्रत्यक्षे संयुक्तसमवेतसमवायः सन्निकर्षः, चक्षुःसंयुक्ते घटे रूपं समवेतं, तत्र रूपत्वस्य समवायात् ।**

**व्याख्या–** इन्द्रियसंयुक्तसमवेतसमवायेन तृतीयेन सन्निकर्षेण चक्षुस्त्वग्रसनाघ्राणमनोभिः पञ्चभिरेवेन्द्रियैः रूपरसादिगुणवृत्तीनां, उत्क्षेपणादिकर्मवृत्तीनाञ्च जातीनां प्रत्यक्षं भवति । द्रव्यसमवेतसमवेतगुणकर्मवृत्तिजातिग्राहकाणीन्द्रियाणि चक्षुस्त्वग्रसनाघ्राणमनांसि पञ्च । अत्रापि द्रव्यसमवेतसमवेतचाक्षुषं प्रति चक्षुःसंयुक्तसमवेतसमवायः कारणमिति विशिष्यैव कार्यकारणभावः कार्यः ।

ननु द्रव्यस्य, द्रव्यसमवेतानां गुणकर्मजातीनाञ्च प्रत्यक्षं द्रव्यसमवेतसमवेतजातिग्राहकेण संयुक्तसमवेतसमवायसन्निकर्षेणैव सम्भवात् संयोगसंयुक्तसमवाययोः प्रथमद्वितीययोः सन्निकर्षयोर्वैयर्थ्यम्, यतो हि संयुक्तसमवेतसमवायसन्निकर्षेणापि द्रव्यतत्समवेतगुणकर्मजातिग्रहः सम्भवति । तदित्थम् चक्षुषा घटप्रत्यक्षस्थले चक्षुःसंयुक्ता कपालिका, तत्र समवेतः कपालः, तस्य समवायः घटे इति कृत्वा तृतीयेनैव सन्निकर्षेण घटप्रत्यक्षसम्भवात् । एवमेव चक्षुषा घटरूपप्रत्यक्षस्थले चक्षुःसंयुक्तः कपालः, तत्र समवेतो घटः तस्य समवायस्य घटरूपे सत्त्वाद् भवति तस्याप्यनेनैव तृतीयेण सन्निकर्षेण प्रत्यक्षमिति चेन्न, तथा सति निरवयवानामात्मादीनां तत्समवेतगुणकर्मजातीनाञ्च प्रत्यक्षासम्भवप्रसङ्गः स्यादतः प्रथमद्वितीययोरपि सम्बन्धत्वं सिद्ध्यत्येव ।

**मूलम्– श्रोत्रेण शब्दसाक्षात्कारे समवायः सन्निकर्षः कर्णविवरवर्त्याकाशस्य श्रोतत्वात् शब्दस्याकाशगुणत्वात्गुणगुणिनोश्च समवायात् ।**

**व्याख्या–** चतुर्थेन समवायसम्बन्धेन श्रोत्रेन्द्रियेण शब्दानां प्रत्यक्षं भवति । यतो हि कर्णविवरवर्त्त्याकाश एव श्रोत्रं शब्दश्चाकाशगुणः, गुणगुणिनोश्च समवायः सम्बन्ध इति श्रोत्रेण समवायेन सम्बन्धेन शब्दस्य प्रत्यक्षं भवति ।

**मूलम्– शब्दत्वसाक्षात्कारे समवेतसमवायः सन्निकर्षः श्रोत्रसमवेते शब्दे शब्दत्वस्य समवायात् ।**

**व्याख्या–** पञ्चमेन समवेतसमवायेन सम्बन्धेन श्रोत्रेणेन्द्रियेण शब्दवृत्तीनां शब्दत्वकत्वखत्वादीनां शब्दवृत्तिजातीनां प्रत्यक्षं भवति । श्रोत्रसमवेते शब्दे शब्दत्वादीनां जातीनां समवेतत्वात् । तथा च शब्दशब्दवृत्तिजातीनां ग्राहकमिन्द्रियं श्रोत्रमेव । अन्यानीन्द्रियाणि शब्दं शब्दवृत्तिजातिञ्च ग्रहीतुं न शक्नुवन्ति, तद्ग्राहकशक्त्यभावात् । ननु शब्दशब्दत्वसाक्षात्कारयोः व्यापारः कः? समवायस्य नित्यत्वेन तस्य व्यापारत्वाभावादिति चेन्न, शब्दस्य श्रोत्रमनःसंयोगस्य वा व्यापारत्वसम्भवात् ।

**मूलम्– अभावप्रत्यक्षे विशेषणविशेष्यभावः सन्निकर्षः, घटाभाववद्भूतलमित्यत्र चक्षुःसंयुक्ते भूतले घटाभावस्य विशेषणत्वात् ।**

**व्याख्या–** अभावप्रत्यक्षं विशेषणतासन्निकर्षेण जायते । अत्र विशेषणता नानाविधाः । यतो हि विशेषणता न

स्वतन्त्रसम्बन्धः किन्तु पूर्वोक्तभावग्राहकसम्बन्धे संयोगस्थले संयुक्तपदं संयोज्य, समवायस्थले च समवेतपदं संयोज्य विशेषणतासम्बन्धो ग्राह्यः। तथा चेन्द्रियसंयुक्तविशेषणता, इन्द्रियसंयुक्तसमवेतविशेषणता, इन्द्रियसंयुक्तसमवेतसमवेतविशेषणता, श्रोत्रसमवेतविशेषणता, श्रोत्रसमवेतसमवेतविशेषणतेत्यादिनानाविधो विशेषणतासम्बन्धो ग्राह्यो भवति। एवमेवात्र विशेषणता पदं विशेष्यताया अप्युपलक्षकम्। तथा च विशेषणताविशेष्यतारूपोऽयं सम्बन्धो नानाप्रकारस्तथापि विशेष्यविशेषणतात्वेनैकेव सम्बन्धो गृहीतः अन्यथा षोढा सन्निकर्ष इति अभियुक्तानां प्रवादो व्याहन्येत।

तत्र द्रव्यवृत्त्यभावप्रत्यक्षे इन्द्रियसंयुक्तविशेषणता, इन्द्रियसंयुक्तविशेष्यता वा सन्निकर्षो भवति। यथा भूतलादौ घटाद्यभावाप्रत्यक्षं घटाभाववद् भूतलमित्यादिरूपेण यदि जायते तदा चक्षुःसंयुक्ते भूतले घटाभावो यो विशेषणमतः चक्षुःसंयुक्तविशेषणतासन्निकर्षेण भूतलादौ द्रव्येऽभावस्य प्रत्यक्षं भवति। द्रव्यसमवेतेषु गुणकर्मद्रव्यवृत्तिजातिषु वर्तमानानामभावानां प्रत्यक्षमिन्द्रियसंयुक्तसमवेतविशेषणतासन्निकर्षेण जायते। यथा सङ्ख्यायां रूपाद्यभावाप्रत्यक्षं चक्षुःसंयुक्तसमवेतविशेषणतासन्निकर्षेण जायते। अत्र चक्षुःसंयुक्तो घटः तत्र समवेता सङ्ख्या, तत्र विशेषणं रूपाभावः, सङ्ख्या रूपाभाववती इति प्रतीतेः। तथा च सङ्ख्यायां रूपाद्यभावानां प्रत्यक्षं चक्षुःसंयुक्तसमवेतविशेषणतासन्निकर्षजन्यम्। एवमेव द्रव्यसमवेतसमवेतसङ्ख्यात्वादिजातौ रूपाद्यभावानां प्रत्यक्षमिन्द्रियसंयुक्तसमवेतसमवेतविशेषणतासन्निकर्षेण जायते। अत्रापि चक्षुःसंयुक्तो घटः, तत्र समवेता सङ्ख्या, तत्र च समवेतं सङ्ख्यात्वं तत्र विशेषणं रूपाद्यभाव इति द्रव्यसमवेतसमवेतसङ्ख्यात्वादिजातौ वर्तमानानामभावानां प्रत्यक्षमिन्द्रियसंयुक्तसमवेतसमवेतविशेषणतासन्निकर्षजन्यम्। प्रतीतिस्त्वत्र सङ्ख्यात्वं रूपाद्यभाववत् इत्याद्यात्मकम्।

शब्दाभावस्य प्रत्यक्षं केवलश्रोत्रावच्छिन्नविशेषणता सन्निकर्षेण जायते। श्रोत्रावच्छिन्ने तत्तदाकाशे शब्दाभावस्य विशेषणत्वात्। अत्र केवलमिति कथनमेतत्सम्बन्धे पूर्वोक्तानां केषाञ्चानानामपि सम्बन्धनामत्र सम्बन्धो नास्तीत्याशयेन। एवमेव श्रोत्रवृत्तिककारवृत्ति-खत्वाद्यभावानां प्रत्यक्षं श्रोत्रावच्छिन्नसमवेतविशेषणतासन्निकर्षेण जायते। एवं प्रकारेण भाववृत्ति-अभावानां प्रत्यक्षं तत्तदभावग्राहकसन्निकर्षविशिष्टविशेषणतया विशेष्यतया वा सन्निकर्षेण जायते। एवमेवाभाववृत्त्यभावप्रत्यक्षमपि विशिष्टेनैवविशेषणतासन्निकर्षेण विशेष्यतासन्निकर्षेण वा जायते। यथा भूतलवृत्तिघटाभावे पटाभावस्य प्रत्यक्षं भूतलवृत्तिघटाभावः पटाभाववानित्यात्मकं चक्षुःसंयुक्तविशेषणविशेषणतासन्निकर्षप्रयोज्यम्। एवं कत्वावच्छिन्नप्रतियोगिताककशब्दाभावे गत्वावच्छिन्नाभावः श्रोत्रावच्छिन्नविशेषणविशेषणतासन्निकर्षेण गृह्यते। एवं प्रकारेण येन येन सम्बन्धेन पदार्थाः संकलितास्तत्तत्सम्बन्धपरम्परान्ते विशेषणता योजनीया, यथा घटे गुणः, गुणे च गुणत्वं, गुणत्वे जातौ पदार्थत्वं, पदार्थत्वे धर्मे घटाभावः तत्र च घटाभावे विद्यमानस्य गुणत्वाभावस्य प्रत्यक्षं चक्षुःसंयुक्तसमवेतसमवेतविशेषणविशेषणविशेषणतासन्निकर्षेण जन्यते। तत्र चक्षुःसंयुक्तो घटस्तत्र समवेतो गुणः तत्र समवेतं गुणत्वं, तत्र विशेषणं(वृत्तिः) पदार्थत्वं तत्र विशेषणं घटाभावः तत्रापि विशेषणं गुणत्वाभावः इति तादृशविशेषणतासन्निकर्षेण तादृशस्य गुणत्वाभावस्य प्रत्यक्षं भवति। तथा च तत्तद्विशेष्येण विशेषणानां ये ये सम्बन्धा भवेयुस्तांस्तानादाय सम्बन्धपरम्पराकल्पनीया।

इत्थञ्च विशेषणतारूपसम्बन्धोऽन्योऽपि कल्पयितुं शक्यते। प्रतीतिभेदाच्च कुत्रचिद् विशेषणता कुत्रचिच्च

विशेष्यता कल्पनीया । न्यायमते प्रथमान्तार्थो मुख्यविशेष्यमन्यत् सर्वं विशेषणम् । यथा भूतलं घटाभाववदित्यत्र भूतलं विशेष्यम्, घटाभावो विशेषणम्, अत एवात्र चक्षुःसंयुक्तविशेषणतासन्निकर्षो भवति । भूतले घटाभावः इति प्रतीतौ तु घटाभावो विशेष्योऽतः चक्षुःसंयुक्तविशेष्यतात्र सम्बन्धो बोध्यः । विशेष्यविशेषणतात्वेनायं सम्बन्धो नानापि एक एव स्वीक्रियते । अतो न षोढासन्निकर्षव्याघातः ।

**मूलम्– एवं सन्निकर्षषट्कजन्यं ज्ञानं प्रत्यक्षम् । तत्करणमिन्द्रियम् । तस्मादिन्द्रियं प्रत्यक्षप्रमाणमिति सिद्धम् । प्रत्यक्षं व्याख्यातम् ।**

**व्याख्या–** उपर्युक्तषड्विधसन्निकर्षैः सनाथीकृतैः षड्विधेन्द्रियैर्जायमानं ज्ञानं प्रत्यक्षप्रमा, तां प्रति व्यापारवदसाधारणं कारणं षड्विधेन्द्रियम्, व्यापार इन्द्रियार्थसन्निकर्षः फलं षड्विधचाक्षुषादिप्रत्यक्षं ज्ञानम् । प्रत्यक्षज्ञानकरणत्वाच्च षड्विधेन्द्रियम् प्रत्यक्षप्रमाणम् इति न्यायसिद्धान्ते सिद्धम् ।

### पदानामर्थपरिचयः

| | |
|---|---|
| अव्यपदेश्यम् | = शब्दावाच्यम्, निर्विकल्पकमिति यावत् |
| इन्द्रियसन्निपातः | = इन्द्रियमेलनम्, इन्द्रियसंन्निकर्ष इत्यर्थः |
| वैशिष्ट्यावगाहि | = सम्बन्धविषकम् |
| अतीन्द्रियम् | = इन्द्रियावेद्यम् |
| अन्तरा | = विना |
| व्यवसायात्मकम् | = विषयमात्रावगाहिज्ञानम् |
| अनुव्यवसायात्मकम् | = व्यवसायानन्तरजायमानं ज्ञानम् |
| त्रिपुट्यात्मकं ज्ञानम् | = मातृमेयमितिरूपत्रितयविषयकं ज्ञानम् |
| मितिज्ञानम् | = ज्ञानस्य ज्ञानम् |
| विशकलितम् | = विश्रृङ्खलितम् |
| डित्थः | = काष्ठनिर्मितहस्ती |
| आख्या | = नाम |
| आन्तरालिकम् | = मध्यगतम् |
| विशिष्य | = एकैकं कृत्वा |
| कल्पनीयम् | = अनुमेयम् |
| प्रतीतिः | = प्रत्ययः, ज्ञानम् |

## अभ्यासः

### १. स्वोपज्ञतया विवरणात्मकमुत्तरं देयम्

(क) प्रत्यक्षप्रमाया लक्षणं सोदाहरणं सपदकृत्यञ्च प्रतिपादयत ।

(ख) निविकल्पकप्रत्यक्षलक्षणं विलिख्य तत्सत्त्वे प्रमाणमुपस्थापयत ।

(ग) प्रत्यक्षप्रमाकारणीभूतसन्निकर्षभेदान् सोदाहरणं स्फोरयत ।

(घ) संयुक्तसमवेतसमवायेन सन्निकर्षेण घटप्रत्यक्षसंभवे प्रथमद्वितीययोः सन्निकर्षयोः कावश्यकता ?

(ङ) विशेषणविशेष्यभावसन्निकर्षविषयकमेकं विस्तृतं विरिणं लिखत ।

### २. स्वशब्दैः व्याख्याङ्कुरुत

(क) ईश्वरज्ञानसाधारणं प्रत्यक्षप्रमालक्षणं प्रतिपादयत ।

(ख) सविकल्पकप्रत्यक्षप्रमायाः स्वरूपं प्रदर्शयत ।

(ग) करणव्यापारयोर्लक्षणे सोदाहरणं प्रस्तुत ।

(घ) द्वितीयमसमवायिकारणलक्षणं निरूपयत ।

(ङ) निमित्तकारणलक्षणं सोदाहरणं प्रतिपादयत ।

### ३. अत्यन्तं सङ्क्षिप्तमुत्तरं देयम्

(क) इन्द्रियार्थसन्निकर्षजन्यं ज्ञानं प्रत्यक्षमनुमितिर्वा ?

(ख) निर्विकल्पकज्ञाने प्रकारता भासते न वा ?

(ग) विषयता कतिविधा ?

(घ) पटप्रत्यक्षजनने कः सन्निकर्षः कारणम् ?

(ङ) गन्धत्वप्रत्यक्षजनने कः सन्निकर्षः कारणम् ?

(च) विशेषणतासन्नकर्षेण कस्य प्रत्यक्षं भवति ?

### ४. कक्षाभ्यासः

(क) केन सन्निकर्षेण कस्य प्रत्यक्षं भवतीति विषये सखिभि सह चर्चां कुरुत ।

(ख) तृतीयेण सन्निकर्षेण घटप्रत्यक्षसंभवे प्रथमद्वितीययोः सन्निकर्षयोरावश्यकत्वे विषये चर्चां कुरुत ।

(ग) विशेष्यताविशेषणतयोर्नानात्वविषये विशदं व्याख्यानं शिक्षकं श्रावयत ।

# पारिभाषिकपदार्थपरिचयः

पौरस्त्यदर्शनक्षेत्रे वैदिकत्वेन प्रथितेषु दर्शनेष्वन्यतमं न्यायदर्शनम् । अस्य च दर्शनस्य प्रणेता महर्षिर्गौतमः । महर्षिणा गौतमेन न्यायसूत्रप्रणयनद्वाराऽस्य दर्शनस्य पल्लवनं कृतम् । न्यायसूत्राख्ये ग्रन्थे प्रमाणादयः षोडशपदार्था उद्देशलक्षणपुरस्सरं परीक्षिता इति । अस्य च न्यायदर्शनस्य द्वे सरण्यौ स्तः । तत्राद्या प्राचीनन्यायनाम्ना प्रसिद्धा, सूत्रभाष्यक्रमेण षोडशपदार्थप्रतिपादिका प्रमेयनिरूपणप्रधाना व्यावहारिकपदबहुला चास्ति चेद् द्वितीया नव्यन्यायनाम्ना प्रथिता, विशेषतो गङ्गेशोपाध्यायजृम्भिता, वर्द्धमानरघुनाथगदाधरादिभिराचार्यैः सम्वर्द्धिता प्रमाणनिरूपणप्रधाना प्रमाणक्रमेणार्थप्रतिपादिका प्रतियोगितानुयोगिताकार्यताकारणतादिपारिभाषिकपदबहुला परिष्कारप्रधाना च वर्तते ।

एवमेव वैदिकत्वेन प्रथितेषु दर्शनेषु अन्यतमं वैशेषिकदर्शनञ्च । अस्य च दर्शनस्य प्रणेता महर्षिः कणभुक् । महर्षिणानेन काणादसूत्रजृम्भणपूर्वकं दर्शनमिदं प्रकाशितम् । दर्शनमिदं प्रशस्तपाद-उदयन-श्रीधारादिभिराचार्यैः सम्वर्द्धितम् । अत्र च द्रव्यादयः सप्त पदार्था व्यालोडिताः । न्यायवैशेषिकयोः समानतन्त्रत्वं प्रथितं वर्तते । एतदेव मनसि निधाय दाक्षिणात्येन अन्नम्भट्टाख्येन विदुषा न्यायाभिमतं प्रमाणचतुष्टयं वैशेषिकाभितं पदार्थसप्तकञ्चाऽऽदाय तर्कसङ्ग्रहनामा ग्रन्थो व्यरचि । तत्र च पदकृत्य-दीपिका-न्यायबोधिन्यादयो राजन्ते ग्रन्थग्रन्थिस्फोटका यथास्थिति नव्यशैल्यवलम्बिन्यो व्याख्याः । यथावश्यकं सटीकैतद्ग्रन्थप्रतिपाद्यविषयाणां परिज्ञानाय पारिभाषिकपदानामर्थज्ञानमावश्यकमिति धिया जिज्ञासूनां छात्राणां पारिभाषिकपदानामर्थबोधायार्थाद्येषां परिभाषयैवार्थबोधो भवति न तु शक्त्यादिवृत्त्येति हृदि निधाय तत्र प्रथितानां केषाञ्चन पारिभाषिकपदानामर्थास्तेषां प्रयोगविधिश्चात्र प्रस्तूयते-

**उद्देशः** – नाममात्रेण वस्तुसङ्कीर्तनमुद्देश, यथा द्व्यगुणकर्मसामान्यविशेषसमवायाभावाः सप्त पदार्था इति द्रव्यादीनां पदार्थानां नामाभिधानमुद्देशः ,अत एवाह भाष्यकारो वात्स्यायनः न्यायभाष्ये “त्रिविधा चास्य शास्त्रस्य प्रवृत्तिः- उद्देशो लक्षणं परीक्षा चेति । तत्र नामधेयेन पदार्थमात्रस्याभिधानम् उद्देशः” इति ।

**लक्षणम्**– असाधारणधर्मो लक्षणम् । असाधारण्यञ्च तन्मात्रवत्तित्वम्, तदितरावृत्तित्वे सति तद्वृत्तित्वमित्यर्थः । एवञ्च तन्मात्रवृत्तिधर्मो लक्षणम् । यथा गन्धवत्त्वं पृथिव्या लक्षणमिति । गन्धवत्त्वं हि पृथिवीतरेषु जलादिषु कुत्रापि न तिष्ठति, जलादौ गन्धप्रतीतिस्तूपाधिना कृतमौपाधिकमित्यनुभवसिद्धम् । तथा च गन्धवत्त्वं पृथिव्या असाधारणधर्मरूपलक्षणम् । तदेवाह भाष्यकारो वात्स्यायनः “तत्रोद्दिष्टस्य तत्त्वव्यवच्छेदको धर्मो लक्षणम्” इति ।

**परीक्षा**– लक्षितस्य लक्षणं साधु न वेति विचारः परीक्षा । यथा गन्धवत्त्वरूपलक्षणस्य पृथिवीतरेषु विद्यते न वाथ च पृथिव्यां सर्वत्र विद्यते न वेति प्रमाणैः परीक्षणं परीक्षा । तथा चाह भाष्यकारो वात्स्यायनः न्यायभाष्ये “लक्षितस्य यथालक्षणमुपपद्यते न वेति प्रमाणैरर्थावधारणं परीक्षा” इति ।

**लक्षणता–** असाधारणधर्मो लक्षणम् तस्य भावः= धर्मो लक्षणता। यथा गन्धवत्त्वं पृथिव्या लक्षणमित्यत्र गन्धवत्त्वं लक्षणं, गन्धवत्त्वे लक्षणता तिष्ठतीति। गन्धवत्त्वञ्च गन्ध एव। एवम् "यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्नः" इति नियमात् गन्धनिष्ठा लक्षणता गन्धत्वावच्छिन्ना समवायसम्बन्धावच्छिन्ना च "येन सम्बन्धेन लक्षणं लक्ष्ये तिष्ठति स सम्बन्धः लक्ष्यतावच्छेदकः" इति नियमात्। तथा प्रयोगः। समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठलक्षणतानिरूपितपृथिवीत्वावच्छिन्नपृथिवीनिष्ठलक्ष्यता–वती पृथिवीति शाब्दबोधः।

**लक्ष्यता–** लक्षणेन ज्ञायते यत्तल्लक्ष्यं तस्य भावः=धर्मो लक्ष्यता। यथा गन्धवत्त्वं पृथिव्या लक्षणमित्यत्र गन्धवत्त्वलक्षणेन ज्ञायमाना पृथिवी लक्ष्या, पृथिव्यां लक्ष्यता तिष्ठति, "यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न" इति नियमात् पृथिवीनिष्ठा लक्ष्यता पृथिवीत्वधर्मावच्छिन्ना भवति। तथा च प्रयोगः– समवायसम्बन्धावच्छिन्नगन्धत्वावच्छिन्नगन्धनिष्ठलक्षणतानिरूपितपृथिवीत्वावच्छिन्नपृथिवीनिष्ठलक्ष्यता–वती पृथिवीति शाब्दबोधः।

**अवच्छेदकः–** अन्यूनानतिप्रसक्तधर्म एव अवच्छेदको भवति। अवच्छेदको धर्मोऽवच्छेद्यधर्मसमानाधिकरणो भवति। समानाधिकरणयोरवच्छेद्यावच्छेदकत्वनियमात्। तत्र समानाधिकरणयोर्धर्मयोमध्ये गौणो धर्मोऽवच्छेद्यः(अवच्छिन्नः) मुख्यो धर्मोऽवच्छेदकः। यथा घटो नास्तीत्युक्तौ घटः प्रतियोगी, घटे प्रतियोगिता वर्तते। घटनिष्ठायाः प्रतियागिताया अवच्छेदको धर्मो घटत्वम्, घटत्वं हि घटनिष्टायाः प्रतियोगिताया अन्यूनानतिरिक्तवृत्ति प्रतियोगितासमानाधिकरणञ्च वर्ततेऽतो घटत्वं घटनिष्ठप्रतियोगिताया अवच्छेदकम्, घटत्वावच्छिन्ना च घटनिष्ठा प्रतियोगिता। प्रयोगश्च घटाभाववद् भूतलमित्यत्र संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगिताकाभावनिष्ठाधेयतानिरूपिताधिकरणतावद् भूतलमिति।

**अवच्छेद्यः–** यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्नः। अवच्छिन्नावच्छेद्यौ पर्यायौ। यथा घटाभाववद् भूतलमित्यत्र घटः प्रतियोगी घटे प्रतियोगिता घटनिष्ठायाः प्रतियोगिताया अवच्छेदकं घटत्वञ्चेद् घटत्वावच्छिन्ना=घटत्वावच्छेद्या घटनिष्ठा प्रतियोगिता भवति। प्रयोगश्च संयोगसंबन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगितानिरूपकाभावनिष्ठाधेयतानिरूपिताधिकरणतावद् भूतलमिति।

**अव्याप्तिः–** लक्ष्यैकदेशावृत्तित्वमव्याप्तिः। अव्याप्तिः कश्चन लक्षणगतदोषविशेषो वर्तते। यतो हि यदव्याप्त्यतिव्याप्त्यसम्भवरूपदोषत्रयशून्यो यो लक्ष्यमात्रवृत्त्यसाधारणो धर्मस्तदेव लक्षणम्। यथा गोः श्रृङ्गित्वे सति सास्नावत्त्वमिति। यश्च धर्मो लक्ष्यस्य कस्मिँश्चिदेकदेशे न वर्तते स धर्मो न लक्षणमव्याप्तिदोषग्रस्तत्वाद्। यथा गोः कपिलत्वं, तद्यदि गोर्लक्षणं क्रियते तदा तस्य कपिलगव्येव वर्तमानत्वेन शुक्लकृष्णादिषु गोष्ववृत्तित्वादव्याप्तिरिति कपिलत्वं न गोर्लक्षणम्। अव्याप्तेर्निष्कृष्टं लक्षणन्तु-लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वमिति। यथा कपिलत्वलक्षणस्य लक्ष्या गौः, लक्ष्यतावच्छेदकं गोत्वं, तच्च सर्वासु गोषु विद्यतेऽतः शुक्लकृष्णादिषु गोष्वपि वर्तत एव, तत्र च कपिलत्वं नास्तीत्यभावोऽपि वर्तत इति कपिलत्वे लक्ष्यतावच्छेदकसमानाधिकरणात्यन्ताभावप्रतियोगित्वस्य विद्यमानत्वात् कपिलत्वमव्याप्तमिति कपिलत्वं न गोर्लक्षणम्।

**अतिव्याप्तिः**= लक्ष्यवृत्तित्वे सत्यलक्ष्यवृत्तित्वमतिव्याप्तिः। यथा गोर्यदि श्रृङ्गित्वं लक्षणं क्रियते तदा तत्रातिव्याप्त्या तल्लक्षणं भवितु न शक्नोति। यतो हि श्रृङ्गित्वं लक्ष्ये गवि, अलक्ष्ये महिष्यादौ च वर्ततेऽतः श्रृङ्गित्वं गोर्न लक्षणमतिव्याप्तिदोषग्रस्तत्वाद्। अतिव्याप्तेर्निष्कृष्टं स्वरूपन्तु लक्ष्यतावच्छेदकसामानाधिकरण्ये सति लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यम्। इदमपि लक्षणमतिव्याप्तेर्दोषस्य स्वरूपमात्रमतिव्याप्तस्य लक्षणस्य तु तटस्थं लक्षणम्। तच्च यथात्रैव- लक्ष्या गौः, लक्ष्यतावच्छेदकं गोत्वं, तच्च गोषु विद्यते, तत्रैव गोषु श्रृङ्गित्वमपि वर्ततेऽतः श्रृङ्गित्वं लक्ष्यतावच्छेदकगोत्वसमानाधिकरणं जातम्, लक्ष्यतावच्छेदकगोत्वसामानाधिकरण्यं श्रृङ्गित्वे आगतम्, एवञ्च लक्ष्यतावच्छेदकगोत्वावच्छिन्नप्रतियोगिताको भेदो वर्तते गौर्नेत्याकारको भेदः, तादृशभेदो महिष्यादौ वर्तते तत्र च श्रृङ्गित्वमपीति श्रृङ्गित्वे लक्ष्यतावच्छेदकावच्छिन्नप्रतियोगिताकभेदसामानाधिकरण्यस्य च विद्यमानत्वात् श्रृङ्गित्वमतिव्याप्तमत एव तन्न गोर्लक्षणम्।

**असम्भवः**= लक्ष्यमात्रावृत्तित्वमसम्भवोऽर्थाल्लक्ष्यमात्रे कुत्रापि लक्षणासत्त्वमसम्भवः। यथा गोरेकशफवत्त्वम्, एकशफवत्त्वं हि न कास्वपि गोषु वर्तते, गोमात्रस्य द्विशफवत्त्वेन गवि एकशफवत्त्वमसम्भवम्। असम्भवस्य निष्कृष्टं लक्षणन्तु लक्ष्यतावच्छेदकव्यापकीभूताभावप्रतियोगित्वम्। यथैकशफवत्त्वे लक्ष्या गौः, लक्ष्यतावच्छेदकं गोत्वं तद्व्यापकीभूताभावः एकशफवत्त्वाभावः तत्प्रतियोगित्वस्यैकशफवत्त्वे सत्त्वादेकशफवत्त्वमसम्भवदोषग्रस्तमिति तन्न गोर्लक्षणम्।

**व्याप्यत्वम्**– तदभाववदवृत्तित्वम्, साध्याभाववदवृत्तित्वत्यिर्थः। (अत्र तत्पदेन साध्यो गृह्यते। तदभावाँश्च साध्याभाववान्। तद्वृत्तित्वाभाव एव व्याप्यत्वम्। यथा 'पर्वतो वह्निमान् धूमाद्' इत्यत्र साध्यो वह्निः। तदभाववान् जलह्रदादिस्तत्र वृत्तित्वं मीनादेः, अवृत्तित्वञ्च धूमस्येति धूमो वह्निव्याप्यः।

**व्यापकत्वम्**– तद्वन्निष्ठान्यन्ताभावाप्रतियोगित्वम्। साधनवन्निष्ठान्यन्ताभावाप्रतियोगित्वम्, हेतुवन्निष्ठा–न्यन्ताभावाप्रतियोगित्वमित्यर्थः। अत्र तत्पदेन हेतुर्ग्राह्यः, तद्वान् हेतुमान्, तन्निष्ठात्यन्ताभावस्य यो अप्रतियोगी भवति, तत्राप्रतियोगित्वं तिष्ठति तदेव व्यापकत्वम्। यथा वह्निधूमयोर्वह्निर्व्यापकः। धूमश्च व्याप्यः। तत्र तत्पदेन धूमो गृह्यते। तद्वान् धूमवान् पर्वतादिः, तन्निष्ठात्यन्ताभावो घटादेरत्यन्ताभावस्तस्य प्रतियोगी घटादिरअप्रतियोगित्वं वह्नाविति वह्नौ धूमव्यापकत्वम्।

**प्रतियोगिता**– यस्याभावः स प्रतियोगी, तस्य भावः प्रतियोगिता यथा घटो नास्ति, घटो नेत्यादिस्थलेऽभावो घटाभावस्तस्याऽभावस्य प्रतियोगी घटः, प्रतियोगिता घटे वर्तते, घटनिष्ठा प्रतियोगिता च केनचिद्धर्मेण केनचित्सम्बन्धेन चावच्छिन्ना भवति। यतो हि धर्मान्तरेण सम्बन्धान्तरेण च घटवत्यपि भूतलादावन्यसम्बन्धेनान्यधर्मेण च घटाभावः तिष्ठत्येव। अतो घटनिष्ठां प्रतियोगितां केनचिद्धर्मेण केनचित्सम्बन्धेन चावच्छिन्ना मन्तव्या। अवच्छेदनीयेत्यर्थः। यथा भूतले संयोगेन घटो नास्तीत्युक्तौ घटनिष्ठा प्रतियोगिता घटत्वधर्मेण संयोगसम्बन्धेन चावच्छिन्ना भवति। यतो हि घटनिष्ठायाः प्रतियोगिताया अवच्छेदको धर्मः स एव यो धर्मो घटनिष्ठायाः प्रतियोगिताया अन्यूनानतिप्रसक्तो भवति। तादृशश्च धर्मो घटत्वमेव। तथा सति यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति नियमाद् घटनिष्ठा प्रतियोगिता

घटत्वधर्मावच्छिन्ना जाता। एवमेव येन सम्बन्धेन यत्र यन्नास्तीत्युच्यते स सम्बन्धः तन्निष्ठायाः प्रतियोगिताया अवच्छेदकः सम्बन्ध इति नियमाच्च भूतले यदि संयोगेन घटो नास्तीत्युच्यते तदा घटनिष्ठा प्रतियोगिता घटत्वधर्मावच्छिन्नेति वाच्या। तथा च प्रतियोगित्वानुयोगित्वयोर्निरूप्यनिरूपकतया प्रयोगो भवति- संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगिता निरूपितानुयोगितावदभावो घटाभाव इति। अथवा संयोगसम्बन्धावच्छिन्नघटत्वावच्छिन्नघटनिष्ठप्रतियोगितानिरूपकोऽभावो घटाभावः, अथवा तादृशप्रतियोगिताकाभावो वा घटाभाव इति। यस्याभावः स प्रतियोगीति नियममादाय विचारोऽयं प्रवृत्तः, सम्बन्धविषयको विचारश्चान्यत्र द्रष्टव्यः।

**अनुयोगिता–** यस्याभावः स प्रतियोगी। तस्य प्रतियोगिनोऽभावोऽनुयोगी। यथा घटाभावस्य घटः प्रतियोगी। घटाभावश्चानुयोगीति। सम्बन्धस्थलीयानुयोगित्वविषयको विचारो ग्रन्थान्तरे द्रष्टव्यः।

**कार्यता–** प्रागभावप्रतियोगित्वं कार्यत्वम्। यद्वस्तु प्रागभावस्य प्रतियोगि भवति तद्वस्तु कार्यं कथ्यते। ननु तर्हि प्रागभावस्य प्रतियोगी को भवतीति चेद्, य उत्पद्यते स प्रागभावस्य प्रतियोगी भवति। यथा कपालस्य कार्यं घटः कपाले घटोत्पत्तिपूर्वकाले घटो नासीत्, कुलालस्य कपालविषयककृत्या कपाले घट उत्पद्यतेऽत एव कुलालस्य कपालविषयककृतिकालं यावत् तत्र घटो भविष्यतीति प्रतीतिर्जायते स एव भविष्यतीति प्रतीतिविषयीभूतोऽभावो घटप्रागभावः तस्य प्रतियोगी च घटः (य उत्पद्यते स प्रागभावप्रतियोगीति नियमात्), प्रतियोगित्वं घटे तस्मात् प्रागभावप्रतियोगित्वस्य घटादौ विद्यमानत्वादुत्पद्यमानो घटादिः कार्यम्। तथा च कपालनिष्ठकपालत्वावच्छिन्नकारणतानिरूपितघटत्वावच्छिन्नघटनिष्ठकार्यतावान् घट इति प्रयोगः।

**कारणता–** कार्यनियतपूर्ववृत्त्यनन्यथासिद्धं कारणम्। अर्थादनन्यथासिद्धत्वे सति कार्यनियतपूर्ववृत्तित्वं कारणत्वं तद्वत् कारणम्। यथा घटस्य कारणं दण्डः, दण्डो हि घटनियतपूर्ववृत्तिर्वर्ततेऽनन्यथासिद्धश्चेति दण्डो घटकारणम्। तथा च प्रयोग घटत्वावच्छिन्नघटनिष्ठकार्यतानिरूपितदण्डत्वावच्छिन्नदण्डनिष्ठकारणतावान् दण्डः।

**व्यापारः–** द्रव्यभिन्नत्वे सति तज्जन्यत्वे सति तज्जन्यजनकत्वं व्यापारस्य लक्षणम्। यथा घटरूपकार्यं प्रति व्यापारो दण्डादेर्भ्रमिरूपक्रिया। भ्रमिक्रिया हि कर्मतया द्रव्यभिन्ना वर्तते। एवञ्चात्रोभयत्र तत्पदेन करणं ग्राह्यं, करणञ्चात्र दण्डोऽतो दण्डरूपकरणजन्यत्वं भ्रम्यां वर्तते। तथैव दण्डरूपकरणजन्यघटजनकत्वमपि भ्रम्यां वर्तत इति भ्रमिरूपक्रियायां द्रव्यान्यत्वस्य दण्डरूपकरणजन्यघटजनकत्वस्य च सत्त्वाद् दण्डभ्रमिः घटकार्यं प्रति व्यापारः।

**कर्तृत्वम्-** उपादानगोचरापरोक्षज्ञानचिकीर्षाकृतिमत्त्वम्। कार्यमात्रं प्रति कस्यचन कर्तुरपेक्षा भवति। कर्तारं विना कार्यमात्रस्योत्पत्तिरसम्भवा। स च कर्ता कः? इति चेद् यस्मिन् पुरुषे यत्कार्यस्योपादन( समवायिकारण) विषयकापरोक्ष(प्रत्यक्ष)ज्ञानं, तद्विषयिणी चिकीर्षा,तद्विषयिणी कृतिश्चास्ति स पुरुषः तत्कार्यस्य कर्ता भवति। यथा यो हि घटसमवायिकारणं प्रत्यक्षीकरोति, घटमिच्छति, इषित्वा च घटोत्पत्त्यर्थं यतते स एव घटस्य कर्ता कुलालः। एवञ्च घटः कार्यं तस्य कर्ता च कुलालः, घटे कार्यता, तस्याः कार्यताया अवच्छेदको धर्मो घटत्वं, यतो हि घटनिष्ठायाः कार्यताया अवच्छेदको धर्मो घटनिष्ठकार्यतासमानाधिकरण एव भवति। समानाधिकरणधर्मयोरेवावच्छेद्यावच्छेदकभाव इति नियमाद्। ननु घटनिष्ठायाः कार्यताया

अवच्छेदकस्तादृशकार्यतासमानाधिकरणघटवृत्तिघटत्वभिन्नः कश्चन तद्घटत्वपृथिवीत्वद्रव्यत्वादिष्वन्यतमो धर्मो भवेदिति चेन्न, अन्यूनानतिप्रसक्तधर्मस्यैवावच्छेदकतया घटनिष्ठकार्यताया अन्यूनानतिप्रसक्तो धर्मो घटत्वमेवेति स एव धर्मोऽवच्छेदको घटनिष्ठकार्यतायाः, एवञ्च यो धर्मो यस्यावच्छेदकः स तद्धर्मावच्छिन्न इति नियमाद् घटनिष्ठकार्यता घटत्वधर्मावच्छिन्ना, एवमेव कुलालः कर्ता चेत् कुलाले कर्तृता, कुलालनिष्ठा कर्तृता पूर्वोक्तप्रकारेण कुलालत्वधर्मावच्छिन्ना, एवञ्च कार्यत्वकर्तृत्वयोर्निरूप्यनिरूपकतया, घटत्वावच्छिन्नघटनिष्ठकार्यतानिरूपितकुलालत्वावच्छिन्ना कुलालनिष्ठा कर्तृता जाता। तथा च घटत्वावच्छिन्नघटनिष्ठकार्यतानिरूपितकुलालत्वावच्छिन्नकुलालनिष्ठा कर्तृता तद्वान् कुलालो घटस्य कर्ता। इति प्रयोगः।

**पदानामर्थपरिचयः–**

पारिभाषिकं पदम् = परिभाषयार्थबोधकं पदम्

पल्लवनम् = विस्तारः।

प्रणेता = आरम्भकर्ता।

उद्देशः = नाममात्रेण वस्तुसङ्कीर्त्तनम्।

लक्षणम् = असाधारणो धर्मः।

परीक्षा = लक्षितस्य लक्षणं सम्भवति न वेति विचारः।

वैशिष्ट्यम् = सम्बन्धः।

सरणी = पन्थाः।

प्रथिता = प्रसिद्धा।

जृम्भिता = आरब्धा, वर्द्धिता, प्रसारिता।

कणभुक् = कणादः।

व्यालोडिताः = विवेचिताः।

समानतन्त्रत्वम् = समानशास्त्रत्वम्।

फलवत् = अर्थवत्, सार्थकम्।

पुञ्जः = समूहः

## अभ्यासः

### १. टिप्पण्यात्मकमुत्तरं देयम्

(क) लक्षणस्य लक्षणं विलिख्य कुत्रचिल्लक्ष्ये समन्वयं कुरुत ।

(ख) कार्यत्वलक्षणं विलिख्य तस्यैकमुदाहरणं प्रस्तुत ।

(ग) सोदोहरणमतिव्याप्तिलक्षणं प्रतिपादयत ।

(घ) उदाहरणसहितं व्याप्यत्वं व्यापकत्वञ्च स्पष्टीकुरुत ।

(ङ) कार्यकारणभावमादायैकं शाब्दबोधस्वरूपं प्रदर्शयत ।

(च) प्रतियोगितां परिचायत ।

(छ) अवच्छेदकत्वं परिचाय्यैकमुदाहरणं प्रस्तुत ।

### २. अतिसङ्क्षिप्तमुत्तरं देयम्

(क) किन्नाम कर्तृत्वम् ?

(ख) कार्यत्वन्नाम किम् ?

(ग) व्यापकत्वं किम् ?

(घ) व्याप्यत्वन्नाम किम् ?

(ङ) अव्याप्तिः का ?

(च) असम्भवस्यैकमुदाहरणं प्रस्तुत ।